तार्किकचूडामणिश्रीमल्लवादिक्षमाश्रमणविरचितम्

द्वादशारनयचक्रम्

श्री सिंहसूरगणिवादि क्षमाश्रवण विरचित
न्यायागमानुसारिणी व्याख्यातः

समुध्धृतं
संपूर्ण मूलमात्रम्



समुद्धारकर्ता
आचार्यश्री विजयलब्धिसूरीश्वरः

DVADASARANAYACHAKRAM

Of

SRI MALLAVADI SURI

Restored
From the Commentary
NYAYAGAMANUSARINI

by

SRI VIJAYALABDHI SURISVARJI

*****

(प्रत-५००)
-संपूर्ण प्रकाशन लाभार्थी-
श्री शांतिनगर श्वेताम्बर मूर्तिपुजक जैन संघ
(अमदावाद)
श्री लब्धि स्वर्गारोहण अर्धशताब्दि वर्षे
२०१०

कर्कशतार्किकचक्रचक्रवर्ति

श्रीमन्मल्लवादिसूरिविरचितम्

द्वादशारनयचक्रम्

उद्धारकाः

श्रीमद् विजयलब्धिसूरिणः

स्वर्गारोहण अर्धशताब्दि समिति

अमदावाद

२०१०

।। प्रस्तावना ।।

જે હસ્તલેખિત પ્રતની સ્વયં ઉપાધ્યાય યશોવિજય મ. કરી હોય તે લેખિતપ્રત કેટલી મહત્ત્વપૂર્ણ હોય તે સમજી જ શકાય છે. પણ પ્રશ્ન એ જ ઉદ્‌ભવે છે કે તે મહાત્માએ કેમ આ ગ્રંથ વિષે કંઈપણ પ્રકાશ ન પાથર્યો ? છદ્મસ્થના જ્ઞાનોમાં નિશ્ચિતતા કયાંથી આવે ? કોઈ એવું સમાધાન કરે છે કે પૂજયશ્રીને આ ગંથ આયુષ્યના અંત ભાગમાં મળ્યો હોય ત્યારબાદ આ અંગે કાર્ય કરવાનો અવસર ન મળ્યો હોય.

પણ આ કાર્યમાં એક જટિલતા હતી જ. આ ગ્રંથ જે પ્રતરૂપ ઉપલબ્ધ છે તેતો ન્યાયાગમાનુસારી સિંહવાદીગણિનું વિવરણ છે. આ અંગે એમ પણ કહેવાયું છે કે સિંહવાદીગણિએ પણ આ વિવેચન ભાષ્ય પર કર્યું છે. પ્રશ્ન એ થાય છે કે આ ભાષ્ય કોના પર છે ? અને એના કર્તા કોણ છે ? ભાષ્યના કર્તા તો પ્રખરવાદિ મલ્લવાદિસૂરિ છે. પણ તેઓની પાસેનો મૂળ ગ્રંથ કયો ? અવગાહનથી લાગે છે કે માત્ર એક જ ગાથા આ મૂળનયનચક્ર છે.

આ ગાથા નીચે પ્રમાણે છે:

विधि नियम भंगवृत्ति-व्यतिरिक्तत्वाद् अनर्थक वचोवत् ।
जैनाद् अन्यत् शासनम् - अनृतम् भवतीति वैधर्म्यम् ।।

આ ગાથા નીચે પ્રમાણેના અનુમાનને બતાવે છે.

जैनात् अन्यत् शासनम् - अनृतम्
↑ अनृतत्वम्
पक्ष - साध्य

विधि नियम भंगवृत्ति व्यतिरिक्तत्वाद्
↑
हेतु

આ ગાથા નીચે પ્રમાણેના અનુમાનને બતાવે છે.

यत् यत् विधिनियमभंगवृत्ति व्यतिरिक्तत्वा भाववत् तद् तद् जैन शासनम्

આ વૈધર્મ્ય દૃષ્ટાંત માટે જો એવો તર્ક કરવામાં આવે કે આ તો એક જ

દૃષ્ટાંત છે. દૃષ્ટાંત અનેક હોવા જોઇએ. આ વાતને માન્ય કરીએ તો એવો પણ તર્ક કરી શકાય છે કે કેટલાક પદાર્થો અને તર્કો અન્ય શાસનમાં પણ વિધિ નિયમ ભંગથી વ્યતિરિક્ત નથી. તો તે તે વચનો જૈન વચનો જ છે. આમ આવા અનેક દૃષ્ટાંતો પણ આપણને મળી શકે છે.

બીજું સિંહવાદિગણિ ક્ષમાશ્રમણ કહી રહ્યા છે કે :

शासनस्तव तत् वक्ष्यमाण वस्तूप - संहारार्थं आद्यं वृत्तमाह

આમ કહીને,

व्यापी एकस्थम्-अनन्तम् अन्तवद् अपि न्यस्तं धियां पाटवे
व्यामोहे तु जगत् प्रतान विसृति - व्यत्यास धीरा स्पदम्
वाचां भागम् अतीत्य वाग्विनियतं गम्यं न गम्यं क्वचित्
शेष न्यग् भवनेन शासनम् अलं जैनं जयति उर्जितम्

જો આમ અવતરિણિકામાં 'आद्यं वृत्तम् आह' એવો પાઠ હોય તો આ ભાષ્યની આદિનો પહેલો શ્લોક છે એમ સમજાય. પણ 'आद्यं वृतम् आह' જો પાઠ વંચાય તો આ ભાષ્ય અનેક શ્લોક રૂપ પણ હોવાની સંભાવના પણ કરી શકાય. ગમે તે હોય પણ આવા પાઠ ભેદોથી અનેક અર્થોની સંભાવના થઇ શકે છે. તેથી પૂ. આ. દેવ લબ્ધિસૂરીશ્વરજી મ. સા. પોતાના આ ગ્રંથનું સંપાદન કરતાં, નયનચક્ર ગ્રંથના પહેલા જ વિભાગની પ્રસ્તાવનામાં લખ્યું છે કે :

'नयनचक्रो ही अयं अतीव गंभीरार्थो दुरुहश्च । अतः प्रतिभाशालिनाम् अपि क्वचित् क्वचित् दुरवगाहता सम्भाव्यते । तस्मात् मदीयसंशोधनादि कर्मणि अपि अस्मिन् नूनं विषयस्य दुरुहत्वात् आलंबनान्तराभावात् स्वमतिमान्द्यात् च स्खलितानि भवेयुः । तथापि तानि नयव्रजपरिकर्मितमतिप्रवराः स्वयं संशोध्य श्री मल्लवादि सूरिणाम् अभिप्रायं विदित्वा यदि सन्तुष्टा भविष्यन्ति तदा स्वपरिश्रमं सफलं मंस्ये ॥'

આમ તેઓએ ન્યાયાગમ અનુસારિણી ટીકામાંથી જે મૂળ ભાષ્યને તારવવાની વાત કરી છે તેમાં ત્રણ વિઘ્નો બતાવ્યા છે.

(૧) વિષય અતિ કઠીન છે.
(૨) બીજા આલંબનો નથી અર્થાત્ બીજા વિશુધ્ધ પ્રતીઓ નથી કે કોઇએ મૂળ ભાષ્યને જૂદુ તારવ્યું નથી.
(૩) અને પોતે પ્રકાંડ વિદ્વાન હોવા છતાંય પોતાની મતિ મંદતાને સ્વીકારે છે. આમાં એક કારણ પોતાની વૃદ્ધાવસ્થા પણ તેમણે કલ્પી હોય અને હાથમાં બહુવાર પુસ્તક રાખી શકવાની અશકિત ને પણ કારણ માન્યું હોય.

તેમ છતાં તેઓ જ કહે છે કે વિદ્વાનો હજી પણ મૂળ ભાષ્યને ટીકામાંથી તારવવા પ્રયત્ન કરે અને પદાર્થોને પણ સ્પષ્ટ કરે.જો કે પોતે આ ન્યાયાગમઅનુસારિણી ટીકા પર વિષમ પદ વિવેચના લખી જ છે. છતાંય પૂજયશ્રીનો મલ્લવાદીસૂરિના ભાવો વધુને વધુ સ્પષ્ટ થાય તેવો મનોરથ ખૂબજ સ્તુત્ય રીતે આગળ વધેલો છે.

અહીં મારો પ્રયત્ન માત્ર પૂજયશ્રીએ જે મૂળભાષ્ય ટીકામાંથી ઉધ્ધૃત કર્યું છે તેનું સંકલન મૂળ પાઠ રૂપે કરી જિજ્ઞાસુ અને બુદ્ધિમાન સાધુઓના હાથમાં પહોંચાડવાનું છે.

આ ગ્રંથ સૌથી પહેલા ગાયકવાડ સરકાર તરફથી છપાયેલો હતો. પણ તેમાં શુદ્ધિનો ખાસ પ્રયાસ જ હતો નહીં. તેથી તેનું મૂલ્ય હતું જ નહીં. તે જ કારણથી પૂજયશ્રીએ આ ગ્રંથ ઉપેક્ષિત ન રહી જાય તેવી ભાવનાથી પોતાની પાછલી અવસ્થામાં પણ આ કાર્ય કર્યું.

પૂજયશ્રીની શુભનિશ્રામાં ઇ.સં. ૧૯૬૦માં મુંબઇ દાદરમાં દ્વાદશારનયચક્ર ગ્રંથનું ઉદ્ઘાટન તે સમયના ભારતના ઉપરાષ્ટ્રપતિ ડૉ. સર્વપલ્લી રાધાકૃષ્ણન્ના શુભહસ્તે થયેલ. અનેક ગણમાન્ય વિદ્વાનો અને મહાનુભાવો ઉપસ્થિત હતાં. પૂજયશ્રીને ૧૦૪ ડીગ્રી તાવ હતો છતાં પ્રાંજલ સંસ્કૃતભાષામાં પ્રવચન કરેલ. સમસ્ત જનતા આનંદ વિભોર બનેલ.

આ ગ્રંથ પર પૂ. મુનિરાજ જંબુવિજયજી મહારાજે ખૂબજ પરિશ્રમ કર્યો છે. છતાંય આ કાર્યને તેની અંતિમતા માની લેવાની જરૂર નથી. હજી પણ નવા નવા વિદ્વાનો પાકે અને આ ગ્રંથ પર સંશોધન કરે

અને આ ગ્રંથના પદાર્થોને વિશદરૂપે સ્પષ્ટ કરે તે જરૂરી છે.

સાત કે આઠ નયોની વિચારણામાંથી ૧૨ ભંગો નયો સુધી મલ્લવાદિસૂરિ પહોંચ્યા છે. આ વિલક્ષણ શૈલી વિકસાવવાની પૂજયશ્રીની આગવી પ્રતિભા દાદ માંગી લે છે. અને આખરે નયોને ચક્રગતિ આપીને નયોની સંખ્યાતીતાને બારનયોમાં સારભૂતરૂપે પેશ કરે છે.

સંક્ષેપમાં કહીએ તો દરેક વિધાનના પ્રતિવિધાન હોય છે. પણ જો વિધાનો એકાંત હોય તો તેને એકાંત પ્રતિ વિધાનથી દૂર કરી શકાય છે. અને છેવટે દરેક વિધાનોમાંથી એકાંત કાઢી નાંખીને વિધાનોને વિશુદ્ધ કરી શકાય છે. અને અનેકાંતરૂપ નયચક્રને શાસન ચક્રવર્તી તીર્થંકરોના ચક્રને ત્રણ જગતમાં વિજયી બનાવી શકાય છે.

પ્રસ્તુત પુસ્તક અમારા શિષ્ય આચાર્ય શ્રી રત્નયશસૂરિના શાંતિનગરના સફળ ચાતુર્માસની સ્મૃતિરૂપે છપાઇ રહ્યું છે. જેનો લાભ શ્રી શાંતિનગર શ્વે. મૂર્તિપૂજક જૈન સંઘના જ્ઞાનખાતામાંથી લેવામાં આવ્યો છે. આ સંઘના તમામ ટ્રસ્ટીઓને પણ ધન્યવાદ છે. શાંતિનગરના સમસ્ત ટ્રસ્ટીગણ લબ્ધિસૂરિદાદાના અનુરાગી છે અને આ ગ્રંથના ગૌરવથી પરિચિત છે.

એક સુભગ અને સુંદર યોગ એવો છે કે આ પુસ્તકનું પ્રકાશન લબ્ધિ સ્વર્ગારોહણ સુવર્ણ જયંતિના પ્રસંગે થઇ રહ્યું છે. અને ઉદ્‌ઘાટન પણ પૂ. ગુરૂદેવ વિક્રમ સૂ. મ. ની સ્વર્ગારોહણના રજત જયંતિના મહોત્સવ પ્રસંગે થઇ રહ્યું છે.

અંતમાં આ પુસ્તકના પઠનથી જ્ઞાન પ્રવૃત્તિ વધે; જ્ઞાન પ્રવૃત્તિથી ચારિત્ર પરિણતિ વધે અને સહુ આત્માથી પરમાત્મા બને એજ પ્રાર્થના.

-લે. પૂ. આ. દેવ રાજયશસૂરીશ્વરજી મ. સા.
સંસ્કૃતિ ભવન
અમદાવાદ-૧૩

श्रीमन्मल्लवादिसूरिविरचितम्

द्वादशारनयचक्रम्

विषयसूची

अराः		पृष्ठसङ्ख्या
	आशिषः	
	प्रास्ताविकम्	
१.	विधिः	१
२.	विधिविधिः	५०
३.	विध्युभयम्	१०८
४.	विधिनियमः	१४५
५.	उभयम्	१६४
६.	विधिनियमविधिः	१८४
७.	विधिनियमोभयम्	१९९
८.	उभयनियमम्	२३७
९.	नियमभङ्गः	३३४
१०.	नियमविधिनयः	३४८
११.	नियमोभयम्	३६१
१२.	नियमनियमम्	३६७
	द्वादशारान्तरम्	३९०
	तुम्बनिरूपणम्	३९८
	अनुबन्धाः	४०६

कर्कशतार्किकचक्रचक्रवर्ति
श्रीमन्मल्लवादिसूरिविरचितम्

द्वादशारनयचक्रम्

प्रथमः विधिभङ्गारः

व्याप्येकस्थमनन्तमन्तवदपि न्यस्तं धियां पाटवे
व्यामोहे तु जगत्प्रतानविसृतिव्यत्यासधीरास्पदम् ।
वाचां भागमतीत्य वाग्विनियतं गम्यं न गम्यं क्वचित्
शेषन्यग्भवनेन शासनमलं जैनं जयत्यूर्जितम् ॥ १ ॥

यदेवंविधं तत्र किमाश्चर्यं जयत्यूर्जितश्चेति, किंतर्हि? एवंविधतैव तु प्रतिपादनीया, किमेवं प्रतिपाद्यमस्ति? प्रतिपादितमेव तत्, द्रव्यार्थपर्यायार्थद्वित्वम् । तदुपष्टम्भविधिभेदपदार्थानामेकवाक्यविधिविधानात् अवबोधसमुद्रावयवीभूतं शासनं दुरवगाहमेवंविधमेव । तद्व्यतिरिक्तशासनिवचनानि प्रत्यक्षानुमान-

विनिश्चेयपदार्थानां विपर्ययप्रणयनेन विसंवादीनि, विपर्ययप्रणयनञ्च रूपादय एव घटो घट एव रूपादयो रूपादयश्च घटश्च, न रूपादयो न घट इति वा, अश्रावणशब्दवादिवचनवदाशङ्कामपि सत्यत्वेन जनयितुमलम्।

अपि च लौकिकव्यवहारोऽपि नित्यानित्यावक्तव्याद्यनेकान्तवस्तुविषय एव, तदपह्नवप्रवृत्तशेषशासनेषु साध्विदमिति विचारो व्यामोहोपनिबन्धनमिति शेषशासनविसंवदनजनितास्थं प्रमाणद्वयसंसिद्धिसम्पादितप्रत्ययं तत एव च प्रतिष्ठापितात्यन्तपरोक्षार्थश्रद्धानं शासनमूर्जितं जयतीति प्रत्याम्नायते॥

अस्य चार्थस्य पूर्वमहोदधिसमुत्थितनयप्राभृततरङ्गागमप्रभ्रष्टश्लिष्टार्थकणिकामात्रस्य प्रतिपादकस्य नयचक्रस्य शास्त्रस्य सङ्क्षिप्तार्थं गाथासूत्रम् —

विधिनियमभङ्गवृत्तिव्यतिरिक्तत्वादनर्थकवचोवत्।
जैनादन्यच्छासनमनृतं भवतीति वैधर्म्यम् ॥ २॥

विधिः आचारः, स्थितिः, क्रमो, न्याय इत्यादि। नियमो विशेषो, व्याप्य इत्यादि। तयोर्भङ्गाः। १. विधिः, २. विधिविधिः, ३. विध्युभयम्, ४. विधिनियमः, ५. उभयं, ६. उभयविधिः, ७. उभयोभयम्, ८. उभयनियमः, ९. नियमः, १०. नियमविधिः, ११. नियमोभयम्, १२. नियमनियमः इति।

तेषां विधिनियमभङ्गानां वृत्तिर्जैनसत्यत्वसाधनवृत्ता तु वृत्तिर्द्वादशविकल्पविशेषणा। अन्यथा प्रत्येकं स्वरूपानवधारणाद-वृत्तित्वमेव वक्ष्यमाणवत्।

तत्र विधिवृत्तिस्तावत् यथालोकग्राहमेव वस्तु, परीक्ष-काभिमानिनां तु तीर्थ्यानां स्वपरविषयतायां सामान्यविशेषयोर-नुपपत्तेर्लोकाभिप्रायोऽविवेकयत्नः शास्त्रेष्विति।

सामान्यविशेषौ हि स्वविषयौ परविषयौ वा स्याताम्? स्वस्यात्मनि वर्त्तेत? परस्य वाऽऽत्मनि? तत्राद्यं तावदेकस्य सर्वत्वात्सर्वस्य चैकत्वात् स्वविषयं घटस्याऽऽत्मनि वर्तते यद्येवं सामान्यविरोधः।

यदि सामान्यं तत आत्मा न भवति, अनेकार्थ-विषयत्वात्सामान्यस्य। यद्यात्मा ततोऽपि न सामान्यम्, एकत्वा-दात्मनः, सेनाहस्तिनोरिव।

अथोच्येत स्यादेव विरोधो यद्यात्मनः सामान्यमिति भेदेन स्वत्वमभ्युपगम्येत। इहत्वात्मैव सामान्यम्, किं तत्? घटादेः सत्त्वादिरात्मा। स हि तत्समुदायकार्यत्वात्सामान्यम्, यथोक्तम्-"आध्यात्मिकाः कार्यात्मका भेदाः शब्दस्पर्शरसरूपगन्धाः पञ्च त्रयाणां सुखदुःखमोहानां सन्निवेशमात्रम्, कस्मात्? पञ्चानां पञ्चानामेककार्यभावात्। सुखानां शब्दस्पर्शरसरूपगन्धानां प्रसादलाघवाभिष्वङ्गोद्धर्षप्रीतयः कार्यम्, दुःखानां शोषतापभे-

दस्तम्भोद्वेगापद्वेगाः, मूढानामावरणसादनापध्वंसनवैभत्स्यदैन्यगौरवाणीति । तथा कारणात्मकाः श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाग्घस्तपादपायूपस्थमनांस्येकादश नारकतैर्यग्योनमानुष्यदैवानि बाह्याश्च भेदाः सत्त्वरजस्तमसां कार्यसमन्वयदर्शनादि''ति । एवं पृथिव्यादि गवादि घटादि।

अत्र ब्रूमः । एवं सत्यात्मभेदः तत्कथमिति चेदुच्यते सुखं सुखञ्च सुखादिसमुदयश्च — सत्त्वं सुखं, रजो दुःखं, तमो मोहस्तत्त्रयमैकात्म्यापन्नमेकमेवेति । एवं शेषावपि । ततश्च त्रिगुणविपरिणामकारणकल्पनावैयर्थ्यम् ।

नित्यमेव त्र्यात्मकमिति चेत्? तथापि तु सुतरां तथा एकत्वनित्यत्वात् प्रकाशप्रवृत्तिनियमकार्यभेदाभावादनारम्भः, वैषम्यनिर्मूलता च, उभयस्य चाभावः ।

अन्यतराव्यवस्थानेऽन्यतरस्याव्यवस्थानात्, यथा च प्रधानावस्थायां सदा त्रिगुणैकत्वाद्विरुद्धधर्माविष्येते त्रित्वैकत्वाद्यात्मस्वतत्त्वातिक्रमेणाव्यतिरिक्तत्रिगुणैकरूपता चेष्यते एवमेव शब्दादौ, तन्मयत्वात्ततश्च सर्वस्यावस्थानाद्यदृच्छामात्रत्वान्न प्रधानमहदहङ्कारादिकारणकार्यनैयम्यम्, ततश्चाङ्गीकृतपुरुषार्थयत्नार्थहानिः प्रधानपुरुषसंयोगत्रित्वपरिज्ञानार्थशास्त्रयत्नहानिरपि ॥

सामान्यविशेषयोश्च सम्बन्धित्वादाद्यन्तवत्पितापुत्रवद्वा एकतराभ्युपगमे विशेषपक्षापत्तिरपि ॥

परविषयतायामप्यसमानावस्थानादसामान्यम्, लौकिकै-र्द्रव्यादीनामनवधृतैकतरकारणत्वात् ।

द्रव्यं तावत् सर्वतन्त्रसिद्धान्ते 'द्रव्यञ्च भव्ये'[1] इत्युक्तत्वात् युगपदयुगपद्भेदभाविमृद्भवनपरमार्थरूपादिशिवकादिवृत्ति द्रव्यमपि भवनलक्षणं व्यापि ।

क्षेत्रमपि 'क्षि निवासगत्यो'[2]रिति सर्वगतिनिवासवृत्ति-स्वतत्त्वमेकैकभावार्थं सङ्घातसमवस्थानात्मव्यापि विपरिणामस्य भावविस्पन्दितस्य ।

कालोऽपि परिणामवती क्रियैव वर्त्तनालक्षणो वा द्रव्यात्मा । स च युगपदयुगपत्कालस्वतत्त्वभूतपदार्थनिरूपितवृत्तिः, अनेक-प्रभेदोपवर्ण्यास्तिकाया यत्र यत्र युगपद्वर्त्तन्ते स तत्र युगपद्वृत्तिः कालः, यत्र चादानधारणपाचननिसर्जननिर्वृत्तिवृत्तिष्वयुगपद्वृत्तिः स कालः ।

द्रव्याद्यपि तु युगपदयुगपद्वृत्तिभावा एवेत्युक्तवदेव, तथा-भवनात्तेषाम्, अन्यथा वन्ध्यादिपुत्रवदभावत्वापत्तेः, नेष्यते च तेषामभावत्वं भावत्वमेवैषाम्, भावश्च भवनसम्बन्धी घटादिवत् । भावोऽपि सर्ववस्तुतत्त्वव्यापी ।

अत एतानि घटादिवस्त्वात्मसामान्यपक्षग्राहिणाऽपि त्वयाऽवश्यापेक्ष्याणि प्रत्यक्षादेव तथात्मत्वात्, दृश्यते एव हि

१. पाणिनि ५.३.१०४ २. धातुपाठः १४०७

द्रव्याद्येकरूपभवनसामान्यता, उक्तविधिना, किमु परविषयमुख्य-सामान्यवादिना।

द्रव्यादीनां परस्परभिन्नानां समानभवनान्मुख्यं सामान्यं लौकिकं, न तु सादृश्यानुप्रवृत्ति व्यावृत्त्यादि मुख्यम्, सामान्य-लक्षणस्यादृष्टत्वात्, प्रत्यक्षत एव तथा तथा परविषयस्य समानस्य भवनात् सर्वतन्त्रसिद्धान्तेन निरुक्तत्वाच्च परेण समानेन भूयते समानभावः सामान्यं यद्भवन्ति सर्वभावाः स तेषां भाव इति।

तथा च ते सर्वस्यास्य जगतो द्रव्यदेशकालभावापेक्षया तेन तेन प्रकारेण विशेषणैकता, द्रव्यं क्षेत्रेण कालेन भावेन विशेष्यते द्रव्येण क्षेत्रमितरौ च, एवं तैस्तदभूत् परस्परतश्च ते। यथा-ङ्गुलिर्वक्रप्रगुणताद्ययुगपद्भाविभावैरूपादियुगपद्भाविभावैर्देशेन द्रव्यान्तरैश्च विशेष्यते तथैकमपि वस्तु न केनचिन्नाभिसम्बद्धयते तथा तथा विशेष्यते च तद्भेदत्वसम्बन्धत्वाभ्याम्।

तत्रान्यस्य कस्यचिदपोह्यस्य सदृशस्य तत्तत्त्वस्य वा समानस्याभावात् सामान्यानुपपत्तिः।

स्यान्मतं परस्परविशिष्टैकत्वादेव तत्समुदायः परविषय-सामान्यमिति तदयुक्तम्, उदितदोषानुबद्धैकसर्वत्वात् स्वविषय-सामान्यापत्तेर्वा।

तथा सङ्घातसमवस्थानभेदाद्वा घटपटवदत्यन्तभेद एव सर्वार्थानाम्, तथाहि किं परमाण्वादीनां घटो भवति? घटस्य वा कपालानि? इति कः सम्बन्धः।

अनवस्थाने वा नित्यप्रवृत्तत्वात् सर्वार्थानां समयमपि तथा समवस्थानं नास्ति यथा समानता निरूप्येत।

अथान्तरेण रूपप्राप्तिं नोक्तिप्रत्ययौ दण्डिवदिति व्यक्तिभिन्नाऽर्थसिद्धिरिष्यते, तन्न। अन्यतोऽपि तयोः सिद्धेः। तौ हि कस्मिंश्चिदेवाऽऽकारादिमात्रे, अन्यथाऽऽकाशादिषु विनाऽनुवृत्त्या कुतोऽभिधानप्रत्ययौ? दृश्येते चात्रापि तौ, तस्मान्नास्ति सामान्यम्।

किञ्चान्यत् सामयिकत्वाच्छब्दार्थप्रत्ययस्य तौ लोकवृद्धव्यवहारात्मकौ लोकवृद्धव्यवहारं दृष्ट्वा बालानामभिधानप्रत्ययौ भवतः, न तत्त्वानुवृत्तिव्यावृत्तिकृतौ, लोकस्य तत्तत्त्वाद्यज्ञानात्।

तथा ह्यन्यतरेण तत्त्वं द्रव्यं समवायश्चाद्रव्ये आकाशादावनेकद्रव्ये आ अन्त्यावयविद्रव्यात् कुड्यलिखिते क्रीडनके चोक्तिप्रत्ययौ दृष्टौ, न भवेदेतत् तत्त्वमात्रेऽपि त्वाकारमात्रे।

तौ च तत्र तत्त्वस्योपनिलयनात् कृताविति चेत्तत्र तत्त्वाभाव उक्तः, सत्यपि च तत्त्वेऽस्मदिष्टाकारमात्रत उक्तिप्रत्ययौ चोक्तौ, अथाप्याभासमात्रे तत्त्वोपनिलयनमिष्यते त्वया ततः स्थाणुमृगतृष्णिकयोर्नरसलिलत्वप्रसङ्गः, तत्र तदभिधानप्रत्ययसद्भावात्, तत्तत्त्वोपनिलयनाच्च, घटत्वोपनिलयनाद्घटवत्, अनुपनिपाते नरसलिलोक्तिप्रत्ययौ मा भूताम्, तौ च दृष्टौ कथमगृहीतविशेषणत्वान्नरत्वसलिलत्वानुपनिपातेन युक्तौ, तत्रोपचारलभ्यौ हि तौ, इह तु

लोकनये विनोपचारेण लभ्यौ, कथमिति चेत्? अनुपचरितकिञ्चिद्भूताकारात्तु किञ्चिदुक्तिप्रत्ययौ स्याताम्, आकारस्यासम्पूर्णस्य दृष्टत्वादेव, भवत्पक्षे पुनर्नहि तत्त्वं किञ्चिन्निलीनं किञ्चिच्चानिलीनमित्यस्तीति।

तथा विशेषोऽपि, तत्र यदि स्वविषयो विशेषविरोधः, यदि विशेषस्तत आत्मा न भवत्यन्यत्वाद्विशेषस्य, यदि घटादावात्मनि विशेषो वर्त्तते स्वविषयः तत आत्मनोऽन्यत्वाद्विशेषस्य रूपादेर्देशतो विशिष्यमाणस्य गुणतः कालतो वा प्रतिक्षणान्यान्योत्पत्ति विनंष्टृषु पुरुषादिषु कस्तदात्मा, अन्यथा घटादौ सामान्यापत्तेः तत्र चोक्ता दोषाः।

अथाऽऽत्मा स विशेषस्ततो विशेषो न भवत्येकत्वादात्मनः।

नैकत्वान्यत्वविरोधदोषौ, आत्मैव विशेष इत्यनपादानादिप्रतिज्ञानादित्यत्रोच्यते प्रथमविकल्प आयातो विशेषस्य विरोध इत्यात्मनोऽन्यथाभवनादनात्मत्वमिति घटरूपादिपूर्वोत्तराणामभावस्तथा चोभयाभावः।

एतदनिष्टतायान्तु परापेक्षपक्षापत्तिर्वा, तथापि द्रव्यभेदः प्रसक्तः परापेक्षत्वाद्विशेषस्य।

पटाद्यवृत्त्यात्मक एव घटः पटाद्यपेक्षत इति चेत् का हि वृत्तिसहायकादृते सिद्धवृत्तेः पटाद्यपेक्षा, प्रयोजनाभावात्, तथाऽऽत्मैवास्य भिद्येत, सहायापेक्षवृत्तित्वात्, शिबिकोद्वाहाऽऽत्मवृत्तिवत्।

समानजातित्वादपेक्ष्यते घटेन पटः, सा पार्थिवत्वम्, घटात्मत्वाच्च विशेषः पटादेरिति चेद्विजातीयात्तर्हि विशेषाभाव उदकादेः, द्रव्यापेक्षा तत्रापीति चेद्विजातीयाभ्यां गुणकर्मभ्याम-विशेषः, तत्रापि सत्तापेक्षेति चेद्विजातीयात्तर्ह्यत्यन्तासतः सतः, जातेरिवाजातेः।

कार्याद्धा कथमिति भावाभावयोरविशेषः, एवं सत्त्वमेवा-भावस्य भाववदसत्त्वमेव भावस्याभाववत् तथापि चोभयाभावः।

पार्थिवत्वादितुल्यत्वाच्च तद्वत्तदात्मत्वम्, पार्थिवत्वात्म-घटत्ववद्वा, तत्तत्त्वेनापेक्ष्यत्वादिति विवेकयत्नार्थहानिस्ततश्चा-विशेषः।

अयं विशेष एव न भवत्यापेक्षिकत्वात् सामान्यविशेषाणां द्रव्यत्वादीनामौपचारिकत्वाच्च मुख्योऽन्त्य एव विशेष इत्यत्रोच्यते, अन्त्येऽपि तत्तद्व्यादिप्रभेदगतिग्राह्यत्वात्।

द्रव्या दिव्यतिरेकेण प्रत्यक्षानुमानाभ्यामग्राह्यत्वात् तत्सरूपे-णैव ग्राह्यत्वाच्च, अन्यथा विषयनिरपेक्षत्वाद्योगिनाम-ज्ञानप्रसङ्गो मिथ्याज्ञानप्रसङ्गो वेति स्थितं न स्वविषयो विशेषः।

परविषयतायान्तु विशेषस्यानवस्थानादविशेषः। यथा च प्राक् असमानावस्थानात् असामान्यमिति प्रक्रम्य सामान्याभावः प्रतिपादितस्तथेहापि तद्विपर्ययेण तदेव प्रकरणं योज्यम्।

द्रव्यादिप्रत्यपेक्षया सर्वस्यास्य सम्बद्धत्वादेकैकस्य निरवशेषमिदं जगद्विशेषणमिति पूर्ववदेव स्यादेकघटसंहतनानावस्थगुणवत्।

तत्र सर्वार्थानां नित्यप्रवृत्तत्वात् समयमपि नास्ति तेषां समवस्थानं यदाश्रयो विशेषोऽवस्थाप्येत आत्तवदिति समवस्थानाभावान्निराश्रयः खपुष्पवन्नास्ति विशेषः।

स्यान्मतं सम्बन्धदेशो न दूष्यते, उपेक्ष्यत इत्यत्रोच्यते सम्बन्धदेशोपेक्षायामुपान्त्यत्यागोऽकस्मात् सामान्याभ्युपगमात् तुल्यत्वात् सामान्यस्य।

रूपादिभेदसम्बन्ध एव विशेष उच्यते, तन्न, अन्यासम्बन्धेऽरूपादित्वात्तेषाम्, सर्वे सर्वत्र सर्वदा सर्वथा द्रव्यक्षेत्रकालभावाविभागसम्बद्धरसा एव हि रूपादयः, शुद्धानां क्वचिदप्यभावात्।

लोके दृष्टो ननु च वायौ शुद्ध एव स्पर्शः, उच्यते तत्रापि हि क्षेत्रादिद्रव्यस्य रूपादयो न गृह्यन्ते, अनभिव्यक्तिसौक्ष्म्यात् वैधर्म्येण द्रव्यादिवत्, चक्षुरादीन्द्रियग्राह्यपरिणत्यभावाद्धेत्वनुमेयता भावात्, वातायनरेणुस्पर्शरसगन्धादिवन्न गृह्यन्ते।

अथोच्येत यद्येककालसहावस्थानादर्थानां विशेषो भविष्यति, अवतिष्ठते हि किञ्चित्कञ्चित्कालम्, यथा पूर्वापरस्थितघटपटाविति, एवमपि तथाभूतसामान्याभ्युपगमादविशेषत्वमेव।

प्रागुक्तविधिना सर्वसामानाधिकरण्याच्च विशेषस्वतत्त्वस्यैक-विकारेऽपि सर्वस्याशेषस्यापि, अन्यथा त्वविकारो जायेत तन्मात्रेऽन्यत्वाद्वन्ध्यानाधिकभाववत्, तस्मान्नास्त्येवानवस्थानान्निराश्रयः खपुष्पवद्विशेषः।

अथ तु तद्बुद्ध्यासन्नमेव ग्रहीष्यते सामान्यविशेषयोरित्येवं तर्हि द्रव्यगुणकर्मणां न सामान्यं नापि विशेषः तेषां परस्पराऽऽसत्त्यभावात्, तया द्रव्यस्य गुणस्य कर्मणो वाऽऽसत्ति-र्गृह्येत, तत्रैव च सामान्यविशेषौ स्याताम् न गुणकर्मणोः तद्बुद्ध्यासन्नता हि द्रव्यस्य द्रव्यस्य, न द्रव्यस्य गुणस्य च, न द्रव्यस्य कर्मणाश्च, न गुणस्य कर्मणश्चेति सामान्यभावो विशेषाभावश्च।

यथा द्रव्ययोः प्रत्यासत्तिर्द्रव्यत्वाभिसम्बन्धात्तथा सत्त्वाभिसम्बन्धाद्द्रव्यगुणकर्मणां भविष्यति यथोक्तं 'सदिति यतो द्रव्यगुणकर्मसु द्रव्यगुणकर्मभ्योऽर्थान्तरं सा सत्तेति, अत्र ब्रूमः, द्रव्ययोरपि नोपपद्यते, तथाऽऽसत्तिः सिकतानां वज्रस्य च न भूम्यम्भसोः, तेनैव हेतुक्रमेण तथाऽऽसत्तिः पिण्डघटयोर्न मृत्सिकतानामेवं परतः परतो यावत्तुल्यजातिगुणक्रिययोरण्वोरेव स्याताम्, न तु तयोस्यन्यत्वेप्रत्ययप्रभावोल्लिङ्गितान्त्यविशेषयोस्तत्समवायेनापक्षिप्तप्रत्यासत्त्योस्तस्मात् सामान्याभावाद्विशेषाभावः सर्वत्रैवोभयाभावः।

सा द्विधा प्रत्यासत्तिः, अर्थसम्बन्धादनर्थसम्बन्धाच्च, तत्रानर्थलक्षणा सद्द्रव्यपृथिवीमृद्घटादितत्त्वानुवृत्तिबुद्धिग्रहणा यथोक्ता,

अर्थलक्षणा तु द्रव्यगुणकर्मसम्बन्धात्मिका यथोक्तं 'अर्थ इति द्रव्यगुणकर्मसु'[१] इति।

तन्न, अर्थाऽऽश्लेषलक्षणायान्त्वासत्तौ पृथिवीघटरूपादीनामेव स्यात्सामान्यविशेषता, नेतरसामान्यविशेषयोः, इष्यते च तयोरपि सादृश्यानुवृत्तिलक्षणसामान्यविशेषता।

तथापि स्वविषयसामान्यविशेषापत्तिः, सा चोक्तदोषा।

तस्मादेतद्दोषापेतं सर्वथान्तरङ्गं वस्तु प्रतिपत्तव्यम्, न बहिरङ्गं सत्त्वद्रव्यत्वादि, स्वमूर्त्तिस्थत्वात् प्रधानत्वाद्व्यवस्थितत्वाच्च घटादिभवनस्य।

न तु यथा तौ सद्द्रव्यादिषु सञ्चारिणौ, घटभवनस्योदकाद्याहरणसक्तात्मनः पुनः क्व सञ्चरणम्, अनपेक्षत्वाच्च, न हि तस्यानुवृत्त्यपेक्षा घटान्तरेषु, यदि स्यात्ततोऽनुवर्तेत स तेष्वपि, न पुनरपेक्षाऽस्ति तस्य स्वसामर्थ्येनैव सिद्धत्वात्, ततश्च सर्वसामान्यांश एव स स्यात्, तद्यथा पूर्वाह्णापराह्णयोरेक एव घट इति।

तत्सन्निवेशस्वरूपापेक्षत्वाच्च तस्यास्तस्य तु तदपेक्षा व्यर्था, घटोऽपि घटत्वापेक्षात्मलाभस्तत्त्वानुवृत्तिरपि घटात्मलाभापेक्षेति चेन्न, इतरेतराश्रयदोषापादनात्।

तथा विशेषेऽप्यस्य नापेक्षा, अन्यथा स एव न स्यादुक्तवत्।

---

१. वैशेषिकसूत्राणि अ. ८ आ. २ सू. ३.

यथालोकप्रसिद्धं पूर्वत्वाच्च घटात्मभवनस्य, अनपेक्षित-पूर्वापरप्रभेदत्वात्, प्रकृतिरिति वाऽन्यदिति वा पूर्वापरप्रभेदाः, वर्त्तमानत्वाच्च तन्न प्रलयभाक्।

तद्धि तेन रूपेण सर्वकालं सद्वर्तते सत्तार्थत्वात्, वर्त्तत इति भाव इति योऽसौ भावः, तदन्तरङ्गं प्रधानमनपेक्षं पूर्वं वर्त्तमानञ्च-वस्त्विति येऽन्येऽन्यत्कल्पयन्ति कारणमेव कार्यमेव सामान्यमेव विशेष एव तदुभयमेवान्यतरोपसर्जनप्रधानमेव नैव वास्त्युभयमिति किमेतेन।

को हि वादानामन्तं कर्तुं शक्नुयात्, अभियुक्तबुद्धयुत्कर्ष-परम्पराया अदृष्टद्रष्टृत्वात्, आह च

'णिययवयणिज्जसच्चा सव्वणया परवियालणे मोहा।
ते पुण अदिट्ठसमयो विभजइ सच्चेवा अलिएव॥'[1] इति

को ह्येतद्वेद किं वाऽनेन ज्ञातेन ?

तथा च कारणे कार्यसदसत्त्वानियमः, कारणे सत्येव भावा-भावाभ्याम्, असति च कारणे कार्यस्य, सेवाद्युद्योगफलानियमात्।

यथा वा वातककर्कोटकपुष्पं फलकारणं सत्कार्यं पुष्पत्वादाम्र-पुष्पवदित्यनुमानप्रसङ्गेऽपि च दृष्टमसत्कार्यम्, अव्यक्तमिति चेन्न व्यक्तिकार्यस्याव्यक्तकार्यत्वादसत्त्वतुल्यत्वात्।

करोतीति कारणं तस्मात्स्वकार्यस्याकरणादकारणत्वमेवेति चेन्न, बीजादीनामपि ह्यकारणतैव क्वचिदकरणादिति कारणमप्य-

१. सम्म. का. १, गा. २८

कारणमेवास्तु, अनिष्टश्चैतत्, लोके पुनरुत्पद्यते कार्यम्, सदसत्त्वानियमात्तु करणे बीजादौ कारणतायामेव सत्यां करणाकरणे।

कारणे कार्यस्य सदसत्त्वयोरनियमात् करणाकरणयोरनियमे किमर्थं पुनः करोतीति कारणमिति शब्दव्युत्पत्तिराश्रीयते? उच्यते, अविदितवेदनार्थविधिपरतया वाक्यप्रवृत्तेस्तस्यामवस्थायामनुपजनितविषयत्वादपवादस्पर्शस्य, तदा हि करोतीति कारणमिति कारणत्वविधानमात्रं क्रियते, देशकालादिविशेषाविशेषणादसति स्वविषये कमर्थमपवादः स्पृशेत्? किं करोत्येव, न, करोत्यपि क्वचित् कदाचित् इति। तदा स मन्यते वक्ता, इदं तावत् प्रतिष्ठां यातु करोतीति कारणमिति, प्रतिष्ठिते चास्मिंस्तत उत्तरकालं सिद्धे सति कारणत्वे कार्यसत्त्वासत्त्वयोस्तेन विशेषणप्रकारेण करोत्येव न करोत्येवेति विकलादेशवशान्नियमोपपत्तेर्विशेषणमाश्रीयते यथा नीलोत्पलं भवतीति।

तथा न्यग्रोधफलं यथा प्रागुक्तसदसत्त्वानियमात्तु कारणे कार्यस्य कारणतायामेव करणाकरणे तथा कार्यकरणाकरणानियमात्तु कारणस्य कार्यस्य कार्यत्वानियमः।

इतश्च कार्यकारणसदसत्त्वानियमः सर्वसर्वात्मकत्वसर्वकारणत्वात्, अतः सेवादिक्रियाकलापो यथाऽर्थप्राप्तेः कारणं तथा क्लेशप्राप्तेरपि। नन्वत एव क्लेशोऽपि भवतीति चेदेवं सतीप्सितेन तावद्भवितव्यं, ईप्सितश्च फलमर्थप्राप्तिर्न क्लेशः सेवकस्य, सन्निहिततच्छक्त्यभीहितत्वात्।

सर्वशास्त्रज्ञान्यतरव्याख्यानवत् तन्न, देशकालाकार-निमित्तावबद्धत्वान्नेष्टमेव फलमवाप्यते सेवकेनेव प्रसन्ननृपादपि, ज्ञाव्याख्यानवत्।

अथ देशादयः किमवबन्धकाः? ततस्तेषामकारणत्वाद-सर्वत्वम्, ततोऽतन्त्रत्वादप्रतिबन्धकत्वम्, अथाऽऽचक्षीथा देशादयः कारणमिति ततः सर्वकारणत्वात्सर्वात्मकत्वात् किमिति सर्वं न भवति, समुदितकारणत्वात्।

अथ मतं भवतः सर्वं न भवति, अनभिव्यक्तत्वाद्देशादेः कारणस्य, प्रधानसाम्यावस्थानवत्।

मैवं मंस्थाः, ननु च त्वयाप्येतदादिष्टं सर्वं देशादेरिति, तस्मात्सर्वात्मकत्वं सर्वात्मकत्वाच्च वैषम्यावस्थैवेति लौकिक-प्रकृतित्वमेव प्रकृतेः, सर्वात्मकत्वाद्देशादिवत् साम्यावस्थैव वा देशादेरपि प्रकृतिवत्।

एते अपि च कल्पने नोपपन्ने, अप्रयोजनत्वात्, निर्वृत्ता-निर्वृत्तार्थक्रियौदासीन्यवत्।

तस्याः प्रकृतेरनभिव्यक्तिसाम्यावस्थाने कालनियतियदृच्छा-स्वभावेश्वराद्यन्यतमकारणवशादित्येतच्चायुक्तम्, प्रकृतिकारण-त्यागेन हि अभ्युपेतविरोधः, कारणान्तरस्य वा तथा प्रणेतुरापत्तिः। आत्मान्तरत्वप्रकाशनमयं हि प्रधानस्य धर्मः।

उपायानभिज्ञत्वात् कारणान्तरं साचिव्यगुणोपेतमपेक्षत इति, तन्न ज्ञानार्थत्वात् स्वतन्त्रत्वादप्रतिहतगतत्वाच्च तस्य।

अतस्तेन नित्यप्रवृत्तेनैव भवितव्यम्, सामान्यतस्तत्स्वभावत्वात्, यथाऽग्निर्दहनप्रकाशनप्रवृत्तः।

ननु भस्मच्छन्नोऽग्निरपि न दहति, अत्रोच्यते, अथ कथं जीवति, स्थितेर्जीवितपर्यायत्वात्, स्थितिप्रकाशदहनात्मकस्याग्नेः प्रत्यक्षानुमानविषयस्य सतस्तथाऽग्रहणेऽस्तित्वे प्रमाणान्तराभावात् कथं ज्ञायतेऽग्निरिति, अप्रकाशयन् वा द्रव्यान्तरं तावत्कोशकादि स्वाश्रयमात्रं तत्परिमाणं तावत्, यथा गृहप्रदीपकः पुलिकामात्रमपि।

छादनाभावोऽपि च प्रधान इति निरावरणाग्निदहनप्रकाशनवत्तत्स्वभावत्वान्नित्यप्रवृत्तेनैव भवितव्यमिति तदवस्था नित्यप्रवृत्तता, ततश्चानभिव्यक्तिसाम्यावस्थानानुपपत्तिः।

कालादिकारणान्तरनिरपेक्षस्य तस्य निरवशेषपुरुषविषये स्वान्यत्वज्ञापने कृते कृतकृत्यत्वात् किं साम्यावस्थानेन? अकृतेऽप्यकृतकृत्यत्वात् किं प्रतिनिवृत्त्याप्रयोजनमसिद्धौदनसूपकारनिवृत्तिवत् इति तदवस्थमप्रयोजनत्वम्।

अव्यक्तिसाम्यावस्थानानुपपत्तेश्च किमिति सततसमवस्थितसमनुप्रवृत्ति प्रत्यक्षकारणनानाभेदाभिव्यक्तिस्वभावमेवेदं जगत् इति नाभ्युपगम्यते, किमित्यदृष्टं कारणान्तरं परिकल्प्यते?

एवं तावत्कारणे कार्यसदसत्त्वानियम उक्तः कार्यानियमोऽपि च, तथानुगम्यमानदृष्टान्ताभावात्, किन्तु मृत्पिण्डशिवकस्थासकोसकुशूलघटकपालशर्करिकापांशुवातायनरेणूनामेव लोके दृष्टत्वात्, पुनरुपचयप्राप्तानन्त्यस्कन्धस्य वातायनरेणुपांशुमृत्पिण्डादेश्चक्रकक्रमेण

कारणकार्यानियमदर्शनादित्यनियतादि सदसद्भूतकारणाध्यासावि-मुक्त्यनिर्मूलत्वं कार्यभूतस्य जगतः।

अतोऽवगम्यतां न किञ्चिदन्यत्र फलं तच्छास्त्रेण क्रियते, तस्मादिदं जगल्लोकप्रसिद्धमेवानियतानुपरतव्यापारदृष्टकारणकार्य-प्रबन्धमिति वृथैवमादौ शास्त्रारम्भः।

अत्र तु शास्त्रमर्थवत्स्यात्, इदं काम(ये) इदं कुर्यादित्याद्यप्राप्ते क्रियाक्रियाफलसम्बन्धे, अर्थ्यो हि ससाधनायाः फलादिसम्बद्धायाः क्रियाया एवोपदेशश्चित्रादिवत्, न तु लौकिक एव गृह्यमाणेऽर्थे विचार इदमेवं न चैवं वेति सार्थकः।

माऽवमंस्थाः मृगतृष्णिकादिप्रत्यक्षज्ञानव्यभिचारात् सर्वं प्रत्यक्षं व्यभिचरतीति, किं तर्हि? अनुपहतेन्द्रियमनःप्रत्यक्षं यत्तन्न व्यभिचरतीति गृह्यताम्, तथा च प्रत्यक्षेण लोके घटादिर्यथा व्यवस्थितस्तथा गृह्यत एव स्वस्थेन्द्रियमानसैस्तत्रार्थे पुनर्वचन-मिदमेवं नैवं वेति प्रत्यक्षप्रसिद्धेर्बाधकमापद्यते यदि तद्वचनं प्रमाणं स्यात्, न पुनस्तत्प्रमाणं तया प्रसिद्धया स्वयमेव बाध्यमानत्वात्। अनुवादादिभावाभावे *यः सिद्धे सत्यारम्भो नियमार्थः स* इति परिभाषाया लोके दृष्टत्वात्। नैवं यथेदं लोकेन गृह्यत इति, किन्तु तथा तथा भवतीति वचनम्।

शास्त्रकारवचनप्रामाण्ये वा प्रत्यक्षाप्रामाण्यम्, तत्र सर्वविपर्ययापत्तिस्तर्कतः, तद्यथा अलोमा हरिणश्चतुष्पात्त्वे सत्युत्प्लुत्य गमनात्, मण्डूकवत्, मण्डूकोऽपि लोमशस्तस्मादेव

हेतोर्हरिणवत्। यूका पक्षिणी षट्पदवत्त्वात्, भ्रमरवत्, भ्रमरोऽपक्षः पदवत्त्वात् यूकावत्, तथा पृथिव्यवसुधा, पदार्थत्वादाकाशवदित्यसाधारणधर्मसम्बन्धेनापि, रूपरसगन्धस्पर्शधर्मसम्बन्धिनी न भवति तत एव तद्वत्, तथा बौद्धमतेऽपि पृथिवी न भूः महाभूतत्वाद्रूपवत्त्वाच्च जलवत्, न कर्कटधारणधर्मा तत एव तद्वत्, एवं शेषपदार्थभेदेष्वपि।

महदहङ्कारतन्मात्रेन्द्रियशब्दादिष्वात्मनि च द्रव्यगुणकर्मसामान्यविशेषसमवायेषु सप्रभेदेषु नामरूपयोः संज्ञाविज्ञानवेदनासंस्कारेषु क्षित्युदकज्वलनपवनेषु चक्षुरादिषु रूपादिषु च दृष्टान्तभेदात् ते ते धर्मा निराकार्याः।

शास्त्रनिरूपणविपरीतमप्रमाणं न हरिणस्वरूपादि, निरपवादत्वात्, न, सर्वस्यैवापोदितत्वात्, देशकालकृतविशेषैकान्तिनः प्रतिप्रदेशं प्रतिसमयञ्च सर्वं विशिष्टमेव न समानं किञ्चिदतो यावदणुशो रूपादिशो विज्ञानमात्रशो निरुपाख्यत्वशश्च भेदात्कुतो हरिणः कुतस्तस्य लोमाद्यवतिष्ठते?

तथा सर्वसर्वात्मकैकान्ते मण्डूकोऽपि लोमश एव, स्थावरस्य जङ्गमताङ्गतस्य, स्थावरस्य स्थावरतां, जङ्गमस्य स्थावरतां जङ्गमस्य जङ्गमतां गतस्येति वचनात्।

अर्थानर्थविषयसामान्यविशेषनानात्वैकान्तेऽतदात्मकत्वात् कुतोऽण्डहरिणमण्डूककारणकार्यदरणिसंयोगगुणोत्प्लवनकर्मभवनव्यावृत्तितथासमवायाः, सर्वथा तत्त्ववृत्तिव्यतीतत्वात् खपुष्पवत्, अन्यथा बालकुमारवत्।

हरिणादिस्वरूपवितथोक्तौ प्रसिद्धिविरुद्धप्रतिज्ञत्वादेवातथात्वमिति चेन्न, उक्तवत्तुल्यत्वात्।

लोकस्य चाप्रामाणीकृतत्वात्तथा कुतः प्रसिद्धिविरोधः कथं वा तत्प्रसिद्धिः? एवं वचनेऽभ्युपगमविरोधात्।

लोमशालोमैक्ये सपक्षासपक्षावृत्तिवृत्त्योरतर्क इति चेन्न दृष्टान्तस्य प्रत्यक्षप्रसिद्धिविषयत्वादसिद्धेर्लोकस्याप्रमाणीकृतत्वात् कुतस्तर्कातर्कत्वविचारः।

इहैव भवान् यं दोषमापादयति स तव, अप्रमाणीकृतत्वात् लोकस्य, सपक्षासपक्षवृत्त्यवृत्त्योरसत्त्वापत्तेः।

तत्र तावदविशेषैकान्ते कुतोऽन्यपक्षोऽसपक्षो व्यावृत्तिर्वा, अन्यस्याभावादविशेषात्, तद्वत्समानस्याभावात्।

आविर्भावतिरोभावयोरभूत्वा भावाद्भूत्वा चाभावादनित्यत्वकृतकत्वे स्त एवेति चेन्न तत्त्व एव तथाभिव्यक्तेः।

विशेषैकान्ते कुतस्तत्पक्षः सपक्षस्तत्सत्त्वं वा, देशतः परमाणुशो रूपादिशो विज्ञानमात्रशोऽनुपाख्यत्वशश्च भेदात्, कालतोऽत्यन्तपरमनिरुद्धक्षणादूर्द्धर्वमनवस्थानाच्च कुतस्तत्पक्षः, धर्मधर्मिणोर्विशेषणविशेष्ययोश्चासम्भवात् कुतः सपक्षः,? सत्त्वं वा तत्र तदभावात्, तथाऽस्थितेः।

तदुभयानेकत्वैकान्ते नोभयमिति साध्यसाधनधर्मधर्मिण एव कुतः? तथाऽपूर्वत्वात्।

दृष्टान्तस्य प्रत्यक्षत्वाद् दृष्टान्ताभ्युपगमात् प्रत्यक्षप्रमाणीकरणमापन्नं तस्माच्च लोकत्वं दृष्टान्तसंवादित्वप्रतिपादनार्थत्वाच्छास्त्रार्थस्य, ततश्च प्रतिज्ञातव्याघातः।

शास्त्रत्वादेवालोकत्वमिति चेन्न, लोकाश्रयत्वात्तेषां शास्त्राणाम्।

तानि हि शास्त्राणि सामान्यविशेषकारणकार्यमात्राणां सामान्यमात्रस्याग्नेः कारणमात्रस्य स्पर्शशौक्ल्यादेर्दृष्टस्य विशेषमात्रस्यार्चिष्षु नवनवोत्पादविनाशरूपस्य दृष्टस्य सर्वत्राध्यारोपेण प्रणीतानि।

अन्यत्र दृष्टस्याध्यारोपाद्घटतत्त्ववदलौकिकत्वमिति चेन्न तथा व्यामोहस्य मृगतृष्णिकावदलौकिकत्वात्, मृगतृष्णिकावदेव तस्याप्रामाण्यप्रसङ्गात्।

तथा च तत्र प्रतिज्ञादीनामप्यनुपपत्तिः यदि यथा लोकेन गृह्यते न तथा वस्तु।

तत्र प्रतिज्ञा तावद्यथोक्ता गृह्यमाणाऽविशेषादेर्न तथा स्यात्। ततश्चांशे प्रत्यक्षविरोधः स्ववचनविरोधोऽभ्युपगमविरोधः, स्वोक्तविपर्ययरूपाभ्युपगमात्।

अथ तथाऽभ्युपगम्यते न तर्हि लोकगृहीतमन्यथेत्यापन्नम्, लोकत्वाच्च प्रतिज्ञातव्याघातस्तदवस्थः।

किञ्चित्तथा किञ्चिदन्यथा, उन्मत्तप्रतिपत्तिवदिति चेदेवं तर्हि साक्षाल्लोकपक्षापत्त्याऽभ्युपगमविरोधः, किञ्चिद्ग्रहणात्तथाग्रहणात् अन्यथाग्रहणाच्च।

उन्मत्त इति च दृष्टान्तो लौकिकस्तमभ्युपगम्य लोकः प्रमाणीकृत एव, तन्निराचिकीर्षव एवोन्मत्ततराः।

भेदवदभेदपदार्थोपादानाच्च न तथेति पुनर्नवोऽभ्युपगम-विरोधः।

अथ प्रतिज्ञैवाभ्युपगमस्ततो लोकाप्रामाण्यात्, न, अविशेषादिष्वसतः पक्षादेरुपादानाल्लोकाभ्युपगमाल्लोकाप्रामाण्यं न सिद्धयतीति।

एवं शास्त्रव्यवहारो लोकदर्शनमन्तरेण न सिद्धयति, लोकवदेव चार्थ इति व्यवस्थाप्य शब्दप्रयोगात्।

तथा सत्यत्वसिद्धे शब्दार्थे ततः पुनर्न यथालोकग्राहं वस्त्विति विरुद्धयेत।

लोकविरोधः प्रस्तुत एव, तदविरोधेऽप्रवृत्तेः।

लोकाप्रामाण्ये वा शास्त्रकाराणां सर्वत्र पदे वाक्ये प्रत्यक्षानुमानविरोधावुपस्थितावेव, तत्स्थत्वात्तयोः।

कथं प्रमाणज्येष्ठं प्रत्यक्षमप्रमाणीक्रियेतेति, तत्र वः सम्प्रचारमिमं प्रयच्छामि, शास्त्रवदेव प्रत्यक्षमपि लौकिकप्रत्यक्षवि-लक्षणं तथानुमानञ्चास्तु तयोरप्यलौकिकत्वकल्पनार्थं सामान्य-विशेषैकान्तसंवादि घटादिकल्पनापोढं प्रत्यक्षं कल्प्यम्।

नामजातिगुणक्रियाद्रव्यस्वरूपापन्नवस्त्वन्तरनिरूपणानुस्मरणं विकल्पना ततोऽपोढमक्षाधिपत्येनोत्पन्नमसाधारणार्थविषयम-

भिधानगोचरातीतं प्रत्यात्मसंवेद्यत्वात् प्रत्यक्षमक्षमक्षं प्रति वृत्तेः पञ्चेन्द्रियजम्।

चक्षुर्विज्ञानसमङ्गी नीलं विजानाति नो तु नीलमित्यभिधर्मागमोऽपि, प्रकरणपदेऽप्येनमेवार्थं भावनयाऽनया विशेषयत्यर्थेऽर्थसंज्ञी न त्वर्थे धर्मसंज्ञीति,

एवमभिधर्मेऽप्युक्तं धर्मो नामोच्यते नामकायः पदकायो व्यञ्जनकाय इति, एवं तावत् कल्पितमेव भवत्सिद्धान्ते, किं सम्प्रधारणया?

कल्पितमपि त्विदमफलमलौकिकत्वात् स्ववचनव्यपेक्षाक्षेपदुस्तरविरोधपरिहारं हि त्वदुक्तिवदेवेदमप्रत्यक्षं कल्पनात्मकत्वात्।

न त्विदमसिद्धं निरूपणविकल्पात्मकत्वात्, घटत्वादिज्ञानवत्, आलम्बनविपरीतप्रतिपत्त्यात्मकत्वात्, यथाऽप्रतिपत्तिः।

स्यान्मतं द्रव्यसतामेवाणूनां नीलपीताद्याकारत्वान्न विपरीता प्रतिपत्तिरित्येतच्चायुक्तं, आकारस्याध्यारोपात्मकत्वात् माणवके सिंहत्वाध्यारोपवत्। सदाऽध्यारोपित इति कुतो गम्यते? सामान्यरूपविषयत्वात्, तत्सामान्यञ्च कारीषतौषतार्णपार्णादिविशेषनाश्रिताग्नित्ववत्। तदप्यसिद्धमिति चेत्, सिद्धमेव तदतद्विषयवृत्तित्वात्, तैमिरिककेशोण्ड्रकादिज्ञानवत्।

सर्वथा साधारणार्थत्वादेर्हेतुपारम्पर्येण कल्पनात्मकत्वसिद्धेः। एकैकस्माद्वा हेतोरप्रत्यक्षमिदं कल्पनापोढलक्षणलक्षितं ज्ञानमनुमानादिज्ञानवत्।

मा मंस्थाः प्रोक्तकल्पनात्मकत्वादिहेत्वसिद्धिरिति, उक्तं हि वोऽभिधर्म एव सञ्चितालम्बनाः पञ्च विज्ञानकाया इति, रूपादिपरमाणोर्ह्येकस्यासञ्चितस्यालम्बनस्य घटादिषु नीलादिषु प्रत्यक्षाभिमतेषु संवृतिसत्स्वभावात् सञ्चिताणुघटनीलाद्याकार एव गृह्यते चक्षुरादिभिः, चक्षुरादिविज्ञानानां रूपादिपरमाणुसङ्घात एवालम्बनम्, ततः प्रत्येकमालम्बनपरमाणूनां परमार्थसतां भवत्सिद्धान्तेनैवाविषयता।

तत्र प्रतिविविक्तरूपान्तराविविक्तस्वतत्त्वे रूपसङ्घाते इन्द्रियसन्निकृष्टे आलम्बनविपरीता प्रतिपत्तिरव्यपदेश्यैकात्मकनीलरूपविषयाऽभिमता।

तद्व्याख्यानार्थं भवतां *अभिधर्मपिटके* यथोच्यते नीलं विजानाति नो तु नीलमिति। ननु हेत्वपदेशव्यपदेश्यैव सा, नच शब्दाभिधेयमेव व्यपदेश्यम्, किं तर्हि? यदर्थान्तरेणाधिगम्यते तद्व्यपदेश्यम्, तथा चोक्तं सञ्चितालम्बनाः पञ्चविज्ञानकाया इति न सञ्चयालम्बना इति, धूमेनाग्निरिवैतदपि चक्षुरादिविज्ञानं व्यपदेश्यं ततोऽन्यत् परमाणुभ्यः परमार्थसद्भ्यः कल्पितमेकं सामान्यं न साक्षादिन्द्रियैर्गृह्यते, व्यवहितमेवार्थान्तरैस्तद्द्वारेण गृह्यते।

ननु च सञ्चयस्य कारकहेतुत्वेनापदेशः प्रत्यक्षप्रतिपत्तेः, न धूमवज्ज्ञापकहेत्वपदेशतयाऽग्नेरिवार्थान्तरस्यैकरूपत्वस्य।

नन्विदमस्यैवार्थस्य प्रदर्शनार्थं प्रस्तुतमस्माभिर्यदीदं प्रत्यक्षं स्यात् कारकादेव, सञ्चयाख्यात् संवृतिसतो न स्यात्, भवति तु

तस्मान्न प्रत्यक्षं ज्ञापकधूमाद्यपेक्षाग्निज्ञानवत्, वैधर्म्येण दाहानुभवनवत्, प्रत्यक्षत्वाव्यवहितप्रतिपत्त्यात्मकत्वात् प्रत्यक्षस्य, तथा तस्य स्वलक्षणविषयत्वादनध्यारोपात्मकत्वादिति यावत्।

कारकतापि सञ्चयस्य नैवास्ति परमार्थतोऽसत्त्वात्, अलातचक्रवत्।

इतश्च सञ्चयस्याकारकता प्रत्यवयवव्यवस्थानमात्रत्वात्।

लोकवत्तु सञ्चयसत्त्वे व्यपदेशोऽस्त्येवेति गृह्यताम्, ततश्चाव्यपदेश्यो विषयः प्रत्यक्षस्य, प्रत्यक्षं वाऽव्यपदेश्यमित्युभयमनृतम्, विशिष्टोऽपदेशो व्यपदेशः, विशिष्टोऽन्य इत्यर्थः, ग्राह्यादन्यः सञ्चयस्तद्व्यपदेशेन व्यपदेश्यं प्रमेयं तदनुमेयं प्राप्नोति, व्यपदेशव्यपदेश्यत्वान्न प्रत्यक्षं धूमानुमिताग्निवत् यथा धूमेन व्यपदेशेन साधितोऽग्निरनुमेयोऽप्रत्यक्षश्च तथा नीलं रूपम्।

सर्वथा तत्तेन व्यपदेश्यं तदविनाभावात्तस्य, कारकतायामकारकतायां वा न कश्चिद्विशेषोऽर्थान्तरनिमित्तादेव पितृधूमादिवत्, ततस्तुल्ये व्यपदेश्यत्वहेतौ व्यपदेश्यनिरोधकोऽयमनर्थको विचारः कारको ज्ञापक इति, एवं तावदर्थतो व्यपदेश्यमेव।

यदपीष्टमभिधानतो न व्यपदेश्यं तन्नीलादिपरमाणुरूपं परमाणुसमूहाभेदादेकं वेत्येते द्वे अपि नैव स्तः, अनुमिताग्निवद्बहुविषयत्वात्, तथा ज्ञानमपि।

तद्धि नीलरूपनिरूपणमर्थव्यपदेशेन शब्दव्यपदेशेन वा दृष्टं स च विकल्प एवातः कल्पनापोढमिति दुष्टं लक्षणं ज्ञानार्थयोरध्यारोपाच्च

निरूपणात्तस्य, प्रतिपरमाणु प्रतिभिन्नानि स्वानि तत्त्वानि, तथा तेषां नीलरूपाण्यप्यनेकरूपाण्येव, तेषाञ्च यथासङ्ख्यमेकतत्त्वैकरूपाध्यारोपपदर्थान्तरनिरूपणम्, स चाध्यारोपो रूपान्तरसामान्यरूपविषयत्वात्, तदपि सामान्यं तदतद्विषयवृत्तत्वात्।

ततश्चात्र प्रत्यक्षेऽन्यस्यानपोहादनुमाने त्वपोहात्प्रत्यक्षमविविक्तविषयमतोऽनुमानात्तत् पापीयः, सङ्कीर्णतरविषयत्वान्नाप्यनुमानवदेतत्, अपोह्यार्थापोहशक्तिशून्यत्वात्।

प्रज्ञप्तिपरमार्थस्थितसञ्चयपरमाणुपरिग्रहात्मकत्वात्तदतद्विषयवृत्तता, सा च सर्वथा साधारणार्थत्वादिसर्वेष्वेतेषु हेतुषु, ततो मूलहेतुरेतैः साधितस्तस्मान्न तत्प्रत्यक्षं नानुमानवदसङ्कीर्णस्वविषयम्।

इतश्च तज्ज्ञानमप्रत्यक्षमप्रत्ययप्रत्ययात्मकत्वाच्छब्दा श्रावणत्व प्रत्ययवत्।

अनुमानज्ञानमपि तन्न प्रतिपूर्यते सम्बद्धगृहीतस्यान्यथा प्रतिपत्तेः, यथा विरुद्धादिज्ञानम्।

अथवा तिष्ठतु तावत् स्वलक्षणमात्रविषयप्रत्यक्षत्वस्य प्रत्यक्षविधिविधानाभ्युपगम विरोध इति, इह तु चक्षुर्विज्ञानसमङ्गीत्येतदेव तु न घटते।

एवं ते सञ्चयस्य तद्ग्रहणे तत्प्रत्यक्षत्वाद्रूपमात्रत्वात् सञ्चितालम्बनकल्पनावैय्यर्थ्यम्।

अतन्मात्रत्वे संवृतिसत्त्वात्सञ्चयस्यारूपत्वं खरविषाणवदित्यचक्षुर्विषयो रूपम्, ततो रूपस्याग्राहकत्वाच्चक्षुरचक्षुः श्रोत्रवत्, अथासञ्चितमेव परमाणुनीलरूपमिष्टं तथाप्यतीन्द्रियत्वादचक्षुर्विषयो रूपमित्युभयथापि रूपाग्राहित्वाद्घटादिवच्चक्षुर्नैव चक्षुः स्यात्।

विज्ञानमपि न विज्ञानं स्यात्, अन्यथाऽर्थप्रतिपत्तेरलातचक्रादिज्ञानवत्, न च चक्षुर्विज्ञानं समङ्गति चक्षुर्विज्ञानस्य रूपादन्यत्रासम्भवात्, न वा तत्सन्तानोऽन्यत्र सम्भवति, सञ्चयापेक्षो व्यभिचारोऽस्त्यतो विशेष्यत इति चेन्न, न हि सञ्चयो रूपमरूपत्वाच्चक्षुर्विज्ञानसङ्गत्यभावः। यदपि च तद्रूपं रूप्यत इति तद्विषयं तदेकगमनं चक्षुर्विज्ञानस्येति, तदपि नास्ति, अविषयत्वादन्येन्द्रियविषयवत्, सञ्चयविषयमपि चक्षुर्विज्ञानस्य समङ्गनं न, संवृतिसत्त्वात् खपुष्पवत्।

नीलविज्ञानसम्बन्धी न भवति तत्सन्तानः, तदाकारज्ञानोत्पत्तिहेत्वभावात्, अदग्धस्य दाहाज्ञानवत्।

नीलञ्च सञ्चयञ्च प्रत्येकसमुदितकारणत्वाद्विज्ञास्यतीति चेन्न युगपज्ज्ञानासम्भवात्।

यद्यपि स्यात्तयोरेकज्ञानत्वादेकज्ञेयत्वं दाहानुभववत्, तस्मिन्नितरेतरत्वे सर्वसर्वात्मवादिता, समुदायानर्थान्तरत्वाद्रूपं समुदाय एव, समुदायस्वरूपवत्, समुदायो वा रूपमेव,

रूपानर्थान्तरत्वात् रूपस्वरूपवत्, तस्मादैक्ये सति समवायग्रहणे हि प्रत्येकैकनीलग्रहणं स्यात्, एकनीलबालग्रहणेऽपि च सर्वनीलकेशपाशग्रहणम्, एकनीलात्मकत्वात् समुदायस्य।

ततश्च यथात्र सन्द्रावात्सर्वनीलैकता तथा रूपादिपञ्चकस्यापि सन्द्रावादेकता गुणत्वात् नीलैकत्ववत्, ततश्च गुणसन्द्रावद्रव्यत्वात् सर्वथा पृथिव्यादीनाम्, तेषामपि रूपादिपरमार्थत्वादिति सर्वसर्वात्मकत्वं विशेषैकान्तवादिनोऽप्यविशेषैकान्तवादिन इव।

गुणसन्द्रावात्मकद्रव्यत्वापादनाय तु सञ्चयस्य सन्द्रावातिशयो मायेयीयः, सञ्चितानामसञ्चितानाञ्च प्रागनभ्युपगमात्, अवश्यञ्चैतदेवमभ्युपगतम्, *आगम* एवोक्तं हि वः *'सङ्घाता एव सङ्घातान् स्पृशन्ति सावयवत्वादि'*ति, तत्र परस्पर्शनिरूपणे सर्वात्मस्पर्शनास्पर्शनयोर्दोषापादनेन निर्धारितं सङ्घाताः सङ्घातान् देशेन स्पृशन्ति देशमेवेति, सोऽपि स्पर्शो न सञ्चयादृते सम्भवति।

एवं च नीलं विजानातीति वाक्यं संवदत्यर्थतः केनार्थेन कतमत्? यत्तूक्तं नो तु नीलमित्येतदेवैकं संवदति नान्यत् किञ्चित्, कदाचिदपि नीलपरमाण्वाकारनियतज्ञानोत्पत्तिहेतुत्वाभावात् समुदायस्य चानीलत्वात्।

भेदतत्त्वाभिमतप्रत्येकसमुदायपरिग्रहेऽपि न नीलं विजानाति, तेषामितरेतरनीलत्वेनानीलत्वात्, जात्याकारादिना अतद्रूपत्वात् परमार्थसन्नीलपरमाणुरेव।

ते च परमाणवोऽत्यन्तमितरेतरव्यावृत्तासाधारणरूपाः कस्मात्? द्रव्यसद्रूपत्वात्, द्रव्यसतो ह्येतद्रूपं यदन्यनिरपेक्षविविक्तस्वरूपत्वम्, तत्र यथा तद्रसरूपेण गन्धरूपेण वा नास्ति द्रव्यसद्रूपत्वात्तथा नीलस्वरूपेणापि नास्ति तदपि च द्रव्यसद्रूपमाण्याद्यभावे स्थाभाववन्नीलान्तररूपाभाववद्वा तदभावेऽपि न भवत्येव । नीलत्वशून्यत्वाद्वा नीलान्तरनीलवत्तदपि परनीलं तद्वदनीलमतः कतरत्तन्नीलं स्याद्यद्विज्ञायेत चक्षुषा चक्षुर्विज्ञानसमङ्गिनेति न नीलं विजानाति चक्षुर्विज्ञानसमङ्गी।

अत एव चक्षुर्विज्ञानसमङ्गी सञ्चितालम्बन इत्यादिप्रत्यक्षविधेर्वाक्यस्यार्थोऽयमापद्यते नो तु नीलमिति, तस्य सञ्चयस्यासतश्चक्षुषा ग्रहणात् नो तु नीलमेवं भवति परमार्थसत्परमाणुनीलत्वात्।

भावना त्वस्यानर्थेऽर्थसंज्ञी न च कदाचित्कचिदप्यर्थे धर्मसंज्ञीति, अनर्थे — संवृति सति समुदाये द्रव्यसन्नीलसंज्ञी, न त्वर्थेऽर्थसंज्ञी, न त्वर्थ एव — द्रव्यसति परमाणुनील एवार्थसंज्ञी भवति तस्यातीन्द्रियत्वात्। यद्येवमर्थे धर्मसंज्ञी भवतु नेत्युच्यते न च कदाचित् क्वचिदप्यर्थे धर्मसंज्ञी, अतीन्द्रियत्वादत्यन्तं सर्वकालं परमाणुनीलादेरग्राह्यत्वात्, ततोऽर्थादेतदप्यापन्नमनर्थ एव धर्मसंज्ञीति, अनर्थ एव — असति नामादिधर्मसंज्ञ्यपि, सञ्चयस्य नामादी नाञ्च कल्पनात्मकत्वादनर्थे — यावत्कल्पनात्मके सञ्चयेऽनर्थकल्पनात्मकशब्दादिधर्मसंज्ञी, कल्पनापोहासम्भवात्, तस्मात्अस्मदुक्तैषा भावना घटते।

अथवा त्वदीयैरेवाक्षरैरेषोऽर्थो भाव्यते अर्थेऽर्थसंज्ञी न, अर्थे — नीलादौ परमार्थसत्यर्थसंज्ञी न भवत्यतीन्द्रियत्वात्तस्य, तुशब्दो विशेषणे, अर्थे धर्मसंज्ञी नेति वर्त्तते यस्तावदर्थ एवार्थसंज्ञी न भवतीति स कुतोऽर्थे धर्मसंज्ञी भवतीति विशेषस्तुशब्दात् अर्थापत्त्या पूर्ववदनर्थेऽर्थसंज्ञी तस्मिन्नेव च धर्मसंज्ञीति, ततः किं जातं? शून्यशून्यप्रत्युपादनवदसद्विषयत्वं दोषजातायां अपि तस्याः कल्पनायाः, ततश्च निर्मूलकल्पनामात्रसत्यत्वाल्लौकिकदृष्टसलिलादिबीजमृगतृष्णिकादिकल्पनाभ्योऽपि पापीयस्यौ प्रत्यक्षानुमानकल्पने युष्मदीये।

यच्चाप्यभिहितम*भिधर्मकोशे* यत्तत्रानेकप्रकारभिन्न इत्यादि यावदनेकवर्णसंस्थानं पश्यत इति बुद्धवचनं प्रत्यक्षलक्षणानुषङ्गागतं चक्षुर्विज्ञानसमङ्गिनीलविज्ञानोदाहरणसंभावनवाक्यवन्नोपपद्यत एवेत्युपपादयिष्यन् न पश्यतीदं पुनर्बुद्धवचनं न प्रमाणमिति।

तत्र कल्पनापोढस्वलक्षणविषयप्रत्यक्षलक्षणचोद्योपक्रमप्रसङ्गेन यत्तर्हीदं सञ्चितालम्बनाः पञ्च विज्ञानकाया इति तत्कथम्? यदि तदेकतो न विकल्पयति, यच्चोक्तमनेकप्रकारभिन्नैकानेकद्रव्योत्पाद्यज्ञानेत्यत्र कल्पनात्मकत्वप्रसङ्गोऽस्वलक्षणविषयत्वप्रसङ्गश्चेति चोदिते तत्परिहारार्थमायतनस्वलक्षणं प्रत्येते स्वलक्षणविषया न द्रव्यस्वलक्षणमिति कथं तत्कल्पनापेतमित्यन्यत्र विचारः करिष्यते। इदमेव तावद्विचारयामो बुद्धवचनं कदाचिदेकेन द्रव्येण ज्ञानमुत्पाद्यते कदाचिदनेकेनेति। अत्रापि कथमनेकप्रकारभिन्नसामान्यवृत्तिरूपायतनतायां तद्रूपायतनं पश्यतस्तदालम्बनत्वात्तस्य स्वलक्षणविषयं

तद्युज्यते? तथा रूपविज्ञानकाय इति कथं? कथञ्च इति पश्यतः तस्यामेकप्रकारावच्छेदः? अविभागसमवस्थसमूहात्मकत्वात्, मणि-समूहप्रभानुविद्धवर्णसंस्थानवत्।

एकस्य च द्रव्यस्य कदाचिदग्रहणादेकेन द्रव्येण कथं चक्षु-र्विज्ञानमुत्पाद्यते? तस्मात् किमेतद्बुद्धवचनं बुद्धवचनमिति चिन्त्यताम्। रसनानास्वादितरसाज्ञानवच्चक्षुषाऽगृहीतेषु चक्षुर्विज्ञानं नास्ति।

एकद्रव्यज्ञानोत्पादे तु सञ्चितालम्बनकल्पना निरर्थिकैवेति तदभ्युपगमविरोधः।

तत्प्रकारावच्छेदानवच्छेदानेकप्रकारभिन्नत्वमित्येतान्यपि ज्ञानानि न भवितुमर्हन्ति, रूपायतनस्य सञ्चितगतेरेव, नरसिंहवत्।

नरसिंहानेकप्रकारगतिरपि हि नरत्वसिंहत्वसञ्चययोः पूर्वं भेदेन दर्शनादभेदकल्पनात्मिकाऽभेदगतिरिति युक्ता, न तथा असञ्चये तु तद्द्रव्येष्वणुषु, असञ्चितस्यादर्शनात् कुत एव तद्वयवच्छेदादि सम्भाव्येत, एवं तावदेकेन द्रव्येणेत्ययुक्तम्।

यदपि चोक्तमनेकेन द्रव्येण कदाचिज्ज्ञानमुत्पाद्यत इत्यस्माद-नेकेनेति वचनात् तस्यानेकद्रव्यसंवृतिसत्त्वात् सामान्यता, सामान्य-त्वादसत्कल्पनं तत्, तद्विषयाः पञ्चविज्ञानकाया असत्कल्पनविषय-त्वादनुमानतदाभासज्ञानवदप्रत्यक्षमप्रमाणं वा, दूरान्मणिसमूह-दर्शनवद्वा न स्वलक्षणविषयाः प्रसक्ताः।

यदपि च *बुद्धेनोक्तं* द्वयं प्रतीत्य चक्षुः प्रतीत्य रूपाणि च प्रतीत्य चक्षुर्विज्ञानं मनःप्रतीत्य धर्माश्चोत्पद्यते मनोविज्ञानमिति, तद्विरुध्यते, बुद्ध्यादेरपि चैन्द्रियकत्वमतीन्द्रियत्वाद्रूपवत्, रूपं वा न चक्षुर्ग्राह्यं स्यादतीन्द्रियत्वाद्बुद्ध्यादिवत् । नन्वतीन्द्रियत्वं चक्षुर्ग्राह्यत्वञ्च परस्परतो विरुध्येतेति तन्मा मंस्थाः, भवतोऽनिष्टापादनपरत्वात्, भवद्बुद्धिनिवर्त्तनफलत्वाच्चास्य प्रयोगस्येति । अथापि यश्चात्र विरोधः सम्भाव्येत स तुल्यः परमाण्वैन्द्रियकत्वेन ।

चक्षुः प्रतीत्य रूपाणि च प्रतीत्य चक्षुर्विज्ञानमुत्पद्यत इति चातीन्द्रियत्वादनुमानविरोधः, उक्तभावनावत्स्ववचनविरोधोऽपि ।

वादपरमेश्वरसंश्रयश्चैवम् ।

न च नस्तेन विरोधः, तस्य लोकनाथत्वात्, स हीनः विलुप्यमानस्य लोकतत्त्वस्य त्राता, सर्ववादभेदयथार्थानां लोकसंवादेनोपग्राहयित्वा पालनात् ।

कथं संश्रय इति चेत्? अनेकात्मकरूपायतनाभ्युपगमात् ।

अत्र चैकरूपायतनाधारतया त्वयाप्यनेकान्तवादोऽभ्युपगत एव, तदाधारतया हि तत्रेत्यधिकरणवाचिप्रत्ययान्तेन तत्रशब्देनाव्यतिरेकं रूपायतनमेवोक्तं तस्यैवारूपरूपता पुनर्दर्शिता, कदाचिदेकेन द्रव्येण कदाचिदनेकेन ज्ञानमुत्पाद्यते इति ब्रुवता । एवञ्च तस्यैकस्यैवैकताऽनेकता च त्वयैवोक्ता तथाऽविभक्ततत्त्वेन ज्ञानोत्पत्तेः । दृश्यते हि तदेव रूपायतनं पश्यत एकमनेकञ्च

परमाणवस्तत्समूहश्चेति स्वलक्षणसामान्यविषयज्ञानोत्पत्तिः, उक्त-हेतुवदेतदपि भेदाभेदात्मकम्।

ननु कदाचिच्छब्दःकालान्तरवचनः, तस्मिन्नैव हि वस्तुनि कदाचित्कालान्तरे ज्ञानमेकाकारमुत्पद्यते कदाचिदनेकाकारं ज्ञान-स्यैवाकारवत्त्वात्तन्न, एककाल एवोभयरूपत्वात्, स्यात्तत् तत्, परमाणुद्रव्यसमूहाभेदात्, स्यान्न तत् तत्, रूपादिपरिणामभेदात्, ग्रहणापदेशविशिष्टार्थत्वादेकानेकात्मकं तद्वस्तु, अनेकवर्णमणि-रूपवत्, एकपुरुषपितृपुत्रादिवद्वा।

अतोऽनपेक्षितस्वाभ्युपगममनेकान्तदूषणमापद्यते, अविभावि तैवमर्थ्यपूर्वाभ्युपगमत्वाद्वोन्मुग्धभ्रान्तोन्मत्तादिवत्, अनपेक्षितस्वा-भ्युपगमानेकान्तदूषणत्वात् कस्य वयं विशेष्यायमेवोन्मुग्धो भ्रान्त उन्मत्तो वेति दोषं ब्रूमः? न विशेषदोषः कस्यचिदपि।

प्रागभिहितसम्बन्धागतकल्पनात्मकत्वापादनचोद्यदूषणमनुक्त्वा तदभ्युपगमेन परिहारोक्तिरायतनस्वलक्षणं प्रत्येते स्वलक्षणविषया न द्रव्यस्वलक्षणं प्रतीति दोषं च लपित्वा प्रतिष्ठापितवानसि।

एष तु विशेषोऽज्ञानत्वप्रसङ्गस्तद्यथास्फुटतरक इत्यादि यावत्कुतः प्रत्यक्षत्वमित्येतदुपदर्शितम्।

योऽपि चैकाकारेत्यादिचोद्यप्रत्युच्चारणमेतद्यावत्सञ्चि-तालम्बनतायाम्।

अनेकार्थजन्यत्वात् स्वार्थे सामान्यगोचरमित्यनेकद्रव्योत्पाद्यत्वात्तत् स्वायतने सामान्यगोचरमुच्यते न तु तद्भिन्नेष्वभेदकल्पनात्, तेषु पृथक्पृथग्ग्रहणाभावादिति।

यथाहि शमीशाखापत्रेषु ज्ञानमन्तादिमध्याविवेकेनोत्पद्यते, एवं प्रत्यक्षमपि।

स्यान्मतं तद्व्यतिरेकेण पत्रे पत्रे समुदाये च यथा ज्ञानं तथा प्रत्यक्षमपि स्यादित्येतच्चायुक्तम्, न च सङ्घातः कश्चिदेकोऽस्ति, तेषामनारब्धलक्षणकायत्वात्, न हि समुदायो *वैशेषिक*कल्पितकायद्रव्यवत् पृथगस्ति, नापि परिणामान्तरमापन्नम्, तेषां क्षणिकत्वादारम्भनिष्ठाकालभेदावस्थानाभावादेवमणुष्वपि।

अयमसमाधिरेव, अस्यार्थस्य जरत्कुटीरवदारोहणाक्षमत्वादत् अङ्गीकृतार्थविनाशित्वात्, शब्दकृतकत्वाभिव्यक्तिस्थापनार्थप्रवृत्तवैशेषिकवत्, कुतस्तत्साधर्म्यमिति चेदुच्यते, अविषयतां प्रतिज्ञाय तदतद्विषयतया तदतद्भूतसामान्यगोचरोपसंहारात्।

नन्वत एव न तत्प्रत्यक्षं स्वार्थे सामान्यगोचरत्वादनुमानवत्, अनुमानमपि वा न, स्वार्थे सामान्यगोचरमिति कुमारब्रह्मचारिपितृवचनवच्चैतत्।

स्वार्थ इति च त्वया प्रमेयमुच्यते, सामान्यतो वस्तुस्वलक्षणं स्वार्थ इति, तथा सामान्यलक्षणमिति लिङ्गगम्यं सर्वम्, अस्वार्थविशिष्टे — स्वविषये — एकस्मिन्नेव रूपादिप्रकारे सामान्यगोचरमिति, सामान्यविषयश्च स्वार्थे ज्ञानमिति च विस्पर्धितमेतम्,

अर्थविषयशब्दौ हि लक्षणार्थाविव, तद्विस्मृत्य भ्रान्तेन नेन्द्रिय-ग्राह्यस्वार्थसामान्यभेदकल्पनापरिहारो युज्यते वक्तुम्, प्रत्यक्ष-व्याख्याविषयत्वात् स्वार्थस्वलक्षणस्वविषयशब्दानाम्।

मा मंस्था नैतदेवं भवतीति, उक्तं हि *प्रमाणसंख्यानिरूपणे* त्वयैव 'प्रत्यक्षमनुमानञ्च प्रमाणे' इत्यादि प्रमाणद्वित्वं नियम्यते प्रमेय द्वित्वात् परिमेयद्वित्वनियतप्रस्थतुलादिपरिमाणद्वित्ववत्, लक्षण-द्वयाद्यन्यत् प्रमेयं स्यात्तदपेक्षया प्रमाणान्तरं स्यात्, नहि स्वसामान्य लक्षणाभ्यामन्यत् प्रमेयमस्ति, प्रत्यक्षानुमानाभ्यामग्रहणात् खर-विषाणवत्।

स्यान्मतं तत्रैव विषयद्वये विकल्पसमुच्चयाङ्गाङ्गिभावैः प्रत्यक्षानुमानागमादीनां प्रमाणानां वृत्तिर्भविष्यतीति तन्न भवति यस्मात् स्वलक्षणविषयनियतं प्रत्यक्षं सामान्यलक्षणविषय-नियतमनुमानमित्युक्तम्, कथं पुनर्लक्षणशब्दोऽर्थपर्यायः? अयते गम्यत इत्यर्थः, तथा लक्ष्यत इति लक्षणं तच्च वस्तुस्वभावः, स्वरूपमर्थः प्रमेयमिति पर्यायाः। तत्पुनर्द्विरूपं द्वाभ्यां प्रमाणाभ्यां परिच्छेद्यत्वात्, प्रमेयाधिगमनिमित्तं हि प्रमाणमिति, न च प्रमाणयोर्विषयसङ्करः।

अधिगम्यस्य द्वित्वाल्लक्षणशब्दोऽर्थपर्यायवाची नेन्द्रियग्राह्य इति स्थिते प्रत्यक्षानुमानयोः स्वरूपाभावः स्ववचनविरोधश्च दोषाः स्वार्थे सामान्यगोचरमिति ब्रुवत इति स्थितम्। एवमवस्थिते सामान्यगोचरव्यावृत्तार्थेन भवितव्यम्, ततः स्वार्थे सामान्यगोचर-मितयेतद्विरुद्ध्यते। न हि तादृशस्वार्थेऽस्य सामान्यस्य सम्बन्धोऽ स्ति, नापि स्वार्थे सामान्यस्वार्थसम्बन्ध इति।

तस्मिन्नेव सामान्ये स्वविषये स्वार्थे प्रत्यक्षं ज्ञानमुत्पद्यत इति चेत्तत एव सामान्यमेव स्वविषयः, स्वलक्षणं नास्त्यतो लक्षणद्वयं नास्ति, एकमेवानुमानं प्रमाणं स्यात्, ततश्च प्रमेयप्रमाणद्वित्वावधारणकल्पना व्यर्था, प्रमाणयोर्वा विषयसङ्करः प्राप्तः।

प्रत्यक्षमपि वा परपरिकल्पितमनुमानभेद एव स्यात्, अनेकार्थजनितसामान्यगोचररूपादिप्रकारपरिग्रहात्। त्वयैवोक्तं हि तत्रानेकार्थजन्यत्वात् स्वार्थे सामान्यगोचरमिति। धूमबलाकालिङ्गजनितज्ञानवत्, एतस्मादेव हेतोरस्वलक्षणविषयत्वञ्चोभयत्र।

अथवोभयत्रेति स्वलक्षणे सामान्यलक्षणे चास्वलक्षणविषयत्वम्, अनेकैकीभावात्, समुदायवत्, सामान्यमपि न स्वलक्षणमत एवानन्तरोक्तसमुदायवत्। सामान्यास्वलक्षणत्वं सिद्धं साध्यत इति चेन्न, स्वार्थ एव सामान्यगोचरमिति वचनात् स्वार्थत्वेनाभ्युपगतत्वात्।

अवश्यञ्चैतदेवमभ्युपगन्तव्यं यतश्शमीशाखापत्रसङ्घातविशेषदर्शनोदाहरणेन च स्फुटमेव दर्शितमप्रत्यक्षत्वमनुमानत्वमप्रमाणत्वमस्वलक्षणविषयत्वं विषयसङ्कर इत्येवमादिदोषजातम्, अनेकैकत्वापत्तिसामान्यगोचरस्वलक्षण एवार्थः प्रत्यक्षस्येत्येषा भवत आशंसा चेन्न, आरात्परान्तमध्यवर्णप्रमाणसंस्थानविविक्तवृत्त्यवस्थपत्रविशेषस्वलक्षणसामान्यात्मकत्वात्।

ननूक्तमनेकैकत्वापत्तिसामान्यगोचरमिति तन्न, यस्मान्न च सङ्घातः कश्चिदस्ति, न च परिणामान्तरम्, तेषामनारब्धस्व-

लक्षणकायत्वात्, एवमणुष्वपि तथा, तस्मान्न स्वार्थे सामान्यगोचरं ज्ञानमिति।

यदपि चोक्तमनेकद्रव्योत्पाद्यत्वात्तत्स्वायतने सामान्यगोचरमित्युच्यते, न तु भिन्नेष्वभेदकल्पनादिति, साऽपि त्वदिष्टा नोपपद्यते, न हि तदनेकद्रव्योत्पाद्यम्, किन्तु सञ्चयात्, न च सञ्चयः सामान्यम्, ततो न स रूपादिभ्यो भेदेन कश्चिदस्ति, अत एव न प्रत्ययस्यालम्बनं युज्यते, अभूतत्वाद्वन्ध्यापुत्रवत्।

अनालम्बनत्वाच्चाभासार्थोऽपि न तत्रास्ति, वन्ध्यापुत्रत्वानाभासवत्, स्वाभासं हि यस्य ज्ञानेन स्वाभावावभासः, अस्वत्वादनात्मकत्वात् कुत आभासविज्ञापनम्?

एवं तर्हि स्वे तु परमाणवः आत्मानस्ते विषयतां यान्तु नेत्युच्यते, ते नाभासमुत्पादयितुमलमतीन्द्रियत्वादतीन्द्रियत्वं निराभासत्वाद्विषयवदिति प्रत्यक्षज्ञानं नोत्पद्यते निरालम्बनत्वात्, खपुष्पवत्।

अतः प्रत्यक्षस्याभावे स्ववचनव्यपेक्षाक्षेपदुस्तरविरोधप्रस्तुतेश्च *कल्पनापोढं प्रत्यक्षमित्येतल्लक्षणमनर्थकं स्यात्, तस्मिन्नभ्युपेतेऽपि तु* सञ्चितालम्बनप्रत्ययत्वेनैवास्य प्रत्यक्षता सिद्ध्यति, त्वन्मतेनैव तदाभासं, कल्पनात्मकत्वात्।

उक्ता च कल्पनात्मकता *'तदुभयमपि भ्रान्तिज्ञानात्मकत्वात् भ्रान्तिः संज्ञासङ्ख्यासंस्थानवर्णान्यथाकल्पनात्, मृगतृष्णिकाप्रत्ययवद्विचन्द्रप्रत्ययवदलातचक्रप्रत्ययवत् कामलोपहतचक्षुषो नीलरूपपीतप्रत्ययवदि'*ति।

तदर्थमुपसंहृत्यान्ते साधनम् 'अत इदं नैव प्रत्यक्षम्, अतथाभूतार्थाध्यारोपात्मकत्वात्, भ्रान्तिवत्, अथवा तत एव हेतोः संवृतिसज्ज्ञानवदप्रत्यक्षम्', तद्व्याख्या यथा गोपालेत्यादिना दृष्टान्तं समर्थ्य तथा संवृतिसतीत्यादिना दार्ष्टान्तिकसमर्थनम् । संवृति-सल्लक्षणे ज्ञापकमाह 'यस्मिन् भिन्न' इति श्लोकः ।

यस्मिन् घटे भिन्ने कपालशकलशर्करादिभावेन घटाभिमता-द्वस्तुनोऽन्येष्वप्यपोहेषुकपालादिषु न घटबुद्धिरस्ति, तदग्रहे तद्बुद्ध्य-भावात् अङ्गुल्यभावे मुष्टिबुद्धिवत्, अतोऽङ्गुलिव्यतिरेकेण मुष्ट्य-भाववत् कपालादिव्यतिरेकेण घटाभाव इति संवृतिसन् घटः, एवं क्रियासम्भवे क्रिययाऽपोढे । यत्रापि क्रिययाऽपोहो न सम्भवति तत्रापि धियाऽपोहेऽन्येषां रूपादीनां घटस्य समुदायान्न तद्बुद्धिरस्ति, रूपादिसमुदायस्य च परमाणुरूपाद्यपोहे न तद्बुद्धिरस्तीति वर्त्तते दृष्टान्तोऽम्बुवत्, एकस्मिन्नपि जलबिन्दौ जलबुद्धिदर्शनात्, रूपादिषु पुनर्बुद्ध्याऽपोढेषु न तोयबुद्धिरस्तीत्येतत्संवृतिसतो लक्षणम् । अथवा यस्मिन् घटे भिन्नेऽवयवशो न तद्बुद्धिर्भवति तद्घटवत्संवृतिसत्, यत्र चाम्बुबुद्ध्याऽर्थान्तरापोहे न तद्बुद्धिरर्थान्तरनिवृत्तिरूपस्य वस्तुनः स्वरूपाभावादग्निवाय्वादिनिवृत्तिमात्रं व्यवहारप्रसिद्धाम्बुवत्तदपि संवृतिसत्, परमार्थसदन्यथा, एतद्विपरीतलक्षणम्, स्वत एव विविक्तरूपं यद्विद्यते रूपं रस इत्यादि तत्परमार्थसत् प्रत्यक्षगोचर-मिति' । एतदपि परमार्थसदित्यभिमतं संवृतिसल्लक्षणानतिवृत्तेरसदेव यथोक्तविधिना । यथा रज्ज्वां सर्प इति ज्ञानं, तददृष्टौ तत्रापि सर्पवद्रज्जुविभ्रम इत्यप्रत्यक्षं नीलादिविषयं चक्षुरादिविज्ञानं शाक्यपुत्रीयं भ्रान्तिवदिति ।

यावदेकाकारपरिकल्पनादिति, उत्तरन्त्वत्राप्यनेकार्थविषयैकप्रत्ययत्वात् — तेषु परमाणुषु प्रत्येकमतीन्द्रियेषु समुदितेष्वसमुदितेषु वा प्रत्ययाभावात्तत्समूहोऽनेकार्थविषयः स एवैकः प्रत्ययः, समूहालम्बनतदाभासज्ञानोत्पत्त्यभ्युपगमात्, अर्थभेदविषयज्ञानाभ्युपगमे च 'विजानाति न विज्ञान'[1] मित्यादि विरुद्धचेत, तस्मादेकप्रत्ययोऽनेकार्थविषय एकार्थरूपस्तत एव सामान्यरूपस्तदतद्विषयतया तदतद्भूतसामान्यगोचरः ततश्चास्वलक्षणो विषयः, अतएव संवृतिसञ्चयस्तस्मात् कल्पनात्मको निर्देश्यश्चेत्येवमाद्यस्माभिः प्राक् प्रक्रान्तं तत्सुतराम्, शेषं त्वयैव भावित'मनेकार्थजन्यत्वात् स्वार्थे सामान्यगोचर'मिति परिहारं ब्रुवता।

भवदभिमतप्रत्यक्षस्याप्रत्यक्षत्वसाधने च द्वे अनेकार्थजन्यत्वात् स्वार्थे सामान्यगोचरत्वादिति लेशेनोन्नीते त्वयैव।

तदभिमतप्रत्यक्षमप्रत्यक्षम्, अनेकार्थजन्यत्वात्, अनुमानवत्, अनुमानमपि हि पक्षधर्माद्यनेकार्थजन्यम्, ज्ञापकः स हेतुरिति चेन्न, अत्रापि तुल्यत्वात् कारकादप्यनेकस्मादर्थात् साध्यसाधनधर्मान्वयैकान्तवतो जायते।

असञ्चितानेकार्थजन्यत्वादनुमाने नैतत्साधर्म्यमुपपद्यते, अत्रोच्यते, ननु धूमादिरपि सञ्चय एव गृहीतोऽग्न्यादिकमणव इव गमयतीति कारकत्वाव्यभिचार उभयत्र।

हेतुप्रत्ययोऽसौ धूमोऽनुमाने, कल्पनाया हेतोः, निर्विकल्पं हि ज्ञानमधिपतिप्रत्ययं प्रत्यक्षमतो वैधर्म्यो दृष्टान्त इति चेदथ कथं साधनानधिपतिर्धूमः? हेतुप्रत्ययस्यार्थस्येन्द्रियाविषयत्वादिति चेन्ननु

१. चतुश्शतक - २६८

सञ्चयनहेतुप्रत्ययोऽप्यनधिपतिरिन्द्रियाविषयत्वात्, तस्मात् सर्वथा तुल्यमुभयं कारकत्वेन । तथा स्वार्थे सामान्यगोचरत्वादनुमानवदप्रत्यक्षमिति ।

अनुमानं वा प्रत्यक्षं स्यात्, अनेकार्थजन्यत्वात्, स्वार्थे सामान्यगोचरत्वादिति ।

द्वयमप्येतदेकमेव, एकलक्षणत्वादिति प्रत्यक्षमेवैकं प्रमाणं तदुभयं स्यादनेकार्थजन्यसामान्यैकगोचरत्वात्, चक्षुरादिद्वारजन्मप्रत्यक्षभेदप्रत्यक्षवत्, अनुमानमेव वा स्यात्, तत एव कारणाद्धूमकृतकत्वाद्यनुमिताग्न्यनित्यादिज्ञानानुमानवत् ।

अनेकार्थजन्यत्वाच्च स्वार्थसामान्यगोचरतायां यथाभासं तेषु ज्ञानमुत्पद्यते, तथा त आलम्बनं रूपादयः, प्रत्येकं परमाणुरूपस्य बुद्धावसन्निवेशात् समुदयकृतं तन्निर्भासतयाऽऽलम्बनम् ।

एवञ्च सति प्रत्यक्षार्थ एवं ज्ञायते, तद्यथा अर्थसन्निकर्षादक्षं प्रति यदुत्पद्यते तज्ज्ञानं प्रत्यक्षमिति ज्ञानमर्थेन विशेष्यते ।

न तदुपपद्यते प्रत्यक्षम्, तस्यार्थस्याभावात्, न च सञ्चयोऽर्थः, संवृतिसत्त्वात् संवृतिसत्त्वमद्रव्यत्वात्, वान्ध्येयवत्, अतो न साधूत्पत्तिप्रत्यय इष्यते इति सोऽर्थो न विशेषणेन विशेष्यः । तस्माज्ज्ञानत्वप्रत्यक्षत्वाभ्युपगमहानिः ।

चक्षुरादिषु ज्ञानेष्वतः स्वनिर्भासव्यतिरिक्तप्रमेयाभावः, ततश्च तैमिरिकस्य केशोन्दुकमशकमक्षिकाद्विचन्द्रादिदर्शनवत् सा

त्वसत्सत्प्रतिपत्तिरेव, तस्मात्तस्य ज्ञानस्याप्रत्यक्षत्वमलातचक्रादिज्ञानवत् तेन त्वया प्रतिज्ञातं तत्प्रत्यक्षत्वं निराक्रियते, तन्निराकरणादनुमानविरोधः।

ननु प्रत्यक्षनिराकरणात् प्रत्यक्षविरोधोऽयं कथमनुमानविरोध इति, अत्रोच्यते त्वन्मतेन सपक्षधर्मस्य विपक्षस्योक्तानुमानेन निराकरणान्निर्विकल्पकप्रत्यक्षत्वाभावात् कतमत्तत्प्रत्यक्षं येन निराक्रियेत? यद्वा निराकुर्यात्? अतोऽनुमानविरोध एवायम्। किञ्चान्यत्, घटसंख्योत्क्षेपणसत्ताघटत्वाद्याकारज्ञानानामपि प्रत्यक्षत्वप्रसङ्गः, कथमिति चेदुच्यते यथा चात्र भवन्मतेन समानासमानानेकार्थजन्येन्द्रियस्वार्थाद्युत्पद्यते तदपि च तैमिरिकवदप्रमाणम्, यथा द्विचन्द्रदर्शनं तथा समानानेकवर्णमणिसमूहजन्येन्द्रियस्वार्थादुत्पद्यमानमपि तैमिरिकवदप्रमाणं स्यात्, समानानेकार्थादतथाभूतार्थान्मण्यादिसङ्घाताज्जन्यं हि तत्, यदि समानासमानानेकार्थातथाभूतार्थात् प्रज्ञप्तिसतः परमार्थसदाकारो लभ्यते त एव हि परमार्थसन्तः परमाणवो नीलादित्वेनाभासन्त इति तद्विषयं ज्ञानं प्रत्यक्षमिष्टम्, तदा निराकृतेभ्यः सत्पक्षत्वेन घटसङ्घाद्याकारेभ्यः समानासमानानेकार्थजन्येन्द्रियस्वार्थेभ्यः प्रत्यक्षज्ञानजनकार्थसधर्मभ्यः परमार्थसदाकारो लप्स्यते नीलादिसङ्घातवदिति घटः संयुक्तो वियुक्तः परोऽपरः स्पन्दत इत्यादिज्ञानं प्रत्यक्षं, स च तद्विषयः प्रत्यक्षः स्यात्, संवृतिसदालम्बनत्वान्नीलादिज्ञानवत्, नीलादिज्ञानं तदर्थश्च न प्रत्यक्षे वा स्यातां, संवृतिसत्त्वाद्घटादिज्ञानार्थवत्, त एव हि परमाणवो य एव घटादित्वेनाभासन्ते य एव नीलादित्वेनाभासन्त इत्येवमुभयोस्तुल्ये जनकत्वे तत्कुत एतन्नीलाद्याभासज्ञानं प्रत्यक्षं न घटाद्याभासमिति?

यथैव हि परमाणवो ज्ञानस्याकारसन्निवेशविशिष्टाः सामान्यत आभासन्ते तथा घटादिज्ञानेष्वप्याकारविशेषेण समुदितास्त एवाभासन्ते, नान्यो घटो नामास्ति यस्तथा भासेत, तथास्थेषु रूपादिष्वेव घट इति बुद्धिः प्रवर्त्तते प्रज्ञप्तिश्च, एवं तथास्थेष्वेव परमाणुषु नीलादिरूपबुद्धिः प्रवर्त्तते प्रज्ञप्तिश्चेति।

अथोच्येत नीलादिसमुदाये नीलादिद्रव्यसदाकारो विद्यते, तदण्वात्मकत्वात्तेषाम्, अणूनां द्रव्यसत्त्वात्तत्प्रत्यक्षत्वं न्याय्यम्, न तु घटाद्याकारोऽतत्परमाणुत्वात्, तथाऽसत्त्वात्।

एतच्च तुल्यमुभयत्राविशेषात्, यथैव तस्मिन् रूपादिसमुदाये घटाद्यनाकारता, तदनणुत्वात् तथाऽसत्त्वात्, एवं रूपाद्याकारस्यानाकारता, अनन्तरोक्तहेतोः सञ्चितस्यैन्द्रियकत्वात्तस्यैवालम्बनत्वात् तदनणुत्वात्, तथाऽसत्त्वात्, अन्यथाऽविषयत्वादनालम्बनत्वादत एवाप्रत्यक्षत्वात्।

पक्षान्तरापत्तिश्चैवं यदाभासं तेषु ज्ञानमुत्पद्यते तथा नालम्बनमित्येवं पक्षं परित्यज्य यथा ते विद्यन्ते तथा नालम्बनमित्ययं पक्ष आश्रितो भवति, अस्मिन्नपि च पक्षे त्वयैव *वसुबन्धुं* प्रत्युक्ता ये दोषास्ते तवापि स्युः, यस्मात्त्वयाऽपि चायं पक्षोऽङ्गीकृत एव, यथाच प्रत्यक्षोत्पत्तिबीजसञ्जननार्थमुक्तं प्रत्येकञ्च ते समुदिताः कारणमिति, तत्रानेकार्थजन्यत्वात् स्वार्थे सामान्यगोचरमित्यस्य व्याख्यायां पुनर्वसुबन्धुं दूषयितुकामेन विकल्पितः स एवार्थः। किम्? यथा विद्यमाना अन्याभासस्यापि विज्ञानस्य कारणं भवन्ति तथा प्रत्यक्षस्यालम्बनं रूपादय इति पूर्वपक्षत्वेनैतयोश्च

वचनयोरेकाकारार्थत्वादसावपि पक्षोऽभ्युपगतस्त्वया, एवमपि न त आलम्बनमतीन्द्रियत्वाद्गगनवत्।

अभ्युपगम्याप्येवंविधालम्बनताश्चान्यथाविद्यमानाः परमाणवः समूहाभासस्यापि ज्ञानस्य कारणं भवन्तीति धूमोऽग्निप्रत्यक्षज्ञानालम्बनं स्यात्, तथाविद्यमानत्वेऽन्याभासस्यापि ज्ञानस्य कारणी भवनात्, त्वदुक्तप्रत्यक्षालम्बनवत्, यथा त्वदुक्तस्य प्रत्यक्षस्यालम्बनं परमाणवोऽन्यथाविद्यमानाः समूहाभासज्ञानस्य कारणं भवन्ति तथा धूमोऽपि तत्साधर्म्यात्तज्जनितज्ञानालम्बनस्याग्नेः प्रत्यक्षालम्बनतामात्मनः साधयति, धूमनिमित्ताग्निज्ञानं वा प्रत्यक्षं स्यात्, अन्यथाविद्यमानत्वेऽन्याभासविज्ञानजनकार्थालम्बनत्वात्, त्वदुक्तप्रत्यक्षवत्, तस्मादेव हेतोश्चक्षुराद्यप्यालम्बनं स्यादेवमयमतिप्रसङ्गदोष एवंवादिनो यदि कारणमालम्बनं विज्ञानस्यान्याभासस्यापीष्टम्।

न च ग्राह्यस्य नीलादेर्विषयस्य चक्षुरादिविज्ञानस्य नीलादिपरमाणव आलम्बनम्, अन्यथा विद्यमानत्वाच्चक्षुरादिवत्। तदसाधारणविषयत्वाद्वा रसज्ञानवत्।

ननु च प्रत्येकमेव ते समुदिताः कारणमित्युक्तमेव, तथासन्त एव समुदिताः परमाणव आलम्बनम्, तदवस्थेषु ज्ञानोत्पादनशक्त्यभिव्यक्तेः, सा हि प्रत्येकं विद्यमाना नाभिव्यज्यते, चक्षुरादिपरमाणूनामिव, न ह्येक इन्द्रियपरमाणुर्विषयपरमाणुर्वा विज्ञानमुत्पादयितुमलम्, न तत्समुदायः, प्रज्ञप्तिसत्त्वात्, तस्मात् प्रत्येककारणतायामणूनां समुदाये दर्शनशक्तिव्यक्तिः, शिबिका-

वाहकसमुदाये वहनशक्तिवत्, वैधर्म्येणान्धपङ्गौ प्रत्येकादर्शनवैलक्षण्यं न।

नन्वेवमभ्युपगतनिराकरणफलैवेयं प्रत्यक्षव्यवस्था, असञ्चित परमाण्वालम्बनाश्रयणात्, तच्चाभ्युपगतं निरुणद्धि प्रत्येकं दर्शनशक्तिख्यापनात्।

ननु प्रत्येकशक्तानामेव सञ्चये तच्छक्त्यभिव्यक्तिरित्युक्तम्, सत्यमुक्तम्, एतदयुक्तम् जनकानन्यथात्वात्, न हि ज्ञानस्य जनकेभ्यः परमाणुभ्योऽन्यः सञ्चयोऽस्तीति प्रागेतद्विस्तरेण प्रतिपादितम्।

अथवा युक्तैषा कल्पना त्वयाऽऽश्रयि, स्वलक्षणविषयं प्रत्यक्षमित्येतत्प्रतिज्ञातसंवादित्वात्तन्निर्वोढुकामेन। प्रत्येकं ते समुदिताः कारणमित्येतद्धि प्रत्यक्षविषयसमर्थवचनमादिप्रतिज्ञातवत्, यस्मात् स्वलक्षणविषयत्वप्रतिसमाधानेन निर्वहणमेतत्, प्रत्यवेक्षितव्यार्थोपायसाध्यसाधनसम्बन्धो हि वक्तव्यः, अहो साधु! किन्तु पुनरत्र देवानां प्रिय ! भवति दोषजातम्, किं तत्? अनेकार्थजन्यस्वार्थसामान्यगोचरनिरसनम्। पूर्वापरानुमतनिगमनपरिग्रहेण वाऽऽदिप्रतिज्ञातार्थनिरसनम्।

अनेकान्तवद्द्वयोरन्तयोरवस्थातव्यं तैः परमाणुभिरेकतः प्रत्येकसमुदितैः प्रत्येकतायाश्च।

प्रत्येकाशक्यशक्तो हि समुदाय इत्युभयथा स्याद्वादिनो यद्वदन्ति तदेव तवाप्यापन्नम्, साक्षात्तदुक्ततत्त्वत्वात्, अनेकैकत्वभृशगत्यर्थसमुदायपरिग्रहाच्च।

इतरथापि चैषां समुदाय एव न स्यात् प्रत्येकमभूतत्वा-द्वन्ध्यापुत्रवत्।

बौद्धैरेवोक्ता त्रयातिरिक्तसंस्कृतक्षणिकानित्यत्वाभ्युपगमेन सहासङ्गतिरस्य, यदुक्तं वः सिद्धान्ते *'बुद्धिबोध्यं त्रयादन्यत् संस्कृतं क्षणिकञ्च तत्'* इति प्रत्येकत्वप्राप्तानन्तरमेव विनष्टत्वात् कः प्रत्येकं समुदायः, को वा देशतोऽत्यन्तं रूपादिभेदेन यावदनभिलाप्यतयाऽव स्थानं भिद्यमानानां प्रत्येकं भावः?।

प्रत्येकत्वप्राप्तिरपि चैवं नैव निर्मूलत एव परमाणूनाम-सत्त्वाद्वन्ध्यापुत्रवत्। सहोत्पाददोष इति चेन्न, तुल्यत्वात्, किं भूतस्य सहता, अभूतस्य वेति विकल्पद्वयेऽपि यौगपद्यासिद्धेः। अभूतस्य सहतेत्ययुक्तो विकल्पः खपुष्पस्येवातो भूतस्य सहतेति ब्रूमः।

त्वमेवैतद्विकल्पद्वयं *'तदवस्थाः प्रत्येकसमुदिताः कारणं परमाणवः'* इति ब्रुवाणश्चिन्तय क एवमाहेति, किं नः एतेन, यो ब्रवीति स ब्रवीतु, यदि भूतस्य, कुतः सहता? उक्तवत्, तथा तेषामसत्त्वापत्तेः, प्रतिलब्धसहत्वस्य चोत्पाद उच्यते त्वया तत्तु सहत्वमप्रतिलब्धमसत्त्वापत्तेरेव।

अथाभूतस्योत्पादो यौगपद्येनेष्यते साऽपि सहता वो नोपपद्यते, वन्ध्यापुत्रसमुदायोऽपि स्यादित्यनिष्टप्रसङ्गात्, अभूतत्वाद -स्थितत्वादणुसमुदायवत्। अणुसमुदायोऽपि न स्याद भूतत्वाद-स्थितत्वाद्वन्ध्यापुत्रसमुदायवत्।

सन्तानादिति चेदेतच्चायुक्तं, सोऽपि ह्येवमेव।

अथोच्येत बाह्यवस्तुप्रतिपत्तिजनितः सर्व एवैष विरोध-संक्लेशः, एवन्तु सर्वदोषविनिर्मुक्तमिदं कल्पनान्तरमाश्रयामहे विज्ञान-मात्रकमिदं त्रिभुवनम्, न पुनरेतस्यां कल्पनायामेवंविधः संक्लेशोऽस्ति यदिदं संवृतिसदिदं परमार्थसदिदमैन्द्रियमिदमतीन्द्रियं इत्यादि विकल्प्यमानं विज्ञानाद्व्यतिरिक्तमर्थजातमिच्छतां स्यात्, न तु तत्ततो भिन्नमस्ति, तस्मादनर्थको विचार इति।

अत्रोच्यते ननु देवानां प्रिय! तन्मतवदेव विज्ञानवाद-विध्वंसनार्थोऽयमारम्भः, तिष्ठतु तावद्बाह्यार्थाभावे विज्ञेयत्वा-भावात्तस्य विज्ञानत्वाभावः, ततश्च प्रमेयत्वाभावात् प्रमाणत्वाभावः प्रत्यक्षस्येति, इदं तावद्विज्ञानं हि लोके प्रत्यक्षादि, तत्र निर्धार्यं कतमत्तव विज्ञानमात्रम्। ब्रूयास्त्वं प्रत्यक्षविज्ञानमात्रमिति, तन्न तस्यैवमवस्थत्वात्, नानुमानविज्ञानमात्रं, तस्यापि तत्पूर्वकत्वात् तदसिद्धावसिद्धिरतन्त्वपटवत्।

एव तर्हि संशयभ्रान्त्यादिकल्पना विज्ञानमात्रमस्तु तदपि न, अत एव, नानध्यवसायमात्रम्, अग्रहात्मकत्वात्तस्य, न हि तदत्यन्तासंचेतितं नाम ज्ञानमस्ति, तस्मात् प्रमाणप्रमाणाभास-ज्ञानेष्वनन्तर्भावात् कतमद्विज्ञानमात्रमिदं सर्वमित्यलमति विकाशिन्या संकथया इति प्रत्यक्षलक्षणस्य सर्वथा दूषितत्वात् तत्कल्पितं प्रत्यक्षं न घटते, स्ववचनव्यपेक्षाक्षेपदुस्तरविरोधत्वात्, अनयैव च दिशाऽविशेषैकान्तवादिनोऽपि।

सर्वसर्वात्मकतायां श्रोत्रादिवृत्तिः प्रत्यक्षमिति ब्रुवतो वस्तुनो निर्विकल्पत्वाद्विभागाभावात् किं श्रोत्रं यत्त्वगादिभ्यो विभक्तम्? किमश्रोत्रं यच्छ्रोत्राद्विभक्तम्? क आदिः कोऽनादिः? का वृत्तिः? किं प्रति कतमोऽन्यो भावोऽन्यमपेक्ष्य तं प्रत्यक्षमित्युच्यते किमक्षमिन्द्रियं यद्विषयव्यतिरिक्तं परस्परव्यतिरिक्तं वा? किमनक्षमिति।

त्वन्मतेनैव च प्रत्यक्षलक्षणायोगः, यदुक्तं *लोकशास्त्रे 'बहिर्वस्तुस्वतत्त्वसाक्षात्प्रतिपत्तिः प्रत्यक्षं'* इति, तत्तु प्रत्यक्षं त्वन्मतवन्न घटते, निर्विकल्पत्वासिद्धेः, शब्दादिविभागविकल्पविषयत्वात्, अविभागरूपश्च सर्वसर्वात्मकं वस्तुस्वतत्त्वम्, तद्विषयश्च तन्न भवति ततश्च कल्पनात्मकम्, कल्पनात्मकत्वादिभ्यो भ्रान्त्यादिवत्।

सञ्चितालम्बनस्थाने उक्तवदिह तद्विपरीतं समुदायपरमार्थत्वम्, नीलादिसंवृतिसत्त्वं, संवृतिसन्तो नीलादय ऐन्द्रिया न परमार्थसत्समुदायः, तस्यारूपाद्यात्मकत्वात्, तदेकदेशभूतस्य रूपादेरपरमार्थसतोऽप्यविभागावस्थस्यैकस्यासर्वस्यालम्बनस्यासञ्चितवदस्मिन् वादे लोकलोकोत्तरव्यवहारप्रत्यक्षाभिमतेषु घटादिषु नीलादिषु चाभावान्न प्रत्यक्षम्।

तथासम्भावनेऽपि च रूपादेर्नैव तत्साम्यावस्थानं सम्भाव्यते।

सम्भाव्यमानेऽपि च तस्मिन्नव्यक्तेऽतीन्द्रियत्वादालम्बनत्वानुपपत्तेश्चक्षुरादिविज्ञानानां रूपादिसङ्घात आलम्बनमिति तेषां प्रत्येकं परमार्थसत्त्वाभावान्न विषयता, तस्माद्योनिबीज-

प्रकृतिबहुधानक प्रधानाव्यक्तादिपर्यायाख्यं यद्वस्तु तदतीन्द्रियत्वाद-प्रत्यक्षम्, यदिन्द्रियविषयं रूपादि न तत्परमार्थसदित्याद्यशेषं विशेषै-कान्तवादिमते यथाभागं तद्विपर्ययेणात्र यद्यत्र घटते तत्तथाऽनुसृत्य योज्यं भेदाभेदसंवृतिपरमार्थस्थानव्यवस्थापनया।

एवं तावद्विशेषाविशेषैकान्तवादयोः स्ववचनव्यपेक्षाक्षेप-दुस्तरविरोधत्वाल्लौकिकप्रत्यक्षविलक्षणं प्रत्यक्षं कल्पितमपि न युक्त-मित्युक्तम्, नानात्वैकान्तवादेऽपि सामान्यविशेषयोः *'आत्मेन्द्रिय-मनोऽर्थसन्निकर्षाद्यन्निष्पद्यते तदन्यत्'*,[1] आत्मा मनसा मन इन्द्रियेणेन्द्रियमर्थेनेति चतुष्टयत्रयद्वयसन्निकर्षादुत्पद्यमानं प्रत्यक्ष-मित्येतदपि द्रव्यादिविनिर्मूलत्वात् किमात्मादि? इति न प्रत्यक्षम्।

द्रव्यगुणभवनविशेषकारणकार्याणां सदसदनेकान्तस्वतत्त्वा-नामन्यतमैकान्तकल्पनात् कल्पनात्मकत्वम्, ततः कल्पनात्मकत्वा -दिभ्यो भ्रान्त्यादिवदप्रत्यक्षम्।

अतः सर्वप्रमाणाविरोधितत्त्वव्यवहारसमवस्थलोकपरिग्रह-वदेव सामान्यविशेषौ घटादिविषयौ नान्यथेति विधिः।

एष च वेदनादिभिरपि लोकप्रमाणकोऽज्ञानिकवाद उपजीव्यत इति, किञ्चिन्न ज्ञायते को वैतद्वेद किं वाऽनेन ज्ञातेनेत्यशक्यप्राप्य-फलत्वाभ्यां वस्तुतत्त्वविचारो न युज्यते, क्रियाया एवोपदेशोऽतः श्रेयानिति लेशेनाभ्युपगतत्वात्तस्यैवायमन्यभेदः। सर्वमिदमज्ञान-प्रतिबद्धमेव जगत् पृथिव्यादि, रूपादिमत्त्वाद्घटादिवत्।

१. वैशेषिकसूत्राणि ३.१.१८

इन्द्रियाण्यपि च तन्मयान्येवाचेतनानि।

तत्करणत्वात्तैः प्रकाशितं स्थूलमङ्गं प्रकाश्यत्वात् प्रतिपद्येत ज्ञः, प्रदीपप्रकाशितघटवत्।

नच परमाण्वादि सूक्ष्मं शुद्धचेतनस्वरूपपुरुषादि वा स्याद-ज्ञानादिप्रतिबद्धम्, तस्यापि चेन्द्रियसन्निकृष्टद्रव्यव्यतिरिक्ता-साधारणस्वरूपादर्शनादिदमिदमिति न निरूपणोपायोऽस्ति, प्रत्येकं समुदाये वा तद्दृष्टानुपपत्तेः, अपूर्वत्वात्।

स्यान्मतमनुभवितुर्बाह्यविषयमिदमिदमिति निरूपणं मा भूयदि न भवति स्वसंवेदनं किन्त्वान्तरं सुखदुःखादिषु किं निरूपणं न भवतीति? उच्यते स्वसंवेदनेनाशनाद्यभ्यवहृतं परिणमयन्न सञ्चेतयतीति व्यभिचारान्न भवति। तथा सुप्तादीनां चलन-कण्डूयनस्फुरणादिक्रियाः कुर्वतामसञ्चेतयमानानामेव ताः क्रियाः दृश्यन्ते, इत्थं कल्पिताकल्पिततथाभूतप्रत्ययानुपपत्तेरज्ञानानुविद्धमेव सर्वं ज्ञानमिति परिच्छेदार्थश्च प्रमाणव्यापारः।

स्यान्मतमज्ञानप्रतिबद्धमित्यज्ञानशब्दोच्चारणादेव ज्ञानाभ्युपगमः कृतो भवति, प्रतिषेधस्याब्राह्मणवदन्यत्र प्रसिद्धविषयत्वात्, अन्यथा प्रतिषेधानुपपत्तेः, स्ववचनविरोधाच्च, तथापि न चाज्ञानमित्युक्ति-विरोधः, राधकपूर्णकमातृव्यपदेशवत्, विशेष्यप्राधान्यादनव-धारणात्, तथा ज्ञानाज्ञानाभ्यां तदेव विशिष्यते वस्त्विति नोक्ति-विरोधो ज्ञानाज्ञानयोरविशेषात्, संशयविपर्ययानध्यवसायनिर्णया-नामवगमावबोधार्थत्वात् अवगमस्य बोधाबोधपर्यायत्वात्तस्मा-देतस्मिन्नयभङ्गेऽज्ञातमेव शब्दस्यार्थः।

यथा चाहुः 'अस्त्यर्थः सर्वशब्दानामि'ति, सत्तामात्रमर्थः सर्वशब्दानाम्, कोऽप्यस्यार्थोऽस्ति, न निरर्थकः शब्दः, स पुनरर्थो न निरूपयितुं शक्योऽयमयमिति, एतत्प्रत्याय्यलक्षणम्, तत्र दृष्टान्तोऽपूर्वदेवतास्वर्गशब्दानामर्था यथा तेषामत्यन्तापरदृष्टत्वादीदृशोऽपूर्वः स्वर्गो देवता वेदृशीति न प्रतिपद्यामहे निरूपणेन तथा गवादिशब्दानामप्यर्थैः तत्समैरेव भवितव्यम्, न हि गमनागमनगर्जनादिष्वर्थव्यवस्था विशेषरूपेति कश्चिदस्त्यर्थ इत्येतावत्प्रतिपत्तव्यम् । एतस्मिन्नेव नयभङ्गे सर्वाणि पदानि वाक्यार्थः, तद्यथा, "देवदत्त! गामभ्याज शुक्लां दण्डेने"त्यत्र परस्पराऽविवेकेन सङ्कीर्णरूपाणि पदान्येकार्थान्यन्वयव्यतिरेकाभ्यामनुगम्यमानं सम्पिण्डितमिवार्थं ब्रूयुर्न पृथग्भूतम्। तस्मात् सर्वाणि पदानि वाक्यार्थः ।

व्यवहारदेशत्वाच्चास्य द्रव्यार्थता *'लौकिकसम उपचारप्रायो विस्तृतार्थो व्यवहार"*[1] इति वचनात्, द्रव्यशब्दो द्रोरवयवो द्रव्यमिति व्युत्पादितः, द्रुः गतिर्यात्रा तस्या अवयव एकदेशः, एकदेशोऽसमस्तवृत्तिरन्यथावृत्तित्वात् ।

सा पुनरस्या विधिवृत्तेरेकदेशवृत्तिता लोकत एव, मृद्घटादिसामान्यविशेषाणामर्थकलापानां परित्याज्यत्वात्, तस्मादन्यदवस्तु, अलौकिकत्वात् खकुसुमवत्, व्यतिरेके घटवदिति दिक् ।

निबन्धनञ्चास्य *'आया भंते नाणे अन्नाणे, गोयमा आयापुण सिय नाणे सिय अन्नाणे नाणे पुण नियमं आया"*[2] इति

विधिभङ्गारो नाम प्रथमो द्रव्यार्थभेदः समाप्तः ।

१. तत्त्वा.अ.१सू.३५ भाष्ये २. भग. १२-श-३-१०

द्वितीयो विधिविध्यरः ।

अयमपि तु विप्रतिषेधादयुक्तः ।

यदुक्तं त्वया सर्वमज्ञानानुविद्धमेव ज्ञानम्, न च ज्ञानाज्ञानयोः कश्चिद्विशेषोऽस्ति संशयविपर्ययानध्यवसायनिर्णयानामवबोधैकार्थत्वान्न लोकतत्त्वं ज्ञातुं शक्यम्, विफलश्च विवेकयत्नः शास्त्रेष्विति, तद्यदि लोकतत्त्वमज्ञेयमेव सर्वशास्त्रविहितलोकतत्त्वव्यावर्त्तनं तर्ह्यप्रत्ययमेव, अशक्यप्राप्यफलत्वाभ्याम्, प्रतिषेध्यस्वरूपज्ञानविषयत्वाच्च ।

प्रतिषेध्यं ज्ञायते तैस्तस्य बहुधा कल्पितस्यानुपपत्तेरित्येतदपि विप्रतिषिद्धम्, तेषामपि मतानां लोकतत्त्वान्तःपातिनां मिथ्याविधिकत्वं ज्ञातमज्ञातं वा स्यादिति तुल्यविकल्पत्वात् ज्ञाताज्ञातयोश्च तद्दोषाविमोक्षात् । यदप्युक्तमनर्थको विवेकयत्नः शास्त्रेष्विति, तत्रापि विप्रतिषेधात्तज्ज्ञानमफलमेव किमिति शास्त्रविहितार्थप्रतिषेधप्रयासः? ।

क्रियोपदेशन्याय्यत्वाभ्युपगमोऽपि चैवं विघटेत, संसेव्यविषयस्वतत्त्वानुपातिपरिणामविज्ञानविरहितत्वात्, अज्ञातवैविध्य-

वस्तुतत्त्वपरिणामवदवैद्यौषधोपदेशव'दग्निहोत्रं जुहुयात् स्वर्गकाम' इत्याद्युपदेशो बालकादिग्रहणवत् ।

उपदेशादेव न ज्ञानयोग इति चेदयुक्तम्, उभयथाऽपि पौरुषेयत्वाद्भारतरामायणादिवदप्रामाण्यम्, अग्निहोत्राद्युपदेशस्याती न्द्रियार्थस्य प्रामाण्यवत् साङ्ग्याद्यतीन्द्रियार्थोपदेशप्रामाण्यं वा ।

वानरमूलिकादिपरिज्ञानवत्तद्विषयं तज्ज्ञानं स्यात् सर्वौषधादि-विषयैकपुरुषविज्ञानवदतीन्द्रियग्राह्यसर्वपदार्थविषयैकपुरुषविज्ञाना-भ्युपगमो वाऽवश्यम्भावी, वेदवचनयोरन्यथाऽनुपपत्तेः ।

उपदेशाप्रसिद्धिरपि चैवं भवतः, सर्वस्योपदेशस्य साङ्ग्या-द्युपदेशवल्लोकतत्त्वान्वेषणादृते सम्भवाभावात् ।

अथ लोकतः तत्त्वान्वेषणपराणां तेषामुपदेशानां शक्य-प्राप्तर्थोपदेशसाफल्ये शक्ये ते कः पराभ्युपगमे प्रद्वेषः? लोक-तत्त्वान्वेषणपरत्वानतिवृत्तौ तर्कशास्त्रविचारविज्ञानसाफल्यं वा ।

उपदेशाप्रसिद्धौ परीक्षकत्वहानिः, पदवाक्यप्रमाणविषया-व्यभिचारज्ञानार्थत्वात् परीक्षायाः । स च त्वन्मतेनैवैवं नावतिष्ठते, लोकतत्त्वान्वेषणानात्मकत्वात् ।

स्यान्मतं पदवाक्यप्रमाणानामपि सामान्यविशेषादिघटादि-जगत्तत्त्वविचारवदव्यवस्थैव, प्रमाणानामपि प्रमाणान्तराधि-गम्यत्वेऽनवस्थादोषप्रसङ्गादित्यत्रोच्यते प्रमाणानवस्था तावन्नास्ति चन्द्रार्कमणिप्रदीपादिवत् स्वपरावभासित्वात् प्रमाणानाम्, तस्यापि

त्वनवस्थाने क्रियाविधाय्यपि शास्त्रं नावतिष्ठेत तस्यापि लोक-तत्त्वान्वेषणात्मकत्वानतिवृत्तेरप्रमाणादिति तत्प्राप्यपुण्याद्यभावः।

यथा'ऽग्निहोत्रं जुहुयात् स्वर्गकाम' इति, इदं तु पुनः किं विधिरनुवादोऽर्थवादः? उच्यते, विधिः, अप्रसिद्धार्थविषय-विधायित्वात्, अत्राप्रसिद्धमग्निसम्प्रदानं हवनं विधीयत इत्युपायस्यापूर्वत्वात्तदभिव्यङ्ग्यापूर्वाभावः, त्वन्मतादेवोक्तवत्।

अतश्च तस्य विधेरसंव्यवहार्यत्वात्तद्विहितक्रियाफलसम्बन्धा-भावः, आरोग्यार्थिडित्थभक्षणोक्तिवत्, एवं त्वदुक्तिक्रिये अशक्य-प्राप्त्यनर्थे चेति सांख्यादिविवेकयत्नतुल्यत्वं तवापि।

अथोच्येत मा मंस्थाः साङ्ग्यादितुल्यत्वमेतस्य, वैधर्म्यात् कर्त्तव्यतां विधायेतिकर्त्तव्यताविधानात्, तद्यथा अग्निष्टोमादि-संस्थानविशेषैर्द्रव्यगुणदेवताकर्तृकर्मकालदेशादिविशेषैश्च 'वसन्ते ब्राह्मणो यजेत ग्रीष्मे राजन्यः शरदि वा यजेत वैश्यः, 'होलाको प्राज्ञ उद्भृषभयज्ञ उदीच्यै'र्वायव्यं श्वेतमालभेत भूतिकामो वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयती'त्यादि त्वया प्रतिपत्तव्यमिति शिष्यमनुशास्ति तत उत्तर-कालमेवं प्रकारमेवाग्निहोत्रं नामकर्म भवति, विशेषविधानार्थप्रति-पत्तिबलेन च सुसिद्धा भविष्यति तस्य शिष्यता इतरार्थाविचारेणेति।

ननु चैवमप्यग्निहोत्रादिविषयकर्त्तव्यताप्रतिपत्तिः प्रतिपत्ति-त्वाल्लौकिककर्त्तव्यताद्यर्थतत्त्वानुसृतेरेव भवितुमर्हति, अन्यथा नारिकेलद्वीपजातवृद्धस्य धेनुप्रतिपत्त्यभाववत्सा स्यात् कर्त्तव्यता-

विधानानन्तरञ्चेतिकर्त्तव्यतावसरः तदुभयमलौकिकत्वादग्निहोत्र-
सामान्यस्याग्निष्टोमादिविशेषस्य द्रव्यमन्त्रदेवताऽग्नियमाद्यात्-
मनश्चाप्रसिद्धेरयुक्तम्।

यथा घटादिकर्त्तव्यतायां विहितायां घटं कुर्विति ततः पुनरिति कर्त्तव्यताक्रम एवम् मृत्पिण्डं चक्रमूर्धनि संस्थाप्य दण्डेन भ्रमयित्वा द्वाभ्यां पाणिभ्यां शिवकाद्याकारविशेषान् क्रमेण निर्वर्त्तयेरिति प्रसिद्धकर्त्तव्यताविधानोत्तरकालं प्रसिद्धेतिकर्त्तव्यताविधानं घटादि-विषयमुपपन्नम्, प्रसिद्धार्थत्वान्न त्वग्निहोत्रकर्त्तव्यतायाः पशुवधादीति कर्त्तव्यतायाश्च प्रसिद्धिः, अप्रसिद्धार्थत्वादग्निहोत्रशब्दस्य, न तु घटवदग्निहोत्रशब्दः काञ्चिदपि कर्त्तव्यतां ब्रवीति।

जुहुयादित्ययं तर्हि ब्रवीति हवनकर्त्तव्यतामिति, एवमपि तदवस्थम्, विविक्तार्थवाचित्वाभिमतानां शब्दानां पदार्थान्तरा-वृत्तेः, जुहोतेर्हि धातोरयं प्रत्यय उत्पन्नः स तत्कर्त्तव्यतां हित्वा पदान्तरकर्तव्यतायां कथं प्रवर्त्तेत?

अथ तदेव तदिति, एतत्तावदनयोरैकार्थ्यं प्रसिद्धिविरुद्धं, पौनरुक्त्यपरिहारार्थं जुहुयादित्येवास्तु किमग्निहोत्रमित्यनेन?

पदान्तरकर्त्तव्यतायां तावद्भवनं पदान्तरकर्त्तव्यतामपेक्षते वाक्यन्यायेन, भेदसंसर्गाभ्यां परस्पराकाङ्क्षया पदान्तरार्थे वर्त्तते पदम्, यथा सब्रह्मचारिणा सहाधीत इत्युक्ते येन समानो ब्रह्मचारी तेन सब्रह्मचारिणा य एवाधीते तेनैव समान इत्याकाङ्क्षा भवति। ननु यथा पदार्थे परिच्छिन्ने न पदार्थान्तरमपेक्ष्यते पदेन तथा घटवदग्नि-होत्रशब्दोऽप्यर्थवत्त्वमपेक्षते न चेदेवं ततोऽग्निहोत्रशब्दः प्रमादाधीन

आपद्येत तत एवं वचनव्यक्तिर्भवति अग्निहोत्राख्यं हवनं कुर्यात् घटवदिति।

एतदयुक्तं दृष्टान्तवैषम्यादर्थभेदासिद्धेः, न हि किञ्चिदग्निहोत्रं नाम घटवत् प्रसिद्धं यदनूद्योच्येत, न हि साधर्म्येण यदग्निहोत्रसंज्ञकं हवनं तत्कुर्यादित्यग्निहोत्रहवनयोरैक्येन तद्विषयं करणमनुविधीयेत, नापि वैधर्म्येण हवनं यत्कुर्यादिति हवनक्रियामनूद्य तदग्निहोत्राख्यमित्यैक्येन विधानं युज्येत, परेणाग्निहोत्रस्य हवनस्य वाऽविहितत्वादत एव तूभयमप्यशक्यम्, विशेषणं विशेष्यं च, प्रधानमुपसर्जनञ्च, विधिरनुवादश्च, शेषः शेषी च, उत्सर्गोऽपवादश्चान्यतरस्याप्यर्थाप्रतीतेः, यदि विशेष्येणैव विशेषणीयं हवनं कुर्यात्तच्चाग्निहोत्रसंज्ञकमिति, अग्निहोत्रं वा हवनमिति तच्च नैवं शक्यमप्रसिद्धार्थत्वात्।

अनुवादविधिविषयत्वे वाक्यभेदापत्तेः।

नापि घटादिकर्त्तव्यतेव काचिदग्निहोत्रकर्त्तव्यता नाम प्रोक्षणबर्हिरास्तरणाज्यप्रक्षेपाद्युपक्रमात्मिका मन्त्रपूर्वक्रिया क्रमवती प्रसिद्धा याऽग्निहोत्राख्यता हवनस्यातिदिश्येत, हवनाख्यता वाऽग्निहोत्रस्य।

अथ पुनरुच्येत नैव हवनं कुर्यादित्युच्यते किं तर्हि? अग्निहोत्रं कुर्यादित्याश्रीयते जुहुयादित्ययं कुर्यादर्थ एव, अग्निहोत्रशब्देन तु तद्विशेषभूतो जुहोतेरर्थोऽभिहित एव तस्मादग्निहोत्रं कुर्यादित्ययमर्थ इति।

एवमपि कर्त्तृप्रत्ययान्तकृञ्दर्शनेन जुहोत्यर्थत्यागोऽर्थभेदश्च, कर्त्तृविशिष्टक्रियासामान्यमात्रवाचित्वाभ्युपगमात्, जुहोतेश्च क्रियाविशेषत्वात्, जुहुयाच्छब्दोऽपि होत्रशब्दार्थं होत्रशब्दोऽपि जुहुयाच्छब्दार्थं ब्रवीतीति नामाख्यातयोः प्रत्येकं द्वयर्थवृत्तित्वादभेदश्चेत्येवं शब्दार्थसङ्करः प्रसिद्धिविरोधश्च जुहोत्यर्थत्यागवत्सर्वधात्वर्थविशेषत्यागस्तत्तश्च तत्त्यागापत्तिरपि विशेषाभावे निराश्रयस्य सामान्यस्याभावात् ।

आसन्नश्रुताग्निहोत्रकर्त्तव्यत्वान्नेति चेन्न, आसन्नतरश्रुतजुहोत्यर्थत्यागात् पदान्तरार्थे कथं वर्तेत?

परपदार्थविधानेऽपि च पदान्तरपरिश्रुतहोत्रमात्रवृत्तत्वाज्जुहुयादर्थमात्रमेवेति कुर्यादर्थोपादानम भेदकम् ।

मात्रग्रहणासिद्धिः, अग्निपदविशिष्टसमासत्वादित्येतच्चायुक्तम्, तिङ्प्रत्ययार्थैकीभूतप्रकृत्यर्थत्वात्, यथा प्रलम्बतेऽध्यागच्छतीति ।

कुम्भकारवत् काण्डलाववत् समासत्वात् कुम्भकारवदेव विशिष्टार्थत्वमिति चेत्तदपि नोपपद्यते । अग्निसमासत्वात्, न ह्यस्त्यग्निशब्दस्य होत्रशब्देन तिङ्प्रत्ययार्थसाकाङ्क्षेण समासः, तिङन्तेन 'अस्तिक्षीरा' 'अश्नीतपिबता'दिषु समासदर्शनाददोष इति चेन्न परिगणितेभ्योऽन्यत्राभावात् तिङन्तप्रतिरूपकनिपातेषूपात्तत्वाच्च तेषाम् ।

सामर्थ्याभावाच्च समासानुपपत्तिः, 'समर्थः पदविधिः'[१] इत्यधिकारात् । असामर्थ्यञ्च सापेक्षत्वात् । ननु प्रधानत्वाद्भवति

१. पाणिनि २.१.१

समासः, न, न चात्राग्निशब्दस्य होत्रशब्दस्य वा प्राधान्यमस्ति, कुर्यात् जुहुयादिति तिङन्तस्य क्रियावाचिनः प्राधान्यात् । अपशब्दश्चायमस्मिन्नर्थे ।

त्यक्तजुहोतिकर्त्रर्थग्रहे तु निःक्रियाकर्तृत्वात् कुर्यादर्थाभावः ।

जुहोतिप्रयोगासत्त्वश्च, त्याज्यत्वात्, व्याधिवत् ।

क्रियानामस्ववृत्तित्यागोपादानाभ्यां धातुप्रातिपदिकभेदोऽपि न, पदभेद एव सः पदान्तरविषयत्वात् ।

एवञ्च श्रुतेर्याऽसौ प्रतिपत्तिस्तस्या अभावोऽन्यथाऽर्थाधिगतेः, स्वप्रत्युपेक्षानुमानेन च तत्त्यागात् कर्त्राद्यर्थप्रतिपत्तिवशेन शब्दार्थावस्थापनात्तु पुरुषस्य ज्ञानमेव प्रमाणीकृतमतस्ते वादावसानं निग्रहस्थानम्, एष चेतरत्राप्यर्थव्याख्याने भवति ।

एवं तर्हि यथाश्रुत्यग्निहोत्रवद्धवनमपि ग्रहीष्यते, अत्रोच्यते नन्वर्थद्वयविधानमशक्यमेकेन वाक्येनाग्निसम्प्रदानकस्य कर्मभूतस्य हवनस्य तद्विशिष्टस्य च कर्तृकत्वस्य ।

नैव हवनं विधीयते किन्त्वग्निहोत्रशब्देन विहितं हवनमनूद्यते विध्यनुवादयोर्भिन्नलक्षणत्वात् प्राप्तमनूद्यते वाक्यान्तरेण, अप्राप्तञ्च विधीयत इत्यत्रोच्यते, नानुवादो हवनस्य युज्यते न हि प्राप्तिरस्ति हवनस्याविहितत्वात् । अस्ति प्राप्तिर्हवनस्य, अग्निहोत्रस्य हवनत्वात्, यदग्निहोत्रं हवनमेतदिति, पुनरुक्तं तर्ह्येवम्, एतच्च नानुवाद उन्मत्तवाक्यवत् ।

विधिविहितस्य ह्यनुवदनमनुवाद इति तदत्र न घटते अग्निहोत्र हवनविधेयत्वादनुवादायोग्यता, अथ विधानं वाऽनुवादो वा यथाकथञ्चित् स्यात् ततः पुनरुक्तदोषाभाव एव स्यात्, इष्यते च पौनरुक्त्यं शब्दतोऽर्थतश्च, उक्तार्थशब्दार्थकथनमविशेषेण पुनरुक्तमन्यत्रानुवादादरादिभ्य इति पौनरुक्त्यभावादिदं जुहुयादिति पदमनुवादाक्षमं विधीयमानत्वादाख्यायमानपण्डितत्ववत् ।

तथा जुहुयादित्येतदपि नानुवादोऽपूर्वोपदेशत्वादनुवादवैधर्म्याच्च तल्लक्षणाभावात् विहितमेव त्वनूद्यते विशेषविधानार्थं यथा पटुर्देवदत्तः पयसैनं भोजयेति । यत्र न विशेषो विधीयते मौलविधिरेव सः, एवं तर्हि विशेषविधानादनुवादोऽस्तु तद्वदिति चेत्तन्न, न चात्र कश्चित् जुहोतेः पुनर्वचनेन विशेषो जन्यते ततश्च प्राक्तनमेव सञ्जातम् । एवं यां तां गतिं गत्वा सर्वथा 'ऽग्निहोत्रं जुहुयादि'त्यस्मिन् वाक्येऽग्निहोत्रकर्मण्येवान्तर्भावितहवने जुहुयाच्छब्दप्रकृत्यर्थे किमति-रिच्यते? पौनरुक्त्यदोषव्यपेतो विधिलिङ् कर्त्तर्यास्ते, अग्निहोत्रं कुर्यात्, अग्निहोत्रं जुहुयादित्येतयोर्वाक्यार्थविकल्पयोरुक्तदोषत्वात् ।

अथोच्येत विधिलिङ्प्रत्ययार्थेऽवश्यवाच्ये प्रकृतिपरव्यवस्थाया आवश्यके प्रकृत्युपादाने वरमासन्ना प्रकृतिरुपात्ता, अर्थः पुनरस्या न विवक्ष्यते गतार्थत्वादिति, एवं चेत्तर्हि वरं वरं सहायकं ददामि बुद्धेः, कर्तृप्रत्ययार्थसमर्था प्रत्यासन्नतराऽविवक्षितार्था कृञ्प्रकृतिः किं नोपात्ता वचनस्योपात्तार्थप्रत्यायनार्थत्वात् । अतोऽग्निहोत्रं कुर्यादित्येवास्तु ।

त्वयैव समर्थितत्वादेवमेवास्तु, स्यादेवं यदि सापि चार्थस्थितिर्निर्दोषा स्यात् सापि चापक्षिप्तवाच्यार्थस्थितिरुक्तवत्।

एवं तावन्न्यायेन परीक्ष्यमाणमेतद्वाक्यं न युज्यते पुरुषतर्कलक्षणेन, यद्यपि पुरुषतर्कलक्षणं न्यायमतिलङ्घ्यापौरुषेयो नित्यो वेदाख्यः क्रियोपदेशः पुरुषगतरागादिदोषाऽऽशङ्काहेतुविनिर्मुक्तः प्रमाणं तथापप तद्वचनादेवास्मिंस्तु न्यायेऽतिलङ्घ्यमाने क्रियोपदेशवादोऽपि तत्त्ववादवदेव त्यक्तः स्यात्, तत्रापि यदृच्छाभ्युपगमात्।

अथ इदमापन्नं को वा तद्वेदाग्निहोत्रं जुहुयात् स्वर्गकाम इत्येतद्वाक्यं सार्थकं निरर्थकं वेति? बालप्रलापवत्, यथाहि बालैः अनियतक्रियाकारकैरसम्बद्धमुक्तं, बुद्धिपूर्वत्वाज्ज्ञातुमशक्यं, केनार्थेनार्थप्रत्यायनार्थमिदमिति, व्यवस्थापेतत्वात्, किं वाऽनेन ज्ञातेन? यदेतज्ज्ञा एवमुक्तवन्तोऽग्निहोत्रं जुहुयादिति वाक्यमव्यक्तम्, अव्यक्तज्ञाना एव हि ते पुरुषत्वादविद्यायोगाच्च दश दाडिमादिश्लोकवादिवत्।

विफलोऽयं प्रयासस्ते अनभ्युपगमात्, अथवा को वाऽऽह ज्ञवचनमेतदिति, ज्ञस्य प्रमाणभूतस्याभावाच्छब्दस्यैव च निर्दोषत्वादिति तन्न, यदि संशयादियोगान्न ज्ञः प्रमाणं तर्हीदमज्ञोक्तत्वादुन्मत्त वाक्यवदिति क्रियोपदेशसाफल्यवादः क्व गच्छतीति चिन्त्यताम्।

अथाऽऽचक्षीथाः काष्ठशब्दवत्सर्वमचेतनं तथाप्यचेतनत्वात् कुतोऽस्य प्रामाण्यमाकाशवत् कुतोऽस्य वचनम्? यच्छब्द आह तन्नः

प्रमाणमितीष्टं भवताम्, अज्ञोदीरितत्वादेव च वचनत्वमस्य नास्ति, वाच्यार्थप्रतिपादनाभिसन्धिपूर्वकं हि तत् । काष्ठशब्दवदित्थं न घटते वेदवाक्यप्रामाण्यम् ।

यदुक्तं प्राक् को वा ह ज्ञवचनमेतदिति न ब्रूमः सर्ववक्तृवचनाप्रामाण्यमिति, किन्तर्हि? सर्वज्ञवीतरागाद्यभावाद्ग्रन्थस्य सर्वभावस्वभावविषयस्य कर्त्तुरप्रामाण्यं न तु वक्तुरनादिनिधनस्य वक्तृपरम्परागतस्य वचनस्य च, क्वचित्प्रामाण्यादित्यत्रोच्यते, आदि वक्तृवच्चोत्तरवक्तुर्यपि धातुकमंत्रादिवद्वचनानाश्वासतुल्यतेत्यलमतिप्रसङ्गिन्या कथया ।

अविवक्षितार्थाया नान्तरीयकत्वात् प्रकृतेः प्रयोगो जुहुयाच्छब्दस्येत्येतदपि न न्याय्यं क्वचिच्च सार्थकयोरेव स्वार्थाविविक्षा न्याय्या नानर्थकस्यैव, यथा नक्षत्रं दृष्ट्वा वाचो विसृजन्ति, कतरद्देवदत्तस्य गृहम्? अदो यत्रासौ काक इति तथा तयोर्नार्थवत्त्वेन दृष्टयोस्तदविवक्षया सार्थकत्वं दृष्टम्, प्रयुक्तस्यानर्थकत्वाभावप्रसङ्गात् ।

उपलक्षणादिप्रयोजनायां विशेषविवक्षायां किमनयाऽविवक्षविवक्षयेत्येतदयुक्तम्, विवक्षाविवक्षयोरनियमेन शब्दप्रवृत्तौ सत्यामप्रयोजनायाश्चाविवक्षायामग्र्याद्यविवक्षाभावे विशेषहेतुर्वाच्यः ।

युक्ततरा तु तदविवक्षा, वक्ष्यमाणन्यायदर्शनात्, अर्थतत्त्वतन्त्रत्वात्तस्याः ।

एवं तावद्दोषान्तराभिधानमपि, अप्रत्यायकत्वमस्य वाक्यस्य, अप्रत्यवेक्षितार्थयाथातथ्योक्तेर्बालप्रलापवदनुपदेशत्वम् ।

त्वदभिप्रायवदग्निहोत्रं हवनं कुर्यादित्येतस्मिन्नर्थे हवनानुवादेन विशिष्टेऽग्निहोत्रे तस्य कर्मणः परपरिकल्पिताऽऽत्मादिवदलौकिकत्वादप्रसिद्धस्वरूपत्वात् करणासिद्धिः।

अथोच्येत विध्यन्तरविधानशैल्या तत्सिद्धिः, यथा 'यूपं छिनत्ती'त्यादि पूर्वं विधाय पश्चात् पालाशमष्टास्रमित्यादीनीति, एतदपि न, वैषम्यात्, न हि सछेदनक्रियाकाल एव यूपः, किं तर्हि? संस्कृतः सन् भविष्यति यूपः इत्थंस्वरूपस्य तस्य काष्ठस्य तदा यूपत्वं नामतो युक्तम्, न पुनरग्निहोत्रस्य तदैव सतः संस्कारनिरपेक्षस्य।

ननु वत्सो दत्तक इत्यादि यावत् स्थूणेन्द्र उच्यते तादर्थ्यात्, एवं यूपार्थं दारु यूपस्तत्कालत्वादत्रोच्यते, छेदनस्य संस्कारता न विहिता स्यात्, यूपस्य निर्वृत्तत्वात् तस्यामसत्याञ्छिदिरविवक्षितार्थः स्यात् तस्माद्यावदेव यूपं स्वीकरोति तावदेव छिनत्तीत्युक्तं भवति, छिनत्तेः संस्कारार्थरहितत्वात्, अदृष्टार्थो वा।

अत इयं या तत्र भावना यूपं छिनत्ति छेदनेन यूपं स्वीकरोतीति तत्र न छेदनमेवावधार्यते अष्टास्रकरणादीनामसंस्कारत्वप्रसङ्गात्, किन्तु स्वीकरोत्येवेत्यवधार्यते सेह हवनविधिवाक्येन न शक्याऽऽश्रयितुम्, अवधारणासम्भवाद्धवनेनाग्निहोत्रं करोतीति हवनाद्यन्यस्याग्निहोत्रस्याभावात्।

तस्याग्निहोत्रस्याप्रसिद्धस्य क्रियाकलापाभिमतार्थनामधेयमात्रत्वात् प्रसिद्धयूपद्रव्यछेदनादिवैषम्यम्।

शैलीप्रामाण्ये चास्य शैल्या यूपक्रियाऽयाथार्थ्यात् तत्सिद्धिर-युक्तैव।

ननु सेवादिवत् क्रियामात्रत्वादितिकर्त्तव्यताभ्यः प्रतिपत्तिस्तन्न, भजनार्थसेवायाः ज्ञातत्वे तासां सेवार्थत्वात् अज्ञातत्वे तदर्थाप्रतिपादनात्, न त्वेवमग्निहोत्रावयवक्रियाः ज्ञाताः अवश्यञ्चैत देवमितरथा प्रतिक्रियं पृथक्त्वापत्तेः।

नात्रापि हवनादीनां दानाद्यर्थत्वाद्वैषम्यम्, उत्तरक्रियामात्रत्वाच्चैतदपि न, लोकविदितदानाद्यर्थानुबद्धेतिकर्त्तव्यतामात्रार्थतापत्तेः, न चैतदिष्टं दृष्टं वा, अग्निसम्प्रदानत्वविरोधात्।

यदि चाग्नय इति सम्प्रदानविशेषो लौकिक एव, ननु लौकिक एव गृह्यमाण इत्याद्युक्तदर्शनवदनर्थकः । नैवं सा तदाभत्वात्, अदानात्मकत्वात्, यथा बालरमणकादिक्रियायामन्योऽन्यदान-भोजनादिक्रियाः । प्रधानादिवादसाधुता वा, प्रसिद्धिविपरीततत्त्व-स्थितार्थत्वात्, वेदवादासाधुता वा तेषां स्यात्।

अथाऽग्निहोत्रमित्यस्यापूर्वविशेषाभिधानार्थतैव कल्प्येत तथा सत्यपूर्वाभिधाने कोऽर्थः कृतः स्यात्?

यः स्वर्गकामः स हवनेनेतिकर्त्तव्यताविशेषेण स्वर्गं भावयेदिति कृतः स्यात्, न, विद्यापर्यायतत्त्वज्ञानोत्पादनार्थत्वाद-विद्यानिराकरणार्थत्वाच्च शब्दप्रयोगः, तेन किमूनीकृतं? यावदेवोक्तं भवति यः स्वर्गं कामयते स जुहुयादिति तावदुक्तं भवत्यपूर्वं

जुहुयात्स्वर्गकाम इति, ततो भावनस्य गतार्थत्वान्नार्थः कश्चिदग्निहोत्रमित्यनेन। प्रसिद्धिविरुद्धा चेयं कल्पना तस्य तदर्थाभावात्।

निरूपणवैधर्म्यात्, न च स प्रत्यक्षोऽपूर्वो यतस्तेन निरूपणमारभ्येत।

अथोच्येत अस्यास्तावत्प्राप्तेः वाक्यान्तरप्रापिता प्रसिद्धिर्भविष्यत्यग्नये होत्रमग्निहोत्रमिति, वाक्यान्तरानुबन्धाच्चेतिकर्त्तव्यताप्रसिद्धेः।

न तर्हि पुनर्जुहुयादिति वाच्यं स्यात्, अग्निहोत्रशब्देनैवाग्नि प्राजापत्यादिसम्प्रदानजुहोतीत्यादीतिकर्त्तव्यताद्युक्तार्थत्वात् पुनरपि स एव दोषप्रपञ्च उपस्थितः।

अपि चैवमत्रापि पुरुषप्रमाणकवादापत्तिः, उत्तरोत्तरविरोधपरिहारविचारप्राप्यार्थपरिग्रहात्तर्क आश्रितो भवति सामान्याद्यर्थैकान्तवदेव, स च दोषत्रयादप्रतिपूर्णः पौनरुक्त्यादेरसत्कार्याभ्युपगमात् पुनस्तत्त्यागाच्च।

एकावस्थामात्रविच्छिन्नपूर्वापरत्वाद्यादिभिन्नवस्तुत्वाभिनिवेशविधानाच्च हवनक्रियानुष्ठानं तत्फलाभिमतः स्वर्गस्तयोश्च सम्बन्ध इति परस्परं विघटितत्वान्नोपपद्येत, कारणे कार्यस्यासत्त्वैकान्ताभ्युपगमात्।

सर्वगतसत्कार्यकारणवृत्तित्वेन भेदविधिनिर्विषयत्वादतः सर्व-वस्तुसन्निधिसद्भूताऽपि सा भेदसाधनसम्बन्धाभिनिर्वर्त्त्येति

विधीयते तदन्वनुष्ठात्रापि तदुपदिष्टभेदसाधननिष्पाद्यत्वेनाभ्युपगम्य यथाभागकारकविन्यासात्मकेतिकर्त्तव्यतयाऽनुष्ठीयतेऽतोऽसौ प्राङ्-नासीदित्याश्रिता, -कार्यत्वेन परिगृहीतत्वात् कुर्याज्जुहुयादित्यादि-वचनाद्विशेषैकान्तवस्तुवत्, एवमनेन तर्केणासत्कार्यवादोऽभ्यु-पगतस्त्वया, स चाप्रतिपूर्णः, असिद्धहेतुकत्वात् प्रतितर्केण बाध्यत्वाच्च ।

नतु तत्त्वमेव वस्तुनोऽसत्कार्यत्वं व्यङ्ग्यत्वात्, व्यङ्ग्या हि सा क्रिया, न कार्या, अविवक्षितप्रत्येकसमुदितघृतादिद्रव्यधर्मत्वेना-भिव्यक्तेः पिण्डकालघटवत्, शुक्रशोणितावस्थायामिव वा देवदत्त-स्तदवस्थाविशेषान्तरत्वे सत्युत्तरकालमुपलभ्यत्वात्, कार्यत्वादेव वा प्रकाश्यघटवदभिव्यञ्जनस्यैव कार्यत्वाख्यत्वात्, एवं तर्हि सत्त्व-रजस्तमसां साम्यवैषम्यवद्व्यक्ताव्यक्तता एककारणत्वस्य बाधिका स्यादिति चेन्न, तत्त्व एवान्यथाभूतेर्नाव्यक्तता नाम काचिदस्ति घटस्वात्मवत् ।

घटस्वात्मवदित्ययं दृष्टान्त उपपद्यते, मृत्पिण्डकालघटवदिति तु न युज्यते तत्त्व एवान्यथाभावात्, पिण्डानन्तरं हि शिवको भवति न घटो न स्तूपकुछत्रकस्थालककोशककुशूलका इति, अत्रोच्यते तुल्यप्रत्यासत्तित्वात्, मृत्पिण्डघटवत् पिण्डावस्थायामेव घटस्य भावात् ।

अत एव कारणमात्रमसौ, तदात्मत्वात्तन्निर्वृत्तत्वाच्च, घटमृत्त्व -वदेवञ्चाप्रतिपूर्णस्तर्कः, स्वयमेव त्वया परित्यक्तत्वाच्च, एकान्त-वादस्वाभाव्यात्, पूर्वोक्तमृषात्ववादवत् ।

इतिकर्त्तव्यताकर्तव्यताभ्युपगमात्तु पूर्वोत्तरावस्थानुबन्धात् कारणमेव कार्यम्, सर्पस्फटाटोपमुकुलप्रसारणकुण्डलीकरणवत् यज्ञोपवीतसूत्रतन्तुपटत्ववद्वा संस्थानमात्रभिन्नस्य कारणस्यैव कार्यत्वमित्यभ्युपगम आपद्यत इति कार्यस्य त्यागः कुर्यादिति, स्वशब्दार्थापत्तिविषयविपरीतार्थत्वाद्विवक्षाभेदव्याघातः स च त्वया तत्त्वानपेक्षणदोषान्नेक्ष्यते।

एवं कारणात्मकत्वेऽभ्युपगतेऽपि यदीतिकर्त्तव्यता जनयतीतीष्यते ततो न सा कर्त्तव्यता काचिदस्तीति सा तज्जन्या न भवति, जनकत्वात् कारणत्वात् पूर्वत्वाद्विधायकत्वान्मातृवद्वचनवत्।

अथ जन्या सा, एवं तर्हि न जनिका न कारणे जन्यत्वादित्यजनकत्वात् कार्यत्वात् अपूर्वत्वात् विधेयत्वात् पुत्रादिवत्।

कारणमात्रत्वे सति कर्त्तव्यता प्रतीतिकर्त्तव्यतां परिसमाप्ता वा स्यादपरिसमाप्ता वा? तत्र यदि प्रत्येकमितिकर्त्तव्यतासु कर्त्तव्यता परिसमाप्ता ततः प्रतीतिकर्त्तव्यतासमाप्तेरितिकर्त्तव्यतान्तरानारम्भः, अनारम्भ एव वा तस्या अपि, कारणमात्रत्वात्। कर्त्तव्यतायाः प्रत्येकमसमाप्तौ च कारणाभावादतथा तावत् समुदायस्यापि च तन्मात्रत्वादुक्तवत्।

अभिमतविध्यनुवादवैपरीत्यदोषप्रसङ्गश्च, अनुवादकता च घृतादेः कारणमात्रवृत्तित्वाद्भवनवत्, घृतादिवद्भवनस्य वा विधायकता, एवञ्च न विधिर्नानुवादो वाऽस्ति, अतोऽवाक्यत्वम्, अनुवादविधायकत्वाद्विच्छिन्नार्थपदवत्, काकरुतवद्वा।

ज्ञाताज्ञातविशेषाच्चैवं पदवाक्यशब्दानां घटज्ञानवत् साधुता-साधुते न घटेते, अर्थान्तराभावात् ज्ञाताज्ञातालम्बनविध्यनुवादार्थयुगपद्विवक्षावृत्तिवाक्यभेददोषपरिकल्पनापरिश्लथता, व्यर्थैवं साधुत्वासाधुत्वाभ्याम्, एकार्थत्वाद्घटकुटवत् ।

इदञ्चाज्ञातमपि सत्त्वया तत्त्वमेवैवं विवेक्तारं प्रति प्रदर्शितं घुणाक्षरवत् ।

अथोच्येत कारणमात्रकार्यदर्शनमिह सदपि निर्मूलापविद्ध-क्रियावाक्यप्रबन्धं कार्यासत्त्वमेवात्र विवक्ष्यते, अलब्धवृत्तित्वात्, खपुष्पवत्, अतोऽसत्कार्यमागृह्य स्वर्गादिप्राप्त्यर्थं क्रियाऽऽश्रीयतेऽग्नि-होत्रं कुर्यादिति । तद्विविधमनितिकर्तव्यतात्मकमितिकर्तव्यतात्मकञ्च तत्रानितिकर्त्तव्यतात्मकं च कार्यं घटादि यूपादि लोके वेदे च दृष्टमितिकर्त्तव्यतात्मकं न भवति तदुपरमेऽपि पृथगुपलब्धेः, इतिकर्त्तव्यतात्मकन्तु प्राप्तिसंवादि यथा सेवादि, तत्कार्यं न कारणमात्रं घटादियूपादिवत् । घटं कुर्यादिति प्रतिपादितासत्कार्यार्थवाक्यवत् कुर्याच्छब्दप्रतिपादितमिदमपि वाक्यं स्फुटतरासत्कार्यार्थम्, आदौ मध्येऽन्ते च कर्त्तव्यताभ्युपगमात् । अतोऽसत्कार्यवादस्यैवाभ्युपगतत्वाद्यदुच्यते त्वया दोषजातं तत् त्वद्वचनच्छलादिति ।

एतदपि नोपपद्यते विधिविधिनयदर्शनोपपादयिष्यमाणकारणमात्रत्ववादात् । अभ्युपेत्यापि नैवास्य वाक्यता इतिकर्त्तव्यतावाक्यासिद्धौ तदसिद्धेः, तदवाक्यत्वे तद्बलप्रतिष्ठाप्यकर्त्तव्यतावाक्यमप्यवाक्यम्, जुहुयादित्यस्योक्तवदेवेतिकर्त्तव्यतावाक्यप्रत्ययापि न कर्त्तव्यतागतिः ।

केदमभिहितं जुहुयादिति हवनमनूद्य घृतादिना तद्विधानं क्रियत इति, तद्धि न प्रसिद्धम्, कथं न प्रसिद्धमग्निहोत्रं जुहुयादित्यत्र हवनस्योक्तत्वादिति चेन्न तस्यैव सर्वप्रयोगपरीक्षायामर्थाभावात् तत्र तावद्धवनापूर्वकरणार्थतायां प्रधानाग्निहोत्र श्रुतित्यागाद्यापत्तिः।

अग्निहोत्रोभयकरणार्थतयोरपि विकल्पयोस्तुल्योत्तरत्वात्।

शैलीप्रसिद्धौ छिदिवदनग्निहोत्रत्वं प्रसक्तं ततश्च यदग्नये होत्रं तदग्निहोत्रमिति तावन्मात्रार्थत्वात् प्रधानस्य स्वर्गसाधनताभिमतस्यानग्निहोत्रत्वाद्धृतेन जुहुयादित्यनेन प्रधानस्वर्गकामानभिसम्बद्धजुहोत्यर्थानुवादेन किं प्रयोजनमितिकर्त्तव्यताकर्त्तव्यतया?

प्राप्तिप्रतिपाद्यप्रसिद्धावग्निहोत्रे जुहोतिप्रयोगोदानादिप्रसिद्ध्युपरोधेन दाहने एव तावद्विधेय इति परिभाव्य पश्चात् प्रसिद्धे दाहने घृतेन जुहुयादितीतिकर्त्तव्यताविधिर्योक्ष्यते, अन्यथा तु तथाऽप्रसिद्धेर विधायक एव कुतस्तदनुवादः?

तथाभूतार्थाभ्युपगमे च प्राप्तेर्व्युदासः, घृतेन जुहुयादित्यत्र जुहोतिप्रयोगात्। यदा वाऽयं घृतेन जुहुयादिति प्रयुज्यते तदा ह्ययमगतार्थ इति विज्ञायेत, अप्रमत्तप्रयुक्तत्वात्, इषे त्वादिवत्, अथवाऽक्षरविद्यावत्।

प्राप्तिवाक्यवृत्तजुहोत्यनुवाद इति चेन्न तत्र विधिलिङ्विषयस्यावृत्तेरज्ञातत्वात्। विध्यनुवादस्य तद्विषयतेति चेन्न, अज्ञातत्वादेवाननुवादत्वात्, कुत एवं ज्ञायते जुहोत्यर्थे जुहुयाच्छब्दः प्रयुक्तो न स्वार्थे इति।

हवनाच्च भावनमेवमनवगमितमेवाभिप्रेतस्य स्यात् ।

प्राप्तिविहितस्वरूपसिद्धेरग्निहोत्रस्य स्वर्गकामकर्मत्वाभिधाना -दवगमितकामानुरूपकर्मण उक्तत्वादेव तद्विधक्रियाविशेषगतेः क्रियाप्राप्यत्वाच्च कामस्य अलकावगमितकामरटनवत् कुर्यादित्यर्थात् आपन्नो विध्यर्थ इति जुहुयादित्यर्थापन्नार्थोऽनुवाद इतीयं व्याख्या-न्याय्या, व्यक्तार्थोपपत्तित्वात्, आदिवाक्ये प्रधानश्रुत्यत्यागगुण-कृदपीति चेत्, तन्न, अर्थापत्तेः पौनरुक्त्यादनुवादत्वासम्भवात् ।

जघन्यतरा चेयं व्याख्या, साक्षाच्छ्रुतविधेर्जुहुयात्त्यागेन चार्था -पन्नार्थाश्रुतानूदितजुहुयाद्विकल्पनात् स एव पुरुषप्रमाणकत्वदोषः शब्दाप्रामाण्यदोषश्च ।

विधीयमानवाक्यार्थविषयानुवदनाच्च वाक्यभेदस्य पुनरुक्तस्य चाङ्गीकरणात् ।

अनुवादस्य च प्राप्तविशेषणपरार्थविषयार्थत्वादनुवादत्वा-भावः ।

यत्पश्चादुच्यते कर्त्तव्यताप्रसिद्ध्यर्थमितिकर्त्तव्यतावाक्यं घृतेन जुहुयादिति, तस्य विधिविषयंविप्रकृष्टीभूतत्वान्न कर्त्तव्यता-विषयत्वम् ।

इतिघटितविघटितमितिकर्त्तव्यतैव कर्त्तव्यतेति । ततश्च प्रतिसमाधेये विरुद्धतरदोषापादनं विधिविषयविप्रकृष्टीभूतार्थत्वादिति गण्डस्योपरि स्फोट आपादितः, ततोऽहमेव ते बुद्धिसंविभागं

करोमि, श्रूयताम् । लौकिकजुहोत्यर्थानुष्ठानप्रवृत्तोपदेश एव त्वयं परमनुवादः स्यात् । स चानुपपन्ननियमार्थ उपदेशस्त्वदिष्ट-विरुद्धार्थः ।

इदं वा 'ग्निहोत्रं जुहुया' यदग्नये च प्रजापतये च सायं जुहोति, 'घृतेन जुहुयात्, 'शूर्पेण जुहोति तेन ह्यन्नं क्रियते' इत्येवमादि-विध्यनुवादार्थवादवाक्यगतो जुहोतिः श्रूयमाणः प्राप्तिविहिते-तिकर्त्तव्यतानतिरिक्तहवनक्रियानाममात्रार्थो विप्रकीर्णावयव-कलापाकारा क्रियैव वाऽस्यार्थोऽसिद्धरूपो यथा घटयूपादि, तन्मात्रत्वात्तु तस्याः प्रकरणानुबन्धनात् हित्वा जुहोतिप्रयोगबाहुल्यं कृञ्प्रकृतिलिङ्कर्तृता च दर्शयितव्येति यदग्नये च प्रजापतये च सायं जुहोति तद्धृतादिना स्वर्गकामः कुर्यादिति । तत्प्रतिपादनार्थमभिमत-वाक्यार्थताऽस्यैवं स्यात् ।

तद्वचनन्त्वप्रमाणनियमागममनुपदेशकञ्च विवेक्तुरपीति संभाव्यते, अप्रत्यवेक्षितार्थत्वात् पौर्वापर्यायोगाप्रतिसम्बद्धार्थ-त्वात्, घटितानुमतविध्वंसनाच्च उन्मत्तप्रलापवत् ।

एवं विचार्यमाणमिदं वाक्यं दोषेभ्यो न मुच्यते, अथवा नैवायं दोषो न च विचारयोग्योऽयमुद्ग्राहः प्रत्यपेक्षाप्रामाण्ययोः निर्विषयत्वात्, त्वन्मतात्तन्न ज्ञानवद्वचनम् ।

यदपि च प्रसह्य परमाक्रम्य कारणेषु घृतादिष्वेवंविधेषु स्वर्गादिफलस्य खपुष्पवदसत्त्वमुच्यते तदपि चान्याय्यमेव

यदेतदसत्त्वं नाम त्वया क्वचिन्मन्यते, न्यायेन बाध्यत्वात्, ततोऽन्यत् कार्यम्, तदसमर्थविकल्पत्वात्, घटपटवत्।

असद्विकल्पासङ्गतत्वं कार्यस्यासिद्धम्, तन्न, प्रसिद्धमेव हि विकल्पासामर्थ्यमसत्कार्ययोरसतः कार्यस्य च, असत्कार्ययोर्विकल्पाश्चत्वारः खपुष्पमसत्कार्यमप्यसत्, खपुष्पं सत् कार्यमसत्, खपुष्पसत् कार्यं सत्, खपुष्पं सत् कार्यमपि सदित्येतेषु कार्यखपुष्पयोरुभयोरसत्त्वं कार्यासत्त्वमेवेत्येतद्विकल्पद्वयं स्यात् उभयसत्त्वकार्यसत्त्वयोः प्रतिपक्षाभ्युपगम एव सत्कार्यवाद इति वादाभावात्। ततश्च तयोर्यदि तावदुभयासत्त्वं ततोऽसत्त्वाविशेषादेव कार्याविर्भाववत् खपुष्पाविर्भावोऽप्यायत्यां स्यात्, असत्कार्यवत्, न चैतद्दृष्टमिष्टं वा।

अथ न कार्यप्रादुर्भाववत् खपुष्पप्रादुर्भाव इष्यते, असच्च कार्यमिति निश्चितम्, तद्वैलक्षण्यान्न तर्ह्यसत्, खपुष्पम्, सदेव, असद्विलक्षणत्वात्, घटवत्, इतर उदुम्बरपुष्पवत्।

ननु घटासत्त्वं पटासत्त्वविलक्षणम्, न, सतो वैलक्षण्यात्। अथवा सदसद्विलक्षणत्वान्न तर्ह्यसत् खपुष्पम्, घटवत्, इतर उदुम्बरपुष्पवत्।

अथैवमप्यसदेव खपुष्पमिति निश्चयो न निवर्तते, अप्रादुर्भावात्मकं च तदिति वैलक्षण्यमिष्यते, अर्थादापन्नं न तर्हि प्रादुर्भावात्मकत्वात् कार्यमसत्। निर्वृत्तघटवत्, असत्त्वे आयत्यां न प्रादुर्भवेत् कार्यं खपुष्पवत्, शेषं पूर्ववदेव विपर्ययेण योज्यम्।

अतः कार्यं सत्, आविर्भावात्मकत्वात्, निर्वृत्तघटवत्, वैधर्म्येणाकाशघटवत् । असच्च खपुष्पमनाविर्भावात्मकत्वादाकाशघटवत्, वैधर्म्येण निर्वृत्तघटवदिति । यदि कार्यखपुष्पयोरसत्त्वं तुल्यं विशेषो वक्तव्यो नो चेदविशेषाद्वैलक्षण्यानुपपत्तिः, घटघटस्वात्मवत् । विशेषोन्नयनेऽपि तु विशेषस्य सदाश्रयत्वात्सत्त्वं घटवदिति भावाभावयोः सामान्यमेव न विशेष इति ।

अथैवं तत्साम्यमनिच्छतः कार्यसत्त्वपरिहारेणायातमिदमन्यतरासत्त्वं कार्यमेवासदिति, कार्यशब्दसमीपे एवकारप्रयोगादसत्त्वं कार्य एव नान्यत्रापीति, ततश्च न खपुष्पमसदिति प्रसक्तम् ।

तथा च खरविषाणविपरीतनिर्वृत्तघटादीनामसत्त्वतुल्यं कार्या-सत्त्वमिति नाममात्रेऽविसंवादोऽग्नेर्मङ्गलनामवत् ।

कार्यसत्त्वनिवृत्त्येकान्तत्यागाच्च स्ववचनादिविरोधापत्तिः ।

अथ कार्यमसदेवेत्येवकारादसदनवधृतेः पूर्वो दोषः ।

अथोच्येत त्वयाऽसत्त्वादेव तयोः कारणकाले विशेषासम्भवः, उभयेषामवस्तुत्वान्निरुपाख्यत्वाच्च यदेव कार्यासत्त्वं तदेव खपुष्पासत्त्वमपीति नावधारणदोषः, नापि पूर्वस्तुल्यत्वापत्तिदोषः असतो विशेषाभावादनेकविषयत्वात्तुल्यत्वस्य, अत्रोच्यते, एवमप्येकत्वाद्विशेषाभावः, यथैव ह्यनुपादानमबुद्धिसिद्धञ्च खपुष्पं निःसामान्यं निर्विशेषञ्च सिद्धमेवं घटादेः कार्यस्य स्यात् ।

अथ सामान्यविशेषोपादानबुद्धिसिद्धत्वसद्भावौ कार्यखपुष्पयोरिष्येते त्वया विशेषौ खपुष्पवदभवदपि अन्यथा भवदपि

तदसदेवेति, निर्वृत्तमपि तर्ह्यसत्, सामान्यविशेषवत्त्वात् कारणकाल कार्यवत्, कार्यवच्चाभवदपि खपुष्पमसन्न स्यात्, निःसामान्यनिर्विशेषत्वात्, सामान्यविशेषवत्।

कार्यासत्त्ववैलक्षण्याद्वा कारणवदसन्न स्यात्, कारणं वा खपुष्पवत् कार्यासत्त्ववैलक्षण्यादसत् स्यात्।

अथ कार्योपादानादिमत्त्ववत् खपुष्पस्याप्युपादानादिमत्त्वं नेष्यते असच्च कार्यमिति निश्चितं तदा पूर्ववच्चक्रकद्वयप्रवर्त्तनमुभयासत्त्वे, अन्यतरासत्त्वे तु कार्यसमीप इत्यादि स एव ग्रन्थ उपादानादिमत्त्वविशेषणविशिष्टो योज्यः। अतः कार्यं सदुपादानादिमत्त्वात् कारणस्वात्मवत् वैधर्म्येणाकाशघटवदिति।

ननु सत्त्वेऽपि कारणवत् प्रत्यक्षत्वं प्रसज्यते, न, अव्यक्तत्वात्, वितटीखातहस्तीव पूर्वं खननात्। भूगन्धवद्वाऽप्रत्यक्षत्वं कार्यस्य, अत एव च प्रकरणचिन्तेति प्रकरणसमदोषोऽनेकान्तत्वात्।

एवं तर्हि दर्शनादर्शनयोः प्रादुर्भावाप्रादुर्भावयोश्च समानः प्रकरणसमदोष इति चेन्न, जन्मप्रकाशविषयविशेषस्योक्तत्वात्, उपादानादिमत्त्वविशेषाच्च त्वत्पक्षेण समान दोष इति। यदेतत् समानकरणं ततोऽन्यत् कार्यम्, तद्विकल्पासामर्थ्यात्, घटपटवत्। अत्रापि चतुर्षु विकल्पेषूभयसत्त्वमन्यतरसत्त्वञ्च स्यात्। तत्र यदि तावदुभयसत्त्वं ततः सत्त्वाविशेषादेवाविशेषे सर्वत्वैकत्वभेदो न स्यात्। एवन्तु कार्यैकत्ववत् कारणैकत्वमपि स्यात्। अथ न

कार्यैकत्ववत् कारणैकत्वं सच्च कार्यमिति निश्चितं तद्वैलक्षण्यान्न तर्हि सत्कारणं सद्विलक्षणत्वादुदुम्बरपुष्पवत्, इतरो निर्वृत्तघटवत् । ननु घटसत्त्वं पटसत्त्वविलक्षणम्, न, असतो वैलक्षण्यात्, इतरेतरासत्त्वात् । अथैवमपि वैलक्षण्ये कारणे कार्यसत्त्वनिश्चयो न निवर्त्तते, अनेकात्मकञ्च तत्, न तर्ह्येकात्मकत्वात् कार्यं सत्, कारणवदिति प्रथमचक्रकम् । शेषं पूर्ववद्विपर्ययेणेत्यादि यदुक्तं तदपि, अथ न कारणसर्वत्ववत् कार्यसर्वत्वं सच्च कारणमिति निश्चितं तद्वैलक्षण्यान्न तर्हि सत्कार्यं सद्विलक्षणत्वादुदुम्बरपुष्पवदितरो घटवत्, ननु घटसत्त्वं पटसत्त्वविलक्षणं, न, असतो वैलक्षण्यादितरेतरासत्त्वात्, एतद् द्वितीयं चक्रकम् । अतः सर्वात्मकत्वसतः कारणादन्यत् कार्यमेकात्मकत्वात् कुम्भादिवैकक्षणः । एकात्मकत्वासतश्च कार्यादन्यत् कारणं सर्वात्मकत्वात् क्षणादिव कुम्भ इति । तथाऽनुवृत्तिव्यावृत्त्यादि ।

न, असिद्धत्वादसर्वत्वादिहेतूनाम्, अस्माकं हि सर्वमेवानुवृत्तिरेव कारणमेवोपादानमेव बुद्धिसिद्धमेवेति । यदि हि घटोऽसर्वकार्यत्वाभिमतो मृत्पिण्डात् सत्त्वाभिमतादन्य इतीष्यते तद्वदेव दण्डादेरप्यसर्वत्वं सर्वस्मादन्यत्वाद्घटवत्, तस्मादेकैकस्यासर्वत्ववत् सर्वस्याप्यसर्वत्वात् सर्वत्वाभाव इति सर्वत्वैकत्वभङ्गचतुष्टयाभावः, स्वोक्तविरोधादिवत् प्रमाणविशेषस्वरूपविरोधाश्च ।

तत्र स्ववचनविरोधस्तावत् — यदि कार्यं घटवत् क्रियते तत् कथमसत् खपुष्पवत् कार्यञ्च? मृदेव हि घटः क्रियते — घटतया व्यज्यते विद्यमान एव व्यक्तीभवति, स एव घटो दीपेनेव तथा च विशेषणविशेष्याप्रसिद्धिरपि कार्यमसदिति ।

अत एवेतिकर्त्तव्यतैव कर्त्तव्यतेति प्रतिपादनार्थं न क्रियायां खेदः कर्त्तव्यो भवति, सामान्यादिवस्तुविचारखेदस्याव्यवस्थित-परमार्थत्वात्, क्रियाया एवोपदेशो न्याय्य इत्यस्याभ्युपगमस्यो-परोधात्।

अज्ञानप्रतिबद्धैकान्तेऽपि च ज्ञानप्रतिबद्धत्वे स्ववचनविरोधः, एतदेवमित्यवगमादभ्युपगमविरोधः, लोके ज्ञानव्यवहारात्तद्विरोधः, प्रमाणविरोधस्तु प्रस्तुत एव, धर्मविशेषविपर्ययसिद्धेर्विशेषविरोधः, धर्मस्वरूपस्य निराकरणाद्धर्मस्वरूपविरोध इति।

अतः पूर्वोदितदोषासम्बन्धेनेदं प्रतिपत्तव्यमात्मैव सामान्य-मिति, ननु पूर्वं दूषितमेवैतन्मतमात्मैव सामान्यमिति, न आत्म-शब्दस्य पुरुषपर्यायत्वात् सामान्यं पुरि शयनात् पुरुषः, विशेषास्तु तस्यैवावस्थावतोऽवस्थाः जाग्रत्सुप्तसुषुप्ततुरीयाख्याः, घटग्रीवादि-रूपादिनवादिभेदाभेदसमवस्थावत्, एवं च सर्वसर्वात्मकत्व-सत्कार्यत्वमूलरहस्यानतिक्रमेण कल्पितमिति गुणश्चात्र विद्यते।

अविचारोऽपि चानेनैव तत्त्वेनैक्यमाश्रित्य न्याय्यो नाज्ञान-प्रतिबन्धात्, इह तु ज्ञानात्मकपुरुषस्वरूपैक्यापत्तिसन्निश्चये निश्चितमेवैतत् किं विचारेण गतार्थत्वादिति।

अयं तस्य प्रवृत्तिपर्यायस्य विधेर्विधिः विधिविधिः स्थितिराचारः प्रवृत्तिर्मर्यादेति, यः पुनर्विधिः प्राक्तनः स न युज्यते, विधिना हि भवतीति भावः कर्त्ता सामान्यमिति सर्वतन्त्रसिद्धान्तेन व्यवस्थितेऽर्थे भेदाभेदनानाभावेषु दोषान्न भावो भवितुरभाव इति

भवतीति भावो घटादिरिति समर्थितः, विविच्यते च सादृश्या-सादृश्याभ्याम्, सा पुनरविविक्तैव, को ह वैतद्भेद? किं वाऽनेन ज्ञातेन? इति वचनात्,

स एष विधिविधिर्न भवति, अविविच्यमानार्थविधानात्, स्ववचनविरोधात्, अंशेन विवेकाच्च, विविच्यमानांशोऽपि च तद्वद्विविच्यते, न स विविच्यते तथा न भवत्येव विधित्वं विधेः, किं न एतेन यदि कारणमित्याद्यविचार्य लोकवद्विधानात्।

यदुत्सृष्टतया विधिः सिद्धयति लोके यथा तत्तथाऽन्यथा च भवति तथा वक्तव्यमिति विधिर्विधिर्भवत्यविवक्षितव्यावृत्तिरनङ्गी-कृतभेदः।

अथ पुरुषवादः

पुरुषो हि ज्ञाता ज्ञानमयस्तन्मयश्चेदं सर्वं जगत्, तदेकत्वात्, स एव भवतीति भावः, सामान्यम्, को भवति? यः कर्त्ता, कः कर्त्ता? यः स्वतन्त्रः, कः स्वतन्त्रः? यो ज्ञः, काष्ठादिवि-प्रकीर्णपचननिर्वर्त्तनवत्।

ननु क्षीररसादि दध्यादेः कर्त्तृ, न च तत्क्षीरं रसो वा ज्ञ इति, न, तत्प्रवृत्तिशेषत्वात्, गोप्रवृत्तिशेषक्षीरदधित्ववत्, ज्ञशेषत्वाद्वा चक्रभ्रान्तिवत्।

ननु चक्रभ्रान्तावपि को भवितेति प्रत्यपेक्षायां घटभवन-व्यवहारे मृद्वदिहापि मूलभवितृ द्रव्यमपेक्ष्यम्, परतः परतोऽपियेन भूयते यद्भवति तदेव मौलम्, तस्माद्घटभवनमृद्वत् कुलालशेष-

भ्रान्तिवच्च ज्ञशेषं सर्वम्, इतरथाऽसौ नैव स्याद्भवितुरभावाद्वन्ध्या-पुत्रवत्।

अचेतनानामप्यभ्रादीनां चेष्टादर्शनाज्ज्ञप्रयोगमन्तरेण प्रवृत्ति-र्दण्डादीनामित्येतच्चायुक्तम्, ज्ञस्यैव सुप्तावस्थत्वात्, न च चक्र-दण्डादि सुप्तावस्था करणनिरीहत्वात्स्वत एव भवति, दधीव पयसः। एतेन दध्याद्यपि ज्ञभवनमाख्यातमेव, ज्ञशेषसुप्तावस्थात्वात्।

यथैव हि रूपरसगन्धस्पर्शशब्दा अमूर्त्तत्वेन सूक्ष्मां वृत्तिमत्य-जन्त एव स्वप्रवृत्तिप्रभावावबद्धमूर्तत्वप्रक्रमानध्यास्य ततो नाना-प्रभेदपृथिव्यादिभेदस्थूलरूपा जायन्ते रूपादय एव, न हि ते रूपादयः प्रतिनियतचक्षुरादिविज्ञान प्रभावितस्वरूपा मूर्त्ताः स्थूला वा।

यथैते सूक्ष्मा मूर्त्तरूपादिपूर्वकाः स्थूलत्वात्, तन्तुपूर्वपटवत्, एवं ततोऽपि परं परतोऽप्यपरं वरिष्ठं कारणं रूपादिभावमापद्यत इति प्रतिपत्तव्यम्।

इति रूपादिप्रविभक्तमप्रविभक्तस्वतत्त्वं यद्भवति तदेव स्वं तत्त्वं तत्तु ज्ञानस्वतत्त्व आत्मेति रूपादिभिरेव निरूपितम्, तद्धि रूपणेमिति रूपणकृतात्मलाभनिरुक्तत्वात् विभक्ताविभक्तं ग्रहणमेव रूपम्, न तु रूप्यते तत्तेन तस्मिन् वेत्यादि रूपम्।

रस्यते स्पृश्यत इत्यादेरपि तत्रैव दर्शनात्, रूपेणोपलक्षितस्य ज्ञानात्मनो रसादेर्गुणाद्गुणिद्रव्याद्वा विभक्तस्यानवस्थानात् पुरुष-भिन्नपुत्रत्वादिवत्।

एवं तर्हि रूपेणाविभक्ततत्त्वात्मकानां रूपवदविभक्तग्रहणं चक्षुषैव स्यात्, रसनादिभिश्च ग्रहणदर्शनात् प्रत्यक्षविरुद्धेयं कल्पनेति चेन्न, तस्य तत्त्वस्यानेकात्मत्वाभ्युपगमात् । द्विधापि रूपस्याविभक्ततत्त्वात्मकतायामपि शक्यं वक्तुं रूपं रस इति प्रत्यक्षम्, भेदेन दर्शनात्, तस्यानेकात्मकस्य स्वप्रवृत्तिप्रभावावबद्धस्य प्रभेदानामुक्तत्वात्, रूपादिभ्यो भिन्नमेकं द्रव्यं पृथग्ग्रहणापदेशादित्येतच्च न, रूपादिव्यतिरिक्तादर्शनात् ।

आत्मतत्त्वाविभक्तत्वग्रहे तु प्रत्यक्षाविरोधः, चैतन्यमेकमेव रूपादिविभक्तमप्यविभक्तं चैतन्याव्यवच्छेदान्वयात्, यथा परैः परिकल्पितं भिन्नमिति तत्र दर्शनं विरोधकारि भवति ।

तदनुभवदर्शनात् स एव तु ग्राह्यो ग्राहकश्चैषितव्यः, व्यतिरेकस्यानुपपत्तेः, अभिमतात्मप्रतिपत्तिवत् बुद्ध्यादिरूपादिसूक्ष्मस्थूलत्वादि च क्षीराद्यत्यन्तापरिदृष्टास्तत्त्व एव धर्माः व्यवस्थिताः, तद्वत्सर्वस्य जगतश्चेतनात्मनि पुरुषे व्यवस्था युगपदेव।

एवञ्च सार्वज्ञ्यमप्ययत्नेन लब्धं पुरुषात्मकत्वात् सर्वस्य, अस्य ज्ञत्वमेवोत्कर्षपर्यन्तवृत्तं सर्वज्ञता, तन्निरतिशयं क्वचित् प्राप्नोति, तारतम्ययुक्तत्वात्, पर्वतोन्नतिवत्, क्षेत्रप्रमाणवत्, प्रत्यवगमकात्मकत्वात् खद्योतादितारतम्यवृत्तोद्द्योतवत् ।

ननु वक्तृत्वादीनां धर्माणामसार्वज्ञ्याव्यभिचारात्, अत्रैव प्रकर्षोत्कर्षदर्शनाच्चासर्वज्ञतैवेत्येतच्च न, वक्तृत्वस्यापि तारतम्यादुत्कर्षवृत्तेर्निरतिशयनिष्ठत्वात्, सर्वस्य वक्ता तथ्यस्य चेति

वक्तृत्वादेव तत्सिद्धेः, नित्यानुमेयमहापरिमाणाकाशदृष्टान्त-साधर्म्याच्च । असर्वातथ्याभिधायिताभ्यां विपर्ययेण भवितव्यमवस्थात्वात्, ज्ञत्वाज्ञत्वावस्थावत्, नीलोत्पलरक्तोत्पलवत् ।

धूमवत्त्वाग्निमत्त्वावस्थाविपर्ययेणापि तर्हि भवितव्यं तत्त्वतः, को विचारः? निश्चितमेवैतत्तेनापि तत्त्वतो भवितव्यम्, नन्विदमेव वर्त्तते, तेन तु यदुच्यते तत्प्रमाणं सोऽपि शब्दो न पुरुषप्रवृत्तिमन्तरेण भवितुं वक्तुं वाऽर्हतीति उक्तत्वाद्वचनत्वाद्वस्तुत्वादपि व्याकरणवत् पौरुषेयम्, इतरथा स नैव वचनं स्यादपौरुषेयत्वाद्वन्ध्यापुत्रवत् ।

नन्वेकस्मिन्नेव काले तस्यैव वस्तुनोऽग्नित्वमनग्नित्वञ्चेति प्रत्यक्षादिविरुद्धं सामस्त्येनाभावात्, न, ननु प्रत्यक्षत एव व्रीह्याद्येकं वस्त्वेकस्मिन्नेव काले भूम्यबादिसर्वात्मकम् तेन विनाऽभावात् तस्य तथाभवनात् व्रीहिस्वात्मवत्, कतमोऽसौ व्रीहिः क्षित्युदक-बीजादिगतवर्णगन्धरसस्पर्शादिधर्मपरिणतिमन्तरेण? इति ।

तत्काले तथाऽग्रहणादप्रत्यक्षतेति चेत् सर्वाप्रत्यक्षता तर्हि, कदापि सर्वेण ग्रहणाभावात्, न हि यद्यथा भवति तथेन्द्रियेण गृह्यते, तुषकणादिरूपादिमात्रग्रहणवृत्तत्वाद् व्रीह्यादिचाक्षुषप्रत्यक्षस्य ।

रूपस्य रूपमात्रत्वात्तर्हि प्रत्यक्षत्वमित्येतच्चायुक्तम्, यावद्रूप-ग्रहणावृत्तत्वाद्रूपादिप्रत्यक्षस्य, तस्मात्, स्थितमेतत् सर्वं सर्वात्मकं ज्ञानस्वतत्त्वैककारणविजृम्भितमात्रञ्चेति ।

तस्य चतस्रोऽवस्था जाग्रत्सुप्तसुषुप्ततुरीयान्वर्थाख्याः एताश्च बहुधा व्यवतिष्ठन्ते ।

सुखदुःखमोहशुद्धयः सत्त्वरजस्तमोविमुक्त्याख्याः, कार्याणि चासां यथासङ्ख्यं तिसृणाम्, तद्यथा प्रसादलाघवप्रसवाभिष्वङ्गोद्धर्ष-प्रीतयः, दुःखशोषतापभेदापस्तम्भोद्वेगापद्वेषाः, वरणसदनापध्वंसनबीभत्सदैन्यगौरवाणि। चतुर्थ्यास्तु शुद्धं चैतन्यं सकलस्वपरिवर्त्त-प्रपञ्चसर्वभावावभासनम्। अथवा ऊर्ध्वतिर्यगधोलोका अविभागा वा, संज्ञ्यसंज्ञ्यचेतनभावा वा।

अविभागात्मनस्तस्यैव चतुरवस्थत्वात् कालभेदाभावाच्च चतस्रोऽपि स्युः, न, नियता एव ह्येता विमुक्तिक्रमात्, तत् पुनः तुरीयं निरावरणमोहविघ्नं निद्रावियोग आत्यन्तिको निद्रासम्बन्धि-जाग्रदाद्यवस्थाविलक्षणमात्मस्वतत्त्वं स एव परमात्मा विमुक्तः सर्वज्ञो व्याख्यातः।

तत्र तावन्महामोहनिद्राक्षयोपशमलब्धिजनितनिर्वृत्त्युपकरणेन्द्रियप्रत्ययं चैतन्यं जायते तच्च प्रत्यक्षादि, प्रत्यवेक्षणात्मकत्वाज्जाग्रदवस्था, सैव करणात्मा, सा चापि चेतनात्मैव, द्रव्यपुरुषवत्। यथानुपयुक्तः पुरुषो नात्मत्वेन परिणमितो द्रव्यपुरुषस्तथा करणात्मापि चेतनात्मैव।

एवं तर्हि परमात्मनः शुद्धचेतनात्मत्वात् सर्वात्मकत्वाच्च तस्य करणात्मावस्थानुपपत्तिरिति चेन्न चैतन्यस्य सर्वात्मकतायामपि सत्यां निद्राग्रहणात् सुप्तोत्थितस्य सावशेषनिद्रस्येव यज्ज्ञानं सा जागरावस्था करणात्मा, व्यपगतनिद्रस्येव सर्वज्ञावस्थेत्यनयोर्विशेषः, अर्थस्वरूपाग्रहणात् करणात्मावस्थायाः परमात्मना वैरूप्यमित्येतच्चायुक्तम्, अर्थस्य च तथातथातत्त्वात् ज्ञानमेव ह्यर्थः,

करणमपि ज्ञानविवर्त्तत्वात्, यथा चेदं ज्ञानं तथा जाग्रदवस्था । शेषः सुप्तावस्था ज्ञानमेव, संशयादीषत्सुप्ततापि करणात्मा ।

सा च सुप्तावस्थापि सती ज्ञानमेव, वस्तुनस्तथातथा तत्त्वात् स्थाणुः स्यात्, पुरुषः स्यादित्यूर्ध्वतासामान्यस्य वस्तुत्वात् । तथा विपर्ययोऽपि ज्ञानमेव, तथातत्त्वादर्थस्य स्थाणुत्वपुरुषत्वाभ्यां विपर्ययेण च, तथाऽनध्यवसायोऽपि ज्ञानमेव, चेतनाचेतनात्मकत्वाज्जागरितवत्, तदेव हि चेतनाचेतनम्, चेतनाया एवाचेतनात्वाद्वा संशयादिवज्ज्ञानमेवानध्यवसायः, अथवा सुप्तवदनध्यवसायोऽपि करणात्मैव व्यक्ततरः स्वापः ।

यथा चैतच्चैतन्यं तथाऽनध्यवसायं द्रव्येन्द्रियपृथिव्यादि कार्यात्मा, सा च सुषुप्तावस्था द्रव्येन्द्रियम्, तदपि ज्ञानात्मकमेव, सुषुप्तावस्थात्मकत्वात्, हालाहलानुविद्धमदिरापानापादितनिद्रासुषुप्तवत्, अथवाऽनध्यवसायवत् ।

योऽसौ पुरुषस्तदेव तत्, आत्मत्वेन परिणामितत्वात् तद्द्रव्यत्वात्, भूम्यबादिव्रीहित्ववत्, यथा भूम्यम्ब्वाद्येव व्रीहित्वेन परिणतत्वात्तद्द्रव्यत्वाद्व्रीहिर्भूम्यादिरेव तथा पृथिव्यादिपुरुष एव चेतनात्मकः, तत्कार्यत्वात्तन्तुपटवत्, तद्व्यतिरेकेणाभावात् तद्देशत्वाच्च घटस्वतत्त्वप्रत्ययादित्ववत् ।

चैतन्यादात्मा सुषुप्तावस्थाया विपर्ययेण वृत्तो रागाद्युपयुक्त उपयोगस्वातन्त्र्येण बद्ध्वाऽऽत्मनाऽऽत्मानमस्वतन्त्रीकरोति, मद्येनेव स्वयं पीतेन मद्यपः स्वयं पूरितवेगया डोलयेव वा पुरुषो

भ्रम्यते, तेन सूक्ष्मस्थूलरूपादिपृथिव्यादिमत्त्वमनाद्यनन्तशः प्रतिपद्यते चैतन्यम् कार्यात्मत्वात्, क्रमेण मृद्घटकपालादि यावद्रूपादयो व्युत्क्रमेण रूपादि यावद्द्रव्यादित्वविपरिवर्त्तानन्त्यवत्। एवंप्रकारस्य भवनस्य देशकालभेदैकान्ताभ्युपगमे वक्ष्यमाणदोषत्वात्।

नन्वेवमनाद्यनन्तत्वे सति कुक्कुटच्यण्डकयोरिव मुक्तस्यापि चैतन्यरूपादिमत्त्वयोस्तुल्येऽविवेके किमर्थं ज्ञानात्मकमित्युच्यते? किं वाकारणं रूपादिमदात्मकमिति नोच्यते सर्वम्? नैवं परिग्रहेऽपि कश्चिद्दोषः, अस्यैवार्थस्य सिषाधयिषितत्वात्, चतुरवस्थत्वात्तस्य, तत एव रूपादिद्रव्येन्द्रियपृथिव्यादिरूपः स एवोच्यते। चेतनाचेतनयोरैक्यापादनप्रस्तुतेः, इमयश्चेदं स एव स्वतन्त्रो भवतीति विशिष्य ज्ञग्रहणं स्वतन्त्रग्रहणञ्च किमर्थमिति चेदुच्यते, तथाहि, भावस्वरूप दर्शनार्थन्तु यो भवति स वाच्य इति ज्ञग्रहणम्, तदपि भवनं ज्ञस्यैव सर्वदेशकालात्मकस्य देशकालाभ्यां सिद्ध्यति, तथाहि वस्तु भवतीति वक्तुं शक्यम्, तद्भिन्नपृथिव्यादिभेदभूतपदार्थपरिग्रहे तु घटभवनं न सिद्ध्यति।

देशभेदप्रत्ययेन तावद्ग्रीवापृष्ठकुक्षिबुध्नौष्ठादीनां देशभिन्नानां कपालशकलादीनाञ्च यावत् परमाणुशो रूपादिशो निरुपाख्यत्वशश्च भेदादभावे। एवं न श्वेतिकापीतिकाद्येकदेशभेदान्मृत्, अश्मादिभेदान्न पृथिवी, पृथिव्यप्तेजोवाय्वादिभेदान्न द्रव्यं गुणकर्मभेदाद्वा द्रव्यादिभेदान्नैकं सत्त्वमिति। कालभेदप्रत्ययेनापि प्रतिक्षणमव्यपदेश्य भवनात् कतरत् घटभवनम्? मृद्भूतव्रीह्याद्यम्ब्वादिकालभिन्नभावभेदे मृदभावात् को घटः? भवनं वा किं स्यात्? अस्मन्मतेन मृद्भूतो

व्रीह्यादिरम्ब्वादिश्चैक एव, कालान्तरावस्थाने सति तत्परिणामोपपत्तेः सामान्यान्वयाद्व्रीह्यादय उदकादय एव वा मृद्भवति घटो भवतीत्यादि युज्यते, परतोऽपि कपालादिपांशुव्रीह्यादिभूतेः, तस्माद्घटादि सर्वात्मकमेव भवति । न चेदेतदिष्यते तत एवं सर्वात्मकस्यैकस्य सत्त्वस्याभावात् प्रत्येकं सत्त्वस्य च देशतः कालत इतरेतरासत्त्वात्मकत्वात् कुतो भवनं भवितुर्घटादेः ।

यथा तु यैः रूपादिभेदेन घटो देशभेदाद्यावन्निरुपाख्यशः कालभेदेन च परमनिरुद्धक्षणोत्पत्तिनिरुपाख्यशो भिद्यत इति सर्वभेदपर्यन्तं भेदं विधायापि विज्ञानमात्रमेवेति व्यवस्थाप्यते तैरस्मदुपवर्णनवदेवाभिहितं भवति, रूपादिपरस्परविविक्तत्वे तु तद्विज्ञानान्वयाभावाद्रूपरसादिभेदपरिकल्पनाभावस्तदंशकल्पनाभावो निरुपाख्यत्वकल्पनाभाव इति विज्ञानमात्रता न भवति ।

ज्ञानस्यापि त्वभावाभ्युपगमे रूपाद्यपलापबीजनिरूपणादिनिर्मूलत्वात् प्रत्यक्षादिविरोधः, तस्मादवश्यमात्मा ज्ञानस्वभाव एकः सर्वभावव्यापी विपरिवर्त्तमानोऽवस्थितः कारणमिति सिद्धम्, अत एवोक्तवत् रूपादीनां तत्त्वात् ज्ञानस्वभावात्मावस्थाविशेषमात्रत्वात् सर्वत्र सन्निपत्यारादूरादुपकारित्वेभ्यो हेतुभ्यः आत्मबुद्धीन्द्रियप्रकाशरूपघटौषधाहारादिषु ज्ञानवृत्तिर्भवतीत्येष विशेषः ।

आह च पुरुष एवेदमित्यादि ।

अत एव सर्वत्वसिद्धिस्तस्य, तया चाऽऽत्मा सत्त्वं भूतः पुरुषः पुद्गलो जन्तुः प्राणी जीव इत्याद्यभिख्या घटन्ते

मृदनुत्तीर्णघटपिठरादिवत् भ्वस्त्यर्थादिभ्यः सर्वस्यानुत्तरात् यावदेव किञ्चिदुत्पद्यते विनश्यति व्यवस्थितं वा तस्य सर्वस्यासावात्मा।

स्वात्मनि वृत्तिविरोधात् कथमात्मनाऽऽत्मानं सृजत्युपसंहरति च, बध्यते मुच्यते च? न ह्यङ्गुल्यग्रं स्पृशति, नासिरात्मानं छिनत्तीत्येतच्चायुक्तम्, शक्तिभेदात् कारकभेदोपपत्तेः, तन्तुवायकोशकारकीटवच्च तदात्मका एवैते संहारविसर्गबन्धमोक्षाः। यथा च *'सुदीप्तात् पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः'*, एवं *'पुरुष एव सर्वम्'*। स एवोच्यते कालोऽपि ज्ञत्वात्, प्रकरणात् प्रकृतिः, रूपणान्नियमनान्नियतिः, स्वो भाव आत्मनैव स्वेन रूपेण भवनात्स्वभावः।

येन यत्र यथा यस्माद्यदा यदर्थं प्रवर्तितव्यं तेन तत्र तथा तस्मात्तदा तदर्थश्च प्रवृत्तिरन्तरञ्चैतस्य, स एव हीदं सकलं जगत् वृत्तमविवृत्तश्च बहुधानकं चेतनाचेतनसप्रभेदरूपमिति। आह च

'तदेजति तन्नैजति तद्दूरे तद्वन्तिके।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः'[१] ॥ इति।

स एवार्हन् बुद्धः ब्रह्मा विष्णुः ईश्वर इति।

अथनियतिवादः

सत्यम्, भवनकर्तुः स्वातन्त्र्यं न शक्यमपह्नोतुम्, भवनस्य क्रियात्वात्, या क्रिया सा भवितुरेव घटादेः परमाण्वादेर्वा यथा पचिक्रिया पुक्तुरेव स्वतन्त्रस्य, भवनमपि च क्रियात्वात् भवित्रा विना न भवति पचिवत्, यत्तु स ज्ञ इति, सम्प्रधार्यमेतत् सर्वज्ञस्यैव

१. ईशावास्योपनिषद् - १-५

भवनाभ्युपगमे दोषदर्शनात्, स यदि ज्ञः स्वतन्त्रश्चेत्युभयगुणसम्पन्न इष्यते नात्मनोऽनर्थमापादयेत्, ज्ञत्वे सति स्वतन्त्रत्वात्, विद्वद्राजवत्।

एतच्च न, निद्रावदवस्थावृत्तेरस्वातन्त्र्यात्, आहितवेगवितटपातवत्। ननु तज्ज्ञत्वाद्ययुक्ततैव, अज्ञातत्वात्, युक्तत्वाभिमतत्वेऽपि चायमेव नियमः कर्त्रेतरत्वापादनाय।

भवति कर्त्ता ज्ञ एवावस्थाविशेषादचेतनोऽपीति कारणान्तरास्तित्वं भवतैव समर्थितम्, ज्ञाज्ञस्वतन्त्रास्वतन्त्रस्वविषयनियतकर्तृकरणाधिकरणकर्मादिनियतशक्तिदर्शनात् देवदत्तकाष्ठस्थालीतन्दुलोदकादीनां तन्नियमकारिणा कारणेनावश्यं भवितव्यम्, तेषां तथाभावान्यथाभावाभावादिति नियतिरेवैका कर्त्री।

न हि तस्यां कदाचित्कथञ्चित्तदर्थानुरूपमेकत्वं व्याघाति, ज्ञानात्मैककारणवादे पृथिव्याद्यचेतनं न कारणानुरूपम्। आह च-'प्राप्तव्यो नियतिबले'[1]त्यादि,।

न च मूर्त्तामूर्त्तचेतनाचेतनत्वादिवस्तुनो यत्प्रतिपाद्यमस्ति, उभयथा तथा तथा प्रविभक्ताप्रविभक्तसर्वार्थयाथातथ्यस्थापनैकरूपत्वान्नियतेः।

प्रयत्नसाध्येष्वर्थेषु कृतकेष्वपि च तद्विषयक्रियाफलस्य तथानियतेर्व्यापिता नियतिकारणत्वस्य।

किन्तावत्तेषामेव भावानां प्रतिस्वं भिन्ना नियतिरुताभेदा सा? परमार्थतोऽभेदाऽसौ कारणं जगतः, भेदबुद्ध्युत्पत्तावपि परमार्थतोऽभेदात्, बालादिभेदपुरुषत्ववत्।

१. सू. श्रु. १ अ. १ उ. २

कथं परमार्थतो नास्ति भेदो भेदबुद्ध्याभासभावेऽस्याः? अथवा परमार्थतस्तु भेद एवास्तु सत्यप्यभेदबुद्ध्याभासभावे? इति, कथं परमार्थतोऽभेदा? अभेदबुद्ध्याभासभावेऽप्यभेदाभ्यनुज्ञानात्, कथमभेदः? भेदबुद्ध्याभासभेदेऽप्यभेदाभ्यनुज्ञानादेव । द्विधापि चाभेदस्याभ्यनुज्ञानादेवाभेदा सेति गृह्यताम्, व्यवच्छिन्नस्थाणु-पुरुषत्ववत्।

सा च नियतिरसा च, इह च स्वर्गादिषु च तथानियतेरा-सन्नानासन्ना च, तस्या एव तदतदासन्नानासन्ननानावस्थद्रव्यदेशादि प्रतिबन्धभेदात्, मेघगर्भवत्, *'तस्मान्नाभाविभावो न च भावि-नाशः'* इति।

न कालादयं विचित्रो नियमः, वर्षारात्रादिष्वपि क्वचिदनियत प्रवृत्तेः, दृश्यते ह्यङ्कुरकिसलयपत्रपुष्पफलगर्भप्रसवादिव्यभिचारो वनस्पतिसत्त्वादीनां स्वतः प्रयोगतश्च । न च स्वभावात्, बालादिकाल एव युवतादियुगपदभावे भेदक्रमनियतावस्थोत्पत्ति-स्थितिच्युतिदर्शनात्, तत्तथा नियतिवस्तु, तदनभ्युपगमे सर्वाविवेके अवस्थास्वभावाद्यभावादभ्युपगमविरोधस्ते जायते, तद्धि न नियतेरन्यतोऽवतिष्ठते।

यथा लोक एकत्व एव पर्वताद्याकारावग्रहो भिद्यते यथा वा ज्ञानमेकत्वेऽप्यनेकबोध्याकारं भवति, अन्यथा घटपटाद्याकार-मन्तरेण ज्ञानात्मलाभाभावात्, एवं भेदाभेदरूपेण नियतिः । तथा नियमात्मकत्वात् सा नियतिर्व्रीहिरित्येकस्मिन् वस्तुन्येका मूलादिभेदे च भिन्नाऽङ्कुरादिर्भवति।

अनेकस्मिंश्च पृथिव्यम्बुतेजोवाय्वादिस्वरूपेऽर्थे पृथिव्यादीनामेव तद्भावापत्तेर्व्रीहिरित्येकत्वादभेदा । तथातथाऽनियतार्थवशादनियतिकारणत्वं, दृष्टं हि प्रसवादिवैकृतं नरतिरश्चां इति चेन्न । अत्रापि तथानियतिवशेनैव प्रसवादिधर्मव्यतिक्रमो वस्तुस्वभावव्यति-क्रमश्चोपलभ्यते ।

नियतिवशादेव किञ्चित्सदसाध्यं, असदसाध्यं, असत्साध्यं, सत्साध्यञ्च प्रतिपद्यते, सदपि चाकाशं भूगन्धवदनभिभवं सलिलसेचनेन सन्तमसस्थघटवत्प्रदीपेन चासाध्यम् ।

वन्ध्यापुत्रादि असदसाध्यम्, इदन्तु नियतिवशादेवासत्त्वात्, नियत्यैव नासत् साध्यतामर्हति, साधनाविष्टक्रियासाध्यत्वात्साध्यानाम्, क्रिया हि साधनेषु वर्त्तमाना सन्तमर्थसाध्यमाविशति प्रत्यर्थनियतत्वात् साधनानुषङ्गस्य, साध्याभावात्तु सा किमाविशतु? ।

इदं पुनरसत्साध्यं घटादि, यद्यसत् कथं साध्यं खपुष्पवत्? उक्तासदसाध्यविकल्पानतिवृत्तेश्चेति, नैष दोषः, सतोऽन्यदसदित्यतोऽन्यत्र विधानप्रतिषेधाश्रयणात्, प्राक् तथाऽवृत्तं तत्काले व्यक्त्या नियतं साध्यम् ।

इदमन्यत् सततोपलब्धिनियतमेव सत् यष्टिसाधनवदृजुत्वेन साध्यते मृद्द्रव्यमूर्द्ध्वादित्वक्रमापाद्यघटत्वेन वा, ऊर्द्ध्वादित्वं घटत्वञ्च भेदेनैव वा सत्साध्यम् । अथवा भेदेनैव सत्साध्यम्, यद्बुद्ध्यैव साध्यते न क्रियया, पुरुषादि किन्तु विद्यमानं अवस्थापरिग्रहापनयनेन ।

एतच्च साध्यमानमप्यन्यविषयक्रियाविलक्षणयानयैव क्रियया साध्यते, एतस्याश्चैतान्येव कारकाणीति साध्यसाधनार्थनियतिः। एवञ्चार्थगतप्रतिविशिष्टसाध्यसाधननियमाभिव्यङ्ग्यनियतिस्थितेरेव कारणगुणपूर्वकतां कार्यस्य प्रतिपद्य कारकान्तरसमवस्थिति-तुल्यतायामपि क्रियासमवस्थित्या सह नियतिप्रसिद्धेरेव पुरुषस्तथा प्रतिपद्य प्रत्यर्थं कारकाणि प्रयुङ्क्ते, तानि च यथाप्रयोगनियमं स्वे स्वे विषये नियतानि नैकविमर्दप्रवृत्तानि परस्परनियतानुग्रहोद्भावन-वृत्तानि स्वविषयक्रियाप्रसाध्यमर्थमभिनिर्वर्त्तयन्ति, तेषां वृत्तिस्तानि तत्फलञ्च सर्वं नियतमेव, ततो नियतिरेव सर्वस्य कारणम्, न तु तदुपायसिद्धेरन्यथा तत्सिद्धिरस्ति।

सिद्धिर्हि नियमेनानुद्भूतानां रूपादीनां साङ्गत्येन स्थितानां स्वनियतेरेवाऽभिव्यक्तिर्जनिर्वा, तत्र मिथ्याभिमान इदं मया कृतमिति पुरुषस्य। तच्च स च तानि च नियतेरेव प्रवर्त्तन्ते, तत्प्र-वृत्त्यप्रवृत्त्योः सिद्ध्यसिद्ध्योश्च व्यभिचारदर्शनात्, तथा च दृश्यन्ते क्रियाणां विपत्तयोऽप्रवृत्तयश्चातस्तत् कृतमपि पूर्वनियतिस्थत्वाद-कृतम्, विनष्टमप्यविनष्टं तथानियत्योत्तरकालं कपालादित्वेनाव-स्थितत्वात्।

एवन्तु विनश्येत्, यदि प्रविशीर्णस्तां नापद्यते खरविषाण-वदत्यन्ताभावी भवेन्न वा विनश्येत् घटत्वेनैव तिष्ठेत्, न त्वेवम्, तस्मान्नाविनाशः, लक्षणतो ह्यन्यथाभावो विनाशः, स च नियतेरलङ्घ्यत्वात्, एवमुत्पत्तिरपि।

तथा चाऽऽम्रबीजे तथानियत्या लीनानां मूलाङ्कुरादीनां फलस्य वर्णानां रसानाञ्च तेषां तेषां व्यवस्थितपूर्वरूपैव प्रवृत्तिर्माया-कारपताकिकावत्, यावदाम्रं नियतिप्रवृत्तिफलावस्थामनुभूय पुन-र्बीजमेव तस्मादपि पुनरपि तथेति, सेयं व्यवस्थिता नियति-सन्ततिरनाद्यनन्ता ।

दाहनियत्युदयेऽपि यवतिलभस्मादीनां तास्तथा तथा प्रादुर्भावतिरोभाववृत्तयः प्रतिनियता एवान्यथा च । ताश्च पुरुषकार-मप्युल्लङ्घ्य तमन्तरेण सिद्धाः, पाककालस्यापि नियतिदर्शनात्, यथा षष्टिकाः षष्टिरात्रेण पच्यन्त इत्यादि । एवञ्च व्यवस्थित-नियतार्थव्यक्तेर्व्यतिरिक्तमतिः पुरुषस्य मिथ्याभिमान एव, न तु नियतौ हि किञ्चिन्नास्ति ।

कथमस्ति सर्वं नियतौ? यथा भूम्यम्ब्वादेर्विना न भवति केवलाया एव बीजनियतेराम्रफलपाकादि, कालातपवातादिभ्यो हि पाकः, तथाऽकालेऽपि भूमिखननादिभ्यः काले वापि न भवति पाको द्रव्यान्तरसंयोगादिना स्तम्भितायां शाखायाम्, द्रावणाद्वा । अन्यच्च तथातथा तस्य ज्ञातुरिच्छानुविधानेन वस्तुनियतिवैपरीत्यमिति नियमाभावात् कृतकत्वाच्चानित्यत्वं ताभ्याञ्च नियत्यभाव इति ।

न, तथानियतित्वात्, बीजादिनियतिरेव ह्युदकादिषु वर्तते उदकादिनियतिश्च बीजादिष्वन्योऽन्यव्यतिहारेण, तन्नियमानुरोधेन हि तेषां सर्वेषां नित्यप्रवृत्तिरन्योऽन्याविनाभावात्, तथा ह्याह-- उदकं पतितं सभावकं निर्भावकञ्च, यदा हि बीजनियतिरङ्कुराद्यभि-

व्यक्तेरभिमुखीभूता तदा तस्या देश उदकस्थ एवाङ्कुरोद्भावने प्रवर्त्तमानः सभावक इत्युच्यते, अन्यदा तु विपर्ययः।

एवं भूमिवायुकालप्रभृतिष्वपि सभावकाभावकत्वे। यदुक्तं पुरुषस्य ज्ञातुरिच्छानुविधानेन वस्तुनियतिवैपरीत्यमिति तन्न, तत्रापि नियतेरेव कारणत्वात् पुरुषो व्यग्रोऽव्यग्र इत्यादि हि नियतेरेव, सापि तादृशी, एवमप्रयुक्तेषु, स्वातन्त्र्यादेव नियतिः प्रयुक्तेष्वपि करणादीनां क्षमत्वाक्षमत्वप्राप्त्याप्राप्त्यादौ तथा नियतत्वात्, एतेन पाकादिदोषाः प्रत्युक्ताः।

सर्वज्ञोऽपि च न नियतिमन्तरेण, तामेवासौ नियतिमखिलां पश्यन् सर्वज्ञो भवति स हि भव्याभव्यसिद्धादिभेदेषु पुरुषेषु गति-स्थित्यवगाहवर्त्तनारूपरसादिशरीरवाङ्मनःप्राणादिपरिणतिरूपाम-सङ्कीर्णामनादिमध्यान्तां वस्तुनियतिमेकामनेकरूपां बन्धमोक्ष-प्रक्रियानियतिसूक्ष्मां पश्यन्ननन्तकालमव्याबाधसुखं तिष्ठतीति।

अथ कालवादः

नायमपि नियतिवादः परितोषकरः, एवं तर्हि भावनयाऽनयैव त्वदुक्तया युगपदयुगपन्नियतार्थवृत्तेर्न नियतिरेव, किन्तर्हि? काल एव भवतीति भावितं भवति।

इह युगपदवस्थायिनो घटरूपादयः किं परस्परं प्रविभक्तितः स्वेनैव भवन्ति उत कालसामर्थ्यात्? तत्र तावन्न केचिदपि वस्तु-प्रविभक्तितः, तेषां सहोपलभ्यमानानामपि तद्व्यतिरेकेणाभावात्, भिन्नेन्द्रियग्राह्यत्वादेव च तेषामैक्याभावाद्यौगपद्यमतो युगप-

द्वृत्तिप्रख्यानात्मकं कलनात्मानं च कालमन्तरेण न ते युगपद्भवितुमर्हन्तीति रूपादयो युगपदित्यैतत् कालसामर्थ्यात्, एवं घटो ग्रीवादयो मृल्लीष्टाद्यः पृथिवी मृदादयो द्रव्यं पृथिव्यादयो द्रव्यादयो भाव एव तथावृत्तेस्तथाभवनात् ।

अयुगपद्भाविनोऽपि भवितुकामस्य वस्तुनो वृत्त्यात्मककालाभावेऽनुपपत्त्यापत्तेः वर्त्तनाभावाद्वन्ध्यासुतवत् सति च तदुपपत्तेः कालात्मकता ।

नियतेस्तु सर्वात्मकत्वात्स्वभावोपालम्भवन्नियत्युपालम्भोऽपि त्वामपि प्रति समानः, सदा सर्वस्यातीतानागतानाकारतावद्वर्त्तमानानाकारता स्यात् वर्तमानाकारतावदतीतानागताकारताऽपि स्यात् ।

अपि च तथापि नैव कालातिक्रम इति स्वीक्षितमपि कालादृते नान्यत् कारणमवस्थानां क्रमेण रूपादीनां वा युगपदवस्थापकमालक्ष्यते, अस्मात् कललार्बुदपेशीघनादिक्रमेण नियतानन्तराभिव्यक्तैवाऽभ्युपगतमपि कालं नियतिमात्रग्राहदोषेण स्वपक्षरागाच्चानिच्छता त्वयाऽऽत्मा तेभ्यो गुणेभ्योऽपनीयते ।

यदि नियतिकृतैवार्थप्रवृत्तिस्तथापीदं पूर्वमिदं पश्चादिदमिदानीमिदं युगपदिति न युज्यते, सर्वेषां तेषां बीजादौ नियतेः सन्निहितत्वात् ।

नियतेरेवेति चेन्न, आनर्थक्यात्, इह तु नियत्यानर्थक्यमेव, पूर्वादिभिरेव कृतप्रयोजनत्वात् किं नियत्या? यत्पूर्वं तद्बीजादि

यत्पश्चात्तदङ्कुरादीत्येवमादिविकल्पव्यवहारेषु कालएव भवतीति भावितम्।

सर्वसङ्ग्रहेणैव वा पूर्वापरयोः कारणकार्यत्वात् कालत्वाच्च नियतेरेवासिद्धेर्व्यवहारासिद्धिरन्यथा, पूर्वादिषु तु समाश्रितेषु नियत्या किं क्रियते?

त्वन्न्यायेन तु हिताहितप्राप्तिप्रतिषेधार्थाचारोपदेशावनर्थकौ, चक्षूरूपग्रहणनियतिवत्, नियत्या सिद्धयत्स्वसिद्धयत्सु वा किं यत्नोपदेशाभ्याम्? अयत्नत एव तथा सिद्धेः।

यत्नोऽपि नियतित एव चेत् सर्वलोकशास्त्रारम्भ-प्रयोजनाभिधानानर्थक्याल्लोकागमविरोधौ, भावस्यान्यथाभावा-भावात्।

क्रियात एवौदनतृप्त्यादिफलप्रसूतेश्च प्रत्यक्षविरोधः, एवं नियतेरेवैवमिति चेन्न, कालानर्थान्तरक्रियाया एवैवंक्रियानियतिरिति संज्ञामात्रे विसंवादात्, एवमपि क्रियासिद्धौ कालासिद्धिरिति, न कालानर्थान्तरत्वात् क्रियायाः।

नियतिप्रतिपादनपरिक्लेशाभ्युपगमाच्च नावश्यम्भावाव्यभि-चारिदर्शनविपर्ययार्थप्रवृत्तेरभ्युपगमविरोधः, स्ववचनपक्षधर्मत्वा-दीनां प्रवृत्त्यैव निराकरणं प्रमाणमन्तरेणापीति।

अतः इयं भावनोच्यते, धर्मार्थकाममोक्षाः कालकृताः एवं चतुर्वर्गसाध्यसाधनसम्बन्धार्थाः सर्वशास्त्रारम्भाः कालसामर्थ्यादेव सफलाः, उक्तभावनावत्।

यथा ब्राह्मणस्य वसन्तेऽग्न्याधानं, वणिजां मद्यस्य, ईश्वराणां क्रीडादीनाम्, निष्क्रमणमित्यादि यावद्विमोक्षं यतीनाम् ।

अनियतचेतनाचेतनत्वपरिणतिवशाज्जीवपुद्गलानामनाद्यनन्त वर्त्तनात्मस्वतत्त्वानां वृत्तेः कलनात्मकं रूपं भूयो भूयो विपरिवर्त्तेऽतोऽतीतानागतवर्त्तमानवर्त्तनात्मकमेकं कूटस्थमविचाल्यनपायोपजनविकार्यनुत्पत्त्यवृद्ध्यव्ययोगीत्यादिनित्यलक्षणं कलनं कालस्वरूपतदात्मकत्वभावेनैव वर्त्तते ।

तच्च द्विविधमस्मदाद्यसर्वज्ञं प्रत्यनुमानमात्रगम्यमविविक्तमुद्देशतोऽतीतानागतवर्त्तमानवर्त्तनाकलनम्, अमितपूर्णकोष्ठागारधान्यकलनवत्, सर्वज्ञं प्रति परमनिरुद्धे काले समये समये वृत्तविविक्तवर्त्तनासङ्ख्यानं कालः ।

स तथाभूतेन कलनार्थेन तां वर्त्तनामेव सामान्यामत्यजन् भूतो भवति भविष्यंश्चेति विशेषव्यपदेशं लभते नान्यः कश्चिन्नियत्यादिः, असत्त्वात्, अन्यथाऽन्यस्याभावात्, यथा कुसुमं खपुष्पं न भवति घटो वा पटतया, तदेव तद्भवति तदेव चान्यथाऽपि भवति, कारणभेदेनापि स एव तथा कलयन् वर्त्तनेन कल्पते तेन च तस्मै चेत्यादि ।

एवमेव च स वर्त्तमानातीतयोः कारणावस्थयोरेव कार्यस्याभि-मुख्येन गृह्यते, यथासङ्ख्यमेकत्र पटादिरेकत्र मेघादिः ।

ग्रहणवच्च स एव क्रियते तथावृत्तेः क्रियया कल्पत इति नाममात्रेणैव भेदात्, तयोरप्यनागते कार्येऽतीतवर्त्तमानयोः

कारणाख्याभिमुख्येन कार्याख्याभिमुख्यकारणैक्यवद्ग्रहणकरणयोः समानता दृश्यते, यथा संयोगतन्त्वाद्युदकगर्भसर्जनपाचनादिवर्त्तन-पटत्ववत्।

अत एव च कलनमेवैकं कार्यकारणवृत्तित्वेन विपरिवर्त्तितुं क्षममपुरुषकारमस्वभावमनियतञ्च, संसारस्यात एवानादिकाल-वृत्तेरेव हेतोः पुरुषवाद्युक्तं सर्वमस्माद्भवति, पुरुषवाद्युक्तमुक्ति-क्रमार्थतुरीयवचनादेव कालस्य समर्थितत्वात्।

वृत्तिक्रमापादितकार्यकारणावस्थयोः कार्यकारणभावोपपत्ते-र्मिथ्यादर्शनादिसामान्यविशेषहेतुभिः कर्मबन्धप्रक्रियोपपत्तेः संसारा-नादिता, तस्य तु परमात्मनो न युज्यते संसारो बन्धाभावात्, बन्धा-भावः प्रदोषादिकारणाभावात्, प्रदोषाभावः कर्माभावात् कर्माभावोऽ शरीरत्वादकारणत्वाच्च।

नापि तस्य नियतेः संसारानादिता, अतत्त्वात्, क्वचि-दुपरमाभ्युपगमात्, यद्यन्न तन्न तन्नियतेर्दृष्टम्, घटपटवदिति, एवमेव तस्य स्वभावादित्येतन्न अतत्त्वात्, यद्यदेतन्न तत्तन्न तत्स्वभावात्, घटपटवदिति।

तस्मात्त्वनादिवर्त्तनात्मकत्वात् कालस्यैतदुपपद्यते, तद्यथा पृथिव्यादिव्रीह्यादिवृत्तिविवृत्तिप्रबन्धेनाऽऽत्मस्वरूपविषया क्रिया बन्धः स्निग्धरूक्षतया तेषां संश्लेषादन्यान्यरूपापत्तिः संसरणं, तच्चानादियुगपदुभयबन्धनात् तथा जीवपुद्गलयोरभिन्नवर्त्तन-

स्वतत्त्वयोः स्वसाध्येभ्य एव साधनात्मभ्यः स्वत एव बन्धक्रिया संसारक्रिया च वर्त्तनाभेदेन रूपभेदेन च, एवं कालस्यात्मस्वात्मन्येव क्रियाऽनात्मस्वात्मनि च युगपदेव बन्धसंसरणविहिता संसारानादिता युगपदभिन्नाऽनादिवृत्त्यात्मिका न न युज्यते ।

इत्यनादितावर्त्तनाप्रभेदा एव भावान्तराणि क्रमेण प्राप्ताः भूम्यम्ब्वादियोगबीजोद्भेदमूलाङ्कुरपत्रनालकाण्डपुष्पफलशूककणतुषव्रीहिकुरुकतन्दुलोदनरूपा ओदनादप्यभ्यवहृताद्रसरुधिरमांसकलेवरमृन्मृत्पिण्डशिबकस्तूपकछत्रकस्थालककोशककुशूलघटकपालशर्करिकापांशुधूलिरजोभूम्यादित्वेन परमाणुद्व्यणुकादिसङ्घाता आरम्भप्रवृत्तिनिष्ठा उत्पत्तिस्थितिभङ्गा अपि वर्त्तनात्मान एव ।

ननु कृषीवलादिभिरपि तथा तथा पर्युपास्यते, आविर्भूतश्चूताङ्कुरकालो न तावद्यवाङ्कुरकाल इत्याविर्भूतानाविर्भूतात्मा कालः ।

तस्मादेव च वर्त्तनालक्षणादवगमितद्रव्यक्षेत्रभावात्मनः कालात् परमनिरुद्धसमयत्वेनाभिन्नादपि सुषमादिभेदात्मकाद्भावभेदाः सम्भवन्ति, स एष पुनरनुभावः कालस्य प्रभुविभुत्वाभ्याम् । एकसमायामपि भावभेदाः संवत्सरवर्त्तनात्, संवत्सरे मासवर्त्तनात्, मासे दिनवर्त्तनात्, दिने मुहूर्त्तवर्त्तनात्, मुहूर्त्ते लग्नवर्त्तनादेवं नालिकायवादिभेदेन च भावभेदा नेया यावत् परमनिरुद्धसमयवर्त्तनेति, एकस्मिन्नन्यथेति चेन्न, कालदोषभावात् ।

तस्मादेव मुहूर्त्तजातानामपि पुरुषाणां तन्मात्रभेदप्रभेदस्वामिभृत्यादिभावभेदा अनुमातव्या धूमादग्निवत् । तस्यैव च व्यापित्वात्,

तथा युगपदेव पश्यतां विश्वदृश्वनामर्हतां प्रवचने कालज्ञानमवितथं दृश्यते, अद्यतनेऽपि केषुचित् पुरुषेषु । अतिसौक्ष्म्याच्चास्य तज्ज्ञानाभिमुखानां क्वचिद्वचनविसंवदनमपि दुरुपलक्ष्यत्वात्, छद्मस्थानां ज्ञेयानन्त्यादज्ञानबहुत्वाज्ज्ञान- परिमितत्वाच्च ।

तथा च

'केसिं णिमित्ता नियया भवंति केसिं च ण विप्पडिएति णाणं',

अत एव साशङ्कं मत्वाऽऽहुरन्ये प्रसह्य यथा 'कालः पचति' इत्यादि । ये पुनर्विनिश्चितधियस्ते प्रसह्यैवं वदन्ति तद्यथा

'काल एव हि भूतानि कालः संहारसम्भवौ ।
स्वपन्नपि स जागर्त्ति कालो हि दुरतिक्रमः ॥' इति ।

अथ स्वभाववादः

ननु तैः सर्वैर्वादैः स्वभाव एव भवतीति भाव्यते, द्रव्यार्थप्रसवात्, यत् पुरुषादयो भवन्ति स तेषां भावः, यथा सर्वे भावाः स्वेन भावेन भवन्ति स तेषां भाव इति वचनात्, येन येन भावेन यो भवति स तस्य भावस्तत्त्वम्, ततश्च तत्र ते भवन्तीति ते भवनस्य कर्तृत्वमनुभवन्ति, ज्ञानस्वातन्त्र्यनियमवर्त्तनात्मकं तत्त्वमिति वदद्भिः स स स्वभाव एव परिगृहीतो भवतीति कारणान्तरपरिकल्पना व्यर्था ।

तथा च स्वभावे सर्वस्वभावात्मनि भवति कर्त्तरि सिद्धे के ते पुरुषादयः? किं तैर्विना स्वभावस्य न प्रतिप्राप्तं कार्यम्?

स्यान्मतं तेषां स्वो भाव इति तानपेक्षत इति तदयुक्तम्, तेषामपि हि स्वत्त्वं स्वभावापादितमेव, ते ह्यात्मानः स्वे, तद्भावः

स्वत्वं तद्धि स्वात्मभिरेव, अन्यथा त एव न स्युरनात्मत्वात्, घटपटवत्, एवं पुरुषादयोऽप्यात्मानात्मत्वादात्मानो न स्युः खपुष्पवत्।

एवमेवैतदवश्यमत्रेव स्वभावव्यतिरिक्तार्थाभावात् तत्र तत्र स्वभावानतिक्रमात्स्वभावा एवेति सर्वैकत्वमभिन्नं वर्ण्यत इति स्वभावः प्रकृतिरशेषस्य।

पुरुषादीनाञ्च स्वत्वे सत्त्वानपोहात्तुल्ये काल एव भवनात्मा न पुरुषादय इति न स्वभावाद्दते सिद्ध्यति तत्स्वतत्त्वस्य सत्त्वाविनाभावात्, न, अतुल्यत्वात् सत्त्वस्य, कालस्यैवैकस्य व्रीहिवत्तथा तथा भवनात्, पुरुषादेश्च पृथक् पृथक् भिन्नभावात्मभवनात्।

नन्वेवमपि कालस्यैव नान्यस्येति कारणकार्यनियमात्मा स एव तस्य स्वभावः।

कालस्यैव तत्त्वाद्विभागाभावात्सामान्यविशेषव्यवहाराभाव एवेति चेदेवमपि स एव स्वभावः। व्यवहारप्रत्याख्याने च प्रागभिहितकालास्तित्वानुमानप्रत्याख्यानदोषः। यदपि च कालानुमानं युगपद्युगपद्वृत्त्योच्यते तदपि स्वभावानुमानमेव सम्पद्यते। युगपद्-युगपद्वर्त्तनातिरिक्तस्य कस्यचिदभावादुद्देश्यनिर्देशार्थं घटरूपादि व्रीह्यङ्कुरादि चोदाहृतं तस्योद्देश्यस्य निर्देश्यस्य च भावस्य तेन तेनात्मना भवनादेव तु स्वभावोऽभ्युपगतः।

अथवा नैतद्युक्तिगम्यं स्वभावकारणं तथा च दृश्यते तेष्वेव तुल्येषु भूम्यबादिषु हेतुषु भिन्नात्मभावः प्रत्यक्षत एव कण्टकादि

मूलतः क्रमहीनतनुरायतादि, पुनस्तदेव तीक्ष्णादिभूतम्, न पुष्पादि तादृग्गुणं, तच्च वृक्षादीनामेव, तत्रापि बब्बुलादीनामेव, न न्यग्रोधादीनाम्।

मयूराङ्गकबर्हादीनामेव पञ्चवर्णतावैचित्र्याणि। अत्राह च- 'कः कण्टकानां' इत्यादि, 'केनाञ्जितानि' इत्यादि।

यदि स्वभाव एव कारणं किं कारणं न स्वभावमात्रादेव भूम्यादिद्रव्यविनिर्वृत्तिनिरपेक्षा कण्टकाद्युत्पत्तिर्भवेत्? किञ्च कारणमन्यथापि न स्यात् सोऽपि कण्टकः किमर्थं कदाचित् किञ्चिद्विध्यति किञ्चिच्च नेति चेन्न, भूम्यादिस्वभावानपेक्षोत्पत्ति-दर्शनात् स्वभावाव्यभिचाराच्च, तद्यथोत्पातादिष्वकण्टकानां वृक्षा-दीनां कण्टकाः, कण्टकिनाश्चाकण्टका दृष्टाः उत्पातादिस्वभाव-नियमवशादप्यनपेक्षितद्रव्यकालादिरपि कण्टकाद्युत्पत्तिर्दृष्टैव।

अपि च भूम्यबादिद्रव्यविनिर्वृत्त्यपेक्षैव कण्टकनिर्वृत्तिरिति ब्रुवता ननु सैव स्वभावसिद्धिस्त्वयैव वर्ण्यते, भूम्यादिभ्य एव कण्टको भवतीति तत्स्वभाववर्णनात् अन्यथा स्वभावात् किमन्यदत्र शक्यं वक्तुं कारणम्?, तेषां तत्तत्स्वाभाव्यात्।

यथा पृथिव्यादिविश्वथा भावः पुरुषप्रयत्ननिरपेक्ष एव भवति, एवं निमित्तानामपि घटपटाद्युत्पत्तौ निमित्तता स्वाभाविकीति तत्कुत उत्पत्तिरिति सा प्रतिवस्तु स्वभाव एव, वयः क्षीरादिवत्।

यदि वाऽसौ नेत्थं स्यादुत्तरत्रापि न भवेदेवाभूतत्वात्, वन्ध्यापुत्रवत्, एवं मृदादिषु सतामेव घटादीनां निमित्तापेक्ष-

स्वभावैवोत्पत्तिर्नाकाशादिषु । दृष्टा घटादीनां क्रियाया उत्पत्तिरिति चेन्न, प्रागनभिव्यक्तेः ।

सा सत्यग्रहणनिमित्तावभावे किमिति चेत् स्वभावादेवेति, त्वयैवाभ्युपगतत्वादतिसन्निकृष्टमतिविप्रकृष्टं व्यवहितं वाऽञ्जन-मन्दरादि चक्षुरादिना न गृह्यत इति यथा स स्वभावस्तथायमपीति किं न गृह्यते? ।

यथैतत्तथा किञ्चिदत्यन्तानुपलब्धिस्वभावमेव भवत्यात्मादि, तत्र न सन्त्यात्मादयोऽर्था इति वृथैव विवदते शाक्यादयः । तन्न पुरुषकामचारप्रवृत्त्यादिभ्यः किञ्चिदपि निर्वर्त्तते, किन्तु भूम्यबादि-व्रीह्यङ्कुरादिमृद्घटाद्यभिव्यक्त्यनभिव्यक्तिस्वभावम्, वस्तुत्वात्त-दात्मत्वात्, तन्न कुतः कस्यचिदर्थिनोऽप्येवं वा विपर्यय एव वाऽऽरम्भक्रियानिर्वृत्तयः?

तथा चाहुः

"चित्रकः कटुकः पाके वीर्योष्णः कटुको रसे ।
तद्वद्दन्ती प्रभावात्तु विरेचयति सा नरम् ॥"

इति प्रभाव इति स्वभावपर्यायत्वाद्रसादेरपि स्वभावत्वात् स एव तथा तथा वर्ण्यते इति, तस्मात् कथं घटोत्पत्त्यादि सम्भाव्यते?

कुलालप्रयत्नप्रेरितदण्डचक्रसूत्रोदकमृदादीनां पुरुषाभिसन्ध्यनु-रूपघटाद्युत्पत्तिविनाशविपरिणामफलैः सम्बन्धदर्शनान्न स्वभाव एवेत्येतच्चायुक्तम्, प्रवृत्तिमतां हि स स्वभाव एव, फलस्व-भावानुरूपाः प्रवृत्तयोऽत एव व्यवस्थिताः । व्यवस्थितप्रवृत्ति-

फलस्वभावे भावे पुरुषप्रयासस्तर्ह्यनर्थक इति चेत्सत्यमेतत् प्रयासोऽनर्थकः, इत्थमनर्थकोऽप्यसौ पुरुषस्यास्त्येव स्वभावादेव।

प्रवृत्तिनिवृत्त्योरानर्थक्ये किंकृता किंफला वा प्रवृत्तिरतः स्वभावानुरूपप्रवृत्तिप्रतिज्ञाव्याघात इति चेन्न, तत्स्वाभाव्यादेव, प्रवर्त्तितव्यमित्येव हि प्रवर्त्तन्तेऽप्रतर्कतो वस्तुनि, अक्षिनिमेषधातुकण्टकादिवत्।

एवञ्च लोकप्रसिद्धिवशाद्यदि हेतुतो यद्यहेतुतो यदस्तु तदस्तु, उभयथापि स्वभावानतिवृत्तिः, तत्रानादिप्रवृत्तस्वभावकारणमात्मभवनमाविर्भावतिरोभावरूपेणैकं नित्यमिति न तस्योत्पादो विनाशो विपरिणामो वा, ततोऽनादिप्रवृत्तस्वभावकारणव्यत्यासे हिताहितप्राप्तिपरिहारार्थशास्त्रव्यर्थता, पुरुषस्य क्रियायाः फलस्य च तथाऽस्वभावत्वात्, ततोऽन्यथोत्पादविनाशविपरिणामेभ्यः घटार्थं प्रवृत्तेषु पट उत्पद्येत विनाशार्थं प्रवृत्तेष्वविनाशो विपरिणामार्थं प्रवृत्तेष्वविपरिणामश्चेति स्वभावानियमान्नोत्पादविनाशविपरिणामाः सन्ति।

अतः शास्त्रार्थवत्त्वाय घटादेः कारणमन्विष्यमाणं वरमिदमेव कारणं स्वभावः, तत्कारणं द्विधा प्रतिवस्तु स्व एवाऽऽत्मीय एवात्मैव वा भावः, स चैकोऽपि कर्तृकर्मकरणादिकारकभेदं स्वशक्तिभेदादेव लभते, तद्यथा स एवानुभवति सोऽनुभूयते।

स्वयं द्रव्याण्येव कर्माकर्मत्वस्वभावानि संयुज्यन्ते वियुज्यन्त इति संसारमोक्षौ स्वभावतः, अन्योऽन्यसंयोगवियोगविपरिवर्त्तनेन

विपरिवर्त्तमानोऽपि स्वभावात्माऽव्याबाधः साध्यासाध्यद्वैतरूपवद-द्वैतरूपः यथा कनकाश्मनि सुवर्णं द्विधाऽविर्भवत् क्रियाक्रियाभ्यां तत्स्वभावः, अन्तरेण धातुवादं यथा कनकाविर्भावस्तथा कर्मविवेक स्वाभाव्यादेव भव्यजीवानामात्माविर्भावः, सम्यग्दर्शनादिज्ञान-पूर्विकया तु क्रियया कैवल्यप्राप्तिर्धातुवादक्रिययेव कनकोत्पत्तिः केषाञ्चिदनाविर्भाव एव कर्माविवेकस्वाभाव्यात् ।

एवञ्च तदुभयस्वभाववर्णनादात्मानो द्विविधा भवसिद्धिकाश्चा -भवसिद्धिकाश्च, अभव्यजीवकर्मणोः सन्तानस्याव्यवच्छेदस्वभावाद -नन्तता, भव्यस्य तु विशुद्धिविशेषस्वाभाव्येन व्यवच्छेदात् सान्तता स्वभावादेव । यदि हेतुरन्यो मृग्येत तेनानन्त्यमस्यापि स्याद-नादित्वादाकाशवत् ।

तदन्तवत्त्वे आकाशमपि सान्तं स्यादनादित्वाद्भव्यकर्मवत् । अथाप्यस्यानादित्वे सत्यहेतुरन्तो भवति ततो निर्हेतुकत्वहेतु-कान्तत्ववद्भव्यकर्मसन्तानस्य निर्हेतुकत्वहेतुकादित्वसिद्धिः कस्मान्न भवतीति स्वभाव एव शरणं कारणवादिनां तदुपायस्वभावत्वान्मोक्ष स्येति । एवं तावद्भव्यसंसारोच्छित्तावभव्यसंसारानुच्छित्तौ च हेतुवादे चोदिते स्वभावाश्रयेण परिहार उक्त एवं सर्वचोद्येष्वतिदेश्यः ।

स्वभावानभ्युपगमे तु साधनदूषणाभावाद्धादहानं ते प्राप्तम्, तद् यथा पक्षहेतुदृष्टान्तादयः साधनं तद्दोषोद्भावनं दूषणञ्च स्वेन भावेन व्यवस्थितमन्यथा न साधनं न दूषणञ्च स्वभावापेतावय-वार्थत्वात्, तस्मात् स्वभाव एव प्रभुत्वविभुत्वाभ्यां कारणं जगतः ।

अनया च दिशा शब्दब्रह्मतत्त्वभेदसंसर्गरूपविवर्त्तमात्रमिदं जगदित्यादिकारणवादा भिद्यन्ते संज्ञादिभेदात्, ते पुनः सर्वेऽपि परमार्थद्रव्यार्थस्य विधिविधिनयस्य स्वरूपमस्पृशन्त एव प्रवर्त्तन्ते, संक्षेपेणायं हि सर्वोऽपि यत्नः सामान्यभिन्नस्वरूपोपादानेनैव स्वाभिमतनिराकरणाय भवति भिन्नार्थाभ्युपगमात्।

पुरुषवादे तावज्ज्ञानमयो न रूपादिमय इति रूपादीनां तन्मयत्वात्तानि च रूपादीनि कार्यात्मानः, तेषां तन्मयत्वे कार्यत्वानेकत्वानित्यत्वासर्वत्वानि पुरुषस्यैव प्राप्तानि। तस्मात् पुरुषस्यैकत्वनित्यत्वकारणत्वसर्वत्वानि निराक्रियन्तेऽवस्थानां पुरुषमयत्वात्। अवस्थावच्च पूर्वादिनियत्यादिष्वपि।

अथ भाववादः

स्वभाववादे तु अतिशयश्चायं, आदावेव भेदोपादानात् सम्भवव्यभिचारवृत्त्यनुमत्या भावविशेषणस्वशब्दोपादानात्, यथा नीलमुत्पलमिति, तथैव चार्थस्य निरूपणात्।

यदयं भवतीति भूयतेऽनेनेति वा भाव इत्यावयोर्भावशब्दार्थव्युत्पत्तौ तुल्यता, स्वशब्दार्थो विशेषणत्वेन प्रतीयमानश्चिन्त्यः, सोऽस्वव्यावर्त्तनार्थः, तदर्थत्वाच्चेतरेतराभावमात्रविषयः, स्वपराभावादितरेतराभावार्थाभावस्तत्तश्चास्वाभवने वर्त्तते, न तु भावस्वरूप-प्रतिपादनमिति भावार्थासंस्पर्शान्न किञ्चिदनेन।

तस्मान्न तत्रोपक्षीणशक्तित्वात् स्वभवनस्य प्रयोजकः, अर्थो वा स्वशब्दं न प्रयोजयति, शब्दवृत्तिविरोधात्। एतदपि वा

स्वशब्दस्य नैवास्ति, अस्वस्याभूतत्वाद्वन्ध्यापुत्रवत्, न चाभूतो व्यावर्त्तनाय, अथ सोऽस्वस्तथा, ततः स भाव एव तस्य भाव-शब्दवाच्यार्थवत् किं व्यावृत्त्याऽनर्थिकया?

स्यान्मतं तस्याभावाद्व्यावर्त्यता विशेषणार्थवत्ता चेत्येतच्चा-युक्तम्, तस्य भावत्वप्रसङ्गात्, न ह्यसतः प्रसङ्गोऽस्ति, अप्रसक्तस्य व्यावर्त्यता वाऽस्ति, अब्राह्मणवचनेन ब्राह्मणत्ववत्, तस्माद्यदपि व्यावर्त्यते तदपि भवेदेव, व्यावर्त्यत्वाद्ब्राह्मणवत् । वैधर्म्येण असत्, असतोऽप्रसक्तत्वादप्रसक्तस्य चाव्यावर्त्यत्वात्, खपुष्पवत्, किञ्चित्वाद्वस्तुत्वादर्थत्वादेः, स्ववत् ।

अयञ्च स्वभावः किं व्यापी प्रतिवस्तु परिसमाप्तो वा? तत्र व्यापित्वे त्यक्तस्वपरविशेषणः स्यादेकरूपत्वात्, प्रतिवस्तुत्वे किं तेन कल्पितेनाभिन्नफलेन लोकवादात्?

स्वभावाभाव एव च प्रसक्तः, तद्यथा — प्रत्येकमात्र-वृत्तिघटाद्येव घटादीनि इतरेतराभावात्, परस्परमस्वभवनपरिग्रहात् कुतः क्व चासौ स्वभावः?

भावविषयैकार्थे स्वत्वे स्वत्वादनन्यो भाव इति चेत्सत्यम्, न किञ्चिदन्यत् स्वं नामेति किमत्र भेदेन क्रियते घटादिना पटादिभावविशिष्टेन? द्रव्यार्थस्वरूपस्याभिन्नत्वात् ।

सोऽपि यदि भावः भवतीति भावस्वरूपादभिन्न एव, अथ न भवति भेदो भावः, तदस्तित्वमेव नाभ्युपेमोऽभवनात् खरविषाणवत्।

ननु घटस्य भाव इति व्यतिरेकषष्ठ्या व्यपदिश्यमानत्वात् पटादिव्यतिरेकेण घट एव भवनस्य कर्त्तेति, न, भावस्यैव तथातथाभवनात्, स एव हि भावो घटपटादिर्भवति, हस्तादिभवनकारणयोः पुरुषभवनकारणवत्, न हि हस्तादौ भवति कुर्वति वा देवदत्तो न भवति न करोति वा, अतो भावत्वेऽभावत्वे वा नास्त्येव भेदो घटादेरिति।

तच्च प्रत्यस्तमितनिरवशेषविशेषणं भवनं सर्ववस्तूनां मूलं स्फटिकवत् सर्वबिम्बप्रतिबिम्बसामान्यम्।

तदेव हि भवनं व्रीह्यादि तदेव च मृदादि साध्यं साधनञ्चैकं तथा अहेयं सदा तदवस्थमेव भवनात्, पुरुषस्य हस्त्यादियावद्भवनवत्, पुरुष एव हि हस्त्यादिर्मृदादिश्च भवति तथा भवनमेव पृथिव्यम्बुमृदादिर्भवति, एकत्रैवोपयुक्तार्थत्वात्। घटादेर्भवनस्य भेदेऽसत्त्वमेव भावाद्भिन्नत्वात् खरविषाणवत्।

भावाद्भिन्नोऽपि घटो भवत्येव चेत्तस्य भवने वन्ध्यापुत्रोऽपि भवेदघटत्वात्।

आत्मनाऽभावात् पटवत्, घटवदेव वा तद्भावाद्भेदाभावाच्च भाव एव विकल्पोऽत्र न सत्यः।

विकल्पो हि भेदसंसर्गपरिणामैर्भवेत्, न चास्य भेदः संसर्गः विपरिणामो वा एकतत्त्वात्मकत्वात् प्रतिस्वत्ववत्।

विकल्प्येत च भाव एव नाभावः, खपुष्पादिरसत्त्वादिति भावस्यैव घटपटादिना भवनं नास्य भेदः कश्चित्, तस्यापि तत्त्वादेव कुतोऽत्र विकल्पः ।

ननु भेदः प्रत्यक्षत एव पूर्वोत्तराद्युत्पत्तिविनाशवस्तु-प्रविभक्तत्वाद्गृह्यते अभेदश्च न गृह्यते ।

अत्रोच्यते, अस्ति किञ्चिद्भावव्यतिरेकेण पूर्वमुत्तरं वा? ततः किं तदपूर्वं यदुत्पद्यते पूर्वं वा विनश्यतीति पूर्वोत्तरादिदिक्कालोत्पत्ति-विनाशवस्तुप्रविभागाभावात् किं तत् प्रविभक्तं प्रविभज्यते प्रविभक्ष्यते वा? अतो नाभावो भेदो भवति ।

स एव ह्युत्पाताद्युदकाग्नित्ववत्तद्विरोधिधर्मापत्त्याऽन्यथा वर्त्तमानोऽन्यथापि वर्त्तत एव । भिद्यमानं हि वस्त्वेवं भिद्यते स्वरूपादविपर्ययगत्या, यद्यभावो भावो भवेत् स तु न भिद्येत कथञ्चित् । उपचितापचितभवनो वा स एव भावो न भिद्यत इति न काचिदवस्था दधिघटादिरादिनिधनविभागवती, क्षीरदध्याद्यवस्था-स्वेकरूपत्वाद्भवनस्य ।

यदि स्यात् सा खपुष्पावस्थापि तत्त्रयधर्मा स्यात् सर्वतो व्यावृत्तत्वात् दधिघटवत् । महापृथिवीवियदवस्थे सादिनिधनविभागे स्याताम्, इतरेतरासत्त्वात्, घटवत्, घटोऽपि वाऽनाद्यादिः अत एव, आकाशमहापृथिवीवदिति ।

तद्ग्रहणमपि नैव भेदस्याभावादेव, अभावः कल्पनात्मक-त्वात्, कल्पनात्मकश्चासन्, वस्तुनोऽन्यथात्वात्, सा च कल्पना

देशतः कालतो वा स्वरूपत एव भिन्नेष्वर्थेष्वभेदकल्पनाद्वा स्यात्, देशकालाद्यभेदे वा भेदकल्पनात् स्यात्, उभयथाप्यसद्रूपत्वं कल्पनायाः, इह तु देशकालाभ्यामभेदो नास्ति, घटादेः कपालादित्वेन भिद्यमानस्य वस्तुनो यावत् परमाणुशो रूपादिशोऽनभिलाप्यत्वशश्च भेदात्, कालतश्च क्षणे क्षणेऽन्यत्वात्, तस्मादनभिलाप्यपरमार्थस्य च वस्तुनो घट इति रूपादिरिति ग्रहणमसदध्यारोपात्मकम्, देशकालाभेदाभावात्, खपुष्पवत्।

अभेद एव तु गृह्यते प्रत्यक्षतः भावस्याभिन्नत्वाद्गृह्यमाणस्य च भावत्वात्।

अथ समस्त एव कस्माद्भावो न गृह्यते? अत्र तु समस्तग्रहणं वक्ष्यामः, त्वां तु किञ्चित् पृच्छामः पश्यता त्वया घटं किं समस्त एव घटो न गृह्यते? परान्तरादिभागाः किं न प्रत्यक्षाः? आराद्भागा एव किं प्रत्यक्षाः? इति, किञ्च समानदोषत्वादचोद्यमेतत् — भावस्य सर्वगतस्याप्रत्यक्षत्वदोषो मम नास्तीति विशेषं पश्यत एतद् युज्येत वक्तुमित्थं भवति तथा न भवतीति, न तु सर्वत्रैवादर्शनभाक् पक्षो यस्य तस्य।

तत्तु दर्शनमत्रैव निर्वर्त्तते न भेदपक्षे, इह यदेतत् सर्वं तद्भाव एव, तस्य य एकदेशः तस्य ग्रहणे तस्यैव ग्रहणं ततोऽभिन्नत्वात्, तद्भावत्वात् देशस्वात्मवत्, तस्य ह्येकोऽपि प्रथनं प्रतिदेशः सर्वाविभक्तभवनवृत्त्यात्मकत्वात् सार्वरूपमनतिक्रान्तः ततोऽभेदपक्ष एव दर्शनम्। नन्वेकदेशश्च स एव चेति विप्रतिषिद्धमिति चेन्न ज्ञायमानत्वापेक्षयोक्तत्वात् त्वन्मत्या सावयवदर्शनं नान्यस्येति।

न चास्योद्‌र्ध्वाधस्तिर्यग्दिक्षु मूर्तिविवर्त्तप्रत्यङ्गानामेकत्वाभिमतभेदवदेकत्वात् क्वचिदवच्छेदो विद्यते दक्षिणोत्तरयोरपि किमु घटपटयोर्भवनैकमूर्त्तिविवर्त्तानवच्छेदात् इति स भावो ध्रुवः कूटस्थोऽविचाली अनपायोपजनोऽविकार्यनुत्पत्तिरवृद्धिरव्ययः । एतानि हि नित्यविशेषणानि भावस्यैव घटन्ते न पुरुषादीनाम्, उक्तवत् ।

अस्य प्रत्यक्षप्रमाणसिद्धिरिहैव, यथार्थवस्तुविषयत्वात्, अन्यत्रानुमानतैव भावे, सम्बन्धैकदेशप्रत्यक्षप्रत्ययशेषसिद्ध्यात्मकत्वात् ।

कुतोऽनुमानताऽपि? प्रत्यक्षत्वासिद्धेः, सम्बद्धयोः कदाचिदप्यग्रहणात्, प्रत्यक्षपूर्वत्वे तत्सम्भवात्, तदभावे तदसिद्धेः ।

तत् किमज्ञानमेवापद्यते?, कुतोऽज्ञानमपि तत्प्रत्यक्षम्?, प्रत्यक्षपूर्वकाज्ञानत्रयेऽनन्तर्भावात्, संशयविपर्ययानध्यवसाया अज्ञान-विकल्पाः प्रत्यक्षपूर्वकाः तत्र संशयनीयविपर्ययितव्यविषय-प्रत्यक्षात्यन्ताभावात् कुतः संशयविपर्ययौ, अनध्यवसायोऽध्यवसायपूर्वः, स चाधिकोऽवसायोऽध्यवसायस्तद्व्यावृत्तिविषयाध्यवसायासम्भवात् कुतोऽनध्यवसायः? । अन्वाह च,

"यथा विशुद्धमाकाशं तिमिरोपप्लुतो जनः ।
सङ्कीर्णमिव मात्राभिश्चित्राभिरभिमन्यते ॥
तथेदममृतं ब्रह्म निर्विकारमविद्यया ।
कलुषत्वमिवापन्नं भेदरूपं विवर्त्तते ॥

तस्यैकमपि चैतन्यं बहुधा प्रविभज्यते ।
अङ्गाराङ्कितमुत्पाते वारिराशेरिवोदकम् ॥
प्रकृतित्वमनापन्नान् विकारानाकरोति सः ।
ऋतुधामेव ग्रीष्मान्ते महतो मेघसंप्लवान् ॥

इति विधिविधिनयः समाप्तः [१]

एषु विधिविधिषु विकल्पः शब्दार्थः, उक्तेषु पुरुषादिष्ववस्थाभ्युपचरितप्रक्रियाभेदकल्पितविकल्पसत्त्वात्तद्वस्तुनिर्विकल्पत्वात्, विद्या तु तत्त्वज्ञानं साऽऽगमविकल्परूपा न भवितुमर्हति वाग्गोचरातिक्रान्तत्वात्तत्त्वज्ञानविषयानन्तात्मकैकपरमार्थस्य ।

ये त्वेते घटादिशब्दा मेघस्तनितवदेते शब्दा एव केवलाः श्रोत्रग्राह्यत्वान्नार्थस्वरूपस्य वाचकाः, नन्विदं प्रसिद्धिप्रस्तुतव्यवहारविरुद्धम्, अत्रोच्यते न ब्रूमः प्रतिपादका इति, किं तर्हि? वाचका इति ब्रूमः प्रतिपत्तृसङ्केतवशात्तदुपलक्षणत्वेन प्रतिपादकत्वं न विरुध्यते, मयूरविरुतवद्धि सङ्केताद्व्यवहारानुपातेन ।

अथवा ते सर्व एव शब्दास्तस्यैव चैकस्य ब्रह्मणो लक्षणार्थाः तदेकदेशत्वात् प्रागभिहितप्रत्यक्षप्रसिद्धिवत्, यथा गौर्विषाणी ककुद्मान्, प्रान्तेवालधिः सास्नावानिति, एवञ्च कृत्वाऽऽहुः — *"सर्वधातवो भुवोऽर्थमभिदधती"*ति ।

एकोऽनवयवः शब्दो वाक्यार्थः, भवनस्यानवयवत्वात्, एष द्रव्यार्थो विधिविधिनयः, सङ्ग्रहदेशत्वाच्चास्य द्रव्यार्थता, इह तु द्रवति

१. मातृकासु अत्र एवं पुष्पिका दृश्यते ।

भवतीति द्रव्यं भवनं भावः, निबन्धनमस्य *सोमिलब्राह्मणप्रश्ने 'किं भवं? एक्के भवमित्यादिके व्याकरणे 'सोमिला! एगे वि अहं दुवे वि अहं, अक्खए वि अहं अव्वए वि अहं, अवट्ठिए वि अहं, अणेगभूयभावभविए वि अहं''* ॥ इत्यादि ।

एवं द्वितीयो विधिविध्यरः सविकल्पो नयचक्रस्य समाप्तः ।

१. भगवती सूत्रम् श. १८ उ. १. सू. ६४७ ।

तृतीयो विध्युभयारः

अथ किं भवता प्रतिस्वमात्मनो ग्राहे तथा तथा या एता व्रीह्यङ्कुरादिघटपटादिवस्तुव्यापिवृत्तयोऽवस्था उक्तास्तासु पुरुषादितत्त्वमवस्थालक्षणं? उत पुरुषादिलक्षणास्ताः?

यद्यवस्थास्वात्मैव न पुरुषाद्यात्मावस्थास्ताः, ततः पुरुषो नाम न कश्चिदिति रूपादिसमुदयमात्रवाद एवायमन्यो युग पद्भावि-रूपादिगुणसमुदयवादतुल्यो युगपदवस्थचतुरवस्था- समुदयवादः।

तुरीयत्वप्रतिपादनार्थाभ्युपगतमुक्तिक्रमवदयुगपदवस्थावृत्तेः क्षणिकवादः, वासोवत्।

शून्यवादोऽपि। तद्यथा — चतसृणां न ज्ञानव्यतिरिक्तत्वं, तथातथा त्वयैव ज्ञानात्मना रूपरसादिघटादिसृष्टेः प्रतिपादनात्, सा च कल्पनाज्ञानं तन्मात्रमेव सत्यं, न रूपादि किञ्चित्, स्वप्नवदिति विज्ञानव्यतिरिक्तार्थशून्यवादः, न वा विज्ञानमात्रं निर्विकल्पत्वाश्रयस्य शून्यत्वापत्तेः।

अचिन्त्यमेवेदं चिन्त्यते मया हि पुरुष एवेदमित्यवधार्योक्तं नोक्तमिदमेव पुरुष इति, ऊर्द्ध्वमधस्तिर्यक् क्वचित्तत्त्वैकः पुरुषः, अनतिरिक्तपरापराणीयोज्यायोरूपात्म- कत्वात्, वृक्षवदिति।

नन्वयमनेकावस्थामात्रस्वतत्त्व एव व्यवस्थापितः, चैतन्यानतिवृत्तिवर्तनात्, तच्च विनिद्रावस्थातोऽनन्यदिति विनिद्रावस्थालक्षण एव पुरुषः, आत्यन्तिकनिद्राविगमरूपनिरूप्यत्वात्, विनिद्रा -वस्थास्वात्मवत्।

न ह्यसावितरात्मिका, स्ववृत्तित्यागापत्तेः सा तन्मात्रैव, तन्मात्रत्वे तु पुरुषस्यापि तदवस्थामात्रत्वम्, तस्माज्जाग्रदाद्यवस्थानात्मकत्वादसर्वगतत्वमिति।

अथ विनिद्रावस्थालक्षणोऽपि पुरुषः सर्वत्वात् न विनिद्रावस्थामात्र एव ततो विनिद्रावस्थापि न विनिद्रावस्थामात्रैव स्यात्, विनिद्रावस्थालक्षणत्वात् पुरुषस्वात्मवत्।

ततश्च प्रत्यवस्थं विनिद्रावस्थावृत्तिः तस्या एवाविशेषेण सर्वगतत्वात् सुषुप्तावस्थापि तृणादि सर्वगतमिति किं पुरुषैकत्वप्रकल्पनया?

अलक्षणत्वाच्च विनिद्रावस्थाया अभावः स्यात्, स्वात्मन्यस्थितत्वात्, खपुष्पवत्, ततश्च तत्तत्वचतुरवस्थसर्वात्मक पुरुषाभावः, तदभावे किमवशिष्यते ?

अथ विनिद्रावस्थालक्षणविपरीतोऽपि पुरुषस्तु पुरुष एव, अवधारणभेदात्, विनिद्रावस्थायाः स्वात्मन्यवधार्यमाणविनिद्रावस्थैव लक्षणम्, पुरुषस्य तु लक्षणमेवेति, पुरुषो लक्ष्यत्वेनानियतोऽन्यासामप्यत्यागात्, स ह्यनेकरूपो मेचकवदिति।

न, उक्तवदवधारणभेदस्यान्याय्यत्वात्, प्रतिज्ञातव्याघातात्, घटरूपादित्ववत् विनिद्रैकावस्थालक्षणपुरुषव्यतिरिक्तार्थाभावात् कोऽवधारणार्थः? पुरुषत्वं प्रागुक्तमवस्थानाम्, अधुना तु पृथक्स्वात्मनस्ता उच्यन्तेऽवस्था इति तत्त्वं पुरुषस्य, न पुरुषत्वं तासां रूपादिघटत्ववत्, यथा रूपादय एव घट इत्येतस्मिन् पक्षे न घटो नाम कश्चित् तथा यद्यवस्था एव पुरुषो युज्येतावधारणम्, तत्तु न युज्यते चैतन्यात्मकैकपुरुषमयत्वप्रतिज्ञाव्याघातात्।

यदा च तासामेव तत्त्वं पुरुषे तु सा लक्षणमेव, तथा तथा तासामितरेतरात्मस्वभावादवधारणभेदादत्यन्तभिन्नार्थत्वात् सामान्याभावः, ततो विविक्तानेकभेदावस्थामात्रत्वात् सर्वमसर्वगतमिति ननु तदेव दर्शनमेतदप्यापन्नं लोकवदेव तत्त्वापत्तिरिति।

अथ विकल्पशब्दार्थत्वादलक्षण एव, तस्याज्ञाततत्त्वत्वात् कुतो वा लक्षणम्? कुतोऽवस्था? इति, तदयुक्तम्, तर्हि चतुरवस्थावर्णनं कथमुपपद्यते? अनेकात्मकसर्वगतत्वभावनञ्च?

यद्यस्यैकैका प्रत्येकं सुप्ताद्यवस्था न भवति ततश्च तासामसत्त्वात् कुतोऽस्य भिन्नानामेकत्वापत्त्यात्मिकाऽविकल्पता?

पृथक् पृथगवृत्तसितासितादिवर्णैक्यापत्त्यात्मकमेचकवर्णाभाववत्, न हि पृथगवृत्ते रूपे द्वे अपि मेचकात्मके भवतः, असन्नेव त्वसावेवम्, अनवस्थात्वात्, वन्ध्यापुत्रवत्।

अनवस्थात्वेऽचतुरात्मकत्वात् खपुष्पवत्, अथवा किमनेन प्रयासेन, ननु त्वदुक्तेरेव च न स लक्ष्यः, अलक्षणत्वात्, अलक्ष्यत्वमिष्टत्वादसाध्यमिति चेत्? लक्ष्यत्वनिराकृतेरर्थनिराकरणार्थत्वान्नार्थः, निर्विकल्पत्वादेवार्थोऽपि नैवेति चेन्निर्विकल्पज्ञानवदवस्त्वेव त्वदिष्टं तत्त्वम्।

अथात इतश्चान्यतरोपादानपरित्यागायुक्तत्वादस्य तल्लक्षणतत्त्वाभ्यामवाच्यतैवेत्येतदयुक्तम्, स त्वसन्नेव हि स्यात्, विनिद्रावस्थया सहैकत्वान्यत्वे प्रत्यवचनीयत्वात् खपुष्पवत्, न तदेकं नान्यद्वा वाच्यम्, निरुपाख्यत्वात्, यत्तु सत्तद्विनिद्रावस्थया सहैकत्वान्यत्वे प्रतिवचनीयम् यथा विनिद्रावस्थायाः स्वात्मनो जाग्रदाद्यवस्थास्वात्मनश्चान्यानन्यत्वे प्रत्यवचनीयत्वात्।

अत एव च तदुभययुक्तत्ववाच्यत्वाभ्युपगम एव, पितृपुत्रवत् तदन्यतरत्यागोपादानायुक्तत्वस्य तदविनाभावात्, अवस्थानामभावेऽनेकदोषप्रसङ्गात्।

यद्यपि च पुरुषस्वात्मैव चतस्रोऽप्यवस्थास्तथापि न तर्हि नामेदानीं पुरुषोऽस्ति, अनवस्थत्वात् खपुष्पवत्, अनवस्थस्य तस्याभ्युपगमेऽपि तु पुरुषस्यावस्थानां चतसृणामप्यैक्यं स्यात्,

पुरुषस्वात्मत्वात्, पुरुषवत्, ततश्च सर्वत्वेन सर्वत्र सम्भाव्याभावात् सर्वाव्यापिता पुरुषस्य।

ततः पुनरेकत्वं विनिद्रावस्थास्वात्मत्वात्तासाम्, पुरुषस्वात्मत्वात् परस्परात्मकत्वञ्च सिद्धम्, विनिद्रावस्थैव हि जाग्रदवस्था विनिद्रावस्थास्वात्मत्वाद्विनिद्रावस्थावत्, एवमितरे अपि तथा जाग्रदवस्थैव विनिद्रावस्था जाग्रदवस्थास्वात्मत्वात् जाग्रदवस्थावत् तथा सुप्तावस्थैव विनिद्रावस्था सुप्तावस्थास्वात्मत्वात्सुप्तावस्थावत् तथा सुषुप्तावस्थैव विनिद्रावस्था सुषुप्तावस्थास्वात्मत्वात् सुषुप्तावस्थावत् यैवान्यावस्था सैवान्यापि, एकस्वात्मत्वात्, सेवेति पुरुष एवेदं सर्वमित्यतिदेशाभावो भेदाभावात्।

उपवर्णनभिन्नरूपाणामासां व्यतिकरः सङ्करश्च प्राप्तः व्यतिकरो विनिद्रावस्थास्वात्मत्वं जाग्रदवस्थास्वात्मनः, जाग्रदवस्थास्वात्मत्वं विनिद्रावस्थास्वात्मनः, एवमितरयोरवस्थयोरपीतरेतरस्वात्मत्वप्राप्तिः। सङ्करस्तु क्षीरोदकसंयोगवदविवेचनीयविनिद्रावस्थास्वात्मत्वमिति, ताभ्याञ्चातथात्वं तत्तत्स्वात्मत्वात् तत्स्वात्मवत्, अस्य चातथात्वमेव तत्स्वात्मत्वात् तत्स्वात्मवदिति पुरुषावस्थाव्यवस्थाऽभाव एव।

उक्तवद्वा व्यवस्थानुमतौ सत्यां पुरुषातिदेशस्त्याज्यः, तदत्यागे यदर्थमयमतिदेशोऽद्वैतैकान्तार्थस्तस्यैवासिद्धिः, एकपुरुषाभ्युपगमो ह्ययमेकपुरुषासिद्धिमेव ते करोति, योऽसावेक एव सम्भाव्यते पुरुषस्तस्याप्यनेकतैवमापद्यते।

यत्स्वरूपाव्यतिरिक्तलक्षणा अवस्थास्त्वया विना भेदेनोच्यन्ते पुरुष एवावस्था इति, नावस्था एव पुरुष इति तत एव तस्य ताभ्यो नानात्वं तासाञ्च त्वद्वचनादेव सिद्ध्यति, यथोर्द्ध्व-ग्रीवादिलक्षणो घटो घट एवाद्ध्वर्ग्रीवादय इति, न त्वभेदेऽवधारण-भेदोऽस्ति, यथा घट स्वात्मैव घटो घट एव घटस्वात्मेति, स पुरुषोऽप्येवञ्च सति पुरुषान्तरेणाभिव्याप्तः, ततश्चानवस्थितैक-त्वतत्त्वप्रतिष्ठः पुरुषान्तरातिदेशयश्च, पुरुषस्वात्मत्वादवस्थावत्।

अस्यां प्रत्यक्षार्थेदंविषयतायां वाऽचेतनव्यक्तमूर्त्ता-नित्यादिरूपार्थपुरुषपरमार्थता प्राप्नोति।

अवस्थास्त्वन्यत्वानेकत्व एव पुरुषः, अवस्थास्वात्मत्वात् पुरुषस्य, ततस्तासामन्यत्वेनानेकः, त्वदुक्तेरेवावश्यमन्यास्ताः पुरुषात्ताभ्यश्च सोऽन्यस्तद्रूपापत्त्यनिष्टत्वात् अवस्थान्तरवत्।

यतोऽवस्थास्वात्मत्वमस्य नेष्यते, पुरुषातिदेशात्तु पुनरन्यत्वं न सम्भवत्येव, स्वपरविषयकृतभेदद्वारान्यत्वासम्भवात्, कस्य-चित्कथञ्चित्ततोऽन्यस्यानुपपत्तावपि चतस्रोऽवस्थाः त्वदुक्तिवदेव येन केनचिदुपपत्तिप्रकारेण सम्भावनापादितान्यत्वाः पृथक् पृथक् स्युः पुरुषश्च।

अथ पुरुषलक्षणापि विनिद्रावस्था न पुरुषः पुरुषोऽपि न तर्हि पुरुषोऽस्तु, पुरुषलक्षणत्वाद्विनिद्रावस्थावदेवं शेषा अपीति पुरुषाभाव एव, कुतोऽस्य सर्वगतता?

अथवा त्वदभिप्रेतमेवैतदेवम्, तदात्मत्वाभिमतनिरसनात्, यथोष्णो न भवत्यग्निरिति ब्रुवन्नौष्ण्यात्मानमग्निमेव निरस्येत् तथेहापि।

यत्तु यत्नेन (अवस्थालक्षणः पुरुषः पुरुषलक्षणा अवस्था इत्यतिदिश्यते तेनैकत्वान्यत्वादिविकल्पप्रसङ्गेनाविकल्पपरमार्थतयेष्टस्य तस्यासत्त्वमेवोक्तमतो न तूक्तवत्।)

वयमपि ब्रूमोऽसदेव सर्वं त्वदिष्टमिति, त्वन्मते सर्वस्याभावात्। भवनं हि द्विविधं सन्निधिभवनमापत्तिभवनञ्च। सन्निधिभवनमापत्तिभवनाभावे न भवितुमर्हति। इदमपि कुतोऽस्य? भेदत्वेन परिणामित्वेन वाऽभूतत्वात्, वन्ध्यापुत्रवत्।

अव्यभिचरितानेकत्वापत्तिर्ह्यनेकेन विना न भवति यथा शुक्रशोणितादेरनेकस्यैकत्वापन्नस्याध्यात्मिकस्य, स हि भेदभावः सर्वत्वं तस्मान्नाभिन्नस्यैकस्य सर्वत्वमिति सर्वत्वाभावात् 'पुरुष एवेदं सर्व'मित्ययुक्तमुच्यते।

त्वदुक्तैकसर्वतायान्तु प्रत्यक्षत एव भिन्नानेकैकसर्वताया दर्शनात् प्रत्यक्षविरोधो ग्रहणभेदादनुमानविरोधः, त्वदुक्तास्मदुक्तैकार्थ्याभावे भेदाभ्युपगमात् स्ववचनाभ्युपगमविरोधो लोके घटपटादिभेदप्रतीतेर्लोकविरोधः, अविकल्पशब्दार्थाद्विकल्पव्यवहारा-ङ्गीकरणादभ्युपगमविरोधः, असिद्धादिहेतुता च, न घटाद्यवस्थाऽभेदाद्वृक्षादिदृष्टान्तः।

यथा च पुरुषे तथेतरद्रव्यार्थेष्वपि प्रतिस्वं योज्यम्, तद्यथा — विनिद्रावस्थास्थाने पुरुषस्य सामान्यलक्षणं विशेषलक्षणञ्च यथा व्याख्यातं तथा नियत्यादावभेदैकत्वं सामान्यलक्षणमतीतानागतवर्त्तमानबाल्यकौमारयौवनक्रमयौगपद्यादयो निद्रादिवद्विशेषलक्षणमिति व्याख्याय विकल्पद्वयप्रतिषेधस्तथैव कर्त्तव्यः।

अतस्तत्त्वे तावत्संवदति यदयं भवति सोऽस्य भाव इति सर्वगतत्वनित्यत्वदेशकालाभेदात्। इदं पुनर्न तावदिच्छामो यस्तु भवति स कर्तैवेति, सम्प्रधार्यत्वात्, अकर्त्तुराकाशादेरपि भवनात्, अभवनव्यावृत्तिमात्रसत्तार्थत्वाद्भवनस्य, कारणपर्यायत्वात् करोतेः अकारणमपि भवत्येव, भवतेः सान्निध्यापत्तिभवनद्वयार्थत्वात्, अस्तिभवतिविद्यतिपद्यतिवर्त्ततीनां सन्निपातषष्ठानां सत्तार्थत्वात्।

असतो भवनाभावादस्त्यादिभवनं सन्निधिमात्रवृत्त्येव तदापत्तिभवनपृथग्भूतम्।

सर्वतन्त्रसिद्धान्तेन विरुद्धमस्वतन्त्रभवनम्, भवतेः कर्त्तृविहिततिप्प्रत्ययान्तत्वादित्येतच्चायुक्तम्, तत्रैवानुज्ञातत्वात्, यदुपाद-यैतदभिधीयते। यत्राप्यन्यत् क्रियापदं न श्रूयते तत्रापि *'अस्तिर्भवन्तीपरः प्रथमपुरुषेऽप्रयुज्यमानोऽप्यस्तीति गम्यतेऽर्थ सद्भावात्, यथा वृक्ष इति, अस्तीति गम्यते।'*[1] अस्ति भवति सन्निहितमित्यर्थः।

१. महाभाष्यम्. अ.. २ पा. ३ सू. १

अस्तिभवनमेवेदं सन्निहिततथावृत्ति आपत्तिभवनम्, कारणे कार्यस्य सत्त्वात्, यथा घटो भवतीति, पूर्वमघटत्वेन दृष्टं सन्निहितमेव मृदि घटभवनं व्यक्तं निर्वर्तते आपद्यत इति।

सा च सन्निधिसिद्धिः भोग्यद्वैतभूततायां नाद्वैतत्रैतादितायां व्यतिरेकाभावात्।

न ज्ञेयमन्तरेण ज्ञातृत्वं ज्ञेयासत्त्वात्, अथवाऽनुपपन्नं ज्ञातृत्वमसंज्ञेयत्वात् खपुष्पज्ञत्ववत्, वैधर्म्येणेतरकुसुमज्ञत्ववत्, अथवा ज्ञातृत्वमुपपद्यते संज्ञेयत्वादितरकुसुमज्ञत्ववत्, वैधर्म्येण खपुष्पज्ञत्ववत्, एवं हि ज्ञातुर्ज्ञातृत्वम्, यो हि संज्ञेयं जानीते स तु मुख्यो ज्ञाता, यथा सलिलं सलिलमिति विद्वान्, यः पुनरसंज्ञेयं विजानीते स तु न ज्ञाता, यथा मृगतृष्णिकां सलिलमिति विद्वानिति।

न ज्ञातारमुपद्रष्टारमन्तरेण ज्ञेयत्वं ज्ञातुरसत्त्वात्, एवमेव हि ज्ञेयस्य ज्ञेयता भवितुमर्हति यदि केनचिदनुपहतेन्द्रियज्ञानेन ज्ञायते, अनुपहतेन्द्रियबुद्धिपुरुषज्ञेयघटवत्, यथा न भोग्यमन्तरेण भोक्तृत्वमसद्भोग्यत्वात्, खपुष्पमकरन्दभ्रमवत्, वैधर्म्येणेतरकुसुम-मकरन्दभ्रमवत्, सद्भोग्यत्वाद्भोक्तृत्वमिति तत्साधर्म्येण वैधर्म्येण वा खपुष्पभ्रमवत्, एवमेव हि भोक्तुर्भोक्तृत्वं भवितुमर्हति, यदि सद्भोग्यं भुनक्ति तथा न भोक्तारमन्तरेण भोग्यमसद्भोक्तृत्वात् वन्ध्यासुतयौवनवार्धक्यवत्, सद्भोक्तृकं भोग्यत्वादितरसुतयौवन-वार्धक्यवत्, एवमेव हि भोग्यस्य भोग्यत्वं भवितुमर्हति यदि सद्भोक्त्रा भुज्यत इति।

युगपद्वा परस्परसम्बन्धिसत्ताकौ भोक्तृभोग्यौ, तत्सम्बन्धित्वात्, यथा सम्बन्धी भ्राता सम्बन्धिनेतरेण भ्रात्रा विना न भवति तथा भोक्तृभोग्याविति।

यदि च तथा तथा वर्त्तनं भवनं रूपादौ पृथिव्यादौ गवादौ घटादौ च सकलजगद्वर्त्तिविवर्त्तरूपं तदपि नैकैकस्माद्भवति, अपरिणामिनो वा, किन्त्वनेकैकस्मात् परिणामिन एव, आपत्तित्वात्, व्रीहिवत्।

नाप्यद्वैते भवत्यापत्तिभवनमेकैकस्य कस्मैचिदर्थमकुर्वतः, किन्तु सङ्घातात्मकत्वात् संहत्यकारिणां हि पारार्थ्यं नानर्थक्यं न स्वार्थत्वं नान्योऽन्यार्थत्वञ्च केवलम्, गृहघटपृथिव्यादिवत् स्त्रीशोभनार्थालङ्कारवत्, तथा आ चक्षुरादयोऽप्याध्यात्मिकाः।

यत्पुनरिष्यते एकं कारणं पुरुषादीति तन्न वयमभ्युपेमः, त्वन्मतेनाप्येकञ्चेत् किञ्चित् पारार्थ्यं कारणमिष्यते तदभ्युपगम्य भेदात्मकेन चानेन भवितव्यमिति प्रतिजानीमहे परार्थार्थेन च, कारणत्वात् तन्त्वादिवत्, शब्दाद्युपलब्ध्यर्थत्वात् किं हि कारणं रूपादि दृष्टमेकं स्वार्थञ्चेति?

तदित्थं द्वैते तु प्रकृतेरनेकात्मिकाया आत्मभिः सुखदुःखमोहैः स्वपरेषां प्रतिपत्तिचलनधरणकरणैः प्रागभिहिताऽऽचार्यपवनपाषाणवत् महदादिना परिणामानुक्रमेणारब्धाः शब्दादयोऽपि तदात्मका एव, तदात्मत्वाभिव्यक्तकार्यत्वात्, मृत्कार्यपिण्डशिवका दिमृत्त्ववत्, सुखाद्युपलब्धेः।

सुखाद्यात्मकानाञ्च महदादिना क्रमेणारब्धानां सुखादेरात्मत्वेनाभिव्यक्तं कार्यमेषां शब्दादीनाम्, यानि तैरारब्धानि शरीरादीन्याध्यात्मिकानि भूतादीनि बाह्यानि घटादीनि पृथिव्यादीनी ते सर्वे सुखादिमया एव, तन्मयकारणारब्धत्वात् यद्यन्मयैरारब्धं तन्मयं तत् कार्पासिकपटवत्।

अनेकात्मकैकपूर्वकं शरीरमन्वितविकारत्वाच्चन्दनशकलवत्, नैकैकपूर्वकं नापूर्वकं नासत्पूर्वकं वैनाशिकाद्यभिमतवत्, अन्वितत्वात्। अन्वाह च —

'अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः।
अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्त भोगामजोऽन्यः॥'[1]

सुखञ्च दुःखञ्चानुशयञ्च वारेणायं सेवते तत्र तत्रा
विशन्ति योनिं व्यतिरेकिणस्त्रयः अजस्तु जायामतिसत्यशुद्धः॥'[2]

'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्योऽभिचाकशीति॥'[3] इति।

अथ कथं शब्दैकगुणप्रवृत्तिविपदभ्युपगम्यते? त्वन्मत-विरोधात्, प्रयोगश्चात्र न प्रवर्त्तेतैव शब्दैकगुणाकाशम्, असन्द्रूतेः, पुरुषवद्वन्ध्यापुत्रवद्वेति।

शब्दे त्रैगुण्यमस्त्येवेति चेत् साधूक्तमेतदेवाऽऽवाचयितु-मवोचम्, शब्दैकगुणवियदप्रवृत्तिप्रसङ्ग इति, ततश्चात्रिगुणं सुखादि,

१. श्वेताश्वतरोपनिषद् अ. ४ श्लो. ५
२. गाथेयं इदानीं उपनिषत्सु न क्वापि दृश्यते।
३. मुण्डकोपनिषद् ३-१-१

एकसुखस्वात्मत्वादव्यतिरिक्ततत्त्वं प्रकाशात्मना मा प्रवर्त्तिष्ट निर्गुणत्वादेकत्वाद्वैषम्यानुपपत्तेरपरिणामित्वादनापत्त्यात्मकत्वात् पुरुषवत्, तथा तद्धर्मवत्त्वात् पुरुषोऽपि प्रवर्त्ततामेभ्य एव, सुखादिवत्, शब्दादि वाप्येकात्मकाद्येव प्रधानावस्थायाम-प्रवर्त्तमानत्वात् सुखादिवत्, अनेकात्मकं वा सुखादि, तत एव शब्दवत्।

नैव प्रवर्त्तते सुखादि, अप्रवृत्तिलक्षणत्वात्, रज एव प्रवृत्ति-लक्षणम्, प्रत्येकं न हि सत्त्वादयः प्रकाशप्रवृत्तिनियम-लक्षणास्ततोऽप्रवृत्तिलक्षणत्वान्न प्रवर्त्तन्ते पुरुषवत्, वैषम्याव-स्थायान्तु रजः प्रवर्त्तते प्रवर्त्तयति च सुखं मोहञ्चेति।

त्रयमपि न न प्रवर्त्तते, अविभक्तस्वतत्त्वस्य तथा प्रविभक्तत्वेन व्यवस्थानात्, यथा मयूराण्डकरसगतग्रीवादिभावाः, यन्न प्रवर्त्तते तदविभक्तस्वतत्त्वं सत् कदाचित् प्रविभक्तत्वेन न व्यवतिष्ठते यथा पुरुषः, यथा वा मयूराण्डकरसे हंसग्रीवादयः, द्रव्यार्थनयविकल्पानां सत्कारणवादिनामसदापत्तिप्रवृत्तेः, यत इह भाव एव यतः।

ननु विभक्तरसग्रीवाद्यापत्तिवत् प्रधानस्यैव च सापत्तिः सिद्ध्यतीत्यत्रोच्यते कस्य वा न मनोरथः? कथं भवान् अनेकात्मकमेकमेव कारणमनेककार्यतया विपरिवर्त्तमानमित्येत-दृर्शनं प्रतिपद्येतेति, तस्य च कारणस्य प्रधानं पुरुषो नियतिः शब्दब्रह्मेत्यादिसंज्ञा त्वयेष्टा याऽस्तु साऽस्तु, किं नो विवादेन, तदर्थ

एव मे प्रयासः, अनेकात्मकैककारणमयत्वं त्वं प्रतिपादयितव्य इति, एष प्रतिपादितोऽसि एवन्तु न वेत्थ अविभक्तप्रविभागापत्तिः कल्पनेति।

अविभक्तानेकार्थकारणमेवेदं विभक्तवृत्ति पृथिव्यादि न विभक्तसुखाद्यनेकार्थैकैककारणपूर्वकम्, उक्तवत्, यथा मयूरग्रीवादि वृत्तिः दध्यादिवृत्तिः तदात्माविभक्तपूर्वा, वक्ष्यमाणवत्।

प्रकाशप्रवृत्तिनियमानान्तु भिन्नात्मकतायां सत्त्वं न प्रकाशेत, अप्रवृत्तत्वात् पुरुषवत्, त्वयैव हि प्रधानवस्थायामप्रवृत्तसमा गुणा इतीष्यन्ते, पूर्ववद्वोत्तरकालमपि, अनग्निप्रकाशवद्वा।

ननु प्रकाशात्मकत्वादेवाप्रवृत्तत्वमसिद्धं सत्त्वस्य, रजसा प्रवर्त्त्यत्वात् अग्नेरिव सन्धुक्षणेन, अत्रोच्यते यद्यप्रवृत्तोऽग्निस्तदाऽसन्नेवाप्रकाशत्वमेव गमयति, प्रकाशात्मप्रवृत्त्यभावात्, एवं हि कारणे कार्यस्य सत्त्वं स्यात् यदि तत् प्रकाशात्मना वर्त्तते प्रवर्त्तते, अनारम्भात्।

न, प्रकर्षेणाप्रवृत्तत्वात् प्रकृष्टवृत्तेर्विवक्षितत्वात्, सा च रजोऽनुग्रहात्तद्रूपव्यक्तिः बीजस्येवाबाद्यनुगृहीतस्योच्छ्नाङ्कुरत्वादिवृत्तिरिति न, रजसोऽपि सत्त्ववदपरिसमाप्तरूपत्वात्, रजःप्रवृत्तिलभ्यप्रकाशात्मरूपव्यक्तिसत्त्ववत्, रजसोऽपि स्वरूपव्यक्तिरसमाप्तरूपैव सत्त्वात् प्रतिलभ्यत्वात्, तथाकाशनं हि प्रवर्त्तकत्वेनाभिव्यक्तिरिति प्रकाशात्मकसत्त्वानुग्रहाद्भवति, अप्रकाशात्मकश्च कथमन्यप्रकाशने प्रवर्त्तेत?।

एवन्तु नानयोरितरेतरानुग्राहिता, उत्थाप्यसाहायकशक्तित्वात्, वाताहतनौद्वयवत्, ग्लानशिबिकावाहकवत्, असम्पूर्णशक्तिता वाऽप्रकर्ष इति कारणतैव न स्यात्तस्य, उपहतबीजवत्।

"असदकरणादित"[1] श्चान्यतो न तत्स्वरूपव्यक्तिः, किन्तु स्वत एव यदा च सुदूरमपि गत्वा प्रागवृत्तेरसत्कार्यवादपरिहारेण प्रकर्षो न परिणामवादाद्दते तदा परिणामादात्मन्येव वर्त्तते युवत्ववत्, अन्यत्र वृतस्य परिणामस्यान्यत्रापरिणामकत्वात्।

एवं तर्हि पूर्ववदुदाहरणादेव पाश्चात्यावस्था विशिष्टा, स विशेषो रजःप्रवर्त्तनादेव क्षीरदधिपरिणामकालत्ववत् पूर्वं न प्रवृत्तं पश्चाच्च प्रवृत्तमिति, एतन्न, परिणामस्य तत्रैवोक्तत्वात्, प्रकाशात्मैव हि प्रवृत्तिः कालः, इतरथा स प्रकाशो न स एव, तथाऽप्रवृत्तत्वात्, तथाऽभूतत्वादित्यर्थः, घटपटवत्। यैव च प्रवृत्तिः स एव प्रकाशः, तथावृत्तत्वात्, घटघटस्वात्मवत्।

प्रवर्त्यप्रवर्त्तकत्वात् पल्लवपवनवन्नेति चेन्न, तदात्मन एव प्रवृत्तत्वात्, रजसा सन्निधिमात्रात् पूर्ववदप्रवर्त्तनात्, य एवासौ सत्त्वस्यात्मा प्रकाशः तथा प्रवर्त्यव्यक्तिस्वरूपः नर्त्तकाचार्य इव नर्त्तक्याः प्रवर्त्तकः, तथा व्यापारणादिति त्वदभिमतप्रवर्त्तकत्वविपर्ययापत्तिरेव। रजःप्रवृत्त्यात्मरूपापादनात् सत्त्वं प्रवर्त्तकमितरथा स्वरूपापादनाद्रजोवत्। रजोऽपि हि त्वन्मतेन प्रवर्त्तमान-

१. साङ्ख्यकारिका ९

मितरयोस्तथास्वरूपापादनाद्दते किमन्यत् करोति? एवञ्च पल्लववद्रज एवापद्यते सत्त्वमेव च प्रवर्त्तकम् तथाप्रकाशेन प्रवर्त्त्यत्वात्।

तथाप्रकाशानतिरिक्ततत्त्वरूपत्वाद्वा प्रवृत्तेः कुतोऽपल्लवपवन भेदसाधर्म्यम्? यथेहापल्लवलक्षणः पवनो लोके भिन्न इति दृष्टोऽपवनलक्षणश्च पल्लवः। न तद्रूपत्वम्, अतद्वृत्तित्वादिति चेन्न रजःस्वप्रवृत्तिवत्तदात्मन एव प्रवृत्तत्वात्।

अन्यथा हि न प्रकाशेतेत्युक्तत्वात्, एवं तथैवान्यथा तु प्रवृत्त्य -भावात् प्रकाश एव प्रवृत्तिः, एवञ्चैकैकविनिद्रावस्थापुरुषत्ववत् प्रवृत्तिः प्रधानमिति तन्मात्रमेव तत्, प्रवृत्त्यापत्तिरूपनिरूप्यत्वात्, प्रवृत्तिस्वात्मवदित्यादि भङ्गचक्रावर्त्तनम्।

एवञ्चैकैकपूर्वकवादापत्तेरेव किमनेकात्मकैककल्पनया?

तथापि च *"सङ्घातपारार्थ्यादि"*[1] भिश्चेतनान्यत्वे स्थिता-चैतन्यैकत्वपरिणामित्ववृत्तिं कारणं सुखमिति वा दुःखमिति वा मोह इति वा परमाणव इति वा कारणमित्येव वा उक्तवत्स्थापितात्म -स्वतत्त्वप्रवृत्तित्वादतः किमिति न गम्यते त्वया वक्ष्यमाण-साधनवदनन्ये सुखदुःखे इति।

किं पुनस्तत्साधनमिति चेत् सुखादनन्यदेव दुःखम् अनात्मत्वेऽवरणाद्यात्मकत्वात्, सुखस्वात्मवत्, अवधारणेन च वक्ष्यमाणसाधनान्तरापक्षिप्तान्यत्वो विपक्षाभावः सूच्यते।

१. साङ्ख्यकारिका १७

सुखादनन्यत्वेन दुःखे साध्येऽनात्मत्वविशेषणेनात्मनि निरस्ते साधनान्तरनिरस्ते तमसोऽन्यत्वे न किञ्चित्सुखादन्यदस्ति तस्मादन्यः कश्चिद्विपक्ष एव नास्ति, मोहेऽन्यत्वमिति चेत्तन्निवर्त्तयिष्यते।

अवरणाद्यात्मकत्वात् कुतोऽन्यत्वनिवृत्तिरिति चेन्न, अवरणाद्यात्मकत्वादिति विधिप्रधानपर्युदासात्मकत्वात्, अनपुंसकवचनादप्रतिषेधेऽनपुंसकसुटः सर्वनामस्थानत्ववत्।

वैषम्याददृष्टान्तोऽयम्, सम्बन्धिनः सुटः सर्वनामस्थानसंज्ञाविधाने नपुंसकानपुंसकविषयत्वाविरोधात्, विरोधाद्वरणाद्यात्मकत्वानुपपत्तिरित्येतदपि न, वैषम्यस्यात्रापि तुल्यत्वात्, तटस्तटं तटीति स्त्रीपुंनपुंसकवदेतत्स्यात् एकस्मिन्नेव लिङ्गत्रयदर्शनात्।

एवं तर्हि सुखदुःखयोरपि वरणाद्यात्मकत्वादवरणाद्यात्मकत्वासिद्धिरेव, वरणाद्यात्मकत्वसिद्धौ वाऽनन्यत्वासिद्धिरिति चेन्न, अवरणाद्यात्मकत्वेऽप्यनन्यत्वाद्वरणाद्यात्मकत्वस्य, वरणसदनमोहात्मकत्ववत्।

वक्ष्यमाणवच्च वरणाद्यात्मकत्वेऽप्यनन्यत्वादवरणाद्यात्मकत्वस्य प्रापितत्वात्।

असाधनमिदं सर्वतुल्यत्वात् प्रसिद्धिविरुद्धसिद्ध्यतिप्रसङ्गात्, शक्यते हि वक्तुं कटः घटादनन्यः, तन्त्वनात्मकत्वात्, यथा घटस्वात्मा वैधर्म्येण पटवदिति।

अथ सर्वतुल्यता कथं दोषः? स्वमतेन परमतेन वा, यदि स्वस्मिन्नेव मते ततस्तव प्रसिद्धिविरोधदोषासक्तिर्ममाभिमतैव, भावपक्षवत्।

अपि च स्वमतेऽपि सर्वानन्यत्वं सुखाद्यन्वयमात्रत्वात् सर्वस्य, मृदि घटः कट इव त्रिगुणोऽपि नास्तीति चेत्ततश्च सत्कार्यवादत्यागो वा तत्राभावात्, समुदयक्षणिकशून्यवादापत्तेश्च।

रूपादीनाञ्चानेन न्यायेनान्यत्वेऽपक्षिप्ते प्रत्युदाहरणाभाव एव।

यथाच प्रकाशादभिन्ना प्रवृत्तिस्तथा नियमोऽप्यभिन्नः प्रकाशात्, प्रकाशस्वात्मत्वप्रतिलम्भ एव हि तन्नियमः, प्रकाशानन्यत्वात्, एतन्नियमलक्षणेन निरुद्ध्यतेऽन्यः प्रकाशान्नियम इति, तत्र दोषदर्शनात्।

भिन्नात्मकतायां प्रकाशात्तन्नियमस्य सत्त्वं न स्यात् प्रकाशो वा, तथाऽनियतत्वात् गुणान्तररूपापत्तिरहितस्य सत्त्वस्य प्रकाशस्य चान्यथाप्रकाशनाभावात्, रजोवत्, प्रवृत्तिवत् मूलत एव सत्त्वमेवं प्रकाश इति न स्यादनियत्वाद्वन्ध्यापुत्रवत्; न च तत्प्रकाशात्मकं पुरुषवत् पूर्ववद्वाऽनग्निप्रकाशवद्वा।

ननु प्रकाशात्मकत्वादेव प्रदीपवत् सत्त्वस्य सर्वतो नियतानियतप्रकाशस्य पूर्वोत्तरव्यक्त्यभिमुखतायां मति नियामके कुड्यादावग्नेरिव तमसा नियम्यत्वं तच्चानन्यथाप्रवृत्ततेति दृष्टत्वाच्चान-पह्नवनीयो भेदो नियम्यनियामकयोरित्यत्रोच्यते, यद्यनियतोऽसाव-संस्तर्हि, अनियतत्वाद्वान्ध्येयवत्।

एवं हि कार्यं कारणेऽस्तीति घटते यदि तत्तत्र नियतमनन्यथा-वृत्तिकार्यमिति, तत्र सन्निधिवर्त्ततेः सत्तार्थत्वात् सन्नियतो वर्त्तत इति

न, आधिक्येन यतत्वादधिको यमो नियमः, तमोऽनुग्रहाद्यः स चानन्यथावृत्तिरूपता, तस्मात्, सत्त्वं तमोऽनुगृहीतं तथाप्रकाशते न स्वत एवेत्येतच्चासत्, तमसोऽपि सत्त्ववत् पृथगपरिसमाप्त-रूपत्वात्, तमोनियमनापेक्षप्रकाशात्मकसत्त्ववत्, तमसोऽपि हि स्वरूपव्यक्तिरसमाप्तरूपैव, तस्य तथाव्यक्तेः सत्त्वप्रकाशनप्रति-लभ्यत्वादिति तथाप्रकाशनं व्यक्तिः प्रकाशात्मकसत्त्वानुग्रहा-द्भवति, अनियतश्च कथमन्यनियमने प्रवर्त्ततेत्यादिः यावन्न परिणामस्य तत्रैवोक्तत्वादिति।

प्रकाशात्मैव तु नियमः, इतरथा स प्रकाशो न सः, तथाऽनियतत्वात्तथाऽभूतत्वात् घटपुरुषवत्, य एव नियमः स एव प्रकाशः, तथानियतत्वात्तथाप्रवृत्तत्वात् घटघटस्वात्मवत्, नियम्य-नियामकत्वान्नौलम्बनपाषाणवन्नेति चेन्न, तदात्मन एव तथानियतत्वात्, सन्निधिमात्रात् पूर्ववदनियमनात्।

य एवासौ सत्त्वस्यात्मा तथानियम्यव्यक्तिस्वरूपः प्रकाशः स एव नियामकः, तथानियमविधेः, इतरकर्त्तृककुम्भकारादिवत्, तमोनियमात्मरूपापादनात् ततस्त्वदभिमतनियामकत्वविपर्ययाप-त्तिः, तमसो नियम्यत्वात्, सत्त्वस्यैव नियामकत्वात् इतर तथात्मरूपापादनात्तमोवत्, तमोऽपि हि त्वन्मतेनेतरयो

स्तथास्वरूपापादनादृते किमन्यत् करोति? एवञ्च नौवत्तम एवाऽऽपद्यते सत्त्वमेव नियामकम्, तथाप्रकाशेन नियम्यत्वात्।

तथाप्रकाशानतिरिक्ततत्त्वरूपत्वाद्वा नियमस्य कुतोऽनौ-लम्बनपाषाणभेदसाधर्म्यम्? भेदे सति लम्बनपाषाणो नौविलक्षणो नावं प्रवर्त्तमानां निरुणद्धीति युज्यते, न तद्रूपत्वमतद्वृत्तित्वादिति चेन्न तमसः स्वनियमवत्तदात्मन एव नियतत्वात्, अन्यथा सत्त्वं न स्यात् प्रकाशो वेत्युक्तत्वात्, तथाऽन्यथा तु नियत्यभावात् प्रकाश एव नियमः।

एवञ्चैकैकविनिद्रावस्थापुरुषत्ववदित्यादि यावद्भङ्गचक्रावर्त्तनं प्रवृत्तिस्थाने नियमतश्च, पुनश्च नियमस्वात्मैव वा त्रीण्यपीति पुरुषावस्थावद्भङ्गचक्रावर्त्तनं यावत्सुखादनन्यदुःखमितीयद्दूरम्, अत्र तु विशेषः सुखादनन्य एव मोहः, अनात्मत्वेऽशोषाद्यात्मकत्वात् सुखस्वात्मवदित्यादिसाक्षेपपरिहारं पूर्ववत्।

न वापीदमेकत एव तत्त्वं सुखदुःखमोहानां सामान्यविशेष-भावात्, किन्तूभयतः, अनन्यत्वात्, अभिन्नत्वात्, एकत्वात् पूर्ववत् ..... सन्निहितापत्तिभवनसत्तार्थत्वन्त्वयथार्थं स्यात्, आपत्तिभवनं सन्निधिभवनाविनाभावे युज्यते, यदि तद्रूपादिबीजे न तु सन्निहितं ततोऽङ्कुरस्यासत्त्वाद्यापत्तिः स्यात्.....।

एवञ्च तावत् सुखदुःखमोहानां प्रकाशप्रवृत्तिनियमात्म-कानामनन्यत्वादेकात्मकैककारणपूर्वकत्वमिति संयगभ्यधाम्।

एवन्त्वनभ्युपगमे इदं निरूप्यं यत्तद्भिन्नात्मकत्वं परिगृह्यप्रयुक्ते कार्यकारणवीतेऽभिहितं सत्त्वरजस्तमांसि त्रीणि शब्दाद्यात्मभिर्व्यवतिष्ठमानानि परस्परार्थं कुर्वन्तीति, एतत्कथं निरूप्यते? वक्ष्यमाणेषु विचारविकल्पेषु यथा यथोच्यते तथा तथाऽनुपपत्तिरेवेति।

अनेकात्मकत्वकारणकल्पनाऽसद्वाद एव, सम्भाव्य विकल्पानुपपन्नार्थत्वात्, तदुक्तसत्यत्वानुपपन्नार्थसर्वोक्तानृतत्वपक्षवत्।

यदुच्यते सत्त्वरजस्तमांसि त्रीणि शब्दाद्यत्मभिर्व्यवतिष्ठमानानि परस्परार्थं कुर्वन्तीति, सत्त्वं शब्दकार्यं प्रख्याय तदात्मना व्यवतिष्ठमानं रजस्तमसोः शब्दात्मभावाय प्रवृत्तिं प्रख्यापयतीति अत्र च किं प्रकाशात्मकेन सत्त्वेन शब्दात्मना व्यवस्थानेन प्रकाशात्मकयोरेव रजस्तमसोः शब्दात्मभावाय प्रवृत्तिर्व्यक्तिः प्रख्याप्यते? उताप्रकाशात्मकयोः?

प्रकाशात्मकयोरित्येष विकल्पो न घटत एव, सत्त्वरजस्तमसां जात्यन्तरत्वाभ्युपगमात् यद्यप्रकाशात्मके रजस्तमसी शब्दात्मभावाय प्रख्याप्येते सत्त्वं पुरुषमपि तर्हि शब्दात्मभावाय प्रख्यापयिष्यति — शब्दत्वायैनं प्रवर्त्तयिष्यति, सत्त्वेन शब्दकार्यप्रख्यातिना शब्दात्मना व्यवतिष्ठमानेन पुरुषः शब्दात्मभावाय प्रवर्त्यतेऽभिव्यज्यते व्यवस्थाप्यते च, अप्रकाशात्मकत्वात्, यद्यदप्रकाशात्मकं तत्तत् सत्त्वेन शब्दकार्यप्रख्यातिना शब्दात्मना व्यवतिष्ठमानेन शब्दात्मभावाय प्रवर्त्यं व्यङ्ग्यं व्यवस्थाप्यञ्च दृष्टं

रजस्तमसी इव, अप्रकाशात्मकेन तेनापि शब्दभावाय प्रवर्त्तितव्यं प्रकाशितव्यं व्यवस्थातव्यम्, प्रकाशकारकत्वोपपत्तेः, रजस्तमोभ्यां इव, रजस्तमश्च यथा प्रवर्त्तते प्रकाशते व्यवतिष्ठते तथा स प्रवर्तते प्रकाशते व्यवतिष्ठते।

अथोच्यतेऽप्रकाशत्वान्नैकान्तः शक्यते कर्त्तुम्, शक्यते हीत्थं वक्तुमपि, पुरुषः सत्त्वान्न प्रकाशते, अप्रकाशकत्वे सन्निहितप्रकाशकारकत्वात् प्रदीपेनेव वियत्, रजस्तमसी च प्रकाशेते, अप्रकाशकत्वात्, प्रदीपेनेव पृथिवी, यथा च वियत्पृथिव्योरप्रकाशकत्वसामान्ये सत्येव कारकसान्निध्येऽपि प्रकाशाप्रकाशौ दृष्टौ, एवं पुरुषस्याप्रकाशात्मकत्वेऽप्यप्रकाशतैव रजस्तमसोः प्रकाशतैवेति।

एवं तावद्विकल्पसमजातित्वादनुत्तरमेव, प्रयत्नानन्तरीयकत्वे सत्येव मूर्तामूर्तत्वादिविशेषवद्घटशब्दयोरनित्यो नित्यश्चेति विशेषः स्यादिति वचनवत्। एतदपि च नैवं वियतोऽप्रकाशकत्वम्, त्वन्मतेनैव शब्दात्मना प्रकाशमानत्वात्, रूपविषयाप्रकाशनमपि च पृथिव्यादिषु न घटते, यस्माद्रूपादिपृथग्भूतपृथग्विपरिणतिषु पृथिव्यादिषु तेजोरहितेषु विद्यमानः प्रकाशकत्वप्रकाशः स्वगतोऽतो विपरिणतः, किन्तु प्रकाश्यत्वप्रकाशोऽस्त्याविर्भूतत्वादतस्तेषां प्रकाशतैव क्वचित्, अत्यन्तमतिरोभूतत्वात् ज्ञादिषु प्रकाश्यप्रकाशकत्ववत् ज्ञानस्वभाव एव हि मनुष्यः प्रकाशात्मा प्रकाश्यो दृष्टः तस्मान्नाप्रकाशकत्वे प्रकाशनम्।

वियत्पृथिवीविशेषोपपत्तिवच्च ते एव प्रवर्त्तेते न पुरुष इत्यस्तु नाम, किन्त्वयमन्यस्ते दोष आपद्यते, प्रकाशात्मके तर्हि रजस्तमसी, शब्दात्मभावाय प्रवृत्तेः सत्त्ववत्, वैधर्म्येण पुरुषवत्, असत्कार्यवादिता चात्यन्तानिष्टा प्रसक्ता, सा च विस्फुटैव, सत्त्वे प्रवृत्तिनियमयोरभूतयोः शब्दात्मव्यवस्थावचनादभ्युपगमात्।

यदि तत्सत्त्वमप्रवृत्तमनियतं वा पूर्ववदप्रवृत्तत्वादनियतत्वाच्च तयोस्तथारूपां प्रवृत्तिं न प्रख्यापयेत्, नैवम् वन्ध्यापुत्रवदित्युक्तत्वात्, व्यवस्थानस्य च प्रागसतः सत्त्वविषयस्याऽऽरम्भावस्थायामभ्युपगतत्वात्।

रजस्तमसोः शब्दभावाय प्रवृत्तिं प्रख्यापयतीति वचनात्तयोः प्रागसतः प्रकाशनस्याभ्युपगमादसतोऽभिव्यक्तिरुत्पत्तिर्वाऽभ्युपगता, यद ते तथाप्रतिपद्येते ततः सत्त्वेन प्रकाशिते, आचार्येणेव नर्त्तकी।

पृथग्भूततत्त्वाश्रयकारणे गुणेऽसतां प्रकाशप्रवृत्तिनियमाना मुत्पत्तिः वैशेषिकाभिमततन्त्वाश्रयपटवत्।

तैर्यथास्वमकारणसद्भिरारब्धं यत्कार्यं त्रिगुणं शब्दादि तदपि भ्रान्तिमात्रम्, त्वदुक्तहेतुसामर्थ्यादेव, त्वयैवोक्त हि यच्च यन्मयैरारब्धं तदात्मकं तदिति, तस्माच्छब्दाद्यसदात्मकं तन्मयैरारब्धत्वात् कार्पासिकतन्त्वारब्धपटकार्पासिकत्ववत् तन्मयतन्मयञ्च भूतादिं शरीरादि घटादि च रूपादिसुखादिमयत्ववत्।

अथोच्येत एवमेव तत्कारणत्वं युज्यते तत्र च तेषु कार्यसत्त्वं एव, शुक्लरक्तकृष्णतन्त्वात्मिकाया रज्जोः कार्यायास्तन्तुकारणत्ववदिति, नन्वेवमेवमेवेति वचनस्य द्वयी गतिः यथा वाऽस्मदुक्तवदेकात्मकं कारणमनेकाकारविपरिवृत्ति पुरुषवदिति रजस्तमसी सत्त्वमेव, प्रकाशकारकत्वादित्येतस्यां गतौ दोषः स एव पुरुषाद्यन्यतमैक कारणवादाभ्युपगमः, अथ त्वन्मतेन जात्यन्तरसुखादित्रय कारणतदात्मककार्याभ्युपगमेनैवमेवेति।

एषा गतिरस्तु को दोषः? इति चेद्ब्रूमः सर्वव्यक्तव्यापि चासत्कार्यत्वम्, प्रतिगुणं प्रकाशाद्योर्द्वयोः कार्यात्मनोः प्रागभूतत्वात्, अन्यगुणकारणकार्यात्मनामन्यत्रासतामुत्पत्ते र्व्यवस्थानवचनात् प्रख्यापनवचनाच्चाभ्युपगतत्वात्।

बौद्धवद्वाऽसत्कार्यत्वम्, तथाभूतवस्तुनिर्मूलोत्पत्तित्वात्, द्वितीयक्षणघटवत्, पुरुषवत्।

असत्कार्याः शब्दादयः कारणत्वात्, अन्यगुणात्मकसुखप्रवृत्त्यादिवत्, सुखं सत्त्वगुणं प्रागसत् प्रवृत्तिनियमकार्यं पश्चात्तत् कार्यं दृष्टं कारणञ्च तद्वच्छब्दादयोऽसत्कार्याः कारणताञ्च बिभ्रति, इतरानुपकृताविद्यमानप्रकाशादित्रयसुखादिकारणवत्, प्रत्येकमितरानुपकृतविद्यमानप्रकाशादित्रयस्वकार्या वा सुखादयः कारणत्वात् शब्दादिवत्तन्त्वादिवद्वेति पुरुषादिवाद एवैषः।

अथ प्रकाशात्मकयो रजस्तमसोः शब्दात्मना व्यवतिष्ठमानेन तत्प्रख्यातिना सत्त्वेन तदात्मभावाय प्रवृत्तिः प्रख्याप्यते इति विकल्प

इष्यते, अप्रकाशात्मकयोरिति च नेष्यते ततो यथैव कारणे कार्यस्य सत्त्वाद्घटेनैव घटः क्रियते तदात्मव्यक्तिप्रतिनियतस्वसाधन क्रम-समावेशाच्च कारणघटेन कार्यघटस्तथाभूतव्यक्तिशक्तिस्थूलता-पत्त्याऽभिव्यज्यते, निर्मलदर्पणस्वरूपोपलब्धिवत् कर्मैव सद्वस्तु कर्तृ भवति, मृद एव घटत्वात् कुलालदण्डादीनामत एव तत्साधनत्वात्, वीरणादितोऽकरणात् तथैव सत्त्वेन शब्दादिप्रकाशेनापृथग्भूत-प्रकाशादितत्त्वमाकाशादि प्रकाश्यते प्रवर्त्यते नियम्यते च शब्दादि-प्रवृत्त्या शब्दादिनियमेन च।

अपृथग्भूततत्त्वेनैव सत्त्वेन प्रकाशेन प्रवृत्तिसत्त्वेनानपेक्ष्यया स्वशक्त्या स्वव्यक्तिराविर्भावः, आविर्भावेन प्रवृत्त्या प्रवृत्ति-सत्त्वेनानपेक्षा स्वव्यक्तिराविर्भावः प्रवृत्तिः, स्वशक्त्यऽऽविर्भावेन स्वनियत्या नियमसत्त्वेनानपेक्षा स्वव्यक्तिः स्वप्रवृत्तिः स्वनियम इति प्रकाश एव प्रवृत्तिर्नियमश्च, एवं प्रवृत्तिरेव चेतरद्वयम्, नियम एवेतरद्वयम्।

अत एषामेकपुरुषप्रवृत्तश्यामायताक्ष प्रलम्बबाहुत्ववत्तथैकव स्तुस्वतत्त्वभूताभिधानप्रयोजनकार्याणामव्यतिरेकैकवृत्तितेति।

सत्त्वसत्त्वेनैव सत्त्वसत्त्वं प्रकाश्यते त्रयाणामपि सत्त्वरूपत्वस्यापादितत्वात्, यत्तत्सत्त्वं सत्त्वमेव भवति नान्यद्भवति रजस्तमो वा तत्सत्त्वसत्त्वं तेन सत्त्वसत्त्वेनैव प्रकाश्यते व्यज्यते, परिणामेन मृत्सत्त्वे यद्विद्यमानं सत्त्वसत्त्वं तेनैव तद्व्यज्यते, स्वपरिणामेन सदेव हि सत्त्वेन परिणमति नासत्, यदुक्तम्भवति

व्यक्तीभवतीति तदुक्तम्भवति प्रवृत्तिनियमानपेक्षेण सत्त्वसत्त्वेन सत्वसत्वं प्रकाश्यत इति, सत्त्वसत्त्वमिति च विशेषणं रजःसत्त्वतमः सत्त्वाभ्याम्, तयोरपि त्वन्मतप्रसिद्धया भेदेऽस्मदुक्तवदभेद एव, सतो हि भावः सत्त्वं यस्मात्तदेव सद्भवति तस्मात्तदेव सत्त्वम् तत्त्वं तद्भावः परिणाम इत्यनर्थान्तरम्।

एवं रजः सत्त्वेन सत्त्वसत्त्वम् । किमुक्तंभवति व्यक्तिप्रवृत्तिपरिणत्या तयैव प्रवृत्त्यात्मिकया व्यक्त्येत्येतदुक्तंभवति, एवं तमःसत्त्वेन सत्त्वसत्त्वम् किमुक्तंभवति व्यक्तिनियमपरिणामेन तयैव नियमात्मिकया व्यक्त्येत्येतदुक्तंभवति, एवमेव रजःसत्त्वेन सत्त्वसत्त्वं प्रकाश्यते व्यक्तिप्रवृत्तिपरिणत्या प्रवृत्त्येवेत्युक्तंभवति, रजःसत्त्वेन रजःसत्त्वं प्रकाश्यते व्यक्तिप्रवृत्तिपरिणत्या प्रवृत्त्येवेत्युक्तंभवति, रजःसत्त्वेन तमःसत्त्वं प्रकाश्यते व्यक्तिप्रवृत्तिपरिणत्या प्रवृत्त्येवेत्युक्तंभवति, तथा तमःसत्त्वेन सत्त्वसत्त्वं प्रकाश्यते व्यक्तिनियतिपरिणत्या नियमेनैवेत्युक्तंभवति, तमःसत्त्वेन रजःसत्त्वं प्रकाश्यते व्यक्तिनियतिपरिणत्या नियमेनैवेत्युक्तम्भवति, तमःसत्त्वेन तमःसत्त्वं प्रकाश्यते व्यक्तिनियतिपरिणत्या नियमेनैवेत्युक्तंभवतीति।

एवमेव च सत्त्वप्रकाशेन सत्त्वप्रकाशो रजःप्रकाशस्तमःप्रकाशश्च प्रकाश्यते, रजःप्रकाशेन सत्त्वप्रकाशो रजःप्रकाशस्तमःप्रकाशश्च प्रवर्त्यते, तमःप्रकाशेन सत्त्वप्रकाशो रजःप्रकाशस्तमःप्रकाशश्च नियम्यत इति त्रयोऽप्यर्था ऐक्यमापादनीयाः।

सर्वाप्येषा मृद्घटव्यक्तिशक्तिस्थूलतैव, तथा सत्त्वप्रकाशादि-प्रपञ्चा व्यक्तिरेकैव सत्त्वमिति वा रज इति वा तम इति वा प्रधान इति वा यथेच्छसि तथाऽस्तु सर्वथाऽप्येकस्य कारणाख्यस्य वस्तुनः सूक्ष्मस्य स्थूलतैव व्यक्तिरिति । यदुच्यते रजः शब्दकार्यं प्रख्याय तदात्मना व्यवतिष्ठमानं सत्त्वतमसोः शब्दात्मभावाय प्रवृत्तिं प्रख्यापयतीति तदपि पूर्ववत् प्रश्नद्वयं कृत्वा प्रकाशस्थाने प्रवृत्तिं कृत्वा सर्वमनुगन्तव्यं यावद्वायुमिति, तथा तमः शब्दकार्यमित्यादि तथैवानुगन्तव्यं प्रकाशस्थाने नियमं कृत्वा यावल्लम्बनपाषाणमिति ।

अतस्त्रीण्यप्येकम्, अपृथग्भूतसमवस्थानस्वरूपभेदात्मकत्वात्, वरणादितमस्त्ववत् ।

अपृथग्भवनसमवस्थानस्वरूपभेदात्मकत्वमसिद्धं सुख-दुःखमोहानां जात्यन्तरत्वात्, कथं पुनरेतदुपलभ्यते सुखदुःखमोहा जात्यन्तराणीत्यत्रोच्यते सुखं लघ्वप्रवृत्तिशीलं प्रकाशकं दृष्टम्, सुखाश्च करणप्रकाशाः, तस्मात् प्रवृत्तिनियमाभ्यामन्ये, तथा दुःखं चलमप्रकाशकं प्रवृत्तिशीलं दृष्टम्, दुःखाश्च करणप्रवृत्तयः, तस्मात् प्रकाशनियमाभ्यामन्याः, तथा मोहो गुरुरप्रकाशको दृष्टः मूढाश्च करणनियमाः तस्मात् प्रकाशप्रवृत्तिभ्यामन्य इति, एवं आध्यात्मिकानां कार्यकरणात्मकानां सुखदुःखमोहमयत्वं बोध्यम् । सत्त्वरजस्तमांसि जात्यन्तराणि, लक्षणभेदात् चेतनशरीरवत्, लक्षणभेदश्च सत्त्वं लघ्वप्रवृत्तिशीलं प्रकाशकं दृष्टमित्युभाभ्यामन्यत्, रजश्चलमप्रकाशकं प्रवृत्तिशीलमित्युभाभ्यामन्यत्, मोहो गुरुरित्यु-भाभ्यामन्य इति ।

ननु लक्षणभेदहेतुत्वमपि न, लघुत्वप्रकाशाप्रवृत्तिशीलत्वान्यपि ह्येकम्, अपृथग्भूतसमवस्थानस्वरूपलक्षणभेदात्मकत्वात्, भिन्नलक्षणतमस्त्ववत्।

न, अपृथग्भूतसमवस्थानस्वरूपेत्याद्यसिद्धम्, तत्कथमिति चेत् — सुखं मोहाद्गुरोरन्यत्, लघुत्वात्, लोष्टादिवार्कतूलः, दुःखात् प्रवृत्तिशीलादन्यत्, अप्रवृत्तिशीलत्वात्, वायोरिवाकाशम्, दुःखमोहाभ्यामप्रकाशकाभ्यामन्यत् प्रकाशकत्वात्, घटादिव प्रदीपः, दुःखं मोहादचलादन्यत् चलत्वात् पर्वतादिव वायुः, सुखादप्रवृत्तिशीलादन्यत्, प्रवृत्तिशीलत्वात्, आकाशादिव वायुः, मोहः सुखदुःखाभ्यामगुरुभ्यामन्यो गुरुत्वात्, अर्कतूलादिव लोहपिण्डः। दुःखं सुखात् प्रकाशकादन्यत्, अप्रकाशकत्वात्, प्रदीपादिव घटः, अतश्च सुखत्वाद्दुःखत्वान्मोहत्वादित्यादयोऽप्यन्यत्वहेतवः स्युः शरीरेन्द्रियगत आत्मैकदेशस्तदेकदेशभूताभ्यां रजस्तमोभ्यामन्यः सुखत्वाल्लोष्टवत्, लोष्टादिर्हि सुखदुःखमोहैः पुरुषभोग्यैरन्योऽन्यतोऽन्यैरुपेतः, एवं दुःखमोहौ।

अत्र ब्रूमः सर्वेऽप्येतेऽन्यत्वहेतवोऽप्रसिद्धसाध्यधर्मसमन्वयव्यावृत्तयः, पृथग्भूतसुखाद्यात्मकसत्त्वादिलघ्वादितूललोष्टादिवस्त्वभावात्, सर्वस्य त्रैगुण्याव्यतिरेकाच्च न चैषां विपक्षाद्व्यावृत्तिरस्ति, तूललोष्टादेरेव विपक्षत्वेन व्यवस्थानात्, साध्यसाधनोभयानन्वयो धर्म्यसिद्धिश्च, साध्याव्यावृत्त्यादिदोषश्च, स्वत एवानुमाननिराकृतस्य पक्षीकरणार्थाश्चैते।

अनवधारितलघ्वादिधर्मतायामितरात्मकमपीति लघुचल-गुर्वाद्यात्मकतयैव पक्षधर्मता स्यादित्यतथा तेनैव, असजातीय-लक्षणव्यावृत्तार्थविषयतया अस्मान् प्रति तावदसिद्धं लघुरेवेति । तद्यथा *'णिच्छयओ सव्वलहुं'*ति गाथा ।[१]

अत्यन्तगुरुतायामेतदेव पतेत् संयोगभावेऽप्यविषह्यगुरुत्वात् प्रतिबन्धानिवार्यस्यूतोपलवत्, योगिनोऽपि च गुरुत्वात् सुतरां पतनमेव स्यात् शिलाबद्धशिलावत् ।

अत्यन्तलघुतायां न कदाचिदपि पतनं स्यात् तस्योत्पत्ति कारणाभावात् खपुष्पवत्, दृष्टविरुद्धमुच्यते गुरुलघुत्वदर्शनात्, अर्कतूलो लघुर्गुरुर्लोहपिण्ड इति, न, कन्यानुदरवत्तु व्यवहारोऽयम-पेक्षाकृतो बादरस्कन्धविषय इति ।

एवमापेक्षिकलघुगुरुत्वे अनवस्थिततत्त्वे अस्मान् प्रति न परस्परतोऽन्ये इति नायःपिण्डार्कतूलदृष्टान्तोऽस्ति ।

अथ ममाऽत्र किम्? यत्तु भवनश्च प्रसिद्धम् यदपि च भवत्सिद्धान्तेनोक्तम्-द्रव्यञ्चैतदेवं लघुगुरुत्वापेक्षया तदेव दृष्टमिति, तन्नोपपद्यते, गुरुलघ्वादयो हि गुणाः सत्त्वरजस्तमांसि च, द्रव्यता तेषां सन्द्रावे एकत्वापत्तौ भवति, ते च गुणाः परस्परतोऽन्य इति ।

आ अद्यापि प्रतिपादनमेव वर्त्ततेऽन्यत्वं गुणानाम्, गुणसन्द्रावद्रव्यत्वे तवाप्येतद्द्रव्यमेव न गुणाः पृथक् सन्द्रुतानामेवाव -स्थानात् कुतः स्यात् सन्द्रावः? तत्रापि च प्रतिज्ञायते सत्त्वादयौ

१. बृहत्कल्पभाष्ये गाथा-६५

गुणाः तत्सन्द्रुतिलक्षणं द्रव्यमेव शब्दादिभावेन व्यवस्थानात् शब्दादिस्वात्मवदिति।

अनापन्नतद्रूपसत्त्वस्यासत्त्वस्यासन्द्रुतस्य स्वेनैव रूपेण स्थितस्य प्रागारम्भादारभमाणस्य शब्दादिभावापत्तिकालः व्यवस्था-शब्देनोच्यते इति चेन्न, पूर्वतुल्यत्वात्, नान्तरेण प्रवृत्त्याद्येकत्वगतिं व्यवस्थापत्तेः।

अतो यथाहेत्वनैकान्तिकस्त्वां प्रति यथा सुखं मोहाद्गुरोरनन्यत् लघुत्वात् लोहपिण्डवदर्कतूलवत् शब्दभाव-व्यवतिष्ठमानसुखादिवद्वा, दुःखात् प्रवृत्तिशीलादनन्यत्, अप्रवृत्तिशीलत्वात् वायुवदाकाशवदित्यादि, स्वप्रयुक्तलक्षण-भेदवैलक्षण्यविशेषणपक्षविरचनया लघ्वादय एव विपर्यसनीयाः।

अथवा मुक्त्वापि तां सत्त्वादिभेदलक्षणाभिमतेभ्य एव त्वदुक्तेभ्यो लघ्वादिहेतुभ्योऽभेदसिद्धिः शक्याऽऽपादयितुं स्फुटेनैव न्यायाध्वना। सुखं मोहादनन्यत् अपुरुषत्वे चलत्वात् मोहस्वात्मवत्, दुःखादनन्यत्, प्रवृत्तिशीलत्वात् दुःखस्वात्मवत्, तथा दुःखादि।

नन्वेवं विरुद्धाव्यभिचारिवदुभयानिश्चयः, न, उक्तत्वात्।

भावितत्वाच्च गुणेषु सदा सन्द्रावस्य, विरुद्धाव्यभिचारिणि च न परस्परनिवारितव्याप्तित्वमात्रात् संशय एव, किं तर्हि? प्रत्यक्षागमबलीयस्त्वभूतादेव निश्चयोऽन्वेष्यत इति युक्तम्, बलीयस्त्वञ्चास्मद्धेतूनामाद्यहेतुभावनातः।

मा मंस्थाः त्वदीया हेतवो बलीयांसः, तदबलत्वञ्चास्मत्पक्षसाधनाय इतोऽपि विपरिवर्तयितुं शक्यत्वात्, यथा सुखादन्यद्दुःखं प्रसादाद्यनात्मकत्वात् पुरुषवत्, मोहश्च दुःखादन्यः तत एव तद्वदिति, अत्रोच्यते किं तन्मात्रादेव विपरिवर्त्तनम्? उत त्रैलक्षण्यात्? त्रैलक्षण्यादिति चेन्न, आदिलक्षणमेव हि नास्तीह यदाधारेण शेषद्वयम्, न ह्यनात्मकत्वं नाम किञ्चिदस्ति, आत्मा न भवति, आत्मैव नास्तीत्यनात्मकमिति द्विधाऽप्यसिद्धं दुःखस्यानात्मकत्वं धर्म्यसिद्धयापत्तेः, न दुःखं नान्यो मोहः पुरुषो वा प्रसादाद्यनात्मकत्वात् खपुष्पवत् स्यादिति।

नन्वन्यपदार्थविषयत्वाद्बहुव्रीहेरनात्मकश्रुतेरस्ति प्रसादाद्यनात्मा वा चित्रगुदेवदत्तवत् कोऽप्यन्यः, सोऽत्र च सद्धर्मवान् धर्मी पक्षो भवितुमर्हतीति।

अत्रोच्यते, बहुव्रीहेरन्यपदार्थविषयत्वानैकान्त्यात्, एवमपि स्थूलशिरा राहुरिति तद्गुणसंविज्ञानपक्षाश्रयेण शिरोऽव्यतिरिक्तस्य राहोरसदाख्यया व्यपदेशिवद्भावेन यथा व्यवहारो दृष्टस्तथेदमपि स्यात्, तस्य व्यपदेशिवद्भावव्यवहारानभ्युपगमे धर्मधर्मिस्वरूपविरोधात्।

आत्मनोऽनन्यदेव दुःखम्, प्रसादाद्यनात्मकत्वात्, आत्मस्वतत्त्ववत्, पुरुषत्वापत्तिश्च, अन्यथा सुखान्यत्वप्रसादाद्यनात्मकत्वानुपपत्तेः।

धर्मस्वरूपविरोधोऽपि चैवमेव, ततश्च प्रकृतिपुरुषयोरप्येकतैव, एवं सुखमोहयोरपि।

अथ मा भूदेष दोष इत्यनात्मत्वविशेषणं त्वद्वदाब्रवीमीत्युच्यते तथा सति यथा किं सुखादन्यत् आत्मानं मुक्त्वा इदं तदिति निदर्शयितुं शक्यते? इति समन्वयाभावः सुखादेरपि सुखादन्यस्य विपक्षत्वाद्विपक्षाव्यावृत्तिरपि।

अथ तु विभक्तस्वतत्त्वं सुखं सुखादन्यन्न भवति प्रसादाद्यनात्मकमपि न भवतीति, उच्यते तथा सति तेन प्रकारेण नियमवत् सुखमेवानन्यत् प्रसादाद्यात्मकं भवति चेति तथा तस्य वस्तुनः प्रवर्त्तनात् तथाव्यक्तेश्च नियमप्रवृत्तिप्रकाशात्मकं सुखमेवेति त्वदभ्युपगमेनैवैक्यं मोहादीनामापन्नमस्मिन् साधने, एवं शेषसाधनेष्वपीति को वादार्थ उभयोरपि।

एवं तावदवरणाद्यात्मकत्वादिहेतवः प्रथमोक्तानन्यत्वपक्षस्यैव साधका अनात्मत्वविशेषणा अपि, तत्रैव त्ववरणाद्यात्मकत्वादिवद्विदोषा लघ्वादिहेतवोऽपि।

सुखादावपि च परिहारपक्षेऽपि कृतेऽपि च परधर्मेणापि विशिष्टेन प्रतिपादनविधिनाऽनन्यत्वहेतवः सुखं दुःखादनन्यत् चला प्रकाशकत्वात्, अविभक्ताशेषगुणात्मकलोष्टवदिति।

एवञ्च स्थिते सुखं दुःखादनन्यल्लघुत्वात्, एवमप्रवृत्तिशीलत्वात् प्रकाशकत्वादेतानि च चत्वारि साधनानि, अत्र द्विकसंयोगेनापि त्रीणि, एवं मोहादपि, परधर्मेण सुखस्य दुःखधर्माभ्यां प्रत्येकं द्वे समुदायेनैकमिति त्रीणि, प्रवृत्तिशीलत्वादित्यपि तत्संयोगेनेतराभ्यामपि सप्तसाधनानि, एवं मोहादपि, एवं सुखं दुःखादनन्यत् गुरुत्वादप्रकाशकत्वात्तत्संयो-

गाच्च । एवं मोहादपि द्वाभ्यामप्यनन्यत् सुखं तेभ्य एव हेतुभ्य इति एत एव सर्वे हेतवः स्वपरधर्माः । प्रसादादयश्चेतरेतरसंयोगेन चाभ्यूह्याः, अन्येऽप्यचेतनत्वादिसमासदण्डकमध्ये यावच्छरीराद्यापत्तित्वाप्रकृतिधर्मैस्सामान्यभूतैर्विशेषितैश्च यावत्किञ्चिदिहास्ति सर्वं तदनन्यत्वे त्रिलक्षणतां प्रतिपद्यते धर्मजातमित्यतः कुतः सङ्कलना? भावितत्रैगुण्यैकात्मकलोष्टादिवस्तुन्यायव्यापित्वात् ।

नन्वेवं स्ववचनविरोधादिदोषा अनन्यत्वप्रतिज्ञाया इत्ययुक्तम्, तवात्मन एवोपालम्भात् ।

प्रधानमेकं सुखदुःखमोहात्मकत्वादभिन्नगुणात्मकं साम्येन चावस्थितमिति तथा परस्परमुपकुर्वन्ति सत्त्वादयः शब्दादिभावेन च व्यवतिष्ठन्ते प्रत्येकं सुखाद्यात्मनेति सुखादित्र्यात्मकत्वं घटादावेकस्मिन्नेव चेति त्वयैवाभ्युपगतत्वात् कस्य स्ववचनविरोधादिदोषाः? इति स्वस्थेन चेतसा चिन्त्यताम् ।

हेतुविरुद्धतोक्तावप्येवमेवेति स्फुटमेव सुखं सदा व्यक्तशब्दस्पर्शरूपरसगन्धं चेत्यभ्युपगम्यताम्, किमन्यापादनेन परदोषाभिधानेन वा तत्त्ववादिनैव भवितव्यमृजुना, तेभ्य एव लघ्वादिभ्यो हेतुभ्यो वियदादिवदिति, स्वमतेन तु व्यक्तशब्दस्पर्शरूपरसगन्धवत्प्रतिज्ञायां वियद्वर्जान्युदाहरणानि ।

सत्त्वादित्रयविषयसमन्वयपरिमाणोपकारशक्तिप्रवृत्तिवैश्वरूप्यगत्याख्यानां प्रकृतिसाधकानां वीतानां व्यवहारसम्प्रसिद्धेः प्रत्ययसर्गास्तित्वैकत्वार्थवत्त्वपारार्थ्यान्यत्वाकर्तृत्वपुरुषबहुत्वयोगवियोगस्थितिविषयस्य शास्त्रस्यैतेषामेव पञ्चानां वीतानां हेतुत्वावधारणार्थानाञ्चावीतानामतथार्थत्वात्तद्विषयः प्रत्ययोऽप्यज्ञानमेव,

तदज्ञानत्वात् ज्ञानप्राप्यपुरुषार्थाभावोऽपीति किमवशिष्यते *वार्षगणे तन्त्रे* सुभाषिताभिमतमतस्त्याज्योऽयमनुपपन्नपरोक्षार्थवादः ।*****

तस्मात् *सर्वसर्वात्मकत्वपरिग्रह एव न्याय्यो न पुनः सर्वासर्वात्मकत्वपरिग्रहः*, अन्यथा भवनद्वैतपरिग्रहाद्विध्युभयनयैकान्तोपपत्तेः, तत्र भवति भावद्वैतं भवतो भावस्य, न तु सन्निध्यापत्तिभवनद्वैतम् ।

तत्र तावद्यः सन्निधिर्नहि स सन्निधिमात्रवृत्तिरस्ति, अनापन्नत्वात्, अनाविर्भूतत्वात् अनाविर्भवनमप्रवर्त्तनमप्रवर्त्तनञ्चानियमः, अथवाऽऽपत्तिर्विपरिणामः, आविर्भावो व्यक्तिः प्रवृत्तिर्नियमस्वरूपत्वमतो विपर्ययेभ्यो हेतुभ्योऽनापन्नत्वादिस्वरूपेभ्यो नास्ति वन्ध्यापुत्रवत् सन्निधिः ।

ननूक्तम् अस्तिभवत्यादिष्वस्तिवर्त्तती सन्निधिवाचिनौ भवतिविद्यती सामान्यभवनवाचिनौ पद्यतिरापत्तिभवनवाचीति, सत्यमुक्तम् । सर्वेऽप्यमी सत्तार्थमेवाविशेषेण ब्रुवते, पद्यतिवर्तत्यर्थ प्रवृत्तत्वात्सत्ताया इत्युक्तम्, न हि द्रव्यादिसद्भेदोपादानवत् पद्यति वर्त्तत्युभयोपादानम् किन्तु अस्त्यादितुल्यार्थत्वेन, सत्तार्थ इत्यविशेषेण वचनात्, एवं तावत्सन्निधिभवनं नास्त्येव निरूपणानुपपत्तेः ।

यदपि चापत्तिभवननिरूपणं प्रधानमेव भवति महदादि विकारापत्त्या, तेन किल भूयते इति तदपि न, तस्यापि भाव्यमानत्वाद्भावयितारमन्तरेण भाव्यत्वानुपपत्तेः, अनापन्नत्वात् ।

अस्वतन्त्रत्वात्, शब्दादिवत्, तस्मात्ततोऽन्यो भवति मुख्यः, कोऽसौ? यः कर्त्ता, कः कर्त्ता? यः स्वतन्त्र प्रवर्त्तनवृत्तत्वात्,

प्रवर्त्तयद्धि कारणं तद्भावमापद्यते सत्त्वादि, तथा भवनप्रवृत्तत्वात् तन्तुपटवत्।

नन्वेते प्रधानशब्दादिपटादिदृष्टान्ता अद्वैतवादं समर्थयन्तीति, उच्यते प्रवर्त्तयितृत्वमात्रसाधर्म्यात्तदभ्युपगम्यते, अन्यथा विध्युभयैकान्तोत्थानाभावात्, भाव्यभावकभेदप्रसिद्धेश्च, अणुधर्मादयोऽपि भाव्यमाना एव।

धर्माधर्माण्वादीनामपि च तन्त्वंश्वादिवत् प्रवर्तकः पूर्व पूर्वशक्तातारतम्येनेश्वरः सन्निहिततद्विधशक्तिः प्रतिविशिष्टबुद्धिः स्वतन्त्रः तस्याभिप्रायेणैव प्रवृत्तिमापद्यन्ते धर्माधर्माण्वादयः, सोऽपि चाभिप्रायप्रवृत्त्यापत्तेर्न सन्निधिमात्रवृत्तिरतः प्रवर्त्तयिता, प्रवृत्तिनिवृत्तिविनियोगेषु स्वातन्त्र्यात्, विष्णुसत्त्वादीनामधिकृत-पुरुषाणामिव प्रवर्त्तनम्, तस्यैव प्रवर्त्तयितृत्वात्।

अधिकृतपक्तृवत् सम्भवनधारणज्वलनविक्लेदनव्यापारेषु स्थालीकाष्ठतन्दुलादीनां प्रवृत्तिनिवृत्तिविनियोगेषु स्वातन्त्र्यात् सूपकारस्तत्तदात्मा प्रवर्त्तयितृप्रयोजनमात्रत्वात् क्रियायाः अथवा कर्तृ-कर्मकरणाधिकरणसम्प्रदानानि प्रतिकारकं पचादीनां क्रिया भेदाद्यथास्वशक्तिस्वातन्त्र्यात् कर्तृणि, यथाधिकरणं स्थाली सम्भवन धारणे कुर्वती पचतीत्युच्यते तथापि उपक्रमप्रभृत्यपवर्गपर्य-वसानासु क्रियासु देवदत्तस्यैव स्वातन्त्र्यादुच्यते देवदत्त एव पचति तेन पच्यत इति।

साक्षाद्वा भवितृवत्, यथा च सम्भवनधारणरोहणादिसमर्थ पृथिव्युदकादिकारितव्रीहिभवनप्रत्यक्षतायामपि व्रीहिर्जायते,

भवत्यन्तसन्निविष्टस्वातन्त्र्यात् तस्यैवेश्वरस्य प्रयोजकत्वादुच्यते भवती च भवतीति।

सत्त्वतमःप्रकाशनियमप्रवृत्ती स्त एवेत्युक्तम्, इतरयोः ख्यापयतीति वचनात्, रजस्तु प्रवृत्तिलक्षणमेव, विशेषतः सत्यपि प्रवृत्तिसामान्ये करोति प्रवर्त्तयतीति वचनात् प्रवृत्त्या रजोभवनवद्वा।

दृष्टान्तबाहुल्यप्रदर्शनं प्रतिसिद्धान्तपरिदृष्टादृष्टादेः प्रवर्त्तयितृत्व ख्यापनार्थमिति स एव भवति सर्वव्यक्तिप्रवृत्त्यात्मकत्वात् तासामेव चास्याष्टमूर्त्तितोच्यते स्वशक्त्या व्याससरूपत्वात् तासु स एव भवति साऽसा च।

इतरथा यद्यदृष्टादेः प्रधानादेर्वा प्रवृत्तयः फलानि वा स्युः तर्हि तयोः स्वानुरूपकार्यकारणानुबन्धसामर्थ्याभ्युपगमादुत्कर्षापकर्षा-भावप्रसङ्गः परस्परानुरूपशालिबीजाङ्कुरादिहेतुकार्यभावप्रबन्धवत्, दृष्टौ च तौ, ततो नान्यदस्ति कारणमीश्वरकामचारेरणादृते।

तनुकरणभुवनसाधनायादृष्टप्रधानकालादिप्रेरितानि परमाणु सत्त्वभूतादीनि विशिष्टचेतनाधिष्ठितान्येव प्रवर्तन्ते, सम्भूयैकार्थ-कारित्वात्, तक्षाधिष्ठितरथदारुगणवत् तथाऽचेतनत्वात्, अथवा स्थित्वा प्रवृत्तेस्तुर्यादिवत्।

चेतनानधिष्ठितक्षीरदधिमेघादिवदनेकान्त इति चेन्न, अदृष्टकर्त्तृकविषयप्रतिज्ञार्थाव्यतिरेकात्, शब्दानित्यत्वसाधने प्रति-ज्ञानुनीतजलधिध्वन्यनित्यत्ववत्।

स्थित्वाप्रवृत्तिचेतनानधिष्ठितेश्वरवदनेकान्तः, ईश्वरस्य वा चेतनाधिष्ठितता स्थित्वाप्रवृत्तेरदृष्टाणुप्रधानादिवदतोऽनवस्था स्यादिति

चेन्न, चेतनाधिष्ठितप्रवृत्तिमत्त्वसाध्यधर्मत्वात् ·। देवदत्तादेस्तर्हि चेतनेश्वराधिष्ठानं न प्राप्नोति, उच्यते च त्वया चेतनानामपीश्वराधिष्ठानम्, यथा पुरुषवादनिरसनाय -

'अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः ।
ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा ॥'[1]

इति चेन्न, प्राग्विशिष्टबुद्धिचेतनप्रतिज्ञानात्, विशिष्टबुद्धित्वमपि चास्यार्थानामर्थक्रियायोग्यत्वेन सन्निवेशकत्वात्, स्थपतिवत्।

तन्वादीनि स्वभावेनैव प्रवृत्तानि न तु केनचिद्विशिष्टबुद्धिना, नीलोत्पलनालकण्टकमयूरचन्द्रिकादिवदिति चेन्न, क्षीरदधिमेघादिवदुक्तोत्तरत्वात्।

लघुप्रकाशप्रवृत्तिगुरुवरणनियमादयः परस्परप्रत्यनीकाः विशिष्टबुद्धिपूर्वकाः संहत्यैकार्थकारित्वात् पाचकाधिष्ठितानलोदकौदनसाधनवदिति।

अन्योऽन्याभिभवमिथुनवृत्तित्वपरिणामादिति चेन्न परिणामस्यापि कार्यत्वात्, धर्मान्तरैक्यादिपरिणामो हि धर्मान्तरनिषेधो धर्मान्तराविर्भवनञ्च, तद्द्वयं कार्यम्, पूर्ववत् प्रतिज्ञार्थाव्यतिरेकात्, विशिष्टबुद्धिमद्विहितम्।अन्वाह

'एको वशी निष्क्रियाणां बहूनामेकं बीजं बहुधा यः करोति·।
तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम् ॥'[2]

१. महाभारते वनपर्वणि अ. ३. श्लो. २८ २. श्वेताश्वतरोपनिषद् ६-१२

अयं विधेरुभयभाक्, विधिर्व्याख्यातः पूर्वमनपवादप्रवृत्तिः तस्योत्सर्गाद्विधानात्मा विधिर्विधीयते सर्वसर्वात्मकत्वात्, नियमः सन्निधिप्रयोज्यसतोरप्रवृत्तेरसत्त्वम्, तयोरसत्सत्त्वात्, स्वतन्त्रस्य कर्तुर्ज्ञस्यैव भवनात् तस्मान्नियम्यते च।

सादृश्यं सामान्यञ्च शब्दार्थः, ननु सामान्यमविकल्पात्म-पुरुषनियत्यादि, सर्वसर्वात्मकत्वादिति पूर्ववादप्रसङ्ग इति चेन्न सर्वसर्वात्मकत्वेऽपि च सृष्ट्यर्थवत्त्वात्, अभिहितन्यायेन सत्त्वादि-शब्दादितन्वादिविकल्पप्रत्ययस्य सत्यार्थत्वात् अद्वैतप्रत्ययस्या-सत्यार्थत्वात्।

वाक्यमपि च पृथक् सर्वं पदम्, यथा "देवदत्त ! गामभ्याज शुक्ला"मित्यत्रैकैकं पदं वाक्यम्, तस्मादेव, देवदत्तोऽपि हि गवात्मकोऽभ्याजात्मकश्च तथाप्रवर्त्तनात्तत्तदापत्तेः, तान्यपि तथापत्तेरिति।

एतस्य विध्युभयनयस्य द्रव्यार्थभेदोऽर्थः, पूर्वविरुद्धत्वान्नया-नाम्, सङ्ग्रहदेशत्वाद्द्रव्यार्थः, द्रव्यमपि गुणसन्द्रावः, विध्युभयन-यत्वात् सन्निहिततद्विधशक्तीश्वरापृथक्त्वादण्वादीनां तदेकैक-सर्वात्मकत्वाच्च तेनापि तद्वशित्वात्।

किं स्वमनीषिकया तदुच्यते? न, उपनिबन्धनमस्य *'दुविहा पण्णवणा पण्णत्ता जीवपण्णवणा अजीवपण्णवणा चे'*[1] ति, अथवा *'किमिदं लोएत्ति पवुच्चई? गोयमा! जीवा चेव अजीवा चेव, एवं रयणप्पभा जाव ईसीपब्भारा समयावलियादि'*[2] ॥

इति विध्युभयारस्तृतीयो नयचक्रस्य।

१. २. स्थानाङ्गसूत्रम् २.३४

चतुर्थो विधिनियमारः

नन्वेवं त्वदुक्ता एवोपपत्तयः प्रत्येकं सर्वप्राणीश्वरत्वं साधयन्ति, बाह्याध्यात्मिकसुखदुःखमोहमात्रत्वाज्जगतः, सदसद्वेद्य -मोहान्तरायभेदानां सुखादित्रयविपाकफलत्वानतिवृत्तेस्तदात्मसंवेद्य -लक्षणत्वात् कर्मणः, सुखादिसंवेदनेनैव हि लक्ष्यते, अतः कारणे कार्यस्य सत्त्वात् कार्ये कारणोपचारात् सुखादयः कर्म, अन्नप्राणत्ववत्।

आत्मापि कर्म ततः सुखादि, पुनरपि सुखाद्रागादिफलं ततः पुनः कर्म ततः सुखादिफलम्, तच्च जीवपरिणामात्मसात्कृत कार्मणयोग्यपरिणामपरमाणुसमूह एवात्मस्थमेकीभूतश्चात्मना, तच्च संवेद्यम्, कर्त्तुः संवेदनात्, प्राक् प्रतिपादितं हि द्व्यणुकत्र्यणुकादि-संयोगैः पृथिव्युदकव्रीह्यङ्कुरादिपरिवृत्तिरूपेणात्मन स्तेषाञ्चैकत्वं सर्व -सर्वात्मकत्वञ्च, तस्मात् कर्मकारणां जगत्प्रवृत्तिं साधयन्ति त्वदुक्ता एवोपपत्तयः।

इतश्च कर्मपूर्वकं जगत्, कर्मप्रवर्त्तनाभ्युपगमात् सर्व-प्राणिनाम्, कर्त्तृत्वात् कर्त्तुरेव भवितृत्वाभ्युपगमात् तस्यैव भवितुश्च प्रयोजनात्।

ईश्वरात्तु कर्मणः प्रवर्त्तनं किं सतः? असतो वा? तद्यद्यभूतस्य ततश्चाद्वैतम्, तस्यापि तदात्मकत्वात्, भूतस्य चेत् प्रागपि तत्कर्मास्ति कारणे कार्यस्य सत्त्वात्, तच्चेश्वरात्मैव, तनुकरणादि भाव्यवत् तथापि सुतरामद्वैतम्, तदात्मकत्वादेव पुरुषावस्थावत्, ईश्वरो भाव्यः तदात्मकार्थादि भवनवद्वा।

अथ यस्मै प्रवर्त्यते यथा तेन तत्तत्प्राण्यात्मकं तदित्यत्रोच्यते तस्मात्तर्हि तत्तथाभूतं प्रत्येकं प्राणिनः कारणात् तद्वशात्तथेश्वरप्रवृत्तेः कृतं त्वदिष्टेनेश्वराख्येन, अथ तत् कृतमपि पुरुषकारराज-प्रसादवदीश्वरापेक्षं प्रवर्त्तत इत्यत्रोच्यते कर्तृतां प्रति स्वातन्त्र्यं सिद्धं तस्यैव, पुरुषकर्मजन्यप्रसादराजवदेव ईश्वरस्याप्यन्यतरपुरुषकृतकर्म प्रत्ययप्रसादोत्पादनात् कर्मस्वातन्त्र्यं प्रवृत्तौ फले वा।

द्रव्यादिपञ्चकापेक्षं हि कर्म प्रवृत्तौ फलदाने वा स्वतन्त्रम्, सेवादिक्रियाफलप्रत्यक्षवत्।

त्वदभिमतेश्वरस्तु यदि स्वतन्त्रः प्रधानादि वर्त्तयति ततः प्रतिपुरुषनियामककर्मानपेक्षायां प्राणिगणस्य स्थानविग्रहेन्द्रियोप-भोगलक्षणाविशेषः, तद्विशेषहेतोरीश्वरस्य समानत्वात्, स तु विशेषो द्रव्यक्षेत्रकालभावभवापेक्षकर्मनियतेः स्यात्, तस्मात् कर्मापेक्षं ईश्वरत्वं सर्वप्राणिनाम्।

अनपेक्षा च कर्मणः किं सतोऽसतो वा? यद्यसत एव क्रियाविलोपः, इष्यन्ते च ताः यस्मादुक्तश्च वः शास्त्रे *'योगं साधयिष्यन्निष्यादि यावन्निद्रातन्द्राप्रमादालस्यरहितश्च स्या'*दि-

त्यादि, कर्माभावे च सर्वप्राणिमुक्तेः तन्विन्द्रियविषयसम्बन्धाभावेन तन्वादिसृष्टिरीश्वरस्यानर्थिका, ततश्च भाव्यभावकभेदाभावादीश्वरकर्मप्रधानाण्वादिद्वैतकल्पनानिर्मूलता।

अथ तु सदपि नापेक्षते सः स्वतन्त्रत्वादिति मन्यते तत आक्षीणोदितकर्माशयबन्धमोक्षाभ्यामकृताभ्यागमकृतप्रणाशौ स्याताम् धर्माधर्मनिरपेक्षत्वात्, स्वभावपुरुषादिवादिमतवत्।

अथैवं कर्मापेक्षः प्रवर्त्तत इति मन्यसे ततस्तान्येव कर्माणि कर्तृणि भवितृणि ईश्वराणि, तेषां तस्यापि तथाभावयितृत्वात्, न स तानि तथाभावयति तथाभाव्यमानत्वात्, यथा च पृथिव्युदकादीन् व्रीहिरेव तथाभावयति, पृथिव्याद्यपेक्षोऽपि तथापत्तेः, न पृथिव्यादयस्तथाऽनापत्तेः तेषामसत्त्वात्, असत्त्वञ्चानापन्नस्यासत्त्वात् खरविषाणवत् अस्वतन्त्रत्वाच्छब्दादिवत् भवति कर्त्ता स्वतन्त्रः सर्वः पुरुष प्रवर्त्तनवृत्तत्वात्, प्रवर्त्तयद्धि कारणं तद्भावमापद्यते शब्दादि, तथाभवनप्रवृत्तत्वात् प्रवर्त्तयितारमन्तरेणाभवनादवृत्तत्वात् तन्तुपटवत्।

ईश्वरस्यापि च तन्त्वंश्वादिवत् पूर्वपूर्वशक्ततारतम्येन प्रवर्त्तकः सर्वः एव पुरुषः, कर्मणिवृत्तेः सृष्ट्यतिशयप्रकर्षस्य, सन्निहिततद्विध शक्तिः प्रतिविशिष्टबुद्धिप्रमाणीकृतक्रियः। स च स्वतन्त्रः, तत्प्रवृत्त्यापत्तेः, आ ईश्वरात् प्रवर्त्तयितृत्वात्।

शक्तिमत्प्रवृत्तीत्यादि यावत्सत्त्वादिवदिति पूर्ववत् सर्वव्यक्ति प्रवृत्त्यात्मकत्वादस्य सर्वमूर्तिता। एवमेव चास्य पृथिव्याद्यष्ट-

मूर्त्तितोच्यते । तासु तस्यैव निमित्तत्वात्, प्रवृत्तिफल प्रकर्षाभाव-प्रसङ्गात् कर्म एव कारणं नेश्वरादि । इतरथा ईश्वरादेः प्रधानादेर्वा प्रवृत्तयः फलं वा स्युस्तर्हि तस्यैकरूपत्वादुत्कर्षापकर्षौ न स्यातां, दृष्टौ च तौ, न निर्बीजेश्वरकामचारेरणात्, अतोऽन्यद्विमर्दक्षमं कारणमस्तीति ।

कर्मापेक्षत्वेऽपि न व्यर्थमीश्वरकारणत्वं तदभावे प्रवृत्त्य-भावात्, दार्वपेक्षरथकारकारणत्ववदिति चेन्न, इतरत्रापि तुल्यत्वात्, ईश्वरापेक्षत्वेऽपि न कर्मवैयर्थ्यं तत एव हेतोः, रथकारापेक्षरथदारु-वदिति, प्रवर्त्तयितृत्वाच्चेश्वरस्य दासस्य स्वामिवत् तच्च कर्मणः सिद्धम्, प्रवर्त्त्यत्वञ्चेश्वरस्य, तथाप्रवर्त्तकं कर्मेति पुरुष एवेश्वरः सर्व इति ।

एवं प्रतिघातप्रसङ्गोऽपि सापेक्षप्रवृत्तित्वाद्रथकारवत्, यथा रथकार उपादानोपकरणानामसामर्थ्यवैकल्ययोः प्रतिघातस्तथाऽप-चितकुशलमनुजिघृक्षतः तद्विपरीतञ्चोपजिघत्सत ईश्वरस्य यद्य-प्रतिघातः स्यात् स्यात् स्वातन्त्र्यम्, न तु भवति पुरुषकर्म प्रत्ययेनेश्वरप्रवृत्तेः प्रतिघातदर्शनात्, अन्यथा शुभकर्माणं दुःखेने-तरञ्च सुखेन योजयेत् तच्च नेष्टमित्यनीश्वरः सः ।

यत्तूच्यते सर्गादौ धर्माधर्मविकलानां शरीरेन्द्रियविषयोत्पादने निरपेक्षोऽप्रतिहतस्वशक्तिवशादेव शरीरादीनुत्पाद्य बुद्धानां धर्माधर्ममर्यादामुपदिशति, "तपोदानयज्ञादि कुरुत, हिंसां मा कार्ष्टेति" । मध्यकाले च तेषां प्राणिनां यथास्वं धर्माधर्ममर्यादा-मनुतिष्ठतामनुष्ठानानुरूपेण फलेनानुग्रहं करोति यदा तदा

सापेक्षोऽप्रतिहतस्वशक्तिवशादेव, ये पुनस्तदुपदिष्टमोक्षमार्ग प्रस्थिता -स्तांश्च सायुज्यं गमयति, पुनरन्तकाले च शरीरेन्द्रियभूतवत् तेषां धर्माधर्मावपि संहत्य तान् दिवससन्ध्यायां परिश्रमाभिभूतान् बालकान् पुत्रकानिव पिता प्रलयक्षपायां स्वापयतीत्यन्तेऽपि निरपेक्षा -प्रतिहतस्वातन्त्र्यः स एवेष्ट इति।

अत्र वयं ब्रूमः — कर्मणामेव तन्निरपेक्ष्य प्रवृत्तौ तस्य प्रतिघातादपरिहृतपूर्वदोषत्वान्न किञ्चिदेतत्, तत्कारित्वात्तज्ज्ञत्व-मिति यत्सर्वज्ञत्वमाकाङ्क्ष्यते तदपि नैव, अस्यानर्थकार्थप्रवृत्तत्वात् बालादिप्रवृत्तिवत् धर्माधर्ममर्यादोपदेशप्रवृत्तेरनर्थकार्थविषयत्वात्, न च धर्माधर्मयोः शरीरादिकारणत्वं, कारणलक्षणाभावात् यस्याभावे यस्याभावो यस्य च भावे यस्य ध्रुवो भावस्तत्कारणमितरत् कार्य-मिति हि कारणलक्षणम्, न च धर्माद्यभावे शरीराद्यभावः, सर्गादौ तदभावेऽपि प्रभुसृष्टेः शरीरादिनिर्वृत्त्यभ्युपगमात्, धर्मादि भावेऽपि प्रलयकाले शरीराद्यभावाभ्युपगमाच्च, तस्योपदेशसाफल्यानभि-ज्ञत्वञ्च निष्कारणशरीरेन्द्रियादिसर्जनादादिकाले, अदत्त फलकुशला-कुशलसंहारादन्तकाले च।

यथा चोपदेशानभिज्ञत्वं तस्य तथा प्राणिनामनुग्रहक्रियाया अपि, यदा तदैवं व्यामुह्यैव स्थितानां प्राणिनां भृतकवत् तेषां शरीर-मुत्पादयामि धर्माधर्ममर्यादां प्रणयामि तत्र प्रवर्त्तयामि तत्फलैरनु-बध्नामि तान् फलानुरूपमुपभोगं विद्याश्चानुगृह्णामीत्याद्युपभोग-विभाजनानुग्रहक्रियायामतिगरीयस्यां किमिति वर्त्तते इत्यत्यन्तपर-वशत्वमेवैश्वर्यम्।

अनुग्रहोऽपि विपर्ययेणोच्यते दुःखहेतुदुःखात्मकाभ्यामिष्टा-निष्टोपभोगस्य, विषकृतभोजनक्लेशनवत्। यच्चोक्तं दुःखमपि तदृण-मोक्षणवदनुग्रह एवेत्येतदप्ययुक्तम्, संसारमोचकव्याध चण्डालादि मारितसत्त्वानुग्रहप्रसङ्गात्, सत्त्वनिकायकलिकलुष कृतात्मोपनिपा-तेनाऽऽज्ञाबाधे सत्त्वानुग्रहवदज्ञानप्रसङ्गाच्च, तत्सायुज्यगमनेऽप्येवम्।

आद्यन्तवन्मध्येऽपि धर्माधर्मक्रियाः प्राणिनां न स्युः, फला-भावात्, ईश्वरवशादेवाऽऽद्यन्तमध्येषु फलसङ्गरात्, ततश्च सर्व प्राणिनां निर्मोक्षः सर्वानिर्मोक्षो वा प्रसक्तः, तत्प्रसक्तौ क्रियाविलोपः, ईश्वरप्राधान्यात्।

यत्तु सर्वशास्त्रार्थनियमनायादावनुध्यानाद्धर्माधर्माद्यपेक्षः स एव स्वशक्तितो जगत्सर्जनाय व्याप्रियते ततश्च प्राणिगणं धर्माधर्ममर्यादामुपदिश्य मध्ये तत्परिपालकान् ब्रह्मादीनाधिकारिकान् विनियुङ्क्ते, अन्ते च शरीरेन्द्रियविषयानुपसंहृत्य प्राणिगणं कुशला शयकलङ्कशुद्धं स्थापयतीति।

इदमन्यथैवोद्ग्राह्यते ईश्वरकर्मणोः प्रधानोपसर्जनभावा-भ्युपगमाद्वैतम्, भाव्यतेऽन्यथा, स एव शक्तित एवान्यनिरपेक्ष इत्यवधारणाददैतार्थभावनात्, एवंनियमनायेयमपि भावनातदनु-ध्यानात् पुण्यमुत्पाद्येत्येषाऽप्यद्वैतभावनैव। प्रत्युपसंहियते तु द्वैताद्वैते द्वे अपि त्यक्त्वा।

तत्राद्वैतस्य त्यागस्तावत् धर्माधर्ममर्यादास्थापनवचनेन, मर्यादा, नामानतिक्रमस्थानं विषयतस्तु सुखदुःखप्रवृत्तिसीमा,

इयति विषये सुखमियति विषये दुःखमिति धर्माधर्मयोः सीमनि स्वके स्वके व्यवस्थापनम्, ततश्च सर्गादौ स्थानाद्यात्मके अपि न स्याताम्, अनियतविषयत्वात्, प्रलयवत्, अन्ते च स्यातामनियत विषयत्वात्, मध्यकालवत्, अथवा नियतविषयत्वात्तदापि स्याताम्, मध्यकालवत् मध्ये वा न स्यातामन्तवदिति।

अथोच्येत अत एव न सुखादिप्रवर्त्तनात्मिका धर्माधर्ममर्यादा, ईश्वरस्यैव सुखदुःखयोः प्रवर्त्तकत्वात्, यदि सा न प्रवर्त्तयति किमर्थमसौ तां व्यवस्थापयतीति चेदुच्यते, अयं धर्मोऽयमधर्म इत्येतावदुपदेशेन स्वरूपसंज्ञाव्यवस्थापनमसौ करोतीति।

एतदपि तुल्यं पूर्वेण, असत्त्वात्, धारणाद्धानाद्वा धर्म इति निरुक्तेः, एतस्यार्थस्याभावे कथमसौ धर्म उच्यते तद्विपर्ययो वा कथमधर्म इति, धर्माधर्माविष्येते सुखदुःखकारणे ह्यव्यभिचरिते, तस्मादयुक्तं संज्ञाकरणमात्रेण मर्यादेति।

अथ तु तस्यैव रुचेः सुखं दुःखं च, न धारण-धान-प्रवृत्त्यात्मकत्वात् - धर्मस्यातस्य वा, उच्यते धर्माधर्ममर्यादावचन-स्यानर्थकत्वात्, यदुक्तं प्रतिबुद्धानां प्राणिनां धर्माधर्ममर्यादामु-पदिश्योत्तरकालं स्वमर्यादानुष्ठानानुरूप्येणेत्यादि तत्सर्वमनर्थकम्, सदैवेश्वरशक्तिमात्रवशादेव यथा तथा सुखस्य दुःखस्य वा यस्य कस्यचित् सिद्धेर्धर्माधर्माकारणत्वादाद्यन्तवत्तन्मर्यादावचनमनर्थकं इति।

तथा द्वैतमपि त्यक्तं, साक्षाद्व्यापारवचनात् तद्व्या-वृत्तेस्तस्य सर्वथा सर्वदा सर्वत्र वाऽव्याहतवृत्तित्वात् किं धर्मादिना?

किं स्थानविग्रहेन्द्रियविषयैः प्राणिभिर्वा? किमाधिकारिकैः? अथ मन्यसे तैर्विना शक्तिर्व्याहन्यते तस्य तर्ह्यस्य व्याहतशक्तित्वात्तु अनीश्वरता कार्यान्तरासक्तेः श्रमाद्वा, इतरवत्।

ननु प्रधानोपसर्जनद्वैतमुद्ग्राह्य तदर्थसंवादेनोपसर्जनेन विनापि प्रधानस्य प्रवृत्तिसद्भावात् चित्राचार्यस्येव शिष्येण विनापि सर्गादौ तथाऽदृष्टाद्यभावेऽपि प्राधान्यात्, भाव्यत्वादिति चेन्न, आदिकरस्य कर्तृत्वात्, अव्यज्यमानप्रकारव्यक्तिरादिः, आदानात्, आदित्यो दयादित्ववत्, तत्प्रयोजनपरमार्थत्वाद्भवितृत्वस्य, यः प्रयोजयति परमार्थतः स कर्त्ता भविता न प्रयोज्यो भूकृञोः सर्वधात्वर्थत्वात्।

आदिकरत्वञ्च यथा व्रीहौ सम्भाव्यते, अव्रीहेर्मृदादेर्व्रीहित्वेनादिकरत्वात्, तथा प्रागप्यादिकरत्वं तथा पश्चादपि, तदादित्वाद्व्रीहेस्तेषामादिकरत्वं तथाभिव्यक्तेः तत्प्रयुक्तत्वाच्च, ते ह्यस्य प्रयोक्तारः।

तत्प्रयुक्तो व्रीहिः, पृथिव्याद्येव न भूतो व्रीहिः, आदिकरत्वादादित्योदयादित्यवदित्यत्रोच्यते को वा ब्रवीति पृथिवी न भूतः, उदकादिश्च व्रीहिरिति तत्प्रयुक्तत्वाद्व्रीह्यादि वा पृथिव्यादि न भूतमिति, तत्प्रयुक्तत्वाद्व्रीहिरपि पृथिव्यबाद्याकाशादि भवति पृथिव्युदकवाय्वाकाशाद्यपि च व्रीहिमाषाम्रजम्ब्वादि भवति, तत्कृताहारोऽपि पृथिव्यादि व्रीह्यादि, पृथिव्याद्यपि तत्कृताहार इतश्चेतश्चेति सर्वस्यैकैकस्य तदात्मकत्वात्तत्तदेव।

पुरुषकर्मत्वस्यैवमेव, पुरुषः कर्त्ता कर्मयोग्यानां पुद्गलानां कर्मत्वेनादिकरः, तथाविधोपयोगगतेः।

तस्मादात्मा करणयुक्तः कर्मत्वेनादिकरः, तदपि च कर्म आदिकरम्, बाह्यमपि घटादिकं सर्वमादिकरम्।

यथा चात्माऽकर्मणां कर्मत्वेनादिकरस्तथा प्राक् पश्चादपि कर्माऽऽदिकरम्, तदादित्वादात्मनः तथाऽभिव्यक्तेस्तत्प्रयुक्तत्वाच्च, आदित्योदयादित्ववत्। तत्प्रयुक्तं कर्म, आत्मैव न कर्मभूतः आदित्योदयादित्ववदित्यत्रोच्यते, को वा ब्रवीति न कर्मभूतोऽसौ, कर्माणि चात्मभूतानि नेति, आत्मापि कर्म भवति, कर्माप्यात्मा भवति तथाविधोपयोगगतेस्तत्प्रयुक्तत्वादित्यादिभिर्हेतुभिः, तस्मात् सर्वसर्वात्मकत्वात् कोऽन्य ईश्वरः, का वाऽन्या प्रकृतिरिति।

इतश्चान्योन्यादिकरता कर्मकर्मिणोः, अचेतनज्ञानावरणकर्म प्रयुक्तत्वादात्मनः।

नन्वात्मपुद्गलैक्यापत्तिवचनादेव वा भेदप्रतीतेः स्ववचन विरोध इत्येतन्न, पालनपूरणपुरुषत्वात्, निरुक्तिभेदेऽप्यर्थैक्यात्। अथैवं नेष्यते ततो नैवात्मा बध्येत कर्मणा, ततश्च तत्फलभूतैः शुभाशुभैर्न युज्येत, विमुक्तत्वात्, मुक्तवत्, मुक्तो वा बध्येत, तत एव तद्वत्।

यदि त्वदृष्टाभावेऽप्यसावीश्वरः ततस्ते मुक्तानामपि तनुकरणानि भुवनानि च कुर्यात्, ईश्वरत्वात् सर्गादिवत्, प्रलयकालेऽपि सर्वेषां कुर्यात्तत एव तद्वत्, मध्ये वा न कुर्यात्, ईश्वरत्वात् प्रलयकालवत्, अनिष्टञ्चैतत्, अस्मात् कर्मैक्यात् सर्वसर्वात्मकत्वात् सर्वेश्वरता, अत एव चाणुत एव सुखादयः, तस्माददृष्टादितः सृष्टिरिति वादान्तरपरिकल्पितं त्यक्त्वाऽस्मदभ्युपग

मोऽवश्यम्भावी, तस्मात् सम्भूयकारित्वाचेतनत्वस्थित्वाप्रवृत्ती नामपक्षधर्मता, एकत्वात्।

एवञ्च कृत्वा कर्मैकान्तवाददोषप्रकाशनमपि कृतं वेदितव्यम्, असम्बद्धत्वात्तस्य, पुरुषकारं निराकुर्वन्तः कर्म समर्थयन्तस्त इत्थमाहुः यदि प्रवर्त्तयितृत्वात् पुरुषकारः कारणं न कर्मापीति चेत्तत इदमनिष्टं ते प्राप्तम्, उत्कर्षार्थिपुरुषकारैकत्वात्, प्रधानमध्यमाधम भेदभिन्नाः पुरुषकारा न स्युः, ततश्च तत्फलभूताः सप्रभेदास्ताः सिद्धयोऽसिद्धयश्च नानाजातीया न स्युरव्यतिरिक्तकारणत्वात्, तुल्यतन्तुपटवत्।

कार्यातिरेकात्तु कारणातिरेक इति कर्मैव प्रवर्त्तयितृ, द्विविधा च सिद्धिरसिद्धिः कार्यस्य कर्मणः कारणत्वे एव सम्भवति, नेतरस्य, तत्र त्वदिष्टपुरुषव्यापारस्यावतारासम्भवात्, चेतनस्य स्वशक्त्या धानासमर्थत्वात्, चेतनामात्रसारो हि पुरुषकारः शक्तिः, न च स तां स्वां चैतन्यशक्तिमिष्टे मनुष्यत्वे पशुत्वे वर्त्तमान आधातुं समर्थः, मनुष्यः सन् न पश्वादौ वा, तस्यापि कर्मलभ्यत्वात्, अपि तर्हि संभाव्यं गङ्गायाः स्रोतसः कर्मणाऽन्यथा प्रवर्त्तनमिति।

यापि चेष्टानिष्टतुल्यप्रवृत्तिः पुरुषस्योपक्रमप्रभृति यावच्छरीरं जह्यात्, सा कर्मत एव वेतालाविष्टशवशरीरवत्, यथाऽऽहारविशेष ग्रहणखलरसादिभावविभजनाद्यसञ्चेतिताव्यक्तक्रियास्वस्वतन्त्र एव गर्भादिषु सुप्तः, ताः कर्मकृताः पुरुषो मत्कृता इत्यभिमन्यते तथाभासमानत्वात्, तत्कार्यतायां हि तासां कदाचिदकरणा भावादिहैवामृतत्वप्रसङ्गः।

कायेन्द्रियनिर्वर्त्तनेऽप्यनिष्टशरीरेन्द्रियादि न स्यात् सम्पन्ने न्द्रियजातिसंस्थानसंहननादियुक्त एव स्यात्, तस्मात्तत्सर्वमेव तत्कर्मण एव; तदतिरेकेण क आत्मनि प्रतिपद्येत? तस्मादहेतुः पुरुषस्तत्कारश्च।

अकारणमपि कर्म सहायापेक्षम्, कवलास्यप्रक्षेपादिवत्, अतो भारोत्पाटवत् फलोपहाराय तत्स्वामिनः कर्त्तुर्नयोद्योगावान्तराव-पेक्ष्यौ, बाह्या च प्रकृतिरिति न मन्तव्यम्, तान्यपि हि स्वामिधर्माधर्मरज्जुनिबद्धानि तदायत्तत्वात्तद्भोग्यत्वात्तन्तुपटवत्, यदि तान्येवं नेष्यन्ते ततः सर्वाविशेषत्वप्रसङ्गः।

योऽपि स्वामिपुरुषकारः सोऽप्यधर्मफलत्वात् कर्मैव क्लेशत्वात्, अथैवं पुरुषकारं संक्लेशाधर्मफलं नेच्छसि ततो न तर्हि दुःखमधर्मफलमिति प्राप्तम्, शिरोरोगादिक्लेशत्वान्नयोद्योगपुरुष-कारवत्। अथ प्रसिद्धिविरोधदोषभयादुःखमधर्मफलमिति त्वयाऽनु-ज्ञायते तत्साचिव्यक्रियायाश्च हिंसादेरिष्टफलप्राप्तिरिति प्राप्तम्, धर्माधर्मफलविपर्ययात्।

अभ्युपगम्यापि पुरुषकारं दोषं ब्रूमः, स निर्हेतुकः सहेतुको वा स्यात्, यद्यहेतुकः मुक्तानामपि स्यात्, सहेतुकश्चेत् कर्मण एवाचेतनाच्छुभादप्यनर्थावाप्तेरशुभादप्यर्थावाप्तेः शुभाशुभवैचित्र्य-मनुमातुं शक्यते, युक्तिक्षमहेत्वन्तराभावात्, नात्रान्यद्विमर्दक्षमं कारणमस्ति।

यदा चैवं प्रवृत्तौ कर्मण एव कर्तृत्वं सिद्धं तदा द्रवतीति द्रव्यं कर्तृसाधनं न भवति, स्वतन्त्रस्य कर्तुरनुपपत्तेः, कर्मपरिग्रह

विशेषात्तु द्रव्यं द्रूयते गम्यते भोग्येन कर्मपुरुषेण तेन द्रव्यं क्रियते कर्मपुरुषेणैव कर्मपुरुषः क्रियत इत्युक्तं भवति, यथा व्रीहिणैव व्रीहिः क्रियते कार्येणैव बीजव्रीहिणाङ्कुरव्रीहिरिति।

यच्चाप्येवं वादिनस्ते कार्यलक्षणत्वात् कर्मणः कार्यं कर्म यत्क्रियते तत्कर्मेत्यक्षरार्थाच्चानुमेयः कर्त्ता, तस्मात् कर्मणोऽन्यं कर्त्तारमन्तरेण कर्माभावात् घटस्येव कुलालोव्याप्येष्यः कर्त्तेति, तन्न, ननु कर्मणैव करिष्यते स्वत एव कर्मणा कर्म क्रियते, न तु तद्व्यतिरिक्तेन कर्त्रेत्युक्तम्।

ननु सुदूरमपि गत्वा त्वयाप्येतदभ्युपगन्तव्यं कर्मव्यतिरिक्तः कर्त्ता पुरुषोऽस्तीति, व्रीहेरप्यावर्त्तकत्वात्, स्वरूपभेदात्, अक्षरार्थाच्च निर्विवादकृतकत्वात् कर्मणः कर्त्तुरेव भावः सर्वस्य, एवञ्च त्वदुक्तहेतोरेव कर्मव्यतिरिक्तपुरुषसिद्धेरावर्त्तकवैधर्म्येण कर्मणः कृतकत्वं कर्त्रर्थोत्तरभूतस्यावधारणञ्चायुक्तम्, तच्छक्तेः।

न हि सा क्रियमाणाऽलब्धात्मवृत्तित्वादस्वतन्त्रत्वाच्च भवति, अभूतदेवदत्तवत्, अनिष्टञ्चैतत्तवापि। पुरुषकारप्रत्याख्याने च सर्वशास्त्रवैयर्थ्यप्रसङ्गः, हिताहितप्राप्तिपरिहारावर्थौ हि सर्व शास्त्राणाम्, ताभ्यां प्रमाणान्तरसंवादेन निरुक्तीकृतसत्यत्वानि चिकित्सितादीनिशास्त्राणि पुरुषक्रिययोरभावे निराकृतानि स्युः, नैवेष्यते तन्निराकरणमेवम्, त्वदुपदेशादिक्रियाणाञ्च दृष्टार्थानाम्, कर्मप्रवृत्तिमात्रत्वात्तत्प्रतिपत्त्यप्रतिपत्त्योः।

कर्मप्रवृत्तिमात्रत्वात्तत्प्रतिपत्त्यप्रतिपत्त्योः कर्मत एव भवतीत्युपपद्यते, प्राज्ञपुरुषप्रतिपत्तिवत् बलीवर्दाद्यप्रतिपत्तिवच्च

तस्मात् सर्वाण्येतानि कर्मण एवेति चेत्, त्वमिदमसि तावत् प्रष्टव्यः, 'अथ तदादिकर्म कुतः? किं तदपि कर्मण एव? उत पुरुषात्?' इति, ब्रूयास्त्वं 'ओमि'ति गत्यन्तराभावात्, न, व्रीहि-वैधर्म्येणाकर्त्तृकत्वात् कृतकत्वमपयाति, ततो वाऽतो व्रीहिरकृतकः, ततश्चाक्रियमाणत्वान्न कर्मत्वं तस्य आत्मादिवत्, उत्क्षेपणा-दिवदिति, एवञ्च कृत्वा तदपि सर्वमसम्बद्धं *यत्कर्मकारणैकान्तिन* आहुः, यच्च *पुरुषकारकारणैकान्तिन* आहुः।

कथमसम्बद्धम्? नहि शुभमशुभं वाऽत्र किञ्चिदाभ्यन्तरं बाह्यं वा इष्टस्य कारणमनिष्टस्य वा, सर्वमेतदिष्टकारणमप्यनिष्टकारणमपि शुभमप्यशुभमपीति गृहाण, यथा त्रिदोषघ्नं मोदकादि प्रमाणाप्रमाण-कालाकालाऽऽहारितं तथैक एव शुभाशुभादिधर्मा ह्ययं पुद्गलकायः, पुद्गलनिरुक्तिकः कायः शरीरं चितत्वात् पुद्गलस्य पुद्गलस्येव वा कायः इति भोक्तृभोग्यात्मकविपरिणामवृत्तित्वात्, आहारवत्, कायचैतन्ययोर्वा ऐक्यपरिणामापन्नयोरेव भोक्तृभोग्यविपरिणाम-वृत्तित्वं सिद्धमतो भोक्तृत्वाद्भोग्यत्वाद्वा शुभोऽशुभश्च कायः।

तच्च न, उदकशुभाशुभत्वे प्रतिविशिष्टसदसद्योगकृते, तस्मात् उभयधर्मता सर्वद्रव्याणामित्येतच्च न, एकैकस्य सर्वरूपद्रव्य भवनपरमार्थत्वात् सर्वशुभाशुभेष्टानिष्टकारणत्वादिरूपो हि द्रव्य भवनपरमार्थः, एवं हि भावादेव भवद्द्रव्यं परमार्थतो भवति, नान्यथा, अत्रानुमानं तदेव तत्, तत्परमार्थत्वात्, तद्वत्, एतदुक्तं भवति तत्तत्स्वरूपभवनपरमार्थत्वात्, तत्तत्स्वरूपवत्।

अन्यथात्वेऽपि तदनतिरेकात्, तन्तुयज्ञोपवीतवत्, यथा चात्र सर्वसर्वस्य बाह्यस्य परिणाम्यपरिणामकभावादेकत्वं परिणामश्च द्रव्यमात्रम्, यद्यद्भवति स परमार्थोऽस्य, यथा क्षीरादेर्यावच्च घटादेः तथात्मकर्मणोरपि, आत्मा परिणमयति तथाभवनसामर्थ्याद्गति-जात्यादिना पुद्गलानिति परिणामकस्ते परिणाम्याः, पुद्गलाश्चात्मानं मिथ्यादर्शनादित्वेन परिणमयन्ति तद्भावेनात्मा परिणम्यते, एतस्य कर्मकर्मिद्वयस्यान्योऽन्यपरिणामकत्वादनादित्वमेकत्वम्, संसारस्य कर्मकर्मिद्वयसम्बन्धजत्वात्तस्य चानादित्वात्।

यदपि च बहिर्भिन्नं विषयजातं रूपादि तदप्यात्मन एव, तत्त्वमुपयोगात्मकत्वात्, मत्यादिवत्, कथं रूपादेर्विषयस्योपयोगः आत्मेति चेदुच्यते, तदव्यतिरेकलभ्यत्वात्।

रूपादीनां देशभेदेन युगपदवस्थायिनां देशकालादितोऽत्यन्त भेदग्रहेऽभवनात्मकत्वात् निर्वस्तुत्वापत्तिर्वन्ध्यापुत्रवत्, ततश्च द्रव्यमेव तथातथाभवनलक्षणं सत्यं न रूपादयो नाम केचिदिति, कथं पुनस्तत् भेदेन भवतीति चेत्, चक्षुरादिप्रत्ययोपयोगापदेशेन, भागिनेयाद्यपदेशविशिष्टैकत्वसत्यपुरुषवदिति साधूक्तमेकमेव सर्वात्मकमिति।

यच्चोपयोगस्वतत्त्वं मत्यादि तदपि पुद्गलात्मतत्त्वम् रूपाद्यात्मकत्वात् घटादिवत्, स हि उपयोगलक्षण आत्मा परमाणु-द्व्यणुकत्र्यणुकादिषु रूपाद्यात्मकेषु पुद्गलेषूपयुज्यते कृत्स्नो व्याप्रियते, तत्प्रदेशस्यापि रूपाद्यात्मकत्वमात्मनोऽभ्युपगम्यते तदुपयोगात्तत्परिणामात्तदेव तदिति न्यायाच्च, यद्येवं ततोऽसङ्ख्यात-

प्रदेशोऽपि सर्वात्मना सर्वैः प्रदेशैर्ग्राह्ये उपयोगं यायात्, मृत्पिण्डः शिवकादिभावमिव, उपयोगमगच्छन्ननुपयुज्यमानोऽचेतन एव, पटानुपयुक्तघटादिवत्, चेतनो ह्युपयोगलक्षणस्तदभावादचेतनः स्यादिति।

आत्मस्वतत्त्वज्ञानावरणाद्युदयप्रवृत्त्यव्यतिरिक्तरूपत्वाच्चात्मा पुद्गलस्वतत्त्व एव तादात्म्यप्रतिपत्तेः।

नन्वेवं पुद्गला एवात्मा प्राप्तः तस्योपयोगात्मनः पुद्गलत्वात् योऽयं पुद्गलोपयोगः स चात्मोपयोगः एव, उपयोगव्यतिरिक्त रूपादेरभावात्, तस्मात् कुतोऽस्य रूपाद्यात्मकतेति, एतन्न, उपयोगात्मकत्वादेव रूपादीनामप्युक्तवत्, अनेन सर्वमपि सर्वात्मकम्, आत्मपुद्गलयोरितरेतरात्मकत्वात्, एवञ्च कर्मैव कारणं पुरुषकार एव कारणमित्येकान्तमसम्बद्धमिति।

इदानीं तु प्रत्येकप्रत्युक्तिभावना दिक्, कर्मैकान्तवाद प्रत्युक्तिदिक् तावत् प्रवर्त्तयितृत्वात् पुरुषश्च कारणमुत्कर्षार्थी, तस्यैवोक्तवत् सर्वत्वात्, असावेव पुरुषः प्राणादिमांश्चेतनः कर्मापि, अस्मिन् पक्षे कर्मादिसर्वसर्वत्वात् किं तदन्यत् कर्मेति, तस्यैव कर्मतापि, तस्मादेव पुरुषकाराणां तत्साध्यानाञ्च सिद्धयोऽसिद्धयश्च नाना स्युरेव। उत्कर्षपरम्पराया बहुप्रभेदाया अपि आमुक्तेः पुरुषस्यैवाव्यतिरिक्तभिन्नकारणत्वात्, अहिभोगविस्तरणा-कुञ्चनवत्, तथाऽनतिरेकातिरेकात् कर्मापि प्रवर्त्तयितृ।

चेतनाचेतनपरमार्थत्वाच्च पुरुषस्य, इष्टानिष्टविधिव्याप्रिय-माणत्वात्, अथैवं नेष्यते त्वया ततोऽसौ भवेत् पशुवन्मनुष्यत्वेनापि गम्यागम्यभक्ष्याभक्ष्याद्यविशेषज्ञः तद्वत् पशुरपि वा विशेषज्ञः।

एवञ्चकृत्वा तस्यैव तत्तदितरवदविभक्तद्वयात्मकतायां द्विविधः प्रवृत्तिप्रबन्धः फलपरिणामप्रबन्धः प्राग्भवीयकर्माख्यपुरुषकारस्य साध्योऽसाध्यश्च, तीव्रमन्दादिहेतूपसेवनसञ्चितत्वात् साध्यासाध्यव्याधिवत्, चलनीयोऽविचल्यश्च बद्धाबद्धमूलत्वात् वृक्षहट्टवत्, निकाचितानिकाचितावयवत्वात्, अयःशलाकाकलापवत्।

परिणमनमपि च तस्यापि पूर्वकर्मणः पुरुषकारस्य विषयो न विषयः क्वचित्, अप्राप्तप्राप्तविपरिणामावस्थत्वात् पुष्पतुगूद्दढफलवत् एवञ्च क्रियासहायश्च स फलं प्रयच्छति, क्रियासहायस्य फलप्रदाने सापेक्षानपेक्षशक्तित्वात्, भारोत्पाटवत्।

सोपक्रमस्य क्रियापेक्षा न निरुपक्रमस्य, तत्र सोपक्रमस्य कर्मात्मनः पुरुषात्मनैकीभूत स्योदयोपशमक्षयोपशमक्षया अवस्थाः सापेक्षा भवन्ति, मदनफलाद्वमनवत् भस्मपटलाच्छन्नाग्निवत्, दरविध्यातावच्छन्नज्वलनवत्, तृणदाहवद्वा।

एवमनयैव दिशा पुरुषकारैकान्तवादः प्रतिषेध्यः तद्यथा — कर्म च कारणं प्रवर्त्तयितृत्वात् सुखदुःखोत्कर्षापकर्षविकल्पानुभवावश्यंभावितस्य चैकस्यैवोक्तवत् सर्वोपयोगत्वात् पुरुषतापीत्यादि सर्वमशेषं योजनीयम्, अत्रैकस्य स्वातन्त्र्यं तत्तत्प्रदर्शित तत्त्वस्येतरस्यापीति भावनीयम्, यथा चात्र तत्त्वं कर्मात्मनोः सर्वप्रभेदेषु वृत्तं भावितमस्माभिस्तथाऽवगाहादिलक्षणैरस्तिकायैः सह, कर्मात्मविचारोक्तात् प्रवर्त्तकप्रवर्त्त्यन्यायात्।

तद्द्रव्यत्वात्, पृथिव्यादिव्रीह्यादिपृथिव्यादिवत्, तद्द्रव्यत्वम सिद्धमिति चेन्न, अवगाहादेव द्रव्यं यथा वियदादि एवमात्माद्यपि, तस्यैव तथाभूतेः, उदकादिव्रीहित्वशिवकादिघटत्ववत्।

अविभक्तावगाहस्यात्मादेरविभक्तमवगाह्यमप्याकाशमित्येकमेवेदं भवनम्, तत्पुनरन्यत्र मिथ्याग्रहोत्थापितनानाप्रभेदं विकल्पितम्, तान् प्रति सर्वगतेतराभिमतद्रव्यस्वरूपमुत्क्षेपणादि, तदव्यतिरिक्तत्वात्, घटघटभवनवत्, यथा घट एव घटभवनं न ततोऽन्यत् ततस्तदव्यतिरिक्तम्, यद्यन्यत् स्यात् घटो न भवेत् भवनादन्यत्वात्, खपुष्पवत्, भवनं वा तस्य न स्यात् ततोऽन्यत्वात् पटभवनवदिति।

एवं पचिक्रियापि क्वचिदप्यनतिक्रान्तद्रव्यस्वरूपा, उत्क्षेपणादिवदेव पृथिव्यादिकाष्ठादि द्रव्यमात्रं भवनमेव, स च भावः पुरुषादि नियतचेतनाचेतनविकल्पद्वैतविशेषणविनिर्मुक्तः सर्वात्मकः, यथा घटादि पटो भवति व्रीहिरुदकं मनुष्यो नभो धर्माधर्मादि वा, पटोऽपि घटो व्रीहिरुदकादीत्यविशेषेण सर्वं भवत्येवैकैकम्।

तदेव हि भवनं यत्सर्वात्मकमसद्व्यावृत्त्यर्थम् न ह्यसन्नाम किञ्चिदस्ति, अनेन हि प्रवर्त्तयितृत्वात् सर्वप्रभेदेन भूयते न न भूयतेऽपि तदात्मानेतिरिक्तत्वात्, बालकुमारादिवत्, अन्यथाऽभाव -त्वापत्तेः।

यद्येवं नेष्यते त्वया प्रागभावादिनापि भवत्येवेति, ततस्तस्य देवदत्तादेर्बालकुमारादिसर्वावस्थात्मपरित्यागे किं तद्देवदत्ताख्यं वस्तु? कास्तास्तद्व्यतिरिक्ता बालाद्यवस्थाः? इत्यभाव आपद्यते।

न चेतनोऽचेतन इति नञा प्रतिषेधवाचिना सम्बन्धादचेतन रूपेण चेतनस्य भावाभावादभाव इत्यत्र ब्रूमः, अचेतन इति चेतनादन्य आत्मैवोक्तः स्पर्शास्पर्शादिधर्मणस्तस्यैवोपयोगाद्यस्पर्शरूपा दन्येन रूपेण स एव स्पर्शादिमान् ज्ञानावरणादिकर्मरूप आत्मा।

न तु भवन्मतात्यन्तचेतनाभावरूपेण चेतनो न भवत्यचेतन इति चेतना न भवत्यचेतनेति ज्ञानादि न भवतीत्यज्ञानादि वोच्यते किन्तु चेतनाया अन्याऽचेतना स्पर्शादि, ज्ञानादेरन्यदज्ञानादीति, प्रसज्यप्रतिषेधस्तु नेष्यते यथा चेतनो न भवत्यचेतन इत्यादिरिष्यते त्वया ततस्तथा सर्वतो व्यावृत्तेश्चेतनाचेतनयोर्व्यावृत्तिः स्यात्, निर्विशेषव्यावृत्यर्थत्वान्नञः स्वतोऽपि व्यावृत्तेः खपुष्पवदसत्त्वा दन्यत्वाच्च तत्त्वमेव चेतना।

ज्ञानदर्शनादिसंवेदना सापि च निर्वृत्त्युपकरणलब्धितत्त्व उपयोगात्मा, अतो रूपादिमदप्यात्मा, चेतनत्वात् अभिमतात्मवत्, तस्यैव तथाभूतत्वात् एवञ्च कृत्वा ज्ञानमज्ञानं पुद्गलात्मकत्वात् रूपादिवत्, अज्ञानमपि च ज्ञानं तत एव तद्वत्, चेतनोऽचेतनः, अचेतनश्चेतन इत्यादि सर्वत्र सर्वसर्वात्मकत्वं भावनीयमिति।

एवञ्चायं सङ्ग्रहेषु द्रष्टव्यः, तेऽपि च सङ्ग्रहाः त्रिविधा द्रव्यस्थितनयप्रकृतयः, तेषु वाऽयं द्रव्यप्रकृतिनयः स्थितप्रकृति विरोधिनोरधिष्ठातृप्रधानयोर्विपक्षः।

स च सङ्ग्रहैकदेशत्वाद्द्रव्यार्थः, द्रव्यशब्दोऽपि कर्तृसाधनो द्रव्यमिति द्रवति याति न विच्छिद्यते भिन्नरूपमुपव्याप्येति। ननु कर्मणि कर्मसाधनत्वमुदितम् तत्कथमधुनाऽवधार्यं द्रवतीति द्रव्यं कर्तृसाधनम्?, उच्यते ननु कर्मसाधनव्याख्यानेन तेनैव कर्तृसाधन

त्वमेव व्यवस्थापितं द्रव्येणैव द्रव्यं क्रियते व्रीहिवदिति, सत्यां कर्मतायामपि कर्तृत्वं द्रव्यत्वादिति।

एतस्मिंश्च नये द्रव्यमेव शब्दार्थः स च नित्यो विच्छेदाभावादवस्थितत्वाद्वा।

अन्वाह च — *पृथिवी धातौ किं सत्यम्? विकल्पः, विकल्पे किं सत्यम्? ज्ञानम्, ज्ञाने किं सत्यम्? ओम्, तदेतद्ब्रह्म।*

एतदुक्तं भवति-अतः परं शब्दार्थव्यवहारो निवर्त्तते निर्विकल्पत्वात्, व्यवहारातीतोऽयमर्थः, कथमोमित्येषोऽन्वय-व्यतिरेकरहितः शब्दार्थो भवितुमर्हतीति चेत् को ब्रूतेऽन्वयव्यतिरेक रहित इति, यस्मादत्रानुवृत्तिव्यावृत्ती अनन्तरोक्तपृथिव्यादिधातु-विकल्पज्ञानसत्यत्वानुप्रबन्धसामर्थ्योपहितरूपे, एते चानुवृत्तिव्या-वृत्ती यथा भागं प्रसिद्धिं गच्छतः, स च शब्दार्थोऽनाद्यनुप्रबन्ध-सामर्थ्योपहितानुप्रवृत्तित्वान्नित्यः, अत्रोत्पादविनाशशब्दावपि तत्स्थितरूपावेव, नासदुद्भवात्यन्तविनाशरूपौ, ऊर्द्ध्वपतन-व्यक्त्यर्थसर्पनिपतनवद्द्रव्य स्वतत्त्वावेवोत्पद्यते विनश्यतीति चोच्यते। अनित्यघटादिशब्दा अपि नात्यन्तमुत्पन्नमभूतञ्चार्थं ब्रुवते, स्वसत्त्वबीजं द्रव्यमेवाविच्छिन्नमाहुः।

वाक्यार्थोऽपि च पृथक् सर्वं पदम्।

निबन्धनमप्यस्य *'जे एगणामे से बहुणामे'* इति।

इति चतुर्थोऽरः नयचक्रस्य समाप्तः।

प्रथमश्च मार्गो नेमिरित्यर्थः।*

* अर्धमेतत् पुस्तकं समाप्तम् इति मातृकासु दृश्यते।

पञ्चमः उभयनयः

सत्यमेतद्यदुच्यते त्वया भवतीति भाव इति किन्त्विदं द्रव्यमेवार्थ इति विरुध्यते अभ्युपगमेन स्ववचनेन वा तदवयवेन वा, भवतीति द्रव्यमिति वैकस्मिन्नेव पदे प्रकृतिप्रत्ययार्थभेदोपादानात्।

यत्तद्भवति तस्य भावत्वादपि यत्तदिष्टं द्रव्यं तद्भावोऽपीति भवनस्य द्रव्याद्भिन्नत्वात्, अतोऽन्यथाऽसत्त्वात्, यदि द्रव्यं भावोऽपि न स्यात्ततस्तदसत् स्यात्, अभावत्वात् खपुष्पवदिति न द्रव्यमात्रमुत्क्षेपणादि, तस्माच्च नैकं सर्वमनन्तरनयदर्शनम्, न सर्वमेकं पुरुषनियत्यादिनयदर्शनम्, नापि विध्युभयदर्शनम्, किं तर्हि? उभयं द्रव्यं भावश्च, अस्य प्रधानत्वच्च तुल्यबलत्वात्।

तत्र सम्मूर्च्छितसर्वप्रभेदनिर्भेदं बीजं द्रव्यमित्येतद्द्रव्यलक्षणम्, तथाभवनाविनाभूतसन्निधिवस्तुत्वव्यक्तिः क्रिया प्रवृत्तिः भावः।

वदनगतक्रमपताकिकासन्ताननिष्कासवत्, यथा मायाकार-कवद्द्रव्यादनुत्पादव्ययात्मकात् पृथिव्यादेर्मूलादयो यथास्वं पताकिकामालावक्रियात्मानो नियता एव क्रमेण निष्कसन्ति, तथा

पचतिगच्छत्यादिक्रिया द्रव्याद्देवदत्तादेः, एवं तस्मिन्नेव वस्तुनि गुणादीनामन्तर्भावात् पदार्थान्तरकल्पनावैयर्थ्यम्।

अद्रव्यद्रव्यवद्द्रव्यसंयोजनवियोजनरूपरसगन्धस्पर्शशब्दोत्क्षेपणापक्षेपणभवनविशेषसमवयनादयो भवनमेव, न गुणादयः सन्ति, द्रवति जानाति इच्छति द्वेष्टि नियतते संयुनक्ति वियुनक्ति श्वेतते इत्याद्याकारकलकारेण कर्त्तृवाचिना क्रियाविशेषाणां सकर्त्तृकाणामभिधानात्।

पृथिव्यादिसंयोजनवियोजनादीनामभावेनमूलादि, भावो वेति द्रव्यभावपरिग्रहो युक्तः।

एवञ्च कृत्वा नहीह कश्चिदपि स्वस्मिन्नात्मनि मुहूर्त्तमप्यवतिष्ठते वर्द्धते वा यावदनेन वर्द्धितव्यमपायेन वा युज्यत इति ग्रन्थः, नहि कश्चिदर्थो द्रव्यं स्वस्मिन्नात्मनि निर्भेदनिरूपाख्ये मुहूर्त्तमपि अवतिष्ठते, अपिशब्दाद्यावत्समयमपि नावतिष्ठते, एतेन वृद्धिहानि सततसम्प्रवृत्तिरूपं सर्वं वस्त्विति द्रव्याऽऽख्यानमेव कृतम्, वर्द्धते यावदनेन वर्द्धितव्यमिति तु पुनः यत्परिमाणस्य यावदिति नियतपरिमाणां वृद्धिं दर्शयता तस्यैव द्रव्यस्यावस्थितस्यावस्थाविशेष एव वृद्धिरिति दर्शितं भवति, तथाऽपायोऽपि, यावदनेनापेतव्यं तावदेवापायेन वा युज्यत इति।

तस्मादयमपि ग्रन्थो द्रव्यात्मकदर्शनेनैव नेतुं शक्यते, सन्निहितव्यक्तियुक्तत्वात्, तत्र द्रव्यमेवेति तावन्न युज्यते, यदि तु द्रव्यमित्येवाक्रियमभवनमभविष्यत् ततो नाभविष्यत्, यदि न

प्रवर्त्तेत न क्रियापि स्याद्द्रव्यं प्राक् केनचिद्गमनादिप्रकारेणावृत्तं तदेवेदानीं पश्चादपि अप्रवृत्तत्वात्, भवदेव हि भवति न निरुपाख्यम्, यदि निरुपाख्यमपि स्यात् खपुष्पमपि स्यात्, खपुष्पमपि वाऽभविष्यत् त्वदभिमतद्रव्यवत्, अभवद्भवनात्।

अनैकान्तिकमेव तत्, आकाशादीनामप्रवृत्तिभवनानां सत्त्वदर्शनादित्येतच्चायुक्तम्, तद्विपक्षत्वासिद्धेः आत्माद्यपि च प्रवृत्तमेव द्रव्यत्वात्, तन्तुबद्बीजवदिति, तस्मात्तेन तेन प्रकारेण परिणममानं प्रवर्त्तमानं वस्तु भवतीत्युच्यते।

तथा च चैतन्यादिलक्षणताऽऽत्मादेरुपपद्यते तथाभवनप्रवृत्तिसामर्थ्यात् द्रव्यत्वतुल्यत्वे सत्यपि।

अथ तु प्रवृत्तिर्भूतिरित्येवाद्रव्या ततो नैव स्यादात्मा पूर्ववत्, भवदेव हि भवति द्रव्यार्थतः, एतदनिच्छतोऽस्थितभवनसाधर्म्यात् खपुष्पमपि वा स्यादद्रव्यत्वाद्भाववत्, भूतार्थसामर्थ्यादेव हि प्रवृत्तिः, गुणाद्यपि च द्रव्यमेव प्रवृत्तत्वात्तन्त्वादिवत्।

भवतीति भावः स च कर्त्ताऽकर्त्ता च द्रव्यम्, यतोऽसौ भवतीति भावः तद्द्रव्यं स भाव्रो, भवनसम्बन्धाद्भवतीति भवति तस्मात्तद्भवनं भावः सा क्रिया।

अत एव तदर्थगतेः *'प्रकृतिपर एव प्रत्ययः प्रयोक्तव्यः प्रत्ययपरैव च प्रकृतिरिति'*[1] व्युत्पत्तिः, उभयार्थवत्त्वप्रदर्शनाय च कोऽसौ भावो नामेति प्रश्नोपक्रमं व्युत्पाद्यते क्रिया, यत्तद्भूयत इति,

१. महाभाष्ये. अ. ३ पा. १ सू. २

नोच्यते योऽसौ भवति कोऽपीति, अस्वशब्दोपादानसाध्यभावत्वात् भावस्यास्मदुक्तानुकारात्, तद्विपर्ययेण तु द्रव्यभावस्य प्रश्नप्रतिवचने दृष्टे व्युत्पादनकाले, तद्यथा कस्य भाव इति प्रश्नः, प्रतिवचनमपि योऽसौ भवतीति उच्यते नोच्यते यत्तद्भूयते तद्भवनमेव, किं भूयते न भूयते केनापीति, स्वशब्दोपादानसिद्धभावत्वात् सत्त्वस्य।

लिङ्गादिमद्द्रव्यं तद्रहिता च क्रिया भिन्नमुभयमेव भाव इति लिङ्गसङ्ख्यावतो द्रव्यात् वस्तुत्वैकत्वगता क्रिया स्वरूपतोऽन्यैव, अलिङ्गसङ्ख्यत्वात् प्लक्षादिवत्, भिन्नानां पदार्थानामेकसम्बन्धि विषयश्चार्थः, समुच्चयोऽन्वाचयः समाहार इतरेतरयोगश्च पदार्थोत्तरकालभाविनः द्रव्याणां गुणानां क्रियाणाञ्च दृश्यन्ते, न चैते द्रव्यं न क्रिया न गुणः किन्तु वीरपुरुषविशेषणविशेष्यैकात्मवत् वस्तुत्वैकत्वगत्याऽनन्यान्यत्वभाजो धर्माः।

साधु भवतीत्यादौ भवने भवितृषु लिङ्गसङ्ख्याभेदवत्सु याः लिङ्गसङ्ख्यास्ता न भवन्ति, भवने नपुंसकलिङ्गमेकवचनञ्चानुमीयते श्रूयते च तद्विशेषणे साधुशब्दे, तस्मादन्यद्भवनं भवद्भ्यः।

प्रत्ययपरप्रकृतिव्यवस्थायान्तु प्रथमैकवचने अतिक्रमकारणाभावात्, नपुंसकञ्च भवनस्याव्याक्तत्वात्, यथा लोके दृष्टं किमपि दृश्यत इति, तथा त्रिकालविषयाद्द्रव्यादन्यो भावो न च तेन विना कारकः त्रिकालत्वात्, द्रव्यं त्रिकालविषयं भावस्य त्रिधा भिन्नकालत्वेऽप्येकरूपत्वात्, वर्तमानत्वेनावतिष्ठमानं तत्सम्बन्धे द्रव्यं त्रीनपि कालान् विषयीकरोति गमनगन्तृवत्, वर्त्तमान एव देवदत्ते गन्तरि गतेस्त्रैकाल्यं दृष्टम्, अगमद्गच्छति गमिष्यतीति तथाऽभूद्भवति भविष्यति द्रव्यमिति।

भावस्य द्रव्यात् पृथक्त्वासिद्धिवत् गन्तुर्गमनपृथक्त्वासिद्धेर्हि दृष्टान्तः साध्यैकदेश इति चेदुच्यते देवदत्तगमनयोः त्रैकाल्यात्रैकाल्य -भेदसिद्धेः द्रव्यभावयोरपि तद्वत्, युगपदयुगपत्तत्त्वखघटवत्।

अथ मतं द्रव्यार्थाभेदत्वादस्य नयस्य द्रव्यार्थस्य च नित्यत्वात् कथमिदं प्रागभावप्रध्वंसाभावात्मकं त्रैकाल्यम्, पूर्वापरकाल-तुल्यत्वात् द्रव्यार्थाभ्युपगमात् द्रव्यस्यैव वाऽत्रैकाल्याभ्युपगमे भावस्य द्रव्यार्थत्याग इत्यत्रोच्यते, प्रवृत्तिनित्यत्वात् नात्रापि द्रव्यार्थ -त्यागः, वस्तुनो द्रव्यभवनात्मकस्योभयत्वादेव नित्यत्वस्यापि द्वित्वम् तदपि नित्यं यस्मिंस्तत्त्वं न विहन्यत इत्युक्तत्वात्।

कूटस्थस्य द्रव्यस्य सर्वप्रभेदनिर्भेदस्य बीजभूतस्य गमनस्थानादि सर्वात्मकत्वेनावस्थितस्यानन्तमात्मानं पर्यनुभवतस्तदर्थानुभवना त्मत्वादेव द्रव्यकौटस्थ्यं युज्यते, इतरस्य तु तथा तथाऽभिव्यज्य मानस्य सततप्रवर्त्तनात्मनो भावस्याकौटस्थ्यं सततसंप्रवृत्तिरूपं नित्यत्वञ्च।

अत एव भूताभूतभात्त्वं द्रव्याद्वैधर्म्यमस्याः प्रवृत्तेरन्यत्व-कारि, भूताभूता क्रिया, द्रव्यं भवदेव, व्यतिक्रान्त्यव्यति-क्रान्तिभात्त्वात् यथा कृतः कटो देवदत्तेन, कृतः कर्मणा विभागः तत्र विभागः कटकर्तुश्चलनात्मकस्य कर्मण ईप्सिततमत्वात् कर्म, चलनेन देशान्तरं प्रापयित्वा क्रियत इति सा व्यतिक्रामति, विभागः कर्म च न व्यतिक्रामतः शब्दार्थस्य पिण्डितत्वात्, न च व्यतिक्रमो निर्निमित्तो भवितुमर्हति, दृष्टश्च वर्त्तमानयोः कर्मविभागयो-र्द्रव्ययोरव्यतिक्रमे करणस्य व्यतिक्रमः।

न चैकस्मिन् व्यतिक्रमाव्यतिक्रमौ युगपद्भवतो विरोधात् तस्मादेतदनुमीयते — देवदत्ते द्रव्ये कटस्य कर्त्तरि कर्मणि वा कर्त्तरि चलने वीरणानां कटे वा कर्मणि करणलक्षणया प्रवृत्त्या तदतद्भवन-स्वरूपया द्विरूपतया भवितव्यमविच्छेदेन।

यथा देशान्तरसंयोगविभागफलं कर्म गमनं गन्तुः पदार्थान्तरम्, तयोः तत्कारणस्य च कर्मणो यावद्द्रव्यभावाभावात् पदार्थान्तरतायां सत्यां गन्तुर्गमनेन सम्बन्धः गच्छति देवदत्त इति, व्यतिलङ्घितगमनश्च गत इत्युच्यते, तथा गमनाद्यपि करणसम्बन्ध-मन्तरेण न भवतीति क्रिया सिद्ध्यति अतो भिन्नं स्वतत्त्वात्, यदि स्वतत्त्वस्याश्रयो न स्यात् कर्मेति न स्यात्, क्रियमाणाद्धि तत्कर्म करणव्यतिक्रमे च कृतमिति न स्यात्, तथाभवद्वास्वसम्बन्धव्यति-क्रममन्तरेण कृतमित्येतं व्यपदेशं न जनयेत् करणसम्बन्धाभावात्, आकाशादिवत् तथा च तद्भवकर्मसत्त्वात् करणसम्बन्धाच्च सदसत्कारणमिति नित्यं स्यात्, सदकारणवन्नित्यमिति नित्यलक्षण योगात्।

यथा च कर्म क्रियया विना न भवति तथा करणमपि भवन-व्यक्तिमन्तरेण नैव भवेत् तथा भवनसम्बन्धव्यतिक्रममन्तरेण भूतमिति न स्यात् ततश्च प्रागादिनिर्विशेषणः नास्त्यभाव इत्य-विशेषेणैकात्यन्ताभाव एव स्यात्, न भवेदेव सर्वम्, खपुष्पवत् असत्कारणत्वाद्वा अभूतभवनसम्बन्धव्यतिक्रमत्वात्।

व्यतिक्रमश्च भवति तृणकर्मादौ कटविभागादिभवनभूततायां, तृणं कटो भवति गमनकर्म विभागो भवति संयोगश्चान्येनेति कथं

तृणं कटो भवति, कर्म विभागो भवतीत्येतदुच्यते? ननूक्तं द्रव्यं क्रिया च द्वयमेव सर्वमिदमिति, तस्य भूतता व्यतिक्रमः।

एवञ्च भावक्रियाश्रयोऽयं कारकाणां कर्मादिभावः न नियतरूपः, न हि किञ्चिज्जातिविशेषयोगात् नियतम्, किं तर्ह्यनियतशक्तिविषयम् तदेव हि द्रव्यमन्यया क्रियया कर्म भवति, अन्यया करणमन्ययाऽधिकरणमित्यादि, तस्मात् सर्वप्रभेदनिर्भेदं बीजं वस्तु द्रव्यं तत्त्वम्, तद्भेदिभवनव्यक्तिक्रिया।

यदि द्रव्यवत् क्रियापि वस्तुनस्तत्त्वं स्यात् ततस्तया विना नैव स्यात् तत्त्वात्तदात्मत्वात्तत्स्वरूपत्वात् न तत्तेन विना भवति देवदत्तबालादिवत्, घटरूपादिवत्, दृष्टश्चैतद्गमनादिक्रियया विनापि देवदत्ताख्यं वस्तु, अन्तरेणापि तु क्रियां भवत्येव वस्तु दोषादर्शनात् ततोऽन्यत्, तदन्तरेणापि भावात् यद्यदन्तरेणापि भवति तत्ततोऽन्यत् घटपटवत्।

दृश्यते हि देवदत्ते गच्छति वृत्तिं करोति यज्ञदत्त इति, अत्र यज्ञदत्तस्य वृत्तिकारणं गमनं देवदत्ताख्यवस्तुनो द्रव्यपरमार्थः तथा क्रियापि स्यात्, गमनवत्क्रियात्वात् स्थानमपि परमार्थ इति प्रागेव स्थानक्रियया गमनविरोधिन्या यदि देवदत्तोऽवरुद्धः स्यात्ततश्च तस्य गमनं नैव स्यात्, देवदत्तत्वावरुद्धदेशे यज्ञदत्तत्ववत्, गमनक्रिया परमार्थदेवदत्तस्य वा स्थानं नैव स्यात्कदाचिदपि, गमनेनाव-रुद्धत्वात्, देवदत्तत्वावरुद्धे यज्ञदत्तत्ववदेवेति यानस्थानयोरभावाद्य-ज्ञदत्तस्य वृत्त्यवृत्ती स्याताम्, यानाभावात्तावत् पूर्ववद्वृत्तेर्यज्ञदत्त-

वृत्त्यभावः, देवदत्तस्य वा गमनकालेऽपि भावे सततमवृत्तिर्वा स्यादिति, एवं स्थानाभावादपि तथेति।

तथा गमनात्मकत्वादस्य देवदत्त एवास्य वृत्तिनिमित्तमिति यावद्देवदत्तं वृत्तिप्रसङ्गः, तदात्मत्वात्तत्कालवत्, तस्य गतिपरमार्थत्वावस्थानाच्च, स्थित्यात्मकत्वाद्वाऽस्य गच्छत्यपि देवदत्ते यज्ञदत्तावृत्तिरेव सदा स्यात्, स्थानकालवत्, एवं तावद्देवदत्तगतिस्थितिविषययज्ञदत्तवृत्त्यवृत्तिविचारद्वारेण दोषा उक्ताः। इदानीं यज्ञदत्तवृत्त्यवृत्तिविषयोऽपि विचारस्तथैव कर्त्तव्यः, अत्रापि यदि द्रव्यपरमार्थवदित्यादिग्रन्थो यावद्वृत्त्यवृत्ती यज्ञदत्तशब्दोच्चारणेन यथा सम्भवं योज्यः, प्रकारान्तरेण तु यज्ञदत्तवस्तुस्वरूपवद्वृत्त्यवृत्ति क्रिययोः तदव्यतिरिक्तत्वात् देवदत्तयानस्थानयोरपि तदव्यतिरेकाद्यावद्देवदत्तगमनस्थानञ्च वृत्तिरेवावृत्तिरेव वा स्यात्, विरोधिनः क्रियान्तरस्याभावात् पूर्ववत्।

तदतद्भवनाविच्छेदात्मकप्रवृत्तिनित्यत्वस्याकूटस्थत्वाद्भवनमेवेदं गतिवृत्तिस्थित्यादि, सततसंप्रवृत्तिरूपभवनात्मकत्वादतो द्रव्यं क्रिया चोभयं नित्यं भावः।

तस्माद्भेदज्ञानव्यवहारौ तु शब्दभेदद्रव्यप्रवृत्तितत्त्वानुरूप्यात्, शक्तिमतो द्रव्यस्य शक्तयो युगपद्भाविन्यो रूपरसादयः क्रिया एव, गमनस्थानादिक्रियास्तु क्रमभाविन्यः, विवक्षापि च तासां शक्तीनां यथानुरूपं प्रतिविषयनियतप्रत्यायनवृत्तित्वात्, रूपादिद्रव्यशक्तिप्रवृत्तिभेदनियतेन्द्रियग्राह्यत्ववत्, नियतप्रवृत्तिविशिष्टवस्तुभागाभिनिवेशिभिरभिधानैः सर्वस्य वस्तुरूपस्याभिधातुमयोग्यत्वात्, यथा

देवदत्तो गच्छतीत्यादौ देवदत्तशब्दो गत्यादीन् नोपादत्ते न वा व्युदस्यति तथाऽऽख्यातमपि देवदत्तादीन् नोपादत्ते न वा व्युदस्यति क्रियांशविषयनियतशक्तित्वात्, तदेवं द्रव्यशक्त्यंशनियतशब्द-प्रवृत्त्यनुपात्ययं भेदप्रत्ययः।

तथैव गतिस्थितिवृत्त्यवृत्त्यादिभेदव्यवहाराः, सर्वभेदपर्यनु-भवार्थत्वान्नित्यप्रवृत्तेः, याऽसौसततसम्प्रवृत्तिः सा सर्वान् गमनादीन् भावभेदान् पर्यनुभावयामि द्रव्यमिति प्रवर्त्तते, यदि तान्नानुभवेत् ततो न ते स्युः, तेनापर्यनुभूयमानत्वात्, खपुष्पवत्, सर्वप्रभेदनिर्भेदं बीजं द्रव्यमिष्यते तद्धा द्रव्यं न स्यात् भेदापर्यनुभवनात् खपुष्पवत्।

देवदत्तवस्तुना शब्देनानुपादीयमानापि हि गतिरुपात्तैव, नियतभावात् तदात्मत्वादिति विशेषहेतोश्च, यद्यदात्मकं तेन तदुपात्तमग्निनेवौष्ण्यम् तथा देवदत्तेन गतिरिति, गच्छतिशब्देन च देवदत्त उपात्तः, देवदत्ताभिसम्बन्धात्, शब्देन चेदर्थ उपात्तोऽर्थेन देवदत्तार्थ उपात्त एव, तदात्मत्वात्, तथा शब्देऽप्येष विधिः, उक्तवदुभयवस्तुत्वात्।

परमार्थतस्तु अर्थनियतत्वात्तु वचसः देवदत्तशब्देन गत्यादि-नानुपात्तम्, तद्भवनार्थत्वात् देवदत्तशब्दस्येति गृहाण, देवदत्तशब्दो हि द्वितीयादिविनाभूतः केवले कर्त्तर्येव प्रयुज्यते, कर्त्ता च क्रियायाः साधनत्वात् क्रियामन्तरेण न भवति, तत्र स्वयमसौ कर्त्ता तेन तेन प्रकारेण वर्त्तमानः, तथा शब्दोऽपि तत्तदर्थवाची यथाहुरन्ततः 'अस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्तीति' स एष

उपात्तगत्यर्थो देवदत्तशब्दो देवदत्तकर्त्रर्थप्रत्यायनार्थो नानर्थकः अर्थप्रत्यायनार्थत्वाद्वचनप्रवृत्तेः।

देवदत्तशब्दो न देवदत्तस्य वाचकः किन्तर्हि देवदत्तशब्देन देवदत्तार्थो विज्ञायमान एवानूद्यते स गच्छतीति विधानाय, स्थानविपरीतगमनप्रतिपादनाय च देवदत्तं गतिकर्तृत्वे नाध्यारोहयामीति प्रयुज्यते यो गच्छति स देवदत्त इति ज्ञातार्थेनानूद्यमानेन विधानात्, तथा च देवदत्त इत्युक्ते विशिष्टक्रियात्मककर्तृनिर्देशाद्गतेर्गतत्वाद्गच्छतिशब्दोऽनर्थकः पुनरुक्तश्च, तौ च न विभक्तविध्यनुवादार्थवक्तारं श्रोतारं वा प्रति भवतः।

विभक्तविध्यनुवादार्थाविवेक्तारं प्रति अन्यतरस्यैव वानयोरविवेक्तारं वक्तारं श्रोतारं वा स्यात्।

प्रथमपदोपादानसन्निहितार्थव्यञ्जनं द्वितीयपदं सन्निधिमात्रेण तथाप्रतिपत्तुः श्रोतुरुपकारकं नान्यस्य, न स पुनः शब्दापराधो यदसौ तदर्थं न प्रतिपद्यते, यथा न हि स सूर्यस्यापराधो यदेनमुलूको न पश्यतीति, अत्र प्रयोगः-प्रथमपदोपात्तार्थमेव द्वितीयपदम्, उद्ग्राहितार्थविवरणार्थत्वात्, भाष्यग्रन्थवत्।

प्रथमपदोपात्तार्थश्चेद्द्वितीयपदं प्रथमपदोच्चारणकाल एव ततः प्रतिपत्तेः वक्तृवत्तथा प्रतिपत्तुः श्रोतुरुपकारकं स्यात् तेनैव व्यक्तत्वादित्यत्रोच्यते कस्यचिद्भवत्यपि केषाञ्चिन्नादित एव तदर्थस्य कारकं तथाव्यक्तव्यञ्जनत्वात् प्रदीपवत्।

तथा च विनापि तत्सन्निधिं पूर्वश्रुतशब्दवृत्तेरेव तथा नियतत्वात्तथैव प्रतिपत्तारो दृश्यन्ते यथा "प्रविश, पिण्डी"मिति

प्रविशशब्दश्रवणात् सुषिरं गृहादि कर्मपदमत्रेति पिण्डीमिति च कर्मपदश्रवणात्तद्योग्यभक्षिक्रियाकर्तृकर्मकमिति।

तथा गच्छतीति च तिपोपात्त एव कर्त्ता, 'लः कर्मणि च'[1] इति। कर्त्तरि विहितलकारोद्देशत्वात्तिपः, स च देवदत्त एव विशिष्टः, विशिष्टकर्तृविषयगमनविवक्षितत्वात् तच्छब्दव्यवस्थाप्यस्वरूपत्वात् वा गच्छतिः स्वांशोपात्तार्थविषयक एव, वक्तुर्विवक्षायामन्यथोक्त्यानर्थक्यात्, अर्थप्रकरणाद्यापादनश्च, श्रोत्राप्यश्रुतोऽपि गृह्यते स इति गच्छतीत्युक्ते, अन्ते च नाम्नः कर्तृत्वप्रतिपत्तिरिति।

अनया च शब्दार्थगतिभावनया लोके दृष्टया भवनमेवेदमेकरूपं देवदत्तभेदं गतिभेदं स्थितिभेदं वृत्त्यवृत्तिहसनकथनादिभेदं वा भवतीति सर्वत्र व्यक्तेर्भवति तेन तथा तथा भूयत इति।

ननु कारकाणां प्रवृत्तिविशेषः क्रियेत्येतज्ज्यायः क्रियालक्षणम्, न सततसम्प्रवृत्तिमात्रम्, सर्वत्र प्रवृत्तिसम्भवेऽपि केनचित् फलोद्देशेन कारकवत्याः क्रियायाः पचिपठिगम्यादेः परिग्रहार्थं विशेषग्रहणम्, प्रवृत्तिमात्रपरिग्रहे तु सर्वभावेषु हि प्रवृत्तिरस्तीति सहभाविभिरसहभाविभिर्विशेषैः प्रत्याश्रयं सहिता प्रचयाप्रचयफला सा तस्याः सर्ववस्तुनि वसन्त्या मुहूर्त्तमप्यनवस्थानात् किं फलं लौकिकं स्यात्? विशेषास्तूपजायमानाः पच्यादय ओदनादिफलान्तरहेतव स्वाश्रयाः कारकान्तराण्यपेक्षन्ते, यथा विक्लेदः तण्डुलाश्रयः काष्ठादीन्यपेक्षते, तत्र या प्रवृत्तिः भवनरूपा सा

१. पाणिनि. अ. ३ पा. ४ सू. ९६

कारकान्तरानपेक्षत्वेन विशेषाव्यापित्वान्न प्रवृत्तिसामान्यं क्रिया लोकव्यवहारानङ्गत्वात्, भावश्च क्रिया द्रव्यञ्चेति यदुच्यते तत्र क्रियायाः फलोद्देशकारकसम्बन्धाभावात् कुतः क्रियात्वम्? गच्छत्या -दिव्यापिरूपता वा? प्रवृत्तिविशेषत्वेनाभूतत्वात्, कारकवत्, वैधर्म्येण तद्भेदवत्।

तथा च द्रव्यं क्रिया च द्वौ भावाविति द्रव्यस्य द्वितीयो भावः क्रियेत्येतदपि च नोपपद्यते, तस्याः क्रियाया असत्त्वात् खपुष्पवत्, असत्त्वमद्रव्यत्वे सत्यगत्यादित्वात् खपुष्पवत् अगत्यादित्वञ्च तदव्यापित्वादिति।

अत्रोच्यते अभ्युपगता तावदस्मदभिमतवत् सर्वभावविषया प्रवृत्तिर्भावानामात्मेति नहीह कश्चित्स्वात्मनि मुहूर्त्तमप्यवतिष्ठते वर्द्धते यावदनेन वर्द्धितव्यमपायेन वा युज्यत इति ब्रुवता, स चाभ्युपगमोऽस्मन्मतसाम्यात् प्रवृत्तिसामान्यक्रियात्वं समर्थयति फलान्तरहेतुहेतुभावाविभक्तवृत्तिः सर्वभावेष्वित्युक्तेः, नहीह कश्चित् स्वात्मनीति वचनात्।

यदपि चोक्तं केनचित् फलोद्देशेन प्रवृत्तिविशेषः कारकाणा-मिति, एतेनापि वचनेन सामान्यप्रवृत्तेरेव क्रियात्वमुक्तम्, अनन्तरोक्तविशेषद्वयसन्निधानात् प्रवृत्तिविशेषात्मिकापि सैव, यदपि चोक्तं विशेषास्तूपजायमाना इत्यादि यावन्न प्रवृत्तिसामान्यं लोकव्यवहारानङ्गत्वादिति, अत्रोच्यते इहापि समानकल्पत्वात्, यथा च विशेषा उपजायमानाः पच्यादय ओदनादिफलनिर्वृत्तौ कारकान्त-राण्यपेक्षन्ते तथा मृद्भवनमपि घटफलनिर्वृत्तौ कारकान्तराण्यपेक्षत

एव कर्त्ता कुम्भकारोऽस्य करणेन दण्डादिना जलाद्याहरणाय मृदाहृत्य तच्छालायां घटं निर्वर्त्तयति, मालवनगरे सप्तवर्षशतानि यावत् स एव घट आर्द्रादिसामिशुष्कनवयुवाद्यन्यथाभवनेऽपि तथातथाभवति तत्राम एव घटो वर्षं न दृश्यते सङ्क्षोप्यते च गोदोहं वा तडागादौ, तथैवापरस्य क्षणमप्यनवस्थानमुदके प्रक्षिप्तस्येति, प्रवृत्ति विशेषत्वेनाभूतत्वाद्यसिद्धतापि चैवमुक्तैव।

अगत्यादित्वाच्च नासत्त्वं हेत्वसिद्धेरेवोक्तवद्गत्यादिस्वरूपत्वात् सततभवनस्य, नन्वगमनस्थानश्चाकाशं भवत्येव, तत्र किमगत्यादित्वादसत् स्यात् खपुष्पवत्? उताकाशवत् सत् स्यादिति सन्देहहेतुता।

नित्यस्थितत्वादाकाशस्य नेति चेदुच्यते, अस्याप्यस्थानत्वमेव, ष्ठागतिनिवर्त्तनवदस्थानमिति च स्थानादन्यद्गमनाद्युच्यते, न स्थानस्यात्यन्ताभाव एव, तस्मादाकाशमप्यस्थानगमनं सच्च, गत्य भावोऽप्रवृत्तिर्गतिनिवृत्तिरिति चेत् अथ निरुपाख्यमेवत्वत्परिकल्पितगत्यभावमात्रस्थानं प्राप्नोति, अभावत्वात् अभावत्वश्चास्या प्रवृत्तत्वात् खपुष्पवत्, आकाशादि च प्रवृत्तं स्थानवदस्थानञ्चेति वक्ष्यामः।

गतिविशेषणसामर्थ्यादिति चेत् तदेवेदमस्मदिष्टं गत्यभावस्य स्थानस्य सत्त्वं सिद्धम्, स्थित्यभावस्य गमनस्य सत्त्ववदिति गतिविशेषणसामर्थ्यापादितस्थित्याद्युत्तरभावसत्यत्वादेव सर्वात्मक गतिस्थित्यादिभवनतत्त्वमवलम्ब्य तदपरित्यागेन तत्स्वाभाव्यान्नि रुच्यते भवनं भाव इति।

योऽप्यभावाभिमतो विनाशो विरोधिभावप्रादुर्भावे भावान्तर निवृत्तिरितीष्टः सा च भावान्तरानभिव्यक्तिस्तस्य भावान्तरस्य भाव एव, विरोधिभावप्रादुर्भावत्वादेव, यथा जागरणेन स्वप्नो निवर्त्त्य-तेऽनभिव्यक्तिं नीयत इत्युच्यते तथा स्वप्नेन जागरणम्, अन्यतराप - नयनेनान्यतरभवनात् सर्पस्फटाटोपकुण्डलभवनवत्, न हि क्रिया-न्तरादन्यन्नीयते न वाऽन्यज्जायतेऽपूर्वमिह किञ्चित्, एवमिहापि च गतिभवनं स्थितिनिवृत्तिः स्थितिभवनमेव गतिनिवृत्तिरिति।

स्यादेतत् यथा तु भुक्तिक्रियाप्रवृत्तिस्तृप्तिफलावसाना, प्रयोजनाभावे कारकानभिसम्बन्धाद्भुजेः निवृत्तिर्न क्रियान्तर बाधनात् तथैव तदपि स्यात्, अत्रोच्यते अत्रापि तु मा मंस्था भुजिनिवृत्तिरभाव एव, किं तर्हि? फलं क्रियान्तरम्, बुभुक्षां हि बाधित्वा भुक्तिक्रियाप्रदुर्भावःभुक्तिं बाधित्वा तृप्तिक्रियाप्रादुर्भाव इत्येवं क्रियाचक्रकान्येतानि, तद्वन्नाभावो गतिनिवृत्तिः भाव एव स्थितिरिति।

यदि स्थितिर्नाम न भावस्तर्ह्यवस्तुकत्वे विवक्षाशब्दयो-रप्रवृत्तिरित्यभिधानाभावः, अर्थाभावात्, काकवासितादिवदनर्थकं वा तत्स्यात्, अथ द्रव्यमात्रं स्थितिर्गतावपि स्यात्, उभयत्र द्रव्यस्य सत्त्वाद्विशेषाभावाच्च, यतस्तु खलु विरोधाविरोधात् भाव एव गतिस्थिती द्रव्यवत्, अत एव द्रव्यभवनादनन्यैव सती भवनान्यत्व एव गतिविरोधिनी स्थितिरिति।

स्यान्मतं विरोधित्वादित्यनैकान्तिकमभावप्रसङ्गात्, गतेर-भावो गत्या विरुद्ध्यते प्रकाशाभावेनेव तमसा प्रकाशः त्वन्मतेनेव,

स्थित्या विरोधवत् खपुष्पादिना गत्यभावेनापि विरोधस्तत्र तद्विरोधित्वात्तदविनाभावात्, खपुष्पादेर्वा भावत्वमेव स्यात् गतिविरोधित्वात् स्थितिवत्, एवं सति कुत एतद्भावविषयमेव, अभावविषयमेवैतदिति कुतः? इति।

अत्र ब्रूमो यद्यभावोऽपि भावेनाभावेन वा भावो विरुध्यते तावुभौ भावावेव तर्हि, विरोधित्वात् यत्किञ्चिद्देशतः कालतो वा, गत्यभावमात्रविषयत्वे चानुपपद्यमानस्थितिर्गतिनिवृत्तिरिति स्यात् तथा च कल्प्यमानायामनुपपद्यमानस्थितौ गतिस्थित्याद्येकभवना विनाभूतद्रव्यविनाशविषयं स्थानमित्यभिधानं स्यात्, न चैवं द्रव्यस्य कूटस्थनित्यत्वाद्भवितुमर्हति, तस्मादेव च गतिनिवृत्तिः स्थितिर्नाभावः खपुष्पादिश्च, तस्माद्गत्यभावलक्षितभावविशेषस्थित्यविना भाव्येव द्रव्यमिति।

अभाव इति च भावादन्यो भावविशेषः, अब्राह्मणक्षत्रियादि-वत्, एवं खपुष्पाद्यसत्त्ववाचिशब्दानां भावार्थत्वम् वक्ष्यते चास्य उदाहरणम्।

यथा तिष्ठति पचतीत्यन्यथाभवनं प्रवृत्तिसामान्यं भवनं नाति-वर्त्तते तथा विनश्यति प्रध्वंसते निर्तिष्ठतीत्यादयोऽपि, येऽप्यत्यन्ता-भावाभिमताः खपुष्पादिशब्दवाच्यास्तेषामपि न तु तथाऽभवनं किन्तु भवनमेव, यथाऽगतिस्थितिः गतेरेव प्रकारान्तरता, सति नियतत्वात् प्रकाराणाम्।

खपुष्पस्य च समवायरूपेणानभिव्यक्तिः, अशोककुसुमादि प्रकारेणाभिव्यक्तिरिति प्रकारत्वानतिवृत्तेर्द्रव्यक्रिययोश्च सर्वात्म-

कत्वाद्भवनद्वयाभेदात् कतमत् खं? कतमच्च पुष्पाणां विकसन-मन्यदिति देवदत्तगमनभवनद्वयत्ववत्तदपि, एवञ्च गमनस्थानादिक्रम भाविनीनामपि क्रियाणां सततसम्प्रवृत्तितादात्म्यानतिक्रमादेक एव पूर्वापरीभूतो भावः प्रवृत्तिरित्युच्यते, प्रकर्षेण वर्त्तनात् स च प्रकर्षः सर्वप्रभेदानुभवनरूपः, स एव चान्तर्भावितस्वप्रभेदत्वात् प्रवृत्ति-विशेष इत्युच्यते, न त्वदिष्टकारकाणां प्रवृत्तिविशेषः सामान्य-प्रवृत्तेर्भिन्नः कश्चित् भुजिविशेषवत्।

यथा भुजिरेवाशनपानादिना द्रव्यक्षेत्रकालभावभेदेन प्रकार मात्रं भिद्यते, न हि तेषु कश्चिदभुजिरक्रिया वा, सर्वोऽप्यसौ भुजिरेव, तथा सामान्यप्रवृत्तिरेव प्रवृत्तिविशेषः, अस्त्यर्थस्य सर्वगतिस्थित्यादिभेदात्मकत्वात्, एवं गतिस्थित्योरस्तियात्योर्वा, सर्वैव चासौ प्रकारमात्रभिन्नसामान्यभवनलक्षणक्रियैव भुजिसामान्य मात्रप्रकारभिन्नभुजिविशेषवत्।

एवञ्च भुजिगतिस्थितिपच्यादीनामपि तथा तथा सर्वभाव-व्यापिता भाषतिजानातिश्वेतत्यादीनामपि पूर्वोत्तरव्यक्त्यव्यक्तिभव-नैकत्वादेव च, पूर्वमभाषमाणो गच्छन् तिष्ठन्नुदासीनो वा पश्चाद्भाषते, तथा पश्यति जानातीच्छति द्वेष्टि प्रयतते स्मरतीत्यादिषु तुल्यश्चर्चः।

यदप्यादिनैगमनयदर्शनमनवबुध्य पूर्वनयनिपातिस्थितिस्व-रूपनिरूपणं क्रियते, सा तु द्रव्यावस्थाविशेषो गतिवदिति, यथा गतिर्द्रव्यस्यावस्थाविशेषो बालकुमारादिवद्द्रव्यादनन्या तथा स्थिति-रिति गतिस्थितिवच्च सर्वक्रिया इति।

अत्रोच्यते, अविकल्पितैकत्वे यत्प्रसाधितक्रियार्थान्तरत्व त्यागः, अव्यक्तद्रव्यावस्थात्वात्, यत्तद्द्रव्यं ततो नान्याऽवस्था तदवयवत्वात्, देवदत्तबालकुमारादिवत्, ततश्च द्रव्यार्थान्तरभूत क्रियापदार्थाभ्युपगमविरोधः, एवमभिधानात्त्वव्युत्पत्तौ व्युत्पत्तौ वोभयथापि स्ववचनादिविरोधः, तत्र तावद्व्युत्पत्तौ अवस्थाया-स्ततोऽन्यत्वं, तत्स्वादिविषयशब्दवाच्यत्वात्, देवदत्ताश्ववत्, यथा देवदत्ताश्च इत्युक्ते देवदत्तस्य स्वमश्वः, सोऽस्य स्वामीति तेन विषयेणाश्वशब्देन तस्य वाच्यत्वात्ततोऽन्यत्वं दृष्टमेवं द्रव्यावस्थेति।

शिलापुत्रकशरीरवन्नेति चेन्न, अवस्थाशरीरशब्दप्रयोगा-नर्थक्यात् अत्रापि शरीरावस्थाक्रियात्वादन्यत्वम्, शिलापुत्रकेण शीर्यते शरारुत्वाच्छरीरमिति शरारुर्भवति तेन शरारुणा भूयत इति द्रव्यक्रियाभिधानं नातिवर्त्तते, तथा च द्रव्यस्यावस्था द्रव्यमवतिष्ठते द्रव्येणावस्थीयत इत्यवस्थानस्य क्रियात्वानतिवृत्तेः, व्युत्पत्तावपि सामासिकपदत्वात् समासस्य च षष्ठीसमासत्वात् षष्ठ्याश्च कर्त्तरि विहितत्वात्, सा यद्विषयं द्रव्यस्य कर्तृत्वं ततोऽर्थान्तरभूतां तां तदन्यगतिविचलनप्रतिबन्धात्मिकामवस्थां दर्शयति, आत्मनोऽ क्रियात्वात् क्रियामन्तरेण कर्तुः कर्तृत्वाभावात्, तस्माद्व्युत्पत्तावव्युत्पत्तौ च यदि द्रव्यं ततोऽवस्था यतोऽवस्था ततो द्रव्यमिति विरुध्यते।

त्वन्मनोरथानुवृत्तेस्तु द्रव्यमात्रदर्शनाभिमुखीभूयापि बलादेवा-त्याज्याभिमततत्त्वद्रव्यशब्दार्थवशात् पुनरपि द्रव्यादर्थान्तरभूताया गतिस्थित्यादिक्रियाया आपत्तिः, भवति भवनं वा द्रव्यमिति भव्यार्थ

-त्वात् तत्र प्रकृतिप्रत्ययार्थव्युत्पत्तेर्द्रव्यक्रिययोः सिद्धिः, यद्भूयते सा क्रिया यद्भवति तद्द्रव्यमिति साध्यसाधनभेदात्।

यत्पुनरेतदुक्तमविशिष्टदेशसंयोगो वा स्थितिरिति लक्षणं तत्र युक्तं वाशब्दवर्ज्यम्, विकल्पार्थासम्भवात् द्वाभ्यामविरोधात्।

यदपि च द्वितीयं विशेषग्रहणप्रयोजनमभिधीयते सर्वदा सर्व भावानां प्रवृत्तिसमन्वयात् देवदत्त इति नाप्रवृत्तिकम् सप्रवृत्तिकमेव, पचत्यादिवद्देवदत्तादयोऽपि शब्दाः क्रियावचनाः, तस्मात् क्रियावचनो धातुरिति धातुसंज्ञास्तेऽपि स्युः, विशेषग्रहणसामर्थ्यात् पुनः देवदत्तादयो विशेषा न भवन्तीति निवर्त्स्यन्ते, सर्वभेद सम्बन्धानुगुण्यात्तु प्रवृत्तिसामान्यमेवेदं भवनवत् सत्यपि भवद्भवन भावविशेषे शब्दस्याविशेषार्थत्वात् न क्रियेति।

इदमपि त्यक्तद्रव्यार्थोत्थानम्, प्रत्याख्यातविशेषग्रहण प्रयोजनतुल्यदोषानुबन्धञ्च।

यथा तत्र प्रवृत्तिसामान्यनिवृत्त्यर्थे विशेषग्रहणे प्रवर्त्तत ईहते चेष्टत इत्यादीनां धातुसंज्ञा न प्राप्नोति क्रियावचनानामेव धातुत्वात्तेषाञ्चाक्रियात्वात् तथेहापि देवदत्तादिधातुत्वनिवृत्त्यर्थे विशेग्रहणे वृतादीनां धातुसंज्ञा नैव प्राप्नोति, अक्रियावचन-त्वाद्देवदत्तवत् स वा क्रिया स्यात् सर्वभेदसम्बन्धानुगुणत्वा-द्वृतादिवत्, अनिष्टञ्चैतदिति। प्रवृत्तिसामान्यनिवृत्त्यर्थे देवदत्तादि-द्रव्यनिवृत्त्यर्थे च विशेषग्रहणे द्विधाऽप्यस्वशब्दोपादान साध्यभावादि लक्षणमुक्तिवचनञ्चानर्थकं स्यात्, द्वयोरपि क्रियात्वात्।

यथा च तत्रोच्यते नैष दोषः, विशेष इति हि भवतः क सम्प्रत्ययः? य उपादीयमानोऽन्यं निवर्त्तयतीति परो ब्रूयात् यद्येवं वृतादयोऽपि उपादीयमाना विशेषान्निवर्त्तयन्ति तैर्हि गच्छत्यादयो विशेषा निवर्त्त्यन्ते न गच्छति न शेते न भुङ्क्ते वर्त्तत एवास्ति भवति विद्यत एव केवलमिति, तिष्ठत्यादिवत्, यथाचोक्तं *भाष्यकारेण* 'सामान्यमपि यथा विशेषस्तद्वदिति',[१] ततश्चैषां सिद्धा धातुसंज्ञेति यथा तत्र प्रवृत्तिसामान्यनिवृत्त्यर्थे विशेषग्रहणे परिहार एवमिहापि प्रत्युच्यते, एवञ्चोच्यमाने नन्वस्मद्धृदय एव दृष्टं फलमभिव्यक्तम्, नन्वस्माभिरप्यभिहितं प्रवृत्तिरेव प्रवृत्तिविशेष इति, एवञ्च कृत्वा प्रवृत्तिमात्रस्य सर्वत्र भावात् विशेषग्रहणमनर्थकमुभयोरपि व्याख्याविकल्पयोः।

न चाफलमेव, अनिष्टकृदपि, एवं देवदत्तस्य क्रियात्वं स्यात्, अन्यनिवर्त्तनप्रवृत्तिविशेषत्वात्, पचादिवृतादिवदिति, येऽप्यमी वृतादयस्तेऽपि अक्रियास्तच्छब्दानामधातुसंज्ञा च स्यात्, सर्वभेद-सम्बन्धानुगुणविशेषत्वाद्देवदत्तवदेव।

यत्तु पुनः पचादिविशेषनिवर्त्तकत्वाद्वृतादयो धातुसंज्ञा भवन्तीत्युक्ते नैव निवर्त्तयन्ति पचादीन् वृतादयो विरोधाभावाच्च वृताद्यन्तर्भावात् पचादीनामतो न धातुसंज्ञा वृतादयः स्युरित्या-शङ्क्य तत्प्रतिसमाधानं पुनरुच्यते निवृत्तिरत्रास्माभिर्नार्थधर्म-प्रकल्पिता विवक्षिता, किं तर्हि? पचतीत्यादिशब्दधर्मप्रकल्पिता सा विज्ञानप्रवृत्तिनिवृत्तिमात्रकृता, यथा देवदत्ते सर्वधर्मसम्बन्धिन्यपि

१.महा.अ. १ पा.२सू.२४

पचति देवदत्त इत्युक्ते गच्छति तिष्ठत्यस्ति शेत इत्यादिक्रियाकलापं निवर्त्त्य देवदत्तं पचतिशब्दो पचनक्रिययैव सम्बन्धयति, तद्विषयैक-विज्ञानाधानहेतुत्वात्, अयञ्च धर्मो वृतादीनामप्यविशिष्ट इति।

अत्र ब्रूमः वस्तुनः प्रवृत्तेः सर्वप्रवृत्तिविशेषसहिताया एवाभ्यनु-ज्ञातत्वाद्भावितत्वाच्च किमस्माभिर्वाच्यं वृतादीनां पचादीनां वा धातुसंज्ञा प्राप्नोति न प्राप्नोतीति, वैधर्म्येण सर्वेषां धातूनामस्मदभि-हितप्रवृत्तिसामान्यक्रियावचनत्वानतिवृत्तेः।

योऽसौ मयाऽऽदावुद्दिष्टो विधिनियमात्मोभयनयः स एष निर्दिष्टः, नैगमदेशत्वाद्द्रव्यार्थोऽयम्, द्रव्यमपि भावसाधनम्, सैव द्वयर्थता, उक्तवत्, पदार्थो द्रव्यक्रिये, वाक्यमाख्यातशब्दः, तदर्थ उक्तोभयभाक्, नयविनिर्गमसूत्रं *'अत्थित्तं अत्थित्ते परिणमति'*[1] इति।

उभयनयः पञ्चमोऽरः समाप्तः।

१. भगवतीसूत्रम् श १. उ ३. सू ३३

षष्ठः विधिनियमविधिः

नन्वेवमुभयमप्यवस्तु, अनुपपन्नस्वावस्थत्वात् खपुष्पवत्, स्वा अवस्थाः स्थित्युत्पत्तिविनाशा द्रव्यस्य वा स्युः क्रियाया वा, ता यदि भावस्य ततो द्रव्यमनवस्थमिति द्रव्यप्रभेदासम्भवः खपुष्पस्येव, ततश्च सर्वप्रभेदनिर्भेदं बीजमिति द्रव्यलक्षणहानिः।

भाव एव तु स तथाभूत आपद्यते तद्भेदस्य तदात्मकत्वात् मृद्वत्।

प्रवृत्तिभाववचनात्तु मत्पक्षे प्रवृत्तावेव व्यतिरेकसम्भवः, तस्माद्भावादेव सर्वस्य प्रकृतत्वाद्द्रव्यं भाव इत्येतत्त्यागाद्द्रव्यविभाग-वचनं व्यर्थम्, ततश्च विभागेन लक्षणाभावात्तयोरभावः खपुष्पवत् तदभावात् क्रिया कुतः? तथाभवनक्रियासन्निधिलक्षणं द्रव्यं प्रवृत्ति-सामान्यञ्च कुतः? तथाभवनविनाभूतत्वात् खपुष्पवदेवेति सर्व-निर्मूलता चैवम्, अव्यक्तिरप्यसन्निहितत्वात् खपुष्पवत्।

अथोच्येत भावस्य स्थित्युत्पत्तिलयाः कल्पनामात्राः सन्निहिततथाभूतवस्तुतत्त्वव्यक्तिद्रव्यमेवोक्तवत्, ताश्च क्रिययाऽभि

-व्यक्तिं नीयन्त इत्यत्रोच्यते, एवं तर्हि सर्वप्रभेदनिर्भेदत्वमसत्यं द्रव्यस्य, क्रियायाश्चाक्रियात्वम्, सन्निहिततथाभूतवस्तुतत्त्वव्यक्तिकरत्वाभावात्; ततश्चाशेषपक्षध्वंसित्वमनुपपन्नस्वावस्थत्वात्।

अथैतच्चेदुभयं नेच्छति भयात् ततोऽविभागावस्थत्वात् द्रव्यमसदापन्नम्, मा भूद्द्रव्यस्याद्रव्यत्वं क्रियायाश्चाक्रियात्वमिति द्रव्यमविभागावस्थं तद्व्यञ्जिका क्रियेतीष्यते ततो यदेवोत्पद्यते तदेव विनश्यति युगपदयुगपद्भाविपृथिव्यादिभेदाविभागद्रव्यस्वावस्थत्वात्।

देशकालादिभेदाभावादस्त्विति चेद्ब्रूमः, यदि यदेवोत्पद्यते तदेव विनश्यति ततोऽङ्कुरोत्पत्तौ तस्यैव विनाशित्वप्रसङ्गः, बीजोच्छ्रूनमूलादिपूर्वभेदानां पत्रनालाद्युत्तरभेदानाञ्च विनाशावस्थात्वादङ्कुर एवैक इत्यङ्कुरोत्पत्त्याऽयमङ्कुर एव विनश्यति ततश्च दृष्टेष्टविरुद्धावनुत्पत्त्यविनाशदोषौ स्याताम्, अङ्कुरोत्पत्तौ तस्यैव विनाशित्वात्, न बीजं विनष्टं नाङ्कुर उत्पन्नः, विनष्टुरुत्पत्तुश्चाभेदात्।

अस्तु नामानुत्पन्नोऽविनष्टश्च को दोष इति चेदुच्यते नैक एव, किं तर्हि? सर्व एव वचनादिविरोधाः, अङ्कुरपत्रादिनिराकरणादपि च लोकादिविरोधाः।

अनित्यतादोषश्च स च क्षणिकवादं व्यतिलङ्घ्य वर्त्तते, अतोऽभ्युपगमात्, तत्र न हि यदेवोत्पद्यते तदेव विनश्यति, किं तर्हि? क्षणोऽस्यास्तीति क्षणिक इत्युत्पादादन्यो विनाशक्षणः, उत्पन्नश्च विनष्टश्चेत्यभ्युपगम्यते जातस्य विनाशात्, इह तु उत्पाद एव विनाशः क्रियार्थकालरहितद्रव्योत्पादादित्वात्।

शून्यवादता वा, अविनष्टानुत्पन्नास्थितत्वात् खपुष्पवत्।

ननु पृथिवीद्रव्यत्वाभेदात्तदंशबीजाङ्कुरभेदात् तत्कालौ चोत्पादविनाशौ स्त इति न भेदस्याभेदस्य वा व्याघातः, तस्मात्तदेवोत्पद्यते तदेव विनश्यतीत्यत्रोच्यते, एवं तर्हि इदानीं भेद एवापतितस्तवापि, अश्मसिकतामृल्लोष्टवज्रादिभेदे सति पृथिवी नाम न काचिदन्याऽस्ति, किन्तु पृथिवीत्वजातिमात्रमभिन्नं तद्भेदव्यापि, तच्च द्रव्यमेकमित्यस्य त्वत्पक्षस्य विघातकम्, बीजस्याङ्कुरस्य च नानात्वं बीजाद्विनश्यतोऽन्याङ्कुरस्योत्पद्यमानत्वात्, विनंष्टुरन्य इव देवदत्ताद्यज्ञदत्त उत्पद्यमानः, तस्मान्न तदेवोत्पद्यते तदेव विनश्यति, ततश्च यथा बीजं व्रीहित्वसामान्याभेदे सत्यङ्कुरात् पृथगेवेष्यते तथा पांश्वादित्वमपीति भेदनिर्भेदद्रव्यनिर्मूलनम्।

अपि च त्वयैव द्रव्यांशाभ्यां बीजाङ्कुराभ्यां भेद इत्यनेन वचनेनापादितं भेदानां बहुत्वं द्रव्यैकत्वविघाति, किञ्चैतदनिष्टपरिहारार्थमुत्थितेन ननु पृथिवीद्रव्यत्वाभेदादित्यादिवचनेन पार्थिवत्वं अपि नानैवोत्थापितम्, बीजादि भेदकभेदकादन्यत्, भेदकत्वात्, अभेदकमितश्च, अभेदकत्वात्, यथा द्रव्यक्रिये इति।

ननु घट उत्पद्यमान एव शिवकत्वेनोत्पद्यमानः पिण्डत्वेन विनश्यति पूर्वोत्तरकालयोरपि सद्द्रव्यपृथिवीमृत्त्वाभेदाद्घटाभेदाद्घट एवेति स एवोत्पद्यते स एव विनश्यति, तस्मात् पिण्डत्वेनोत्पद्यमानः शिवकत्वेन नश्यति, तथा पुनर्घटत्वेन विनश्यत् पटत्वेनोत्पद्यते, शिवकत्वेनेव विनश्यंश्छत्रकत्वेनेति।

अत्रोच्यते, अयमपरिहारः, उक्तोत्तरत्वात्, अर्थतो हि यदेव शिवकोत्पत्तौ शिवकेनैव विनाश इति तदेवाङ्कुरोत्पत्तावङ्कुरेणैव विनाश इत्युक्तं ततोऽयं दोषो बलादापद्यते शिवकेनैवोत्पत्तौ शिवकेनैव विनंष्टव्यमिति, ततोऽभिन्नत्वात्, यथा त्वदुक्तानन्तर घटोत्पादः, एवं त्वनुत्पत्तौ तस्यैवावस्थितस्य नैवोत्पत्तिः, अत्यन्तं भावादन्यत्वात् खपुष्पवत्, अनुत्पन्नस्य च विनाशाभावः खपुष्पवदेव विनाशस्याप्यभावाद्घटादिभवनाभावः, भवनसम्बन्धस्य तद्व्यतिक्रमस्य चाभावात् सर्वमभूतं नास्तीत्येवमाद्यापद्यते।

अथोच्येतैक्य एव भिन्नयोरप्यभेदः, यथा मृत्कुम्भावस्था, रूपादिशिवकादियुगपदयुगपद्भाविनियतभवनानि मृद्द्रव्यभवनस्यैव भवनभागा अभिव्यज्यन्ते तांश्च भवनभागान् क्रियापि व्यनक्ति नान्यथेति यद्यभिन्नस्यैवावस्थाः स्युः को दोष इति।

अत्रोच्यते नन्वस्माभिरपि नोपपद्येते इत्युक्तमनन्यत्वात् सर्वस्य सर्वात्मकत्वाच्च, त्वयाऽभ्युपगतानां स्थित्यादीनां द्रव्यस्वावस्थत्वात् तस्मादविरोधादनन्यत्वमासाम्, अनन्यत्वाच्च पूर्वोत्तराभावात् कः केनाभिभूतो येनैक्यमापद्येरन्, यत इयमनया क्रिययाऽभिव्यज्यते, नेयमिति च, अविद्यमानपार्थक्यात्, पृथक् सिद्धानां ह्यैक्यापत्तिः तन्तुपटवत्, ततः कस्यचिद्व्यक्तव्यक्ती नोपपद्येते इति कुत उत्पादादिभेदः?।

अपि च लोकप्रतीतव्यक्तिधर्मविपरीतत्वादुत्पादाद्यभाव इति ब्रूमः, लोके हि पूर्वव्यक्तिव्यतिरिक्तो व्यञ्जकः प्रसिद्धो न तु तद्द्रव्या -

व्यतिरिक्तः, यदेवोत्पद्यते तदेव विनश्यतीति द्रव्यस्वावस्थाविभागं ब्रुवता त्वया न ततोऽन्यः संयोग संयोगी वाऽभ्युपगम्यते, क्रिया स्वावस्थाद्रव्यभेदनिषेधात्, तदभ्युपगम्य व्यक्तिधर्मस्त्यक्तः, तत्त्यागाच्च व्यक्तिरनुत्तरैव, व्यक्तिकारणाभावात्।

अहेतुतो व्यक्तेरिव वाऽव्यक्तेरपि तद्वत्त्वे नित्यमेव व्यक्तिरव्यक्तिर्वा सर्वस्य स्यात्, परिणामान्नैवमिति चेन्न, उक्तदोष तुल्यत्वात्, एवं तावदुत्पादविनाशयोः संयोगेनायं विकल्पः सप्रसङ्गपरिहारप्रचर्चोऽभिहितः, तथा वक्ष्यमाणेषु समानः प्रचर्चो द्रष्टव्यः।

अथोत्पादविनाशसामानाधिकरण्ये दोषदर्शनाद्विकल्पान्तरमाश्रीयते तदेवोत्पद्यते तदेव नितिष्ठतीति, अत्रापि हि द्वयी गतिः — तेनाप्युत्पत्तिप्रकारेणावतिष्ठमानं यद्वा स्थित्युत्पत्तिविनाशप्रकारैः सर्वथावतिष्ठमानं तदेवोत्पद्यते तदेव नितिष्ठति चेति, यदि तथोत्पादेनैवावतिष्ठमानमुत्पद्यते नितिष्ठतीत्युच्यते तत उत्पादेनैवावस्थितत्वान्नोत्पद्यत इति उत्पत्तिर्द्विधाऽपि कुतः? उत्पद्यमाने चावस्थानम्? यद्युत्पद्यते कथमवतिष्ठते? यद्यवतिष्ठते कथमुत्पद्यते? इति स्ववचनादि विरोधाः पूर्ववत्।

व्यापिस्वतत्त्वानुमतांशुतन्तुवत्तु प्रदीर्घद्रव्यस्य पूर्वोत्तरतया-स्थित्युत्पत्तिविनाशावस्था व्यापिस्वतत्त्वानुमतबीजाङ्कुरत्वादय इत्यस्मिन् प्रकल्पे उत्पत्तिस्थितिसामानाधिकरण्ये न स्ववचनादि विरोधा इत्यत्रोच्यते, एतस्मिन्नपि प्रकल्पे बीजस्यांशूनां वाऽनुत्पादित्वादविनाशित्वाच्च नित्यत्वात् स्थितिरेवेति कुतोऽङ्कुरो बीजात्,

कुतोऽशुभ्यस्तन्तुः? इति त एव विरोधाः, पूर्वस्तम्बनित्यत्वाद्वा बीजानुत्पत्तेः।

स्तम्बोत्तरबीजोत्पत्तेस्तु हेतोरङ्कुरवत् स्थितिभिन्नोत्पत्तित्वात् सर्वस्य द्रव्यात्मनोऽनित्यताऽव्यापिता च, एवं पूर्वाद्यभाव एव च, अभेदत्वात्।

अथोच्येत तदेवोत्पद्यते तदेवावतिष्ठत इत्यनेन वचनेन त्वयमर्थ एवं कथितो भवति उत्पत्तिरेवावस्थानमिति, यदि नोत्पद्यते नावतिष्ठेतानुत्पत्तिरूपत्वात्, तस्मात् खपुष्पवैलक्षण्येनैवोच्यते यदेवोत्पद्यते तदेवावतिष्ठते नानुत्पत्तिकमवतिष्ठत इति; एवं सति यदेवोत्पद्यते तदेवावतिष्ठत इत्यस्येदं व्याख्यानं संवृत्तं यत एवोत्पद्यते तत एवावतिष्ठत इति, प्रागुक्तोत्पत्तृस्थात्रैक्यवत् उत्पत्तिस्थित्यैक्ये उत्पत्तिरेवावस्थानमित्यापन्नमुक्तस्थितित्यागात्, न स्थितिरन्या काचिदुत्पत्तेरतश्च क्षणिकत्वापत्तिः, उभयात्यागाभिमतौ चानेकान्ता -पत्तिरभ्युपगमविरोधिनी प्रक्रिया स्यादिति।

अथोच्येतोत्पादपूर्वत्वदोषानपरिहार्यान् प्रत्युच्चार्यानुमत्य चोभौ विकल्पौ त्यक्त्वा विनाशप्रधाने विकल्पान्तरे निर्दोषे इत्याश्रयेतेति तत्राद्यस्तावत्तदेव विनश्यति तदेवोत्पद्यत इति, अस्मिन्नपि विकल्पे दोष उच्यते-लोके तावत् प्रत्यक्षादिप्रसिद्धं अङ्कुरोत्पत्तौ बीजं विनश्यति, तव पुनर्यदेव विनश्यति बीजं तदेव उत्पद्यते नाङ्कुर इति पूर्ववत् स्ववचनादिविरोधाः, तत्पूर्वपत्राद्यपोहाच्च लोकादिविरोधाः, तदेव विनश्यति तदेवोत्पद्यत इति वचनेना-नन्यभूतस्यैकस्मिन्नेव काले विनाश उत्पादश्चेति क्षणिकवादा-तिशयादि स्यात्।

अथ विनाशोत्पादैकाधिकरण्ये दोषदर्शनाद्विकल्पान्तरमाश्रीयतेऽत्राप्युक्तवदेव दोषाः स्थानाभिधानेन तु योज्याः, तथा वा सर्वथा वा विनश्यदवतिष्ठमाने कुतो विनाशः, विनाशे वा कुतोऽवस्थानमिति त एवाधिकृतास्ते वचनादिविरोधाः क्षणिकवादातिशयनादि च पूर्ववत्। उत्पादविनाशपूर्वत्वदोषानपरिहार्यान् प्रत्युच्चार्यानुमत्य च चतुरोऽपि विकल्पान् त्यक्त्वेमौ निर्दोषौ विकल्पावित्याश्रयेत तत्राद्ये तावत्तदेवावतिष्ठते तदेवोत्पद्यत इति विकल्पे पूर्ववद्व्याख्या यावत् क्षणिकवादातिशयनादि, अथ तदेवावतिष्ठते तदेव विनश्यतीति स्थितिपूर्वद्वितीयविकल्पेऽपि व्याख्यानं तदेव योज्यम्।

अवतिष्ठते वाऽनन्वयगोचरो व्यतिरेक एव तन्मात्रोपलब्धेश्च सर्वत्रैव तदेवावतिष्ठते तदेव विनश्यतीति व्यपदेशो न सम्भवतीति पूर्ववत्त एव स्ववचनादिविरोधा इति।

अनेनापि प्रकारेण भवताऽशेषसाधनावयवाः ध्वंस्यन्ते तथाव्यवस्थानविनाशात्, तथाव्यवस्थानाविनाश एव हि सपक्षमपि तत्स्यात् न विनाशे, अग्निरत्र धूमादिति यथा, यथा हि धूमो धूमरूपेण व्यवस्थितो व्यवस्थित एवाग्नावग्नितया तद्वत्तया च प्रदेशे, त्वन्मतेन तु विविधाऽदर्शने विनाशे त्वयेष्टयाऽवस्थयाऽवश्यं विनंष्टव्यं इत्यवस्थानविपरीतवृत्तित्वादस्य पक्षधर्मत्वमसिद्धमतः प्रदेशस्याप्यन्यथावृत्तत्वादभूतत्वाद्धाऽऽश्रयासिद्धिः विपरीतवृत्तेर्विरुद्धतापि।

एवं त्रिकादिभङ्गेष्वपि यावद्योगं दोषाः उक्तवदत्र पक्षे, तस्माद्विपर्ययोऽस्त्विति अन्यदुत्पद्यतेऽन्यद्विनश्यतीत्यादि, यथा वस्तुबीजाङ्कुरकर्माद्यात्मधर्माणुस्थूलपृथिव्यादिवत्।

यत्तत् सतोऽन्यत् कार्यम्, तदतुल्यविकल्पत्वात् घटपटवत्, कथमतुल्यविकल्पतेतिचेदुच्यते, अत्र चत्वारो भङ्गाः — कारणं सत् कार्यञ्च, कारणं सत् कार्यमसत् कार्यं सत् कारणमसत्, कार्यमसत् कारणञ्चेति वा, तेषु द्वौ सम्भवेताम्, कार्यकारणयोर्द्वयोरपि सत्त्वं कार्यसत्त्वमेव च, इतरयोरभ्युपगतप्रतिपक्षत्वाद्वादाभावोऽवसित प्रयोजनत्वात्।

तद्यदि तावदुभयसत्त्वमत्र कारणाविर्भाववत् कार्याविर्भावः, उपलब्धिलक्षणप्राप्तत्वे सति तदात्मकसत्त्वाविशिष्टत्वात्, कारण स्वात्मवत्, अथ न कारणाविर्भाववत्, कार्याविर्भावः, सच्च कार्यमिति निश्चितं ततश्च तद्वैलक्षण्यान्न तर्हि सत् कारणम्, असत्, सद्विलक्षणत्वात् खपुष्पवत्, ननु घटसत्त्वं पटसत्त्वविलक्षणम्, न, इतरेतरासत्त्ववैलक्षण्यात्, अथैवमपि वैलक्षण्ये कारणसत्त्वविनिश्चयो न निवर्त्तते आविर्भावात्मकञ्च तत्, न तर्ह्यनाविर्भावात्मकत्वात् कार्यं सत्, खपुष्पवत्, इतरथा हि नित्यमेवाविर्भवेत्, सत्त्वात् कारणवत्, कारणं वा नित्यं नाविर्भवेत्, अनाविर्भावात्मक सत्त्वा-विशिष्टत्वात् कार्यवदिति।

अथ न कार्यानित्यप्रादुर्भाववत् कारणानित्यप्रादुर्भावः सच्च कारणमिति निश्चितं तद्वैलक्षण्यान्न तर्हि सत् कार्यम्, असत्, सद्विलक्षणत्वात् खपुष्पवत्, इतरः कारणवत्, खपुष्पमपि वा सत्, अनित्यप्रादुर्भावानुपलब्धेः कारणवत्, ननु घटसत्त्वं पटसत्त्व-विलक्षणम्, न, इतरेतरासत्त्ववैलक्षण्यात्, अथैवमपि वैलक्षण्ये कार्यसत्त्वविनिश्चयो न निवर्त्तते प्रादुर्भावात्मकञ्च तत्, न

तर्ह्यप्रादुर्भावात्मकत्वात् कारणं सत्, न त्वेवं भवत्यतः कारणं सदुपलभ्यत्वात् कृतवत्, कृतमपि वा कारणवदसत्, उपलभ्यत्वात्, सत्त्वे वा विशेषो वक्तव्यः, अविशेषे वैलक्षण्यानुपपत्तेः, विशेषोन्नयनेऽपि विशेषस्यासदाश्रयत्वात् ततोऽन्यत्वमेव-तत्रासत्त्वमेव, अघटपटवदिति।

अथैतत्साम्यमनिच्छतोऽवश्यं कार्यमेव सदित्यवधारणपक्षः स्यात्, कार्यशब्दसमीपे एवकारप्रयोगात् सत्त्वं कार्य एव नान्यत्रापीति ततश्च कारणमसदिति प्रसक्तम्, तथा च कारण विपरीतानिर्वृत्तघटादीनां सत्त्वतुल्यं कार्यसत्त्वमितिकार्यासत्त्व निवृत्त्येकान्तत्यागाच्चाभ्युपगमविरोधः नाममात्रेऽविसंवादः।

अथैवं सत्त्वं नावधार्यते कारणमप्यस्तीतीष्टत्वादिति चेत्, अवैलक्षण्यादिकृताः पूर्वदोषा एव, अथोच्येत सर्वथा सत्त्वात् मृत्पिण्डादीनामेककारणता यथैकस्यैवाहेः संवर्त्ते विवर्त्ते च तथा तथा तस्यैवावस्थानात्, यदेव कारणसत्त्वं तदेव कार्यसत्त्वमपि, यदेव कार्यसत्त्वं तदेव कारणसत्त्वमपीति नावधारणकृतो दोषोऽस्ति नापि पूर्वतुल्यत्वापत्तिदोषः, एकत्वात्, अनेकविषयत्वात्तुल्यत्व-स्येति।

अत्रोच्यते एवमप्येकत्वाद्विशेषाभावः, ततो यथैव कारणम् अनुपादानसिद्धं सामान्यमन्तर्भावताशेषविशेषसत्त्वात्मकं तथा कार्यमपीति कारणवदेवाक्रमं स्यात्।

अथ मा भूदेष दोष इत्यक्रममेव कार्यं कारणे कार्यस्य सन्निहितत्वात् यदि क्रमवदह्यादिकारणं स्यान्न स्यात् कारणं

क्रमवत्त्वात् खपुष्पवत्, युगपत्सन्निहितसर्वधर्मकं कारणमिष्टम्, नो चेत् संवर्तविवर्त्तावहाविवाऽऽकाशेऽपि स्यातामुभयोरक्रमतुल्यत्वात्, तस्मादक्रममेवं सर्वम्, कारणत्वादेव भेदेनाभवदप्यक्रमरूपेण भवदपि तत् सदेवेति।

तदप्यसत् अनुमानान्तरविरोधात्, खपुष्पमपि तर्हि सत्स्यात् अनुपलभ्यत्वात् कार्यवत्, कारणञ्च स्यात् अनुपलभ्यत्वात् कार्यवत्, कारणत्वे वा तथा भेदेनाभूतत्वात् सत् स्यात् कार्यवत्, अथैवं नेष्यते कारणमसत् कार्यञ्च सदिष्टं तथाऽनुपलभ्यत्वात् खपुष्पवदेव ततश्चानु-पादानसिद्धं कारणमसत् सदुपादनसिद्धं कार्यमसच्च सद्भवति, यदि तु कारणानुपादानादित्ववत् कार्यमनुपादानसिद्धं सत्त्वादिति नेष्टं सदिति निश्चयो न व्यावर्त्तते ततस्तद्वैलक्षण्यात् न तर्हि कारणं सदनुपादानादित्वात् खपुष्पवदित्यादि पूर्ववच्चक्रकद्वयप्रवर्त्तनम्।

नन्वेवमसत्कार्यञ्चेदुत्पद्यते ततोऽसत्त्वादायत्यामपि नाविर्भवेत् कार्यम्, खपुष्पमप्यायत्यां वा प्रादुर्भवेत्, असत्त्वादिति, तच्च नास्ति, तस्मात् सत्कारणे कार्यमित्येतच्च न, सविशेषणासत्त्वात्, अत्यन्तासत एवासत्त्वादनन्यचन्द्रादित्ववत्, नास्ति घटो गेहे मृत्पिण्डे कपालावस्थायां वेत्यादीन्यसत्त्वानि सविशेषणानि, तेषाञ्च सतामिवासतामायत्यामाविर्भावदर्शनात्, अत एव प्रकरणचिन्ता, किं घटादिकार्यमसदाविर्भवेदलातचक्रवत्? उतेतरचक्रवत् सदाविर्भवेत्? इति।

एवं तर्हि मयापि शक्यं वक्तुं यत्तदसत्ततोऽन्यत् कार्यं तद्विकल्पासमर्थत्वात्, घटपटवदित्यादि सत्कार्यसाधनप्रपञ्चोऽतीतः

सोऽत्र द्रष्टव्यः, उत्तरमत्र वक्तुमशक्यम्, यद्येवं मतिः तदोभयवादसिद्धिर्निवारयितुमशक्यत्वात्, उभयोरन्यतरस्य वा निषेधे प्रमाणाभावात्, ज्ञानाभिधानयोः प्रमाणयोः द्विरूपार्थविषयत्वादुभयरूपार्थस्थितिसत्यत्वम्, नन्वेवं तथार्थस्थितिसत्यत्वात् *सर्ववादनाथानेकान्तवादाश्रयणं* कृतम्।

अनेकान्तवादो हि वादनायकः सर्ववादविरोधाविरोधयो र्निग्रहानुग्रहसमर्थत्वादरिविजिगीष्वादीनामिवोदासीननृपः, स चेत्थं — स्यादन्यत् स्यादनन्यत् कारणात् कार्यम्, तदतत्समर्थविकल्पत्वात्, एकपुरुषपितृपुत्रादिवदिति सदसद्वाद्युभयोपनीतहेतुसामर्थ्यादेवानेकान्तसिद्धेः, न च तेन सह कस्यचिद्विरोधः, तस्मात् परित्यक्त-पक्षरागैरनभिनिविष्टैरात्महितगवेषिभिः कुशलैरयमाराध्यः शरणश्च नयसमूहात्मकत्वात्, यद्यसौ सर्वैराराध्यः शरणश्च वादानां किमर्थं वादिभिः सह विवदते, दृष्टश्च विवादः, तस्माद्विरोधादित्वाच्छेषवादिवदनाराध्योऽशरणश्चेत्यत्रोच्यते, मम तेन सहाविरोध एव तथापि त्वत्प्रतिपत्त्यैकान्तवस्त्वनुपपत्तेर्ब्रूमः।

यत्तद्भूयते येन भूयते द्रव्येण तस्य भवनसामान्यस्योत्सर्जनविधिः प्रवृत्त्यात्मकस्तस्यैवापवाद विधानमित्येषउभयविधिस्त्वयेष्ट एवं न भवति किन्तु सत्ताद्रव्यत्वादिगगनादिद्रव्याणामेषां सर्वव्यापिता अण्वादिसहितानां विभुत्वपरिमण्डलत्वादिगुणसहितानां नित्यत्वञ्चेत्युत्सर्गः।

आरब्धद्रव्यगुणानां कर्मणश्चानित्यत्वादन्यत्वम्, पुनश्च द्रव्यगुणकर्मणां परस्परतः स्वजातिप्रभेदेभ्यश्च सत्तासमवायसमान्य

विशेषान्त्यविशेषेभ्यश्च नित्येभ्योऽनित्यानां कार्यकारणतया चेत्यपवादः, तयोर्विधिरेष विधिनियमविधिः।

यदप्युक्तं त्वया तथाभूतसन्निहितवस्तुशक्तिव्यक्तिः क्रिया सर्वप्रभेदनिर्भेदं बीजं द्रव्यमिति च तन्न भवति, क्रिया हि प्रागभूत-निर्वृत्त्यर्था, जगत्प्रलयकाले च का त्वदिष्टव्यापारलक्षणा क्रिया मदिष्टा -दृष्टचोदिताणुगतकर्मण्यसति? न हि सा निर्वृत्तमेव निर्वर्तयितुं निरर्थकं वा प्रवर्त्तते, सा चानेकद्रव्यतायां सत्यां भवति, अनेकद्रव्य-त्वञ्चादृष्टचोदिताणुकर्मान्तरेण न भवितुमर्हति, भेदबीजमात्रद्रव्य-शक्तिव्यक्तौ वा न कश्चिदुपकारोऽस्त्यस्य जगतः, न चेदेवमिष्यते तदा नित्यैकस्तिमितगगनवदारम्भाभावात् क्रिया निर्विषयैव स्यात्।

आरब्धद्रव्यभूतावपि च द्रव्यादेः कारणकार्यलक्षणा-रम्भानारम्भभेदादन्यत्वादेव तदभूतेः, सामान्यादीनाञ्च, स्वाश्रयस्य स्वानुरूपप्रत्ययाधानहेतुत्वात्, ततस्त्वदुक्त द्रव्यस्वरूपलक्षण-भवनानुपपत्तिरित्युभयस्यापि भवनस्याभावः, किन्तु द्रव्यादिषड्-भेदस्य सप्रभेदस्यैव भावः।

यदपि च तस्य सन्मात्रं तदपि नात्मनैव, यदुच्यते यदयं भवति स्वयमेव यदनेन भूयत इति, नैष पुनर्भावो भवति, कस्तर्हि? अन्येनान्येन भूयते, सोऽन्य एवास्य भावः, सत्ता, येन च भूयते सोऽपि चास्य भावः न केवलं सत्तैव, यत्सम्बन्धाद्भवतीति भवति, सापि सत्ता भावः, भावेऽप्युभयता, उत्सर्गात् अपवादात्, सा उत्सृज्यते नियम्यते च द्विविधो हि भाव इति, स्वभावसम्बन्धिन्या सत्तया द्रव्यगुणकर्मसु सदिति भवति।

न तु भवत्येव भावः सद्द्रव्यगुणकर्मवत् सद्द्रव्यादिः, सद्भाव-सामान्येऽपि भावानां प्रतिस्वं स्वभावभेदात् सत्तास्वतत्त्वासमवायात् स्वरूपसत्तायाः सतामपि सामान्यविशेषसमवायानां समत्वात् स्वसद्भावादेव सतामितरेभ्यो विशेषः।

दण्डवत्त्वर्थान्तरभूतसत्तादिसमवायादेव स्वानुरूपा विशेष्ये बुद्धिरनुप्रवर्त्तते न त्वगृहीते विशेषणे, विशेषप्रत्ययस्य गगनादिष्व-तत्सम्बन्धिष्वभाववत्।

एवमेव ह्युभयस्येवोभयप्राधान्यस्यापि विधिः, अत्यन्तविशेष-रूपत्वात् पदार्थषड्भेदानाम् न तु पूर्वनयेष्टः, अस्वातन्त्र्ये कर्त्तृत्वा-भावात्, अस्माभिस्त्वदनुकम्पयाऽभ्युपगतेऽपि कर्त्तृत्वे द्रव्यस्यैव च प्राधान्यमिति विधानात् क्रियायाः प्राधान्याविधानाद्भावो न भवितुमर्हति।

तथाभूतार्थविषयत्वात् सन्निधानस्य तथातथाभवद्भावा-भिमुखसन्निहितघटादिभवनगेहवत् क्रियया न किञ्चित् प्रयोजनम्, सम्भाव्यमानमपि प्रयोजनमभिव्यक्तिमात्रं स्यात्, तस्या अपि तद्भवनतन्त्रत्वाद्द्रव्यभवनस्यैव प्राधान्यस्योपकारमात्रार्थत्वाद्व्यक्तेर-प्राधान्यम्।

अयन्तूभयप्रधानविधिः, आरब्धानारब्धद्रव्याणां पार्थिव-परमाणुद्व्यणुकादीनां भावसम्बन्धाभिव्यङ्ग्याभेदेऽपि सति स्वभावादिभेदान्नानात्वम्, भावसत्त्वस्यात्यन्तव्यञ्जनस्वातन्त्र्यात्, अन्यथा भूतेः, यद्येवं न स्यान्नैव स्यात् सत्तासम्बन्धरहितत्वात्

खपुष्पवत्, पृथिव्युदकज्वलनपवनगगनकालदिगात्ममनसां द्रव्याणामपीतरेतराभावात्मनाऽसतामेव सत्तातो द्रव्यत्वादन्योऽन्यतश्च तेन तेन प्रकारेणान्यत्व, अन्यत्व एवेतरेतरासतां भावादिसम्बन्धः, गुणकर्मणोरप्येवमेव, न चास्य भावस्यान्यस्माद्भावता, स्वपरप्रकाशहेतुत्वात् प्रदीपवत्, तस्मात् स्वभावसद्भावेन सत एवासत्त्वं सम्बन्धसद्भावाभावात्, नेतरेतरासत्त्वात्, यथा गुणोऽगुण इति, एवं सामान्यं सामान्यमेव, योऽप्यसौ स्वभावसद्भावः कार्यद्रव्यादीनां यतो भावसम्बन्धादादेयस्तस्मादेवासन्निति न, किन्तर्हि? तन्न भवतीति भवत्येव अभूत्वा भावात् भूत्वा च भावात् सदसद्भावद्वैरूप्यम्, किञ्चित्तु परमाण्वाकाशकालदिगात्मनोद्रव्यादि भवदेव भवति स्वसद्भावादेव, सामान्यविशेषेऽप्युभयता कर्मणि च, स्वभावसम्बन्धसद्भावाभ्यां भेदाभेदौ, एवं साधर्म्यवैधर्म्याभ्यां षट्पदार्थेषु वैशेषिकमिति।

नैगमैकदेशत्वात् द्रव्यास्तिकोऽयम्, द्रव्यमपि द्रव्यत्वसामान्यविशेषसम्बन्धात्, जातिः शब्दार्थः, अन्त्यश्च पदं वाक्यार्थः, स च पूर्वपदज्ञानाहितसंस्कारापेक्षेऽन्त्यपदप्रत्ययः।

तन्निर्गमसूत्रं, *'इमाणं भंते'* इत्यादि यावत् *'संठाणपज्जवेहिं'*[1] इति भेदवचनात्, वर्णादिपर्यवादिषु सङ्गृहीतसमासद्वयत्वात् वर्णः पर्यवः समन्ताद्भवितैकवाक्यभावात् वर्णस्यैव परितो भावाद्गमनाच्च, वर्णेभ्य एव गुणान्तरं चित्रवर्णः पाकजो वा तदारम्भनियमादेव पृथिव्यादिषु भवति समन्ताद्गच्छति वा घटादीनि वा

१. जीवा. ३-१-७८

द्रव्याण्यारब्धानि तैरप्यन्यारब्धद्रव्याणि प्रागभावप्रध्वंसात्मकानि वर्णाद्यात्मकान्येव च गृह्यन्ते, तस्मात्तैर्घटाद्यात्मभूतैर्वर्णादिपर्यवै-रशाश्वती रत्नप्रभा, वर्ण एव च पर्यवो यथासम्भवं श्यामादय आरब्धानारब्धद्रव्यगताः कारणगुणपूर्वकाश्चतुर्विधे पार्थिवेष्वेव पाकजाः तैः, एवं गन्धादिभिरपि।

इति विधिनियमविध्यरः
षष्ठो नयो नैगमभेदो द्रव्यास्तिकान्तःपाती परिसमाप्तः।

द्रव्यार्थनयविकल्पाः समाप्ताः।

अयं चैष च सविभागविन्यस्तश्चक्रार इवार इति सम्पिण्डयैकस्य त्रिशतभेदस्य संक्षेपेण षड्भेदाः, एषु च पर्यवशब्दो भाववचनः समन्ताद्भवनात् पर्यायशब्दः समन्ताद्गतिवचनः द्रव्यस्य वर्णाद्यात्मना परितो गमनादिति।

सप्तमो विधिनियमोभयम्

यद्यसत् कार्यं तर्हि न तदुत्पद्येत, असन्निहितभवितृकत्वात् खपुष्पवत्, खपुष्पमपि वोत्पद्येत, असन्निहितभवितृकत्वात् कार्यवत्।

खपुष्पं सत्त्वस्याश्रयो नास्तीति चेत्, इतरत्रापि तुल्यत्वात् कार्यस्य मृदोऽसत्त्वात् त्वन्मते पिण्डादेः कार्यसमत्वात्, असतः सत्तासमवायित्वात्।

अथाश्रयिसमवायाद्दतेऽपि सत् कार्यं स्वेनैवास्तित्वेनाश्रयो भवति, एवं तर्हि किं तदतिरिक्तसत्तासम्बन्धकल्पनया? तदनभ्युपगमे कार्यखपुष्पयोराश्रयकृतविशेषाभावो वा।

यद्यसत् कस्मात् खपुष्पमेव नोत्पद्यते घटादि कस्मादुत्पद्यत इति। अथोच्येत कारणवदकारणविशेषादिति, यदकारणं नोत्पद्यते तत्पुरुषे वाच्ये, अथ बहुव्रीहिसमाश्रयणं तन्नोत्पद्यते तस्याविद्यमान-कारणत्वात् खपुष्पवद्घटवद्वा।

एवं तर्हि सर्वासत्त्वप्रसङ्गः परमाण्वादयोऽकारणत्वा-न्नोत्पद्यन्ते, अनुत्पन्नत्वान्नाश्रयः सत्तायाः, ततश्च समवायाभावात्

खपुष्पवत् कारणानामभावात् कार्यं क्व समवैतु? ततः कार्य-समवायिनां खपुष्पान्न कश्चिद्विशेष इति सर्वशून्यतेति सर्वविरोधाः।

अथोच्येत नित्योत्पन्नत्वात् कार्यद्रव्यगुणकर्मणामेव सत्ता-समवायात्मत्वमिति, एवं तर्हि कार्यद्रव्यगुणकर्माण्यपि सत्ता-स्वरूपत्वादनुपनिपातिस्वरूपत्वाच्चात्माभेदात् केनचित्सम्बन्धेऽसति स्वात्मस्वरूपं स्वात्मन्यादधति, तत्पदार्थत्ववदिति हेतुफल-संबन्धित्वाभावः स्यादिति सत्तादिसम्बन्धात् सन्ति द्रव्यादीनीत्य-युक्तम्।

ततोऽनुपपन्नविकल्पत्वात् सत्तासमवायात् सत्, द्रव्यत्व-समवायाद्द्रव्याणि, गुणत्वसमवायाद्गुणाः, कर्मत्वसमवायात् कर्माणि, रूपत्वाद्रूपमित्यादिना द्रव्यादीनां लक्षणविरोधाविरोधाऽऽ रम्भानारम्भकार्यकारणादिभिश्च सत्तादिभ्यश्च षडविशेषमुखेन विशेषाभिधानं सर्वमयुक्तं कर्त्तुम्,सर्ववाक्यानृतत्ववत्।

इह प्राक् सत्तासम्बन्धात् सतां वा सत्तासम्बन्धः, असतां वा, सदसतां वा? न तावदसताम्, खपुष्पाविशेषप्रसङ्गात्, नापि सतां भूतत्वात्, सत्तावत्, प्रकाशितप्रकाशनवैयर्थ्यवत्, सताञ्च पुनः सत्तासम्बन्धात् सत्त्वादनवस्थाप्रसङ्गात्, प्राक् सत्तासम्बन्धात् तच्च किमात्मकमिति स्वरूपावधारणं कार्यम्, अन्यथाऽसत्त्वात्, नापि सदसताम्, ऐकात्म्यानुपपत्तेः सदसतोर्वैधर्म्यात् घटखपुष्पवत्, उभयदोषप्रसङ्गाच्च — यदसत्तत् खरविषाणाविशिष्टम्, यत्सद्भवति तत्र सत्तासम्बन्धवैयर्थ्यम्, सदसतोर्वैधर्म्यात् कार्ये सदसत्ता नेति च त्वन्मतसिद्धानुपपत्तिरेवायं विकल्प इति।

नन्वगुणगुणवत् स्वभावसद्भावेन सन्नेव भावोऽसन्नित्युच्यते ऽतो नैवासतां सत्करी सत्ता, त्वयैव तर्हि कृतमेवं ब्रुवता एतदस्मदनुष्ठेयम्; अत्र वयं निश्चिन्ताः संवृत्ताः, अपि चैवमपि नैवैतत्, किन्त्वसतामेव सत्तासम्बन्धः स्याद्वा न वेति विचार्यम्।

अपि च ननु सः प्राग् विषयसद्विकल्पोपपादनायागुणगुणत्व-दृष्टान्तो योऽपि चावयवार्थविकल्पेष्वन्त्यो व्युत्पत्तिविकल्पः सुष्ठु व्युत्पाद्य व्यावर्त्तितः सोऽप्येवमनुपपन्नः।

यत्तावदुक्तं नासतां सत्करी सत्ता, शशविषाणादीनां सत्करित्वप्रसङ्गात्, नासावन्येनानभिसम्बन्धात्..... असाधनत्वम्, प्रतिज्ञाविशेषो वा ..... प्रतिविशिष्टत्वम्, अथ द्रव्यादीनां तदानीमसत्त्वमिति चेत्, तेषामसत्त्वमसिद्धं द्रव्याद्य-भ्युपगमे सत्त्वात्, प्रागुत्पत्तेरिति चेत् सिद्धसाधनमेतत्। तदा तेषां सत्तासम्बन्धानभ्युपगमात्, नासता सम्बध्यते सत्ता, विशेषणत्वात्, दण्डवत्, यथा विशेणस्य दण्डादेः सता देवदत्तेन एवं सत्ताया अपि। अथ सम्बध्यते शशविषाणादौ सत्तासम्बन्ध स्तदवस्थः, अथ तव मतमसदपि द्रव्यादि सम्बध्यते सत्ताया एवंस्वरूपत्वात्, तत्प्रतिपाद्य-सत्ताया एव हि हेतुभूतायाः सामर्थ्यात् तस्या आधारो भवति सद्द्रव्या-दीति तद्वच्छशविषाणादिरपि तत्सामर्थ्यात्तस्या आधारः स्यात्। मैवम्। शशविषाणादिवदत्यन्तनिरात्मकत्वानभ्युपगमात् कार्यद्रव्य-गुणकर्मणाम्, नन्वसदित्युत्तरपदाभिधेयनिवारकत्वात् कथमस्य सात्मकत्वम्? न, अनेकान्तात्, नास्य सदित्यसत्, न स्वयमसत्, यथाऽपुत्रब्राह्मणवत् नास्य पुत्रोऽस्तीत्यपुत्रो न तु पुत्रो न भवतीति

प्रतिषिध्यते। अगुणगुणवद्वा नास्य गुणोऽस्तीति गुण एवं सन्नगुण उच्यते तथेहापि। न च तदपि निरात्मकं सत्तासम्बन्धात् वैधर्म्येण शशविषाणवत्.....त्वन्मते दृष्टान्ताभाव इति चेत् सामान्यवद्वा.... सामान्यवदेव सात्मकं न घटादिवत् सात्मकम्, सामान्यादीनां सात्मकत्वमसिद्धमिति चेन्न स्वरूपभिन्नत्वे सत्यभिन्नवाग्बुद्धि-व्यवहारविषयत्वात्, विशेषणं सामान्यं सात्मकञ्चेति, अत्राप्युत्तरे बह्वेव सम्प्रधार्यम्।

अन्यदप्यत्र वक्ष्यामः, अत्यन्तनिरात्मकत्वानभ्युपगमादिति वचनेन सदसत्त्वयोरपि विकल्पवत्त्वं वर्ण्यते किञ्चित्सत् समस्तं सदिति, एवमसदपीति, सम्पूर्णनिरतिशयस्वात्मन एव तु सत्त्वात् कुतो विकल्पः सत्त्वे? अस्तु वा विकल्पवत् तत्पुनर्निरूप्यं त्वया।

एतर्हि निरूप्यते एकसत्तासदसदपि, असमर्थगोवत्, एवं तर्हि सामान्यसत्तासत्ताऽव्यक्तिः किञ्चित्सती न सम्पूर्णा सती, एकसद्भावत्वात् यदेकया सत्तया सत् तत् सच्चासच्च दृष्टम्, स्वसत्तावत्, स्वभावसद्भावत्वाद्वा, असमवेतसत्ताकानि द्रव्यादीनि यथा स्वभावसद्भावत्वात् सत् सम्बन्धसत्तयाऽसत् तथा सत्तापि स्यात् सा असर्वगता च व्यक्तिरेव वा, एकजातीयापेतस्वरूपत्वात् घटवत् वक्ष्यमाणदुर्निरूपविकल्पत्वाच्च।

उभयासम्पूर्णतायां वा तन्निरूप्यमेव किं सदसम्पूर्णता, उतासत्, आहोस्वित् सदसदिति। तत्र यदि तावत्, सत् तत्सन्न भवति, असत्त्वात् खपुष्पवत्, नासत् सत्त्वाद्घटवत्, न सदसत् त्वन्मतेनैव सदसतोर्वैधर्म्यात् सदसत्ताऽभावाच्च। अहं पुनरेवं

तर्कयामि सदसद्वैधर्म्यनिराकरणायैव तु प्राय इयं प्रतिपत्तिर्भवत उभयासम्पूर्णतायां तदेव सच्चासच्चेति साधर्म्यमेव।

योऽपि चासच्छब्दस्यागुणगुणवत् नास्य सदित्यसदिति बहुव्रीहिसमाश्रयात् सदर्थवत्त्वमेवेति विकल्पः, असदिति सत्ता-सम्बन्धरहितमित्यर्थः, सोऽप्यनुपपन्नः, कृत्तद्धितान्तरूपार्थ-विप्रकृष्टान्तरत्वात् कथं सत्ता सत् स्यात् यदभावान्नास्य सदित्ययं भाव्येत।

अथ नास्य सदिति सत्तापि स्वभावसत्तया सती सा यस्य नास्ति तदप्यसद्द्रव्याद्युच्यते गुरुत्वाभावात् गुणागुरुत्वदिति, एतदेव ननु प्रस्तुतं सदादिषडविशेषाभिधानद्वारेण द्रव्यादीनामेव त्रयाणां विकल्पः परस्परतश्च लक्षणादिना व्याचिख्यासितो भवताम्, तत्र सदादिषडविशेषो द्रव्यादीनामेव न सामान्यादीनामित्युक्त्वा सामान्यादीनां सत्त्वमुच्यमानं स्ववचनविरोधाय, सदा मौनव्रतिनः कोऽस्मीति वचनवत्।

यत्तु सत् मुख्यं समवायिकारणं द्रव्यादेः कार्यस्य, तदस्यास्त्येवेति तत्किमिति मत्त्वोक्तं? ननूक्तं सामान्यं समवायि सत् तदस्य नास्ति तदपेक्षयोक्तमसदिति, तद्धि सदेव न भवत्यावयोरपि मतेन, किं तर्हि युक्तं वक्तुम्? नास्यासत् तदिदमनसदिति, न हि खपुष्पं यस्य नास्ति सोऽसन्नित्युच्यते संस्तु सद्धान्नियमाद्भवति प्रतिषेधद्वयार्थत्वात्।

ननु द्विविधभावत्वात् सत्तासद्वचनेऽपि न दोष इति, ननु तदेवेदं भवनं विचार्यते किमेकविधमेव निरतिशयमस्मन्मतवत्? उत

त्वन्मतवत् किञ्चित् सत्, समस्तं सदिति? तस्य द्वैविध्यस्यास्मान् प्रत्यसिद्धेः, सत्तासम्बन्धरहितत्वमपि सत्तोपपत्तिरहितत्वमेव उक्तवत्।

अत्र केनचित् पृच्छचेत कस्मात् खपुष्पं दलकेसरमकरन्दादिषु कारणेषु न समवैति? इति, वयमत्रोपपत्तिं ब्रूमः, अद्रव्यत्वात् अभूतत्वात् असन्निहितत्वात् वन्ध्यापुत्र इव, पुनः पृच्छेत् कश्चित् कस्माच्चम्पकपुष्पं दलादिषु तु समवैति? इति, सद्द्रव्यत्वादेरिति।

तथा च द्रव्यादीनि प्राक् सन्ति, तस्यामवस्थायां सत्तयाऽभिसम्बध्यमानत्वात्, यथोत्पत्त्युत्तरकालं सत्तयाऽभिसम्बध्यमानान्युत्पत्त्यवस्थायां तान्येव, अभूतक्रियागुणव्यपदेशमुत्पत्त्यवस्थमपि कार्यं ततः प्रागपि सत्, सत्तायाः सम्बन्धित्वात् भवनात् आकाशवत्, इदानीमपि वा न सत्तया सम्बध्येत कार्यम्, प्रागसत्त्वात् खपुष्पवत्।

अन्यथाभूतत्वान्नेति चेन्न, अन्यथाभवनेऽपि तदनन्यथाभवनात् प्रत्यक्षतः, मृत्तन्त्वादितद्भावानतिक्रमात् सजातीयासजातीयेतरस्वभावभूतत्वात्, सुचिरादपि तत्तत्त्वाच्च दृढीभूतघटवत्।

यदपि च दृष्टान्तत्वेनोक्तं नास्य पुत्रोऽस्तीत्यपुत्रो न तु पुत्रो न भवतीति प्रतिषिध्यत इति, इदमपि नातिगमितार्थं, अत्रापि हि पुत्रान्तरसम्बन्धो न प्रतिषिध्यतेऽस्य स्वामिपुत्रादेर्दृष्टत्वात्, नञ् उत्तरपदाभिधेयनिवारणार्थः, तत्पुरुषसमाससम्भवसामर्थ्यात् बहुव्रीहावपि पुत्रात्मकत्वमेव प्रतिषिध्यते नञा, अतद्द्रव्यत्वात्, स्वयं

पुत्रीभावपरिणामशून्यत्वात् खपुष्पवत्, यथोक्तं *'अगणिझूसिता अगणिसेविया अगणिपरिणामिता अगणिजीवसरीरेति वत्तव्वं सियत्ति'*[1] तथाऽन्योऽप्यन्वाह *'अङ्गादङ्गात् सम्भवसि हृदयादभिजायसे'*[2] इति।

गुणोऽगुण इति गुणभाव एव प्रतिषिध्यते, न गुणसम्बन्धः, स चेष्टः युगपदयुगपद्भाविता, भवनलक्षणद्रव्यत्वात्, सङ्ग्रहवादवद्वा तस्माद्बहुव्रीहावपि नासत्, सदेव तस्मात् सम्पूर्णनिरतिशयं सदसद्वा।

स्ववचनविरोधादेः सदप्यसत्, सत्तासम्बन्धरहितत्वात्, सत्ता सम्बन्धश्च सदिति लिङ्गात् सदभिधानप्रत्ययदर्शनादनुमीयते। अतः सत्तासम्बन्धात् सद्भवतीत्युक्तं भवति सत्तासम्बन्धेन च भाव्यमानं सद्भवतीति। ततो यच्च भाव्यमानं सद्भवति तदारम्भकेभ्यो भवति, द्रव्याद्यारब्धद्रव्यान्तरवत्, भाव्यमानभवितृत्वात्, तस्मात्तस्यां अवस्थायामसत् तत् सदिति च ब्रुवतः स्वचनविरोधोऽनुमानविरोधश्च

सत्तापि च कारणं भावकत्वात् आरम्भकवत्, सति सत्तान्तराधानमिति चेन्न, तुल्यत्वात्, एवमपि कारणमेव ते सत्ता, सति सत्तान्तराधायित्वात्, पटसत्ताधायितन्तुसंयोगवत्।

संयोगस्याप्यारम्भकत्वेष्टेः कारणत्वमात्रसाधनाद्वा न दोषः, अथ वा वृत्तसत्त्वातिरिक्तसत्त्वकरत्वात् कारणमेव, तन्त्वादिवत्, तथा च द्रव्याद्यन्यतमदेव तत्सामान्यम्, तस्मात् सदनित्यं द्रव्यवत् कार्यं कारणं सामान्यविशेषवच्च, द्रव्यादिवत्।

१. भगवती सूत्रम् श. ५ उ. २ सू. १५ २. कौषीतकि उपनिषद् २-११

अत एव च नास्य सत्तदिदमसदिति स्वान्वयवृत्तिसत्त्वा-व्यतिरेकवृत्तिनिष्कलस्वतोऽवधारितसत्त्वं द्रव्यादि व्याख्यातम्, तस्मात्तदर्थमभिधानप्रत्ययहेतुनाऽन्येन नार्थः, स्वत एव सिद्ध-प्रयोजनत्वात्, तत्रान्यस्य सदभिधानप्रत्ययहेतोर्द्रव्यादावनवकाशः स्वत एव सिद्धप्रयोजनत्वात्, सत्तासामान्यादिवत्, आकाशादिवद्वा यथा वा पुत्र एवापुत्र उच्यते स्वगतपुत्रत्वसंसिद्धान्वय व्यतिरेकाभिधानप्रत्ययदेवदत्तः पुत्र एव सन्ननपेक्षपुत्रत्वः, अत्र स्वभावसिद्धेरेव द्रव्यादित्वं नेतरसत्त्वादिति सत्ताया निराकरणं कृतम्, द्रव्यत्वाद्यप्येवमेव निराकार्यम्।

एतेन सत्सत्करत्वपक्षेऽपि साक्षात्कृतमेव वैयर्थ्यम्, स्वत एव सिद्धत्वात्।

यत्त्वनवस्था न दृष्टान्तात् वाक्प्रकाशितघटाद्यर्थक्रियार्थप्रदीप-प्रकाशोपादानस्यार्थवत्प्रकाशनावस्थावत्, इहापि द्रव्यादिकार्येण वस्तूद्भूतिप्रकाशमात्रेण द्रव्यादेरुपयोगक्रिया नास्तीत्यशक्त-सदसत्त्वात् विचित्रोपभोगसिद्धयर्थं सत्तासम्बन्धोऽर्थवानेवेति।

सोऽप्यनुपपन्नः, अवस्थावद्दृष्टान्तासत्त्वात्, अनेकान्तत्वात्, एकान्तरूपो हि निश्चितोऽर्थो दृष्टान्तः स्यात् त्वदुद्ग्राहितार्थस्य तु न हि व्यर्थत्वैकान्तानुगतं प्रकाशनम्, इन्द्रियेणानुपलब्धस्य विचित्रोपभोगा-सिद्धेः, तस्यापि बहुप्रभेदोपकरणप्रकाश्यत्वात्, तान्यप्यात्मलब्धि प्रकाश्यानि, साप्युपयोगप्रकाश्या, तस्यापि बाह्योपयोग्यद्रव्योपयोग-प्रकाश्यत्वादनवस्था, अतः परं पुनरुक्तं भवति, तस्मात् प्रकाश्यः प्रदीपप्रकाशोऽपि, अतद्रूपभावाधिगम्यत्वात्, प्रस्तुता सत्तापि च

आश्रयस्यातद्रूपस्य प्रत्ययेनात्मानं लभते न स्वत एव, वाक्प्रकाशावगमितार्थस्य प्रदीपादिप्रकाशनवदिति।

प्रधानमपि चैवं स्याद्भवता परिकल्पिता सत्ता, विश्वरूपोपभोगप्रतिपादनार्थत्वात्, गुणत्रयवत्, यथा सत्त्वरजस्तमोनामकं पुरुषार्थं प्रवर्त्तमानं प्रधानमेव, एवं सत्ता प्रधानमेव न ततोऽन्यत्, कार्यमपि च ते जन्मकालात् प्रागपि सदेव प्राप्नोति, अशक्तसदसत्त्वेन व्याप्यमानत्वात्..... सत्क्रियमाणत्वात्, उत्पन्नमात्रद्रव्यादिवत्, यद्वा न तत् सत्क्रियते, सद्भूतत्वात्, सत्तादिवत्, न तत्सत्ता सत्तान्तरमपेक्षते, सत्तासम्बन्धरहितत्वेऽपि सत्तात्मकत्वात्, अत्यन्तानुप्रवृत्तसत्तावत्, अनर्थसत्ताऽपि चान्यत्रानाधेया, तत एव, स्वसत्तावदिति।

यदि तत्कारणसमवेतं स्वत एव सन्न भवति सत्तासम्बन्धात् सद्भवति सदेव न, असदपि, यद्येवमिष्यते असदेव तर्हि तत्, स्वतो निरुपाख्यत्वात्, वेदनादि हि निरुपाख्यमपि स्वत एव सामान्यात्मना पररूपेण च सोपाख्यम्, तथाऽव्यपदेश्यत्वात् खपुष्पवैलक्षण्येन, तथाऽविशिष्टत्वादिति, कार्यमपि वा प्राक् सत् एभ्य एव हेतुभ्यः उत्पन्नमात्रद्रव्यादिवत्।

यदपि च कर्त्रादिकारकाणां समवायिनाञ्च व्यापारस्य फलमशेषविशेषणविनिर्मुक्तं स्वभावसद्भावमात्रं कारणसमवेतं तदित्यात्मावधारणं कृत्वा स्वयमेव यच्चोदितं वस्तुमात्रस्य निरतिशयत्वात् सत्त्वादिद्रव्यत्वादिविशेषणसम्बन्धनियमानुपपत्तिरितितत्तथैव — वस्तुमात्रस्य निरतिशयत्वात् सत्वादिविशेषण सम्बन्धनियमानुपपत्तिरेव।

यत्तु प्रत्युच्यते न, कारणसामग्रीविशेषसद्भावात्, यत्तुल्यजातीयावयवसंयोगारब्धावयविद्रव्यकार्यं द्रव्यत्वेन सम्बध्यते यत्तु कारणगुणारब्धगुणान्तरं *'तैरारब्धे कार्यद्रव्ये नियमत एव गुणान्तरमारभन्त'* इति वचनात् गुणत्वेन सम्बध्यते, यत्पुनः गुरुत्वादिभिः स्वाश्रयसंयोगसहितैर्वा स्वाश्रय आश्रयान्तरे वा पतनकर्मारभ्यते तच्च कर्मत्वेन सम्बध्यत इत्यस्त्यतिशयः, एतन्निदर्शनमात्रं सर्वत्र कारणसामग्र्यनियामकसद्भावात् प्रतिनियतः सामान्यविशेषसम्बन्धो द्रष्टव्य इति।

अनेनैव परिहारवचनेन यत्तदुत्पन्नं कार्यं तत्स्वत एव परस्परतो विशिष्टं विस्फुटीकृतम्, तेनैव विशिष्टेन सत्तादिविशेषण सम्बन्धनकृत्यस्य प्रतिप्रापितत्वात्, तत्र विशेषसद्भावस्तावदाहृत्य भेरीमभ्युपगतः तदुपवर्णनद्वारेण वाऽविशेषोऽपि।

अशेषविशेषणविनिर्मुक्तमपि न भवतीत्येतदपि त्वयैव तुल्यजातीयावयवसंयोगादिभिन्नत्वेऽप्यविशेषो द्रव्यादीनामित्यनेन भावितं तस्मादस्ति हि ..... नेतरं नेत्रेति, पुनरपि च तद्विजातीयेष्वप्यबादिष्वपि तुल्यजातीयाद्यवयवसंयोगादपि द्रव्यत्वं भावितम्। एतेन पृथिव्यादिभिन्नाप्याद्यवयवसंयोगादिभिन्नत्वेऽपि अविशेषेण द्रव्यत्वमुक्तं।

तुल्यजातिभेदेऽपि चाविशेषविशेषणाविनिर्मुक्तत्वं वस्तुनः द्वयोर्बहुषु चेति वचनात्, जातिकल्पनावच्च स्वत एव प्रकाशते कारणसमवेतद्रव्यादीत्येतस्यार्थस्य प्रदर्शनार्थं यदुक्तं वस्तुमात्रमाविर्भूतमुक्तवन्नियामकतया स्वेनैव महिम्ना वस्तुनियतत्वात्

विशेषणेन द्रव्यत्वादिना अविशेषविशेषणवृत्तिमात्रेण सामान्य-विशेषेण सम्बध्यते।

तत एतदापन्नं स्वत एव वृत्तं वस्तु द्रव्यादिप्रत्ययत्वादिना सम्बध्यते, तस्मादेव तु न्यायात् स्वसामान्यस्यापि प्रकाशकं तदेव, प्रदीपवद्भूताद्धस्तुनः प्रकाशान्तरनिरपेक्षात्तस्मादेव प्रविभक्तविषयान्वयात्, विचित्रोपभोगक्रियाप्रसिद्धेर्भिन्नेष्वभिन्नव्यवहारप्रसिद्धेश्च न विशेषणसम्बन्धः कल्प्यः, सर्वत्र तु घटत्वादावपि तत्त्वं स्वत एवेति त्वद्वचनादेव प्रतिप्राप्तम्, तदेव च विशेषणस्यापि प्रकाशकमिति स्थितम्।

इदन्तु प्रस्फुटतरं विशेषणसम्बन्धप्रकाशं वस्तु, तेन च वस्तुना नापेक्षितः सामान्येन सह सम्बन्धः, सामान्यमेव वस्तुना सह सम्बन्धमपेक्षत इति तत्सम्बन्धनियमाय तद्व्यक्ततरं वस्त्वेवार्थान्तर-निरपेक्षं विशेषणानामपि प्रकाशकमिति, अथ वा विशेषण-सम्बन्धमन्तरेणापि वस्तुमात्राणां परस्परातिशयोऽस्ति, तेन विशेषणसम्बन्धनियमसिद्धिरिति वदता त्वयैवाभ्युपगतम्, चोद्यपरिहारोऽपि कथं परस्परातिशय इति चेत् कथं प्राक् ..... अतिशयः स्यात्। न, दृष्टान्तात्, यथा परपक्षे सत्त्वरजस्तमसां परस्परातिशयस्तथेहापि स्यात्, सामान्यादिवद्वा ..... सत एव स्यादिति, सोऽपि चैवं प्रसिद्धमस्मदुक्तमेव संदर्शयति।

अत्र प्रयोगाः न द्रव्यादि अन्याधेयस्वप्रकाशं सत्त्वात्, यत् सत् न तदन्याधेयस्वप्रकाशं नाधेयसत्त्वादि नाप्रतिपूर्णसत्त्वादि दृष्टम्, सामान्यादिवत्, सात्मकत्वात्, प्रत्येकं सत्त्वात्, स्वभाव-

सद्भूतत्वाच्च, एवमनभ्युपगमे असदेव वा स्यात्, सत्त्वसमवायलभ्य-सद्भावत्वात्, कार्यवत्, तस्मान्न सतामपि द्रव्यादीनां सत्करी सत्ता व्यर्थत्वादिति साधूक्तम्।

नापि सदसतां सत्करी सत्ता, अभूतत्वात्त्वन्मतेनैव, खपुष्पवत्, या तु त्वयोक्तोपपत्तिः सदसत्त्वाभावे सदसदैकात्म्या-नुपपत्तिरिति सा नोपपत्तिः, त्वन्मतेनैव सदसदैकात्म्योपपत्तेरत्यन्ता -विरुद्धत्वात्, सामान्यादिद्रव्यादौ तदतत्सदसद्वत्, यथा सामान्यादीनि स्वात्मना असन्त्यपि भवन्ति, सम्बन्धसद्भावेन च सन्त्यपि न भवन्ति, तस्मादसदभूतत्वादिति साधूक्तं।

नन्वेवं तदव्यवहृतेः प्रागभावभेदाभाववदभूतत्वमेवेति, अत्रेदं सम्प्रधार्यम्, अथ यदेतदभूतत्वं तत् किं भूतस्य द्रव्यादेः? अभूतस्य वा? यदि भूतस्य तदेव भूतं वस्त्वात्मना, तदेव चाभूतम-व्यवहारात्मनेति सदसत्त्वविरोधो नेति सदसदैकात्म्यापत्तिरेव, अथाभूतत्वमिष्यते ततो द्रव्यादेरभावहेतुर्वाच्यः, केन हेतुना तदभूतं कार्यं स्वकारणेषु समवेतम्? अहेतुतो भवने हि क्षणिक शून्यतादिव्युत्पत्तिवदभाव एव, न चेत् पूर्ववदस्मदुक्तसद-सदैकात्म्योपपत्तिरेव प्राप्नोति।

तिष्ठतु तावत् प्राक् सत्तया सम्बन्धात् कार्यस्य सदसत्त्वम्, यदापि स्वसत्तया सम्बद्धं तदापि सदसत् त्वन्मतेनैव, यत्तत्कार्यं सत्तया सम्बद्धं सदित्यभिधीयते दण्डविशिष्टदेवदत्तवत् न च सत्तया, न हि दण्डसम्बन्धेन देवदत्तोऽसन् सन् क्रियते, सत्ताऽपि न वस्तुसत्तयाऽसती सती क्रियते, आश्रयप्रतिलम्भात्मन्येवाभिव्यज्यते

तदुभयम्, कारणकार्याकारणकार्यनित्यानित्यसम्बन्ध्यसम्बन्धि-जातिजातिमद्भेदेभ्यो द्रव्यसत्तयोर्भेदात्, तन्तुसमवायवदितरेतरा-भावादिवर्णनैश्च।

अथेदं *जैनेन्द्रत्वमेव* प्रतिपद्य बहुधा प्रज्ञाप्य च मा भूद्दुर्जनेषु *जैनानामेव* गौरवं मम च लाघवमिति त्वयैवं नानाऽविविक्तप्रज्ञाः प्रतिसंव्रियन्ते, विगृह्यन्ते वा, नाहं *जैनेन्द्रत्वमभ्युपैमि*, न चाविविक्तप्रज्ञान् प्रतिसंवृणोमि, न तु विगृह्यैवात्र वादः, स तु सिद्धार्थसुतमतावलम्बिनं त्वामेवोद्दिश्य, यदुच्यते *सैद्धार्थी*यैरुपादान-नियमदर्शनात् सत् कार्यम्, तिलवत्, तत्क्रियाद्यसत्त्वदर्शनादसत्, वीरणेष्विव घटो मृद्यपि, दृष्टा तु क्रिया, उपादाननियमश्च तथाऽनिच्छतोऽविशेषः, उपादानमेवानुपादानमेव वा, लब्धात्म पदार्थकारकव्यापाराभाववत् प्रागपि व्यापाराभावश्च, उभयैकान्ते दोषदर्शनात्।

तन्न विकल्पानुपपत्तेः, सदेवासत् सदसत् ..... स्वेनैवात्मना सच्च असच्चान्येनात्मना प्रागुत्पत्तेः घटो मृदात्मना सत् घटात्मना चासत्, न तावत् ..... असत्त्वप्रतिपक्षश्च सत्त्वम्, ... सत् सोपाख्यमसन्निरुपाख्यम्, ... सदसत्त्वं न भवतीत्यर्थः।

अत्र तूपादानसतोऽसत्प्रतिपक्षत्वमसिद्धम्, तदङ्गत्वात् तदात्मकत्वात्, तत्प्रवृत्तित्वाच्च, घटोर्द्ध्वग्रीवादित्त्ववत्, तदङ्गन्त्वस्य भवत्सत् भवतीति, भवनश्चाभावानुविद्धम्।

प्रत्येकवस्तुस्वरूपप्रतिपत्त्यर्थतदतत्प्रवृत्तिव्यावृत्तिसदसदात्मकः स्वतोऽत्यन्ताविभक्तवृत्तिपर्यनुभवनात्मकत्वादभूतखपुष्पविलक्षणः

अर्थान्तरभूतक्षणभङ्गविलक्षणश्च अतीतानागतवर्त्तमानभिन्नभवन-सदसदेकक्रियः, तस्मादभावो भावाङ्गं भावात्मा भावप्रवृत्तिरेव, आकाशवदितोऽपीतोऽपीति।

इतरथा च नैव भवेद्वस्तु, अपूर्वत्वात्, खपुष्पवत्, वैधर्म्येण चम्पकपुष्पवत्। तस्माद्वर्त्तमानमेव न स्यात्ततश्च नैव स्यात्, वान्ध्येयवत् क्षणिकवादवत्। तस्मान्न सदसतोः प्रतिपक्षत्वम्। इतश्च नानैकात्म्यम्, विधिप्रतिषेधैकविषयत्वात्, भावितैकात्म्यचेतना चेतनत्ववत्।

यदपि च वैधर्म्यमुच्यते सत्सोपाख्यमसन्निरुपाख्यमिति तदपि नोपपद्यते, सतोऽप्यनुपाख्यत्वात्। को हि प्रतिवस्तुविलक्षणसत्त्वेन सद्वस्तु प्रतिक्षणमुपाख्यातुं शक्नोति असाधारणत्वात्, स्वसुखादि-पर्यनुभववत्। अथ च निरुपाख्यतायामपि नैव तदसत्, सामान्य-सोपाख्यत्वात्, यदप्यसाधारणं सुखादिपर्यनुभवादि तदपि सामान्येनो-पाख्यायते किमपि सुखं दुःखमित्यादि। अपि च त्वयापि द्रव्यादिकार्येण वस्तूद्भूतिप्रकाशमात्रेण द्रव्यादेरुपयोगक्रिया नास्तीत्य-शक्तसदसत्त्वादिति विचित्रोपभोगक्रियाप्रसिद्ध्यर्थं सत्ता द्रव्यत्वादि-विशेषणसम्बन्धः कल्प्य इति वदता। अथ च मतमसत् तत् सम्बन्धसत्त्वात् तस्यामवस्थायाम्, सोपाख्यश्च तदुत्तरकालं सत्तासम्बन्धोपाख्यत्वादिति व्यभिचार उक्तः।

सदसदेव तु सोपाख्यनिरुपाख्यत्वात्, सामान्यवत्, अथ वा सोपाख्यं निरुपाख्यञ्च, सदसत्त्वात्, सामान्यवत्, सामान्यं स्वसत्, न सामान्यसत्, वस्तुवदिति सदेवासत् सामान्यम्, तदेव च

सोपाख्यम्, स्वपरप्रत्ययाभिधानाधानात्तदेव निरुपाख्यञ्च, वस्तुवत् सामान्याद्यन्तराभावादिति सोपाख्यमेव निरुपाख्यम्, वस्तुनि विपर्यय इति व्यवस्थापिते दृष्टान्ते ताभ्यां धर्माभ्यामेव प्रतिपद्यतां भवान् सोपाख्यनिरुपाख्यत्वात् सामान्यादिद्रव्यादिवत् सदसत्त्वमिति।

यत्तूक्तं स्याद्वादिनं प्रति पूर्वदोषपापीयस्त्वान्न सदसत् कार्यम्, तत्र हि सदसत्कार्यपक्षयोः सति क्रियाया अभावः, असति चोपाददाननियमाभावः, विरोधादिति ब्रुवतो जैनस्यापि हेतूपादानक्रियानियमाभाव इति द्विदोषता पापीयसीति, तन्न, परिहृतपूर्वदोषत्वात्।

तत्र हि सत्कार्यपक्षे क्रिया किं विरुध्यते? यदसावेकान्तेन सन्नेव घटः इत्याह ततस्तस्य क्रियाकरणं न युज्यते, कर्त्तव्यत्वाभावात् कृतवदित्येवं तस्य क्रियाऽभावदोषो भवति, न पुनराकाङ्क्षितकर्त्तव्यपर्यायद्रव्यवादिनः *स्याद्वादिनः*, यदि त्वसौ स्यादादिना कर्त्तव्यत्वमपि विदधीत क एनमेवं ब्रूयात् 'क्रियाभावदोषस्ते प्राप्तः, कर्त्तव्यत्वाभावात्, कृतकवदिति'।

असत्कार्यपक्षेऽप्युपाददाननियमः किं विरुध्यते? यदसावेकान्तेन क्रियागुणव्यपदेशाभावादसत्कार्यमिति हेतुषु सन्निहितस्या व्यक्तस्यार्थस्यपर्यवज्ञया ब्रूयात् तस्य पटार्थितायां तत्तदुपाददाननियमो न युज्यते, तत्रासत्त्वात्तृणादिवदित्यसत्कार्यैकान्तवादेऽप्युपादाननियमाभावदोषः, सोऽनेकान्तवादे स्यादादिविशिष्टे नास्ति तथा यदि

वैशेषिकोऽपि विशेषं ब्रूयात् क एनं किञ्चिदपि ब्रूयात्, तस्मान्न स्तः *स्याद्वादिनः* पूर्वदोषौ, कुतः पापीयस्त्वम्? ।

एवमस्मिन् पूर्वश्रेयस्त्वार्थ आद्युद्ग्राहे दर्शित एव स स्वपक्षरागादस्मत्प्रद्वेषाद्वा नावबुद्धस्त्वया ।

यत्पुनरिदं 'सद्भागस्योपादाननियमः, असद्भागस्य क्रिया च युज्यतेऽतः सदसंदशयोरन्यतराश्रयेण तावंशौ वस्तुनि स्त एवेति चेन्न विपर्ययप्रसङ्गात्, एकस्योभयात्मकैकवस्तुत्वे कुत एतत् सद्भागमाश्रित्यैवोपादाननियमो न त्वसद्भागमाश्रित्य, असद्भागमाश्रित्यैव च क्रिया, न सद्भागमाश्रित्येति विशेषहेत्वभावादिति पूर्वदोषपापीयस्त्वं एव' इति ; एतदपि न किञ्चित्, कार्यत्वादेव । क्रियत इति हि कार्यम् । तस्मिन्नुपादानक्रिययोः स्वविषयनियतौ, एकस्योभयात्मकत्वात्, एकपुरुषनियतपितृपुत्रत्ववत्, न ह्येकस्य पुरुषस्य पितृपुत्रत्वात्मकत्वेऽपि ते अनियतविषये दृष्टे किन्तु नियतविषये एव, न तु नियमाभावः, एवं वस्तुन उभयात्मकैकरूपत्वेऽप्युपादानक्रिययोः स्वस्वविषयनियतत्वान्न विपर्ययप्रसङ्गः ।

विपर्ययप्रसङ्गापत्तावप्येवंविधार्थतैव, सदसदात्मनो वस्तुनोऽसद्भागमाश्रित्योपादाननियमाभाव एव, अनुपादानसत्तादिभावसामान्यलभ्यस्वरूपत्वात्, अस्य नोपादाननियमोऽस्ति, सद्भागमाश्रित्य क्रियाया अभाव एव, तस्य वादिनः सर्वस्य तथात्वादसत्नाम किञ्चिन्नास्ति ।

यत्तूच्यते सदसतोर्वैधर्म्यादेकस्मिन्नेव कार्ये प्रागुत्पत्तेः सदसच्छब्दार्थयोरेकाधिकरणभावेन प्रयोगो नास्ति — सदेवासदित्यनु-

सन्धानं नास्त्येकाधिकरणभावेनेति प्रयोगानुपपत्तिः, एषोऽर्थो दर्शितः कार्ये सदसत्ता नेति सप्तम्यभिधाने नेति, एतदपि न किञ्चित्, इतरेतरभूताभूततत्त्वं जगत्, न केवलं कार्यमेव सदसत्, वृत्ता-वृत्तपर्यायार्थेनाविभक्तद्रव्यार्थभावनायां निखिलं जगत् सदेवासत्, किन्तूभयपर्यायप्रत्यपेक्षया भावयितव्ये निःसन्दिग्धमेव वस्तुनः स्वात्मनि, तथा चेतरेतराभावरूपेण स्वेन च भावरूपेण सदेवासत् सर्वमिति न सदसतोर्वैधर्म्यम्।

यदप्युक्तमापेक्षिकं सदसत्त्वं *स्याद्वादी* किलेत्थं समर्थयति — मृदात्मना घटस्य प्रागुत्पत्तेः सत्त्वम्, घटात्मना चासत्त्वमिति, न, असत्कार्यत्वसिद्धेः — एवं तर्हि मृदात्मनः कर्तव्यत्वाभावात्, क्रियते इति हि कार्यम्, न च मृत् क्रियते घटो हि क्रियते स त्वसन्। तस्मान्न प्रागुत्पत्तेः सदसत्कार्यमिति। अत्र न पूर्वपक्षो नोत्तरपक्षश्च सत्यः।

को हि नाम सोऽ*नेकान्तवादी* ब्रूयात्-प्राक् मृदात्मना सत्, घटात्मना चासत् कार्यमिति, यदि ब्रूयादनेकान्तवादत्याग एकान्त-वादाभ्युपगमश्च। एवं हि मृदोऽकार्यत्वेऽसत्कार्यवाद एवावस्थापितः स्यात्, ततश्चैवं ब्रुवाणेषु को भेदः? अभूत्वोत्पत्तिवाचकप्राक् शब्दोच्चारणादेव चासत्त्वैकान्तः साक्षादभ्युपगतः, ततः किमर्थं विवदेत, अत्यन्तासमीक्षितभाषिणैकान्तवादिनापि न तुल्यता मेत्यसौ।

देशकालभेदलक्षणोभयपर्यायमात्रत्वाच्चैवमयमसद्वाद एवं स्यात्, इत्थं पुनः कोऽ*नेकान्तवादी* ब्रूयाद्रूपं रसात्मना नास्ति रसोऽपि रूपात्मना कृष्णाद्यपि शुक्लात्मनेत्यादि, धृतिसङ्ग्रहपक्ति-

व्यूहावकाशदानात्मकपृथिव्याद्यात्मकत्वान्मृदादेर्घटादेश्च कथं मृदमेकामपेक्ष्य मृदात्मनैवास्तीत्यापेक्षिकमसत्त्वमसद्वादिवत्, आपेक्षिक-मृदात्मसद्विशेषणात्त्वसदभिधानमेवेदं मृदात्मना सत् घटात्मना चासदिति वचनम्, अभिधेयस्वतत्त्वनिरसननियतत्वात्, यद्वाक्यमभिधेयस्वतत्त्वनिरसननियतं तदसदभिधानं दृष्टम्, यथाऽनुष्णोऽग्निरित्युक्तिरिति, अव्युदासे तु घटात्मनापि सन्नेव, तद्भावत्वात्, तथा च सत्कार्यत्वोक्तिरेव कृता तथा वदता।

सदसदात्मकैकं वस्तुतत्त्वं द्रव्यार्थपर्यायार्थोभयलक्षणं *जैना* उपवर्णयन्ति खपुष्पवदन्यथाऽसम्भवात्, द्रव्यशब्दमपि मृदादि रूपाद्यतीतानागतवर्त्तमानभेदाभेदार्थं पर्यायशब्दं सर्वाभेदभेदार्थं तेष्वेव, तस्मादुभयोरुभयार्थत्वम्।

मृदात्मानं घटात्मानं द्रव्यार्थपर्यायार्थम्, द्रव्यं हि घटो यावद्द्रव्यार्थमत्यन्तसन्, पर्यायस्तु यावत् पर्यायार्थमसन्, यथा च घटात्मा मृदप्येवम्, इदमपि च कुतो निष्पन्नेऽपि घटे मृत्त्वदर्शनात् मृदात्मकस्योपादानम्, न पुनर्धृत्यादिवत् सङ्ग्रहादि दर्शनाज्जलाद्यात्मकस्येति? तस्मान्न मृद एव दर्शनमुभयथाऽपि।

असत्त्वाद्घटात्मनेति कुत एतत्? न पुनर्मृत्तत्त्वघटसत्त्वात्, तत्त्व एवानुभवक्रमप्राप्तेः, तत्प्रत्यग्रादिवत्।

यदपि च न, असत्कार्यत्वसिद्धेः, एवं तर्हि मृदात्मनः कर्त्तव्यत्वाभावात्, क्रियत इति हि कार्यम्, न च मृत् क्रियते, घटो हि क्रियते, स त्वसन्, तस्मान्न प्रागुत्पत्तेः सदसत् कार्यमिति,

एतदपि नैव, असत्कार्यत्वसिद्धिवत् सत्कार्यत्वसिद्धेः, अकर्त्तव्य त्वान्मृत्तत्त्वस्य घटादेः सदेव कार्यमिति भावानां कुतो नेष्यते सत्कार्यत्वम्? न हि घटतायां मृत्तत्त्वाभावे घटस्यावस्थानमस्ति, येन प्रागसन् स्यात्, मृद आत्मैव हि घटात्मा, तत्त्यागे तत्स्वरूपानुपपत्तेः, अतीतानागतवर्त्तमानविचित्रविशेषस्वभावसद्भूतमृत्त्ववत्, अतीतानागतवर्त्तमानविचित्रविशेषाध्यासितभाव सद्भूतघटवदिति।

एतेन सर्वास्याद्वादः प्रत्युक्तः।

यदपि चोपादाननियमसत्त्वप्रतिषेधार्थमुत्तरं कर्तृकर्मेति क्रियानिमित्तकौ शब्दौ, तत्र प्राक् प्रसिद्धव्यापारयोग्यद्रव्योपादानं तत् क्रियानिमित्तं न कार्यसत्त्वनिमित्तमिति, अर्थस्य व्यापारनियमः कुतः? स हि कार्यसत्त्वमन्तरेण न सिद्ध्यति, समर्थस्य करणेऽधिकारपरिग्रहात् स इति चेत् समर्थस्यैव कार्यक्रियायामधिकारपरिग्रहणात् कार्यमसदेव, ननु त्वयैव समर्थस्य करणेऽधिकारपरि-ग्रहादुपादाननियम इति ब्रुवता सत्कार्यत्वं समर्थितम्, एकीभावं गतार्थस्य समर्थत्वात्।

अथ कथं तन्तुतुर्यादिपटनिर्वृत्तौ कारणत्वेनोपादीयते, न पांशुवास्यादीति, न, तस्यैव तथा तथा समर्थत्वात्, पटादिकार्यं तन्तुषु तत्कारणेषु च तत्र तत्रास्त्येव, तत्समवायव्यङ्ग्यत्वात् तदात्मकत्वाच्च, तथा तुर्यादिष्वपि पांश्वादिष्वपि च तत्कारण-कारणत्वात्, परमाणुवत्।

योऽप्युपचयहेतुः क्रियागुणव्यपदेशाभावात् प्रागसत् कार्यं खपुष्पवदिति, अयमेव ते उपचयहेतुः परपक्षसाधनाय — सदेव

भवति कार्यं प्रागभूतक्रियागुणव्यपदेशत्वात् सत्तासम्बन्धिद्रव्यादिवत्, अनैकान्तिकता च। ननु खपुष्पवदनेकान्तः प्रागुत्पत्तेरसत्कार्यं स्यात्, उपजातमात्रद्रव्यादिवत् सत् स्यादिति त्वत्साधनमपि संशयकारीति चेन्न, प्राग्विशेषणापक्षिप्तप्रसङ्गत्वात्।

ननु प्राङ् निष्पत्तेरसत् कार्यमिति कालविशिष्टं प्रतिज्ञाय क्रियाद्यभावादिति हेतुरुक्तः, स तु निष्पन्ने नास्ति, सदेव तु द्रव्यं न कार्यमित्यत्र ब्रूमः ननु निष्पत्तिरुत्पत्त्यभूत्वाभावादिसमानार्थिका, तेनाव्यक्तसत् व्यक्तसद्भवतीत्युक्तम्भवति, अनुपनिलीनसत्त्वश्च तज्जातमात्रं सत्तोपनिलयनात् प्रागनिष्पन्नं सत्तासामान्येन सद्भवति, निष्पत्तिशब्दो ह्यभूतस्य भवनस्य त्रिप्रकारां निष्पत्तिमाह — नियता निश्चिताऽधिका वा, सा च ते सत्तासम्बन्धादेव द्रव्यादौ कार्ये नियता, निश्चिता सत्त्वान्तरेभ्यो विविक्तत्वात् सत्तायाः, अधिका पुनर्भवनात्।

उपादानस्वसत्तानियता तत्त्वतोऽसौ निश्चिता पटादिव्यावृत्त्या, तण्डुलविचयवत् विचिता निश्चितास्तण्डुलाः कचवराद्यपनयनेन स्वरूपपरिग्रहेण च, क्रिययाऽनिष्पत्तेः सकाशान्निश्चिता घटनिष्पत्तिः, अधिका युगपद्युगपत्पर्यायक्रमतथाभूतेरिहापीति सदसत्त्वं कार्यस्य। तस्मात् सदसत् कार्यम् सदसत्क्रियागुणत्वात्, अन्यथा हेतुशक्त्युपादानानामभिधानमात्रप्रसङ्गः, यद्यसदेव कार्यं तदा हेतुशक्त्युपादानानामभावे नियमस्य वचनमात्रमेव स्यात्, खपुष्पादिनिष्पत्त्यर्थक्रियाहेत्वाद्यभाववदसत्त्वाविशेषात्।

यस्य तु विद्यमान एवार्थस्तस्यापि निष्पाद्यनिष्पादकत्वाविशेषात् कुलालमृद्दण्डाद्यस्तित्ववद्घटास्तित्वादेतेषां सर्वेषां

अभावादभिधानमात्रप्रसङ्ग इत्यतश्चायुक्तं सत्कार्यत्वमेव, एकान्त-पक्षयोर्दोषदर्शनादनेकान्तपक्षे चादोषदर्शनात् सदसदेव कार्यम-व्यक्तसद्व्यक्तसंद्रवतीति।

यदपि चोक्तं विकल्पानुपपत्तेरिति, नासौ दोषो विकल्प-त्रयानाश्रयात् विकल्पान्तराश्रयणाच्च, निष्ठासम्बन्धयोरेककालत्वात्, निष्ठा च कारणसामग्र्यव्यापारकालः प्रागसतो वस्तुभावो निष्ठानं समाप्तिः, सम्बन्धश्च स्वकारणसत्तासमवायः, सत्तासम्बन्ध एव निष्ठाकालः, कुतः? समवायस्यैकत्वात्, यस्मिन्नेव काले परिनिष्ठां गच्छत् कार्यं कारणैः सम्बध्यते समवायसम्बन्धेनायुतसिद्धिहेतुना, तस्मिन्नेव काले सत्तादिभिरपि, तस्मात् कालस्याप्रतिभागात् प्रागित्यनुपपत्तेरनास्पदः सदादिविकल्पोऽर्थाभावादिति।

एतदपि न, अनुपपन्नविकल्पत्वात्, असम्बन्धात्, असम्बन्धोऽप्यवस्तुत्वात्, खपुष्पवत्, प्रागुत्पत्तेरसतः कार्यस्य परिनिष्ठां गच्छतः कथं वस्तुत्वं? कथं वाऽवस्तुनः कारणैः सत्तया वा सम्बन्धः परिनिष्ठां गच्छेत्, यदि तस्य स्यात् खपुष्पस्यापि स्यात् अवस्तुत्वात् कार्यवत्।

सम्बन्धकाले तन्तुवद्वस्तुभावात् परिनिष्ठितश्च सम्बद्धश्चेत्येकः कालः, तस्मात् सम्बन्धो वस्तुन इत्युक्तमिति, अत्रोच्यते पुनरपीदं तदवस्थमेव निष्पद्यमानावस्थाया उत्पत्तेः पूर्वकालत्वात्, एककाला चेत्तस्यामवस्थायां कार्यं सदेव स्यात्, स्वकारणैः सत्तया च सम्बध्यमानत्वात्, निष्पन्नकार्यवत् शशविषाणवद्वा, न हि परिनिष्ठायाः सम्बन्धाद्वा सत्त्वम्, सत एव निष्ठासम्बन्धदर्शनात्,

यदि निष्ठायाः सम्बन्धाद्वा सत्त्वं तदा हि शशविषाणमपि निष्ठां गच्छत्सम्बध्येत, निष्ठितश्च सम्बद्धश्चेति भवेदसत्त्वात्, कार्यवत्, कार्यमपि वा तदा परिनिष्ठां गच्छत् स्वकारणैः सत्तया च न सम्बध्यते, असत्त्वात् खपुष्पवदिति।

इतश्चेतश्च समानत्वान्नेति चेत्-यथाऽसतः समवायसम्बन्धेन द्विविधेन स्वकारणसत्त्वादिभिः सम्बध्यमानताऽदृष्टा तद्वत् सतोऽपि स्यादविशेषात्, न हि सम्बध्यमानं विशिष्टं किञ्चिदिहाधिकृतमित्यत्र ब्रूमः, सम्बन्ध एव स न भवति, सत्स्वभूतत्वात्, शशविषाणवत्, विद्यमानविषयेणैव तेन भवितव्यम्, सम्बन्धत्वात्, द्व्यङ्गुलि-संयोगवत्।

यदि त्वात्मात्मीययोरिह यथाविवक्षं स्वशब्दस्य वृत्तेरर्थ-व्यञ्जनसद्भावकर्तृत्वनिर्विषयास्त एव तन्तवः परिनिष्ठां गच्छन्तः सम्बध्यन्ते परिनिष्ठिताश्च सम्बद्धाश्चेति, तदा ते यदि तन्तव इत्येव तर्हि कारणमात्रवादवदयं स्यात्, सोऽपि न प्रतिपूर्येत, निर्व्यापार-कारणमात्रवादाभ्युपगमात्, तन्त्वाकुण्डलनवत्, यथा तन्तूनामा-कुण्डलीकृतानां कुविन्दनयनानयनप्रसारणवयनादिक्रियानिरपेक्षाणां कारणत्वं नास्ति, तत्रात्यन्तं पटकार्यादर्शनात् तथा कारण-मात्रमसम्पूर्णसत्कार्यमेतत्, पूर्वोत्तरकालतुल्यत्वात्।

परिनिष्ठाऽपरिनिष्ठाऽविशेषश्च खपुष्पवत्, अथ पटोऽपि केनचिन्न्यायेन तन्तुष्वस्तीत्यभ्युपगम्यते ततः स्वकार्यकारणसत्ता-सम्बन्धद्वयतन्तुपटद्वयसान्निध्यं नानेकान्तानाश्रयणे, तस्मादेषोऽपि विकल्पोऽसत्सम्बन्धदोषदुष्ट इति।

असत्सम्बन्धदोषपरिहारार्थश्च *प्रशस्तोऽन्यथा* व्याचष्टे — सम्बन्धश्च सम्बन्धश्च सम्बन्धौ निष्ठायाः सम्बन्धौ निष्ठासम्बन्धौ न निष्ठा च सम्बन्धश्चेति, तयोर्निष्ठासम्बन्धयोरेककालत्वात् निष्ठितं निष्ठां गच्छद्भूतमिति, कोऽर्थः? कर्त्रादीनां कारकाणां परिस्पन्दाद्वस्तु भावमापन्नमव्यपदेश्याधारं समवायहेतुः कार्यं निष्ठितं निष्ठेत्युच्यते तस्य स्वकारणैः सत्तया च युगपत् सम्बन्धौ भवत इति, *भाष्यमपि*केन पुनर्लक्षणेन गतं सद्गच्छदित्युच्यते ब्रूमः 'वर्त्तमानसामीप्ये वर्त्तमानवद्वा'[1] इति, किमिव? यथा कारकान्तरादुत्पद्यमानं उत्पन्नमित्यर्थः, कस्मात्? दृष्टमित्यक्षिगोचरापन्नार्थनिर्देशात्, इतरथा दृष्टं न स्यात्, तत्पुनः कतमत् कारकव्यापारात्? देवदत्तस्थालीकाष्ठादीनां व्यापारादिति।

तदपि न समवायिकारणत्वविरोधात्, स्ववचनविरोधोऽभ्युपगमविरोधश्च, यदि पुनर्वस्तुभावं गतं कार्यं कारणैः सत्तया चाभिसम्बध्यते ततोऽनारम्भकाण्यकारणानि च कारणद्रव्याणि स्युः, किञ्च कार्यकारणगुणगुणिव्यक्त्याकृतीनामयुतसिद्धः समवायः सम्बन्ध उक्तोऽभ्युपगतश्च तयोर्विरोधोऽपि, इदानीं निष्ठितस्य कार्यस्य कारणैः सत्तया च सम्बन्धोऽभ्युपगतस्स च युतसिद्धः, कार्यस्य कारणेभ्योऽन्यत्र परिनिष्ठितत्वात्।

यत्तूच्यते समवायिकारणत्वनिवृत्तिरिति चेन्न, अन्यत्रासमवायात्, यदि तस्य समवायोऽन्यत्र स्यात् स्यात् समवायि--

१. पाणिनि ३.३.१३१

कारणत्वनिवृत्तिः, न चैवम्, तस्माददोष इति, सोऽप्यपरिहारः इच्छामात्रत्वात् स्वोक्तोपपत्तिविरुद्धार्थत्वात्, विरुद्धार्थत्वमसम्बद्धत्वात्, तन्तुष्विव घटस्य, द्रव्यादिकार्यस्य तदसिद्धमिति चेन्न, तत्राप्रवृत्तत्वात्, तत्रानारम्भात् तदसम्बद्धोत्पत्तित्वात्, कार्यस्य च तदसम्बद्धस्याप्युत्पादे खपुष्पमप्युत्पद्यतां कारणैरसम्बद्धत्वात्, त्वदभिमतकार्यवत्।

अकारणत्वादिति चेत्, पटाद्यपि कार्यं मोत्पादि, अकारणत्वात्, खपुष्पवत्, तद्वोत्पद्यताम्, अकारणत्वात्, कार्यस्योत्पत्तिवत्, यथा तन्त्वादीनि कार्येणासम्बन्धादसतः सतोऽप्यकारणानीति सर्वञ्च कारणमकारणञ्च यथायोगं स्वस्यैव कार्यस्य नासतो नान्यकार्यस्य वा, असम्बन्धात्, कार्यकारणभावश्च सम्बद्धत्वे सति भवति, तस्मात् सम्बन्धः प्रागपि कार्योत्पत्तेः।

योऽयमेकीभावेन बन्धः स सम्बन्धः, अनेकसर्वैकात्मकत्वात्, एकीभावेनापगमनेन गतिः, द्रव्यपर्यायाभ्यां तन्तुत्वापरित्यागेन पटत्वपरिणामः समवायः कारणसत्कार्यैकत्वलक्षणः, तदापत्तिरूपाद्भयात्त्वयेदममार्गप्रपदनमस्थाने क्रियते यदिदं अव्यपदेश्याधारकार्यसम्बन्धकल्पनम्, कार्यस्यासत्त्वात्।

सोऽपि च मिथ्याभिमान एव मन्यतान्तु तत्रैवास्तीति, परिनिष्ठितत्वात्, विभुपरिमण्डलवियदादिवत्।

योऽपि च कार्यकारणयुतसिद्धिदोषस्य परिहारः — तस्यासंयोगात् न हि कारणसम्बन्धिभिः कार्यस्य संयोगोऽस्ति,

द्वयोरङ्गुल्योराकाशे युज्यमानयोः संयोगस्य सम्बन्धिनोः पृथक् सिद्धयोरिवेति सोऽपि न परिहारः, उक्तवदसंयोगासिद्धत्वात्, यदि तत्रोत्पन्नताद्यसिद्धिः सम्बन्धासिद्धिश्च स्यात् स्यादसंयोगः ततः परिहारश्च युतसिद्धिदोषस्य स्यादिति।

तत्त्वोपनिलयनात् सदाद्यभिधानार्थं कारणसमवेतस्य वस्तुन उत्तरकालं सत्तासम्बन्ध इति *बहूनां* मतम्, वस्तूत्पत्तिकाल एवेति तु वाक्यकाराभिप्रायोऽनुसृतो *भाष्यकारैः*, सिद्धस्य वस्तुनः स्वकारणैः स्वसत्तया च सम्बन्ध इति *प्रशस्तमतेरभिप्रायः*, *अस्मदभिप्रायस्तेषां* त्रयाणामप्यसत्यतेति, परस्परविरुद्धार्थत्वात्, कुमारब्रह्मचारि-पितृत्ववत्, इदमेवोदाहरणमन्यत्र, एवं वक्तुरिव सर्वेषां शास्त्रकार-मतानुवर्त्तित्वात् स एवानाप्तः स्यात्।

सदादिविकल्पानुपपत्तिश्च तदवस्थैव, यत्पुनर्द्रव्यादीनां स्वत एवाभिधानप्रत्ययविषयत्वं सत्त्वात् सत्तादिवत्, यथा च सत्तायां स्वत एवाभिधानप्रत्ययौ एवं द्रव्यादेः, न सत्तायोगादित्युक्तुरुच्यते परिहारः *काणादैर्नैतत्*, अतादात्म्याद्दण्डनिमित्तादण्डदण्डित्ववत्, यथाऽदण्डाद्दण्डिनो दण्डित्वं दण्डनिमित्तमेवं द्रव्यादेरसदात्मनः सत्तानिमित्तं सदभिधानादीति।

अत्र वयं सम्प्रधारयामस्त्वया सह कथमिदं तादात्म्यं किं सतो भावात्? उत सत्करत्वादिति, तद्यदि तावत् सतो भवनं ततः सर्वेणापि सता भूयते, स्वत एव अथ सत्करत्वात्तादात्म्य तत् प्राक् प्रत्युक्तम्, यथा च सत्तायां स्वत एव सदभिधानप्रत्ययौ तदात्मत्वादेवं द्रव्यादौ द्रव्यत्वादौ नित्यैकसर्वत्रगेषु सामान्यसामान्य -

विशेषशून्येष्वपि, दण्डेऽपि च तादात्म्यादेव दण्डाभिधानप्रत्यय-सिद्धौस्वत एव दण्डिनि तौ तादात्म्यात्, इतरथा दण्डिकुण्डल्य-विशेषः स्यादिति, तथा च दण्डत्वसामान्यविशेषनिरपेक्षः स्वत एव भवति दण्डस्तादात्म्यात् सत्तावदिति सिद्धम्।

अथोऽच्येत दण्डोऽपि दण्डत्वाद्दण्डाभिधानप्रत्ययभागिति, अनुदाहरणं तर्हि दण्डी दण्डाद्दण्ड्यभावात्, दण्डस्य स्वतोऽ सिद्धत्वात्, दण्डत्वोपपादितदण्डाद्दण्डीति चेत्, इतरेतराश्रयत्वात्, दण्डत्वतत्त्वाद्दण्डसिद्धिः दण्डविशेषणसाधितदण्डत्वसिद्धेर्दण्डत्व-तत्त्वसिद्धिरिति, दण्डीति च दण्डाद्दण्डी, न तु दण्डत्वात् स्वत एव भवद्दण्डी, आत्मान्तरसङ्क्रान्तिश्चैवम्, दण्डत्वादात्मान्तरं दण्डः स्वत एवाभवन् दण्डत्वाद्भवन् तदात्मा भवति, एवं दण्ड्यपीति, वयन्तु ब्रूमो यत्तद्दण्डेन भूयते तस्यैव दण्डत्वात् यद्दण्डी दण्डी भवति स देवदत्तो भवत्यात्मानं लभते, तदभावेऽसामान्यात्मकत्वमेव सर्वस्य स्यात्, यदि सा स्वत एव न भवति सत्तासामान्यादितत्त्वाद्भवति नास्त्येव सा, खपुष्पवत्, ततश्चासामान्यमेव सत्तादिः स्यात्, स्वत एव भवतः समानस्याभावात्, तस्मात् स्वत एव दण्डो भवति स्वत एव सदभिधानप्रत्ययौ, न सत्तायोगात् एवं दण्ड्यपि।

यदप्युक्तमतदात्मत्वात् द्रव्यादीनां सदभिधानप्रत्ययौ सत्तायोगात् न स्वत इति तदपि न, अतदात्मत्वादित्यादेरनैकान्ति-कत्वात्, द्रव्यत्वादीनामतादात्म्ये स्वतः सदभिधानप्रत्ययौ न सत्तातः, एकैकत्वात्, आत्मवत्, एवं द्रव्यादीनामपि स्वत एव द्रव्यत्वादिवत्।

सत्तासम्बन्धरहितेषु द्रव्यत्वादिष्वौपचारिकौ तौ स्याताम्, असंख्ययोर्गुणत्वकर्मत्वयोरेकाभिधानप्रत्ययवदिति चेत्तर्हि द्रव्यादिषु अपि द्रव्यत्वादि रहितेषु तावौपचारिकौ स्याताम्, मनुष्यसिंहत्वादिवत्तथाऽञ्जसाऽनुपपत्तेर्नेति चेत् ततस्ते स्वपक्ष एव दोषविधानम्, यदि तु सत्तासम्बन्धापेक्षौ सदभिधानप्रत्ययौ तर्हि कथं सत्तादिषु तावौपचारिकाविति, त्वमेवासि प्रष्टव्यः यत्पुनरिदंमुच्यते सत्तायां सिद्ध इति चेत्, यदा च..... आत्मानमात्मना न युक्तमभियोक्तुं..... तद्योगनिमित्तम्, तदयुक्तं न द्रव्यादिष्वञ्जसा सिद्धिः, अतदात्मनिमित्तस्य सत्प्रत्ययस्यानुपपत्तेः, मनोरथवत्।

द्रव्यादिभाक्तत्वनिवृत्तिः स्वतः सत्त्वं सत्तादिवच्चैतस्य वचनस्य व्याघात इत्येतद्दोषद्वयदर्शनादिति चेन्नैव च दोषः दण्डित्वदण्डत्वयोर्यथायथं स्वत एव सतोः तत्सम्बद्धत्वात्, सत्त्वतः सत्त्ववत्, सदेव स्वं सत्त्वतः — सत्त्वात्, सदेव सत्, न सत्तातोऽन्यत् सत्, तस्मात् सर्वस्य सतो नास्त्यतादात्म्यं सदात्मैव सर्वमिति भाक्तत्वनिवृत्त्याद्यभावः, सदादिवच्च स्वतः सत्त्वम्।

यतश्चैवं ततः सतो भावः सत्तेति द्रव्याद्यव्यतिरिक्तसत्तार्थैव ज्ञायते, कर्त्तरि षष्ठीवृत्तेः यत्तत् सद्भिः ..... सदित्यभिधानप्रत्ययकारणं सर्वत्र, एवमपि ..... यदुक्तं स्वतः सत्त्वमिति, एतदयुक्तं अत्र हि सत्तावदिति सर्वमिदं त्वदनुवृत्त्या, न मम सत्ता द्रव्यादिव्यतिरिक्ता काचिदस्ति 'कर्त्तरि षष्ठी'[1]त्युक्तत्वात्, ततोऽनुपपन्नं द्रव्यादीनामनेकत्वम्।

१. पाणिनि

कर्तृणाऽकर्तृणा च यो भवति स एव भावः सामान्यं देशकालादिभेदेऽपि भवनतुल्यत्वात्, स एव विशेषोऽन्यभवन निरपेक्षः कर्त्ता उक्तवत्, भवदेव भवति तदेव द्रव्यं भव्यं कलनं गुणः युगपदयुगपत्पर्यायत्वेन भवनात्, स एव भावः क्रिया, स एव विशेषः भावान्तराद्विशिष्यमाणत्वात् अन्यनिरपेक्षत्वात् सदसदात्मकत्वात् वक्ष्यमाणवच्च, स एव समवायः, एवमेव भवतः कर्तृत्वेन तस्यैव कारणत्वं तदेकीभावगत्या कार्यत्वापत्तेः, सहासत्त्वेन कर्तृत्वात् नासंयोगः, कार्यकारणप्रतिपादनात् नासमवायः, ताभ्यां सम्बद्धत्वान्नित्यत्वासत्त्वे न स्तः।

अथ वा अकारणनित्यासम्बन्धाजातीनि द्रव्यादीनि, स्वतः सत्त्वात् सामान्यादिवत्, कारणादि वा सामान्यादीनि स्वतः सत्त्वात्, द्रव्यादिवत् तदात्मत्वात्, उभयं वा, इतरेतररूपैकभवनाविशेषात्।

यदपि च समवायस्यैकत्वे सङ्करप्रसङ्ग इति दोष उक्तः स तदवस्थ एव, बहूनां सम्बन्धिनामेकसम्बन्धभावात्, वागादिगवाद्यभिधानवत्, तस्माद्द्रव्यत्वसम्बन्धाद्यथा द्रव्ये द्रव्यत्वबुद्धिं तथा गुणे कर्मणि च द्रव्यत्वबुद्धिं कुर्यादिति सर्वस्य सर्वाभिधानप्रत्ययौ स्याताम्, पदार्थलक्षणव्यवस्थानस्याभावात् षडपि पदार्था निवर्त्तन्ते कथम्? समवायस्यैकत्वात् द्रव्यत्वेन गुणकर्मणोः सम्बन्धाद्द्रव्यत्वात्तयोश्च स्वरूपस्य हानिः, तत्त्वविशेषणभेदाद्धि तद्भेदः स्यात्, छत्रिदण्डिवत्।

कार्यकारणाधाराधेयसमवायात्तौ गुणकर्मभावौ भविष्यत इति चेत्, न, तयोर्गुणकर्मणोर्गुणकर्मभावनिवृत्त्या प्रथमद्रव्यभाव-

निवृत्तिः, तद्यथा य उक्तः कार्यकारणाधाराधेयसमवायात्तस्यैकत्वात् स द्रव्यभावेन सम्बन्धात्ते द्रव्यमेवैकं करोति, ततश्च द्रव्यलक्षणं नास्ति, क्रियावद्गुणवत् समवायिकारणमिति, तदभावान्न द्रव्यम्, न गुणकर्माणि तथा लक्षणानीति द्रव्यस्यापि द्रव्यभावनिवृत्तिः, एवं गुणकर्मणोरपि।

द्रव्यगुणकर्मणां द्रव्यत्वगुणत्वकर्मत्वादीनामाश्रयाभावाद-नुपपत्तिः, परस्परस्वरूपापत्त्या परस्परभावनिवृत्तौ द्रव्यादिषट्पदार्थ-निवृत्तिः, यच्चाधाराधेयभावभेदे संयोगवद्विवृत्तित्वात् समवायस्या-नित्यत्वं स्यादिति पूर्वपक्षं कृत्वा परिहारमाह *वैशेषिकः*, न, बहूनामेकत्वात्, न तु द्वयोर्द्वयोः सम्बन्धत्वं संयोगवत् समवाय-स्येति, एतेनापि सङ्करप्रसङ्गः, पदार्थलक्षणव्यवस्थानासम्भवात् षट्पदार्थनिवृत्तिर्वा, यत्तु प्रत्युक्तं नाधाराधेयनियमात् — यद्यप्येक एव समवायः तथाप्याधाराधेयनियमोऽस्ति द्रव्य एव द्रव्यत्वं गुण एव गुणत्वं कर्मण्येव कर्मत्वं सर्वत्र चैकः समवाय इति एतदपि प्रत्युक्तं सर्वत्र सर्वाधेयवृत्तौ सर्वाभिधानप्रत्ययसाङ्कर्यात् कथं द्रव्यादीनि प्रतिनियतानीति।

यत्तूच्यतेऽवगम्यतां तावत् यथा कुण्डदधिसंयोगे दध्येवाधेयं कुण्डमेवाधार इति नियमस्तथा द्रव्यादीनां समवायैकत्वेऽप्याधाराधेय -नियमः स्यादिति, इदमपि स्ववादेनैवोत्तरमार्गविधानं कृतं त्वया, न तु तथा सङ्कराभावो घटते, यदि दधिमधूदकादिभिर्बहुभिराधेयैः कुण्डाधारः संयुक्तो भवति ततः किमिति सङ्करो नास्ति? यदि सर्वात्मकः समवाय एक एव भवति तदा किमिति सङ्करो न स्यात्?

नापि च द्विवृत्तित्वनिवृत्तिः समवायस्य, यतः संयोगाद्वैधर्म्यमुच्यते सर्वत्रैव च द्रव्यद्रव्यत्वादिसमवाये द्विवृत्तित्वं त्वयैवोपवर्ण्यते, द्वयविशिष्टाभिधानप्रत्ययत्वात् कुण्डदध्यादिसंयोगवत्, यथा कुण्डदध्नोः संयोगे दध्ना कुण्डेन वा विशिष्टे तन्निमित्तमभिधानं प्रत्ययश्च दृश्यते तद्विवृत्तित्वञ्च तथा समवायेऽपि द्रव्यगुणयोः विशिष्टे तन्निमित्तमभिधानं प्रत्ययश्च स्यात् तद्विवृत्तित्वञ्च, तथा च समवायस्य संयोगवद्विवृत्तित्वादनित्यतैव।

यत्त्विदं स्वतत्त्वानुरूपप्रत्ययोत्पत्तेः परस्परव्यतिरिक्तैराधेयै-र्द्रव्यत्वादिभिराधाराणां द्रव्यादीनां नियमनं द्रव्येष्वेव द्रव्यमिति ज्ञानमित्यादि, अनेन स्वपक्षे प्रत्यक्षविरोध उद्भाव्यते त्वया, न हि समवायस्यैकत्वे व्यतिरेको नियमश्चास्ति, अविशिष्टत्वादतो न स्यात् द्रव्येष्वेव द्रव्यमिति ज्ञानम् — एवं ते द्रव्येष्वपि गुणज्ञानं स्यात्, गुणज्ञानकारणत्वात् समवायस्य, गुणवत्, एकत्वे योऽयं द्रव्यस्य द्रव्यभावेन सम्बन्धः स एव गुणस्यापीति प्राप्तं द्रव्यस्यापि गुणत्वम्, तस्य गुणभावेन सम्बद्धत्वाद्गुणवत् द्रव्यभावनिवृत्तिरिति । तस्य द्रव्यस्य गुणभावेन सम्बद्धत्वाद्गुणभूतस्य गुणानाश्रयस्याभावः, असति द्रव्ये कस्य गुण इति गुणभावनिवृत्तिः तल्लक्षणानुपपत्तेः क्रियावद्गुणवत्समवायिकारणमिति द्रव्यलक्षणम् द्रव्याश्रय्यगुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणमिति, ततश्च गुणेष्वपि द्रव्यज्ञानं स्यात् किं कारणम्? द्रव्यज्ञानकारणत्वात् समवायस्य, द्रव्यवत्, एकत्वे योऽयं गुणस्य गुणभावेन सम्बन्धः स एव द्रव्यस्यापीति प्राप्तं गुणस्यापि द्रव्यत्वम्, द्रव्यत्वाभिसम्बन्धाच्च तस्य द्रव्यत्वापत्तिर्गुणत्वत्यागश्च द्वे अनवस्थाने।

योऽयं गुणस्य कर्मत्वेन सम्बन्धः स एव द्रव्यस्यापीति प्राप्तं गुणस्य कर्मणश्च द्रव्यत्वम्, द्रव्यत्वाभिसम्बन्धाच्च तयोर्द्रव्यत्वापत्तिः गुणकर्मभावत्यागश्च, तस्य द्रव्यस्य गुणभावेन कर्मभावेन च सम्बद्धत्वात् गुणभूतस्य कर्मभूतस्य च गुणक्रियानाश्रयस्याभावः, असति द्रव्ये कस्य गुणः कर्म वेति न गुणकर्मणी तथा लक्षणे, तयोरलक्षणत्वादसत्त्वात् आश्रयोपलक्ष्यद्रव्याभावः, तस्मिंश्चासति निराश्रययोर्गुणकर्मणोरभावाद्द्रव्यस्य चाभावादाश्रयिणां द्रव्यत्वादीनां अप्यभावः, तथा कार्यकारणयोः..... गुणस्येत्यादिः।

ननु सर्वगतत्वात् समवायस्य स्वतत्त्वेनापि सम्बन्धात् द्रव्यभावः गुणभावः कर्मभावो वा सिद्ध्यतीत्यत्रोच्यते, नन्वत एव सङ्कर उच्यते, परतत्त्वेनापि सम्बन्धादतत्त्वमपीति सङ्करदोषाविमोक्षः, एवञ्च स्वविषयसर्वगतानि हि तत्त्वानि, समवायस्य सर्वगतत्वे तान्यधुना सर्वगतानि प्राप्तानीत्यभ्युपगमविरोधः, अतो द्रव्यगुणकर्मणां व्यवस्थितानामभावात् कथं द्रव्येषु द्रव्यज्ञानं? गुणेषु गुणज्ञानं? कर्मसु कर्मज्ञानमिति।

यदपि कुण्डदधिसंयोगवद्द्रव्यादीनामाधाराधेयनियम इत्युक्तं तदपि नैव, कुण्डदध्याधाराधेयभावसमवायानामप्येकत्वात् तदवस्थः सङ्करदोषः, यद्यसङ्करेण नियमेन वाऽर्थो वयमेव स्पष्टतरं ब्रूमः, समवायनिमित्तस्य तत्त्वस्य स्वत एवात्मप्रतिलम्भः, तयोश्च लोकसिद्धिवद्भेदः स्ववृत्तिप्रतिलम्भादेव, दधिकुण्डयोर्लोकसिद्धिवद्भेदाभावात् कारकशक्तित एव तु प्रतिपद्यते भेदसिद्धिः, तयोः संयोगैकत्वेऽप्याधारशक्तिः कुण्डस्य, आधेयशक्तिर्दध्न इत्यसङ्कीर्ण

आधाराधेयनियम इति, अवश्यञ्चैतदेवं त्वयाऽपि प्रतिपत्तव्यं यथा त्वमेवात्र न समानत्वात् इत्युत्तरमात्थ, समवायस्यैकत्वेऽपि कारकशक्तेरेव नियमभेद इत्युत्तरमात्थ द्रव्यत्वादिसमवायो न सर्वत्र किन्तु कस्मिंश्चिदेवेति।

यत्तूच्यते व्यङ्ग्यव्यञ्जकत्वभेदाद्द्रव्यद्रव्यत्वादीनां भेदो घट प्रदीपवत् सम्बन्धैकत्वेऽपीति न सङ्करप्रसङ्ग इति, एतच्च व्यङ्ग्यव्यञ्जकत्वं द्रव्यद्रव्यत्वादेस्तदा स्याद्यदि प्रदीपघटदृष्टान्तवत् पृथक् सिद्धं स्यात् न तु तदात्मभेदनियमः, सिद्धे हि तदाधाराधेय-भेदनियमोऽपि स्यात्, ततो न दृष्टान्तसाधर्म्यं भजत एतदिति नासङ्करः स्यादेवम् समवायस्यैकत्वेन व्यतिरेकनियमयोरभावात् तथा यदि य एव गुणकर्मभावाभ्यां सम्बन्धः स एव द्रव्यस्यापीति प्राप्तं गुणकर्मणोरपि द्रव्यत्वम् द्रव्यत्वाभिसम्बन्धाच्च तयोर्गुणकर्म-भावविनिवृत्तिरिति सर्वं प्रपञ्चनीयं यथास्वार्थमिति।

यत्पुनरिदमाशङ्कितं समवायैकत्वं पञ्चत्वव्यवहारेण विरुध्यत इति तदेवमेव ममापि प्रतिभाति। यत्पुनरिदं प्रत्युच्यते, न आश्रय-विशेषात्, भाववत्, जलचन्द्रवच्च तथा समवायस्यैकत्वेऽप्याश्रयाणां नानात्वादुपचारेण नानात्वव्यवहारो भविष्यतीति, इदं निर्मूलमेव, व्यङ्ग्यस्याऽऽधेयनियमादाश्रय एवासिद्धेः कुतस्तद्व्यङ्ग्यो व्यञ्जको वाऽऽधेयोऽर्थः? कुतो वाऽऽश्रयाणां वैचित्र्यम्? समवायैकत्वे षट्पदार्थनिवृत्तेः सुभावितत्वात्, अजलचन्द्रवदेकत्वात्, समवायस्य भावस्य च जलचन्द्रेण साधर्म्याभावात्कुतो नानात्वोपचारः? छाया-

मात्रत्वाच्च जलचन्द्रस्य, भावो वा कुत इत्यलमतिविकासिन्या सङ्कथया।

एवमेतदुभयमुभयभागित्यस्य नयस्य स्वरूपम्, यत्तत्सामान्यं तदपि विधीयते नियम्यते च, योऽपि विशेषः सोऽपि विधीयते नियम्यते च, सामान्यं भावः प्रकृत्यर्थः यत्तत्तेन भूयते सा सत्ता 'भू सत्तायां'[1] मिति पाठात् सामान्यम्, विशेषोऽपि प्रत्ययार्थः सः, तस्यैव भवितृत्ववाचिप्रत्ययार्थत्वात्, योऽसौ भवति स विशेषः सामान्यमपि भवनात्मकत्वात् भवनसामान्यमन्तरेण तस्याकर्तृत्वात् स एव प्रकृत्यर्थानतिक्रमेण वृत्तः।

सामान्यं प्रवृत्तिः द्रव्यमन्वयो धर्मी विधिर्भाव इति, विशेषोऽपि निवृत्तिः पर्यायोऽन्यत्वं धर्मो नियमोऽभाव इति, द्वावेतौ भावौ पूर्ववदेकमेवेदमित्येवंविधं भावमनापद्यमानौ सामान्यमपि सामान्यं विशेषश्च भवतः, विशेषोऽपि विशेषः सामान्यश्च भवतः, प्रवृत्तिः निवृत्तिरित्याद्युभयमन्योऽन्याविनाभाविभावः तस्य सतो भावः सत्ता, येन हि सता यथा भूयते सततनियमेनेति उभयोर्नियमो विधिश्च। यदि स्यात् ..... खपुष्पवत्।

एवं द्रव्यक्षेत्रकालभावैः घटपटघटान्तरगृहबहिःस्वपरक्षेत्रान्तर वर्त्तमानातीतानागतकालान्तरैः घटशिवकस्तूपकादिकपालादि पूर्वोत्तरभावैः वर्त्तमानयुगपदयुगपद्भाविभावभावान्तरैर्वा भावाभावाभ्यां भवतीति घटस्य सदसत्त्वम्, प्रतिवृत्तिवस्तुप्रवृत्तेः घटादि

१. धातुपाठः १

मृदादिकारणमपेक्षते निर्विशेषत्वे भावाभावत्वेनाविशेषः, कण्ठ-कपालादिभावाभावाद्यात्मना परस्परतश्चासत्सु भेदं प्रति वृत्तत्वादिति स्वावयवभेदेषु सदसत्त्वेन वृत्तिः, तद्भावाभावात्मको घटस्तदभावे न भवति, तदभावभावे च भवतीति, तथा घटपटादिद्रव्यक्षेत्रकाल भावसत्तायां घटसामस्त्येपि न कश्चिद्विशेषः वस्तुत्वात्, असामान्यवत्, यथैव ..... गुणावृत्त्यनावृत्तिभेदेषु विवक्षया चैष विशेष उभयोरपि तत्त्वात्।

तथा घटस्तावदस्त्येव, क्रियागुणव्यपदेशवत्त्वात्, पटरथवत् खपुष्पवैलक्षण्येन सर्वसर्वसमवायासत्त्वात्, योग्यस्यैव योग्येषु समवायात्, यथा रूपे घटोऽस्त्येव रूपं वा तदाधारो वा, एकैकस्मिन् वृत्तत्वात्, अथैवं न स्यात्ततोऽसावसन्नेवापद्यते सिकतास्विव अविद्यमानं तैलम्, अनिष्टश्चैतदेवम्, रूपादीनां प्रत्येकं सत्त्वात्, परस्परं व्यावृत्तात्मत्वाच्च रूपादयः सन्ति, न च तथास्थितौ घटो न भवति, तयोरितरेतराभूतयोराधारभूतस्य वा घटभावात् असामस्त्येन वा भावाभावात्मको घट इति।

ननु घटरूपादिवत् पृथिव्यपि मृदादिर्विशेषः, यथा स्वाधारेषु घटो भवति रूपादय एव वा, न निर्मूलः तथा पृथिव्यपि मृदादिषु तदात्मिका वा तस्या एव ते विशेषाः, नाभावः, इतरथा निर्मूलत्वाद्घटस्य रूपादीनाञ्चासत्त्वं खपुष्पवत्, न चैतदिष्टम्, तथा च रूपादयो मृदादयश्च भावविशेषा एव, एकभवनात्मकत्वात्, घटघटस्वात्मवत्, न चैवमविशेषः, तद्विशेष एव विशेषः पृथिवीसामान्ये सत्येवोर्द्ध्वविस्तृतत्वादिः घटोऽपि मृदेक-भवनात्मकाकारविशेषो भाव एव, न पटाद्यभाव इति।

ननु पृथिवीभवनमुदकाद्याद्यभवनम्, एतदेवास्य मूलम्, तन्मूलत्वात् किमित्यस्यासत्त्वापत्तिः?

न, उक्तोपन्यासवद्द्रव्यमिति भवनात् पृथिव्यादिद्रव्यभवनाविनाभावेनैव भवति, ननु द्रव्यमपि गुण इति न भवति, न, सदिति भवनात्, सत्त्वभवनव्याप्त्याभावस्यैव विशेष इति पूर्ववत्, यदि सदित्येव भवति तर्हि सत्त्वाविशेषात् द्रव्यगुणकर्मणामव्यतिरेकात् केन विशेषहेतुना सदेव सर्वमिति भवति? न द्रव्यमेव, गुणकर्मणोरपि सद्भावात्, गुणकर्माभावाद्द्रव्यं सदिति भवति, गुणकर्मणी च तदभावात्, यतस्तु पटः.....।

यद्येवं घटो भवतीत्युक्तेऽप्यभाव एवोक्तो भवति पटो न भवतीति तर्हि भवतीत्युक्तेऽपि न भवतीत्येवोक्तं भवति, परितो भवनाभावात्, खपुष्पवत्, ननु परितो वचनेन स्वात्मन्यप्यभवनमुक्तं भवति तथा ..... असत्त्वात् पक्षधर्मोऽनर्थत्वैकान्ते कण्ठः कपाले नास्ति ..... पटः कटादिर्न भवति नापि रूपादिरिति।

ननु परितोऽप्यभवनमेव त्वदुक्तं साधयत्यस्मदिष्टं भावमपि कटोऽपि कट इति भवन्नेव घटपटौ न भवतीति, भवन् गुण इत्यभवनात्, ननु गुणोऽपि भवन्नेव कट इति न भवति विशेषेण, न, द्रव्यमित्यभवनात्, अत्रोच्यते यदि न भवत्येव ..... ततो घटस्यापि ..... घट इति भवतीति।

नन्वेवं विकलादेशपक्षे भावाभावयोः परस्परापेक्षतयाऽव्यवस्थितत्वं परस्परावबद्धनौद्वयवदित्यत्रोच्यते तन्न व्यवस्थितोपकारि-

स्वरूपत्वात् धृत्यादिवृत्तजगदवस्थावत्, यथा नित्यत्वे पृथिव्यादीनां व्यवस्थितत्वं परस्परोपकारित्वञ्च धृतिसङ्ग्रहपक्तिव्यूहावकाशदान-क्रियाभिः सिद्धमेव, अनित्यत्वेऽप्यर्थभवनाविच्छेदात् स्वत्व-परत्वाभ्यां परस्परावबद्धव्यवस्थितोपकारिस्वरूपत्वान्नानवस्था तथा भावाभावयोरिति।

यदि तु नैवं तर्हि पटस्याभावे भाव एव त्वदिष्टविघात्यापद्यते, अभावतुल्यत्वात्, पटवत्, यदि च घटस्य भावः पटस्यापि भावः, भावतुल्यत्वात्, एवमन्तरितद्रव्यत्वसत्त्वादिगुणत्वादिसामान्य विशेषाभ्यां भावाभावात्मकता, ननु तस्य साक्षादेव भवनमभवनमु-भयतः, तथा तद्विपर्ययेण, नन्वत एवैवं घटो गुणत्वेन पटद्रव्यादि-त्वेन च साक्षान्न भवति घटद्रव्यत्वेन भवति, पटः पटद्रव्यत्वेन साक्षाद्भवति, न भवति गुणत्वेन घटद्रव्यादित्वेन च।

यदि त्वसौ पटत्वद्रव्यत्वाभ्यां न भवेत् न पटो भवेत्, पटत्व-द्रव्यत्वाभ्यामभवनात्, घटवद्गुणवद्वा, यतस्तु पटः इतराभ्यां न भवति तत एवेतरो न भवति यतश्च पटः भवति तत एवेतराभ्यां भवति, अवश्यञ्चैतदेवम्, अन्वयव्यतिरेकाभ्यामर्थस्यावधारणे प्रयोगस्य साफल्यात्, नीलोत्पलादिवत्, ... अतस्त्वन्यथा सतोऽप्यभाव एव स्यात् खपुष्पवत्।

कालतोऽपि चैकमेव भूतमभूतञ्च, कालाभेदात्, अतीताना-गताभ्यामसंमृष्टतत्त्वा मृत् शिवकादिना वर्त्तमानैककाला न तथा यथा लोको वदति पलालमग्निर्दहतीति, यदि तद्दह्यत एव तर्हि भिन्नावस्थस्य पलालस्य पूर्ववद् भस्मीकरणानुपपत्तेः, अन्तर्देशः पलालस्य दह्यते तच्च पलालमेवेति चेत् तथापि आकाशाद्यमूर्त्तद्रव्यस्य

देशस्यापि भस्मीकरणानुपपत्तेः, अथाकाशव्यतिरेकेण पलालमेव दह्यत इति तदपि न, च्विप्रत्ययान्तेन भस्मीकरणेनान्यो दाहो वर्त्ततेऽन्यच्च पलालमिति भिन्नार्थत्वबोधात्, अथाप्येकत्वं पलालस्येष्यते ततस्तस्य दाह्यता नास्ति भस्मत्वाभूतेः, तथा घटो भिद्यते इति न घटते कालभेदात् यदि तद्भिद्यत एव तर्हि भिन्नावस्थस्य घटस्य भिदानुपपत्तिः पूर्ववत्।

क्षेत्रतः शून्यं ..... तिष्ठति गच्छति ..... भावतोऽसंयतः प्रव्रजति कथं घटते? एवमेव भव्यः सिद्धयतीति, कुम्भं करोतीत्यादावप्याह निर्वृत्त्युत्तरकाले च कृतः कुम्भ इति न तथा घटते, यदि स कुम्भ एवानिर्वृत्तोऽपि न क्रियते, भूतत्वात्, अन्त्यमृद्वत्, अथाभूतः, न क्रियते सः, अभूतत्वात्, खपुष्पवत्, कथमसत् कुम्भ उच्यते वा, अथोच्येत सत्यं प्रागभूत इदानीं क्रियते, क्रियमाणश्च भवतीति, न, भूताभूतविकल्पद्वयानतिवृत्तेः क्रियाऽभावः, न कस्याञ्चिदप्यवस्थायां कुम्भो जायत इति का क्रिया? क्रियमाणमेव हि क्रियते मृदाहरणादि।

कथं तर्हि सोऽक्रियमाणः कुम्भो जातः? को वा ब्रवीति जात इति, अहन्तु लोकमेवायुक्तवादिनं मन्ये द्रव्यादितो जन्म विनाशसमत्वात् भावाभावभाव एव वस्तु, स भावाभावात्मकोऽर्थो न जायत इति किं शक्यो वक्तुम्? ओमित्युच्यते, विनश्यत्वात्, पूर्ववत्, न विनश्यतीत्यपि शक्यं वक्तुम्, जायमानत्वात्, उत्तरवत्, निर्वर्त्त्यविकार्यकर्मिकासु सर्वासु क्रियास्वेषैव वार्त्ता।

प्राप्यकर्मक्रियास्वपि च कासुचित्, कासुचित्तु हिमवदादित्य-श्रयणदर्शनादिषु नैषा वार्त्ता, कृतदग्धगतादिशब्दैश्चोक्तानां क्रियाणां कृतत्वानुपपत्तेः सुतरां प्रयोगाभावः, एवं तावद्युत्पन्नशब्दानां क्रियावाचिनां नाम्नां शुक्लादिगुणशब्दानाञ्च निर्विषयता, द्रव्य-शब्देष्वपि उक्तन्यायेन तदसंस्पर्शात् कुतः तत्त्वोपनिपातिवचनम्?

भूक्षेपादिवत्त्वभिधेयाभिमतार्थपर्यायमात्रपरमार्थत्वात्तदर्थ-प्रतिपत्त्युपायः शब्दः।

अत्र च अपोहः शब्दार्थः, यस्मादाह — *'शब्दान्तरार्थापोहं हि स्वार्थे कुर्वती श्रुतिरभिधत्ते'*[1] इति, प्रतिभा च वाक्यार्थः।

अयं पुनर्नयः ऋजुसूत्रदेशत्वात् पर्यायास्तिकः, ऋजु-प्रगुणं सूत्रयति तन्त्रयत इति ऋजुसूत्रः, सूत्रपातवदृजुसूत्र इति वा परि समन्तात् अयति गच्छतीति पर्यायः, स एवास्तीति मतिर्यस्य स पर्यायास्तिकः।

उपनिबन्धनमप्यस्य *'आता भंते! परमाणु पोग्गले णो आता? गोयमा! सिआ आता परमाणुपोग्गला, सिआ णो आता, से केणट्ठेणं भंते! एवं वुच्चइ-सिआ आता सिआ नो आता? गोयमा! अप्पणो आदिट्ठे आता, परस्स आदिट्ठे णो आता'*[2] इति।

इति सप्तमोऽरः उभयोभयभङ्गः समाप्तः।

---

१. २. भगवतीसूत्रम् श. १२-उ.१०-सू. १६-२४

अष्टमः उभयनियमारः

भावाभावभावनायां भावो विधिरभावो विशेषः, स च पराभाव इष्टो न स्वरूपस्यैव विशेष इति तदभावे स्वत्वं परत्वं चाव्यवस्थितं परस्वाभावविशेषतुल्यत्वात्, सति च स्वपरविशेषत्वाभावे भावाभावयोर्भेदेनोपनिपातो न स्यात्, स्वतोऽप्यसत्त्वं स्यात्।

किञ्चान्यत् — किमेतौ भावाभावौ द्वावपि प्रधानौ? भावः प्रधानं विशेष उपसर्जनम्? विशेषः प्रधानं भाव उपसर्जनम्? उभयमुपसर्जनं? वेति।

तत्र तावद्यदि द्वावपि प्रधानं ततोऽङ्गाङ्गिभावो न स्यात्, परस्परानपेक्षत्वात् तयोः, परस्परानपेक्षत्वं अपरार्थत्वात्, अपरार्थत्वं प्रधानत्वात्, विजिगीषुवत्, ततो विरोधादेकत्र प्रवृत्त्यभावाद्वस्तु भावाभावात्मकं न भवति, कथं तर्हि भवतीति चेत्? घटः स्वेनैव भवति, न पटादिभावेन नाभावेन वा, उक्तसङ्करविशेषासत्त्वदोषभयात्, पटोऽप्येवमेव।

शिबिकावाहकवत्तुल्यशक्तीनामप्यर्थानामङ्गाङ्गिभावदर्शनादिति चेन्न, शिबिकावाहकवत् सामान्यविशेषयोः प्रधानभूतस्यान्यस्य प्रयोजयितुरभावात्, उत्तरभावः प्रयोजयितेति चेन्न, तदाऽभूतत्वात्।

अभ्युपेत्यापि तदुत्पत्तिमुत्पन्नस्यापि तदात्मकत्वात् पूर्वमेवोत्तरः कथमात्मानमेव प्रयोजयितुमर्हति? भेदमभ्युपगम्यापि शिबिकावाहकवदस्वतन्त्रत्वादप्रवर्त्तकत्वम्।

अथ सन्मित्रवदन्यतरोपसर्जनप्रधानभावेन सामान्यविशेषयोरविशिष्टतेति चेन्न, वक्ष्यमाणैतन्नयमतादन्यतरोपसर्जनप्रधानभावाभावात्, अथोपसर्जनावेव भावाभावौ ततस्तयोः प्रधानेनान्येनावश्यं भवितव्यम्, तदभावे प्रवृत्त्यभावात्, दृष्टा हि प्रवृत्तिरबलयोर्बलवदाश्रया, एतावती च प्रवृत्तिः सामान्यविशेषयोर्भवन्ती भवेत्, सर्वथा साऽनुपपन्ना, भावाभावयोरेव पर्यायमात्रत्वात्, गुणगुण्यादिकल्पनास्वपि भावाभावत्वव्यतिरिक्तार्थाभावाद्द्वैधैव स्यात् तथा वस्तु परिक्ष्यमाणं चतुर्धाऽपि न घटते।

न च प्रधानेन विनोपसर्जनम्, भृतकादिरिव स्वामिना, न च प्रधानोपसर्जनभावेन विना दृश्यते भोक्तृचेतनाधिष्ठितशरीराद्यर्थाऽऽहारादिवस्तुप्रवृत्तिरिति तयोरेव प्रधानोपसर्जनतेति भवत् प्रधानं कर्तृसाधनं प्रत्ययार्थः, भाव उपसर्जनं भावसाधनं प्रकृत्यर्थः, प्रकृत्यर्थविवक्षायामपि कर्त्रर्थप्राधान्याद् भावसाधनत्वेऽपि कर्त्रर्थ एवोच्यते, यत्तेन भूयते यदसौ भवति भवनमापद्यते भवनक्रियामनुभवति स्वरूपप्रतिलम्भे गुणभूतं क्रियात्वं प्रतिपद्यमानोऽर्थो विपरिवर्त्तत इत्युक्तं भवति नटपरमार्थनृपत्ववत्।

घटः कर्ता तेन कर्त्रा भवित्रा भूयते, स एव भवतीति भवति, न भवनेन कर्त्रा भूयते, उपसर्जनत्वात्, तेन भवनेन भूयते चेत् खपुष्पमपि भवेत्, यद्यभवद्भवेत्, खपुष्पमपि भवेत्, भवनस्य द्रव्यत्वापत्तेः।

ननु भवनमविशेषं सामान्यमात्रं क्वचिदपि भवद् दृष्टम्, विशेषेण तु भवित्रा वशीकृतं दृष्टम्, सत्यमेतत्, वयमपि न ब्रूमो भवनं नास्त्येवेति, विशेषप्रधानं स्वोपसर्जनं तु दृष्टमिति।

क्रियाघटव्रीहिदेवदत्तादौ कारकरूपादिमूलादिबालादिभेदं भवनसामान्यं भेदप्रधानं दृश्यते लोके विशेषेणेत्युभयं नियम्यते सामान्यमुपसर्जनमेव विशेष एव प्रधानमिति, न यथा पूर्वत्र, इह स्वरूपं घटो विशेषो न पटाद्यभावः, स एव प्रधानं भावः, सामान्यं क्रियाभवनं प्रकृत्यर्थ उपसर्जनमप्रधानम्, शिबिकावाहकयानेश्वरयानवदिति विशेषभवनमेव भावभवनमिति पर्यायनयभेदोऽयं सर्वद्रव्यार्थभवनप्रतिपक्षभूतः।

तत्र नामद्रव्यार्थभवनं तावत्--स्वरूपतो नमयति प्रह्वीकरोति सर्वमात्मस्वभावेनेति नाम कारणं द्रव्यं तदेव कार्यं नासत्, भवनात्मकत्वात्, स हि शब्दो भवनात्मकः, भवनान्यवस्था विशेषाः, स्वप्नादिवत् पुरुषस्य बालादिवद्वा, पिण्डादिरूपादिवद्वा घटस्य।

घटस्य हि कुम्भकारचेतना कारणं, नामूर्त्तात्मा, ततः किं कुम्भकारशरीरं कर्त्तृत्वात् मूर्त्तत्वात् मृदाद्यात्मकत्वाद्घटस्य मूर्त्तस्य

कारणं सम्भाव्येत? यदस्तु तदस्तु कार्यं कारणञ्च सर्वथा चैतन्यरहितस्य मूर्त्तद्रव्यस्य मूर्त्तिरहितस्यापि वा चेतनस्य कारणत्वा -सम्भवान्मूर्त्तचैतन्यात्मकः कुम्भकारः, सर्वमपि चैतन्नामैव।

कुम्भकारोह्यात्मा तत्सन्निविष्टशब्दानुविद्धचैतन्यस्व रूपत्वात् शब्दात्मकः, तदनुरूपान्तःशब्दानुविद्धचैतन्यप्रेरितपिण्डशिवकाद्यनु -क्रमप्रवृत्तयोऽपि तदात्मिकाः, तत्प्रवृत्तित्वात्, मृत्प्रवृत्त्यात्मक-घटवत्, तद्भावे तद्भावात्, तदभावे न प्रवर्त्तते, तन्तुवायवत्।

न हि काचिदपि चेतना अशब्दाऽस्ति, अनादिकालप्रवृत्त-शब्दव्यवहाराभ्यासवासितत्वाद्विज्ञानस्य, चैतन्यमेव हि पश्यन्त्य-वस्था मध्यमावैखर्योरवस्थयोरुत्थाने कारणं नामेत्युच्यते, कारणात्मकत्वात् कार्याणाम्, यथोक्तं, *'वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम्'*[1] इत्यादि।

येऽप्यव्यक्तचेतना जङ्गमाः स्थावराश्च तेऽपि शब्दाभ्यासवासना जनितान्तर्निविष्टस्वानुरूपचैतन्याः, हिताहितप्रवृत्तिव्यावृत्तिवृत्तत्वात्, कुम्भकारवत्।

भगवदर्हदाज्ञापि तथोपश्रूयते- *'सव्वजीवाणं पि य णं अक्खरस्स अणंतभागो निच्चुग्घाडिओ'*[2] इत्यादि।

---

१. वाक्यपदीयम् काण्डः १ श्लोकः १४३

२. नंदी सूत्रम् ५१

अतो यथैव कुम्भकारकरणशब्दचेतनावैचित्र्यवृत्तितारतम्याध्यासनसमुपहितरूपा घटता नाम्नःसाक्षाद्भवति तथा तथा तत्प्रभवमेव कुम्भकारमनुष्यशरीरं मृदादि च, शब्दोपयोगसम्बन्धात् योगवक्रताविसंवादनादेः, रूपादिमदर्थविरचनात्मकत्वात् कुम्भकार-कार्यवत्, यथा हि घटपिठरादिकुलालकार्यं तेन तेन मृन्मर्दनादिप्रकारेणान्तःसन्निविष्टशब्दानुविद्धकुम्भकारप्रवृत्त्या निर्वर्त्तितत्वात् तत्प्रभवं तदात्मकं रूपादिमदर्थविरचनात्मकत्वात् तथा कुम्भकार-शरीरमृदाद्यपि।

नाम्न एव च प्रभावात् तत्प्रेरितप्रयत्नपरिस्पन्दजनितनिष्पत्तिवस्तुनो वस्तुत्वं लभ्यते न बहिर्निमित्तापेक्षम्, तत्प्रवृत्तीनामपि स्थाने स्थाने शब्दचेतननियोजितानामात्मलाभात्तदात्मत्वम्, इतरथा स्वरूपप्रवृत्तिरेव दुर्लभा, कुतो वस्तुत्वम्? तस्मात् सर्वकारकसान्निध्येऽपि कर्तुरौदासीन्ये तदभावे वा क्रियायाः कार्यस्य चाभावाच्छब्दप्रभावप्रभवं सकलं जगत्, तथा हि स्कन्दरुद्रेन्द्राः स्कन्दनरोदने-न्दननिमित्तानुपपत्तावपि जीवस्याजीवस्य वा निमित्तनिरपेक्षाः संज्ञाः क्रियन्ते।

प्रत्यक्षत्वात् गोपालादय एव तद्भूता मुख्यया वृत्त्योच्यन्ते, ते तु भवकार्तिकेयादयः समयान्तरप्रसिद्धशब्दपरिकल्पगम्या न सर्वलोकप्रसिद्धशब्दाभिधेयाः, तस्मात्त एव तेषु प्रत्यक्षाः, येऽपि च ते स्कन्दादयस्तेष्वेकस्मिन्नितरयोरपि संज्ञयोः प्रवृत्तिनिमित्तसद्भावात् त्रयोऽपि परस्परसंज्ञानिर्देश्याः सङ्कीर्णाः स्युः, अन्यतमनिमित्तमात्रतत्त्वयाऽवधृतया संज्ञया विवक्षितेष्टार्थव्यवहरणात्तु

अन्तर्निविष्टशब्दानुविद्धचैतन्यनिमित्तः संज्ञाव्यवहारोऽभ्युपगतो न बहिर्निमित्तं प्रत्यक्षम्।

निमित्तप्रत्ययेन संज्ञाप्रवृत्तेश्च यावत् सम्भवं संज्ञासन्निवेशे सर्वव्यपदेशभाक्त्वात् भावकादयोऽपि ते प्राप्ताः, तथा च यावत् किञ्चित् भवननिमित्तग्रस्तं तस्य सर्वस्येन्द्रस्कन्दादिरर्थः, तद्वाचिनश्च पर्यायशब्दा एव, घटकुटशब्दवत्, एवं तावत्सर्वसर्वत्वमविशेषात्।

विशेषतोऽपि सम्भवघटनादिस्कन्दनादित्वाच्च सर्वसर्वत्वम्, कतमद्द्रव्यं कतमेन निमित्तेन नाभिधीयते?

एवमपि तु स्थिते सर्वसर्वाभिधानलक्षणाव्यवस्थाव्यावर्त्तनार्थं बहिर्निमित्तनिरपेक्ष संज्ञामात्रसन्निवेशिनियतार्थाभिधायिस्कन्दादित्वमभ्युपगन्तव्यम्, एवं हि सङ्केतमात्रत्वाच्छब्दार्थसम्बन्धस्य मुख्यार्थाः सर्वदेशभाषा इत्येतदयत्नसिद्धम्, नियतनिरपेक्षत्वात् सङ्केतस्य, स्वोपयोगप्रतिपादनसमर्थत्वाच्च शब्दानाम्, डित्थादिवत्, अत एवेदमप्यभियुक्तानां स्मरणमुपपन्नं *'अनेकार्था धातवः'* इति .... द्दश्यतामिति।

चेतनाचेतनभेदस्यास्य जगतो भावकं नाम, तस्मादेव घटो भवति, घटस्य द्रव्यं कारणम्, घटं भावयति नाम, घटस्य ततो भवनात् यद्यतो भवति तत्तस्य कारणं दृष्टम्, यथा मृत्, अनया यथा घटस्तथा नाम्ना, घटक्रियात्मकत्वं वा भावकत्वम्, तस्माद् घटं भावयति नाम, रूपाद्युपयोगभवनं वाऽन्तर्निविष्टशब्दानुबद्धम्,

रूपणाद्रूपम्, रस्यत इति रसः घ्रायत इति गन्धः श्रोत्रग्रहणं शब्द इति लक्षणात् रूपादिरपि शब्दो भवति, तस्मान्नामद्रव्यस्यानुपसर्जनतैव।

अस्यापि नियमः, प्राधान्येन तु विशेषो नियत इत्युक्तः, अर्थार्थत्वाच्छब्दप्रयोगस्यार्थः प्रधानं न शब्दः, अर्थस्यापि ज्ञानोत्पत्तिनिमित्तत्वात् ज्ञानमेव प्रधानम्, न च ज्ञानशब्दयोरैक्यम्, प्रत्यक्षप्रतीतिविरोधाभ्याम्, प्रत्यक्षमेव हि न नाम्नो घटादिर्भवति, ततस्तु श्रोत्राभिघात एवोत्पद्यते।

तथा च यदि शब्दस्य घटोत्पत्तौ द्रव्यत्वं स्यात्ततो घटार्थिनो भवतु घट इति प्रब्रवीरन्, अरिविनाशार्थिनश्च राजानः परबलमेति मा भूदिति वा ब्रूयुः, तस्मात् प्रवृत्तिनिवृत्तिकारणमर्थार्थिनाञ्च क्षायोपशमिको भावः, सोऽपि द्रव्यार्थतां हित्वा भवति, क्षणिकत्वात्, तेनापि विशेषेणैव भूयते, उक्ता शब्दार्थ व्युत्पत्तिर्वस्त्वर्थश्च, स हि भावागमः, ततः उत्थाप्यते शब्दः, तस्माच्छब्दो द्रव्यागमः, तथा ह्याहुः *'आगमतो जाणए अणुवउत्ते दव्वसुतं'*[1] इति।

तत एव हि चास्योत्पत्तिः, प्रवृत्तोऽपि शब्दः परतन्त्रः, ज्ञानार्थत्वाच्छ्रोतरि प्रवृत्तेश्च, तादर्थ्येन ज्ञानं प्रधानं शिबिकावाहकयानेश्वरयानवत् अतस्त्वदुक्तिवत् उपयोगविशेषभवनं प्रधानम्, तत्कार्यत्वाच्छब्दस्य।

१. अनुयोगद्वारसूत्रम् ३२

अथोच्येत सामान्यमविशेषः तद्भवनमात्रम्, उभयोः परस्परकारणत्वाविशेषत्वादित्यत्रोत्तरम्, अथ कस्मात् उपयोग एव नामत्वमापद्यते? उपयोगत्वप्राप्तेर्नाम्नः सर्वत्र विशेष प्रधानत्वम्, तस्यापि वा नामशब्दस्य उरःप्रभृति द्रव्यमिति नामद्रव्यार्थं हित्वा द्रव्यद्रव्यार्थोऽङ्गीकृतः, ततो मूर्त्तद्रव्यकारणत्वाभ्युपगमः ते विरोधाय आपद्यते, मूर्त्तममूर्त्तस्य हि द्रव्यं न भवति नामशब्दो मूर्त्तः कुड्यादि प्रतिहतगतित्वात्, यथा लोष्टादि, तन्नाम नोपयोगस्य द्रव्यम्, मूर्त्तत्वात्, मृद्वत्, वैधर्म्येणाकाशवत्, उक्तं हि

न हि मूर्त्तममूर्त्तत्वं नामूर्त्तं याति मूर्त्तताम्।
द्रव्यं त्रिष्वपि कालेषु नात्मभावं जहाति हि॥

नन्वन्योन्यानुगतस्वरूपत्वात् निर्वृत्त्युपकरणेन्द्रियज्ञानतन्वात्मद्रव्यवत् घटाकाशवच्च, द्रव्यं कारणं ज्ञानस्य द्रव्येन्द्रियं मूर्त्तममूर्त्तस्य ज्ञानस्य द्रव्यं शरीरादि कारणं भवान्तरात्मनः, घटश्च घटाकाशस्य।

आगतं तर्ह्येतद्योऽर्थो द्रव्यं विशेषो वा योऽस्तु सोऽस्तु सर्वथाऽसावस्वतन्त्रो विशेषेण ज्ञानेन तथा तथा भाव्यते सर्वात्मनेति प्रधानं विशेष एव भवतीति, तत्र यदि सेन्द्रियाणि ज्ञानानि तानीन्द्रियकृतत्वादज्ञानानि स्युः, केवलमेवैकं ज्ञानं स्यात्, आत्मानश्च चेतनत्वात्, स्वतन्त्राः यदि तच्छरीरं स्वतन्त्रश्च कर्त्ता, ततश्चाशरीरेण शुद्धेन सिद्धकेवलिना कृतं कर्मान्वेष्यं स्यात्, अनिष्टं च न रागिकृतम्, इष्टमपि स्यात्, आत्मनोऽनन्यत्वात्,

तथाऽऽकाशघटयोरनावृत्त्यावृत्त्यात्मकयोरावृत्त्यनावृत्त्यात्मकघटाकाशभवने घटाकाशमिति स्यात् तत्तु त्वन्मतेनाकाशमेवामूर्त्तं तद्विपरीतो घट इति कुतो घटाकाशमुदाहरणं घटते? एवं द्रव्यस्य भवने दृष्टान्तस्य विपर्ययसाधनत्वात् कुतः साऽन्योऽन्यानुगमरूपता? द्रव्यस्य सदा रूपापरित्यागात्।

अन्यरूपानुगमात्तु चेतनाचेतनयोरात्मभावत्यागाद्द्रव्यस्य सामान्यभवनमुपसर्जनीकृत्य भवदेव च भवति तस्मात् केनचिद-विशेषः, तदसत्त्वात् सामान्यासत्त्वमापन्नम्, तथाच विशिष्टे स्वविषयेऽप्येकवृक्षादिभवने द्विचनादिविशेषान्तरनिरपेक्षेणैव तेन भवितव्यम्, न पुनस्तथा भवति सः, नक्षत्रपुनर्वस्वादि-समानाधिकरणवचनलिङ्गादिभेददर्शनात्।

यद्येकं न तर्हि द्वयादि, यदि द्व्यादि नैकम्, विरोधित्वादेकत्व-द्वित्वयोरित्यादि सर्वं यथा विषयं प्रतिविधातव्यम्, घटपटादिव-दन्योऽन्यस्वरूपापत्तिर्नास्ति विशेषाणां सामान्यात्, दृष्टा च नक्षत्रपुनर्वस्वादिषु, प्रतीतेस्तादर्थ्यमेवेति चेन्न, प्रत्यवयवप्रतीतेरेव वयमपि ब्रूमः *'द्व्येकयोर्द्विवचनैकवचने, बहुषु बहुवचनम्'*[1] इति, यद्येकवचनान्तः शब्दः अभिधानार्थेनाप्येकेन भवितव्यम्, न द्वयादिना, अथ द्वयादिः नैकवचनेन शब्देन भवितव्यमुक्तवत्, इदन्त्वभिधानाभिधेयप्रत्यययोर्विसंवादात् प्रतीतिविरुद्धम्, कुमार-ब्रह्मचारिपितृत्ववत्।

१. पाणिनि १-४-२१,२२

लक्षणं हि नाम प्रकृतिप्रत्ययादिविभागान्वाख्यानम्, तद्धि लक्ष्यान् शब्दान् व्यवस्थापयामीति, तेषाञ्चाव्यवस्था, प्रकृत्याद्यर्था यथार्थत्वात्, कुतस्तदन्यलक्षणत्वे प्रतिपत्तिः शब्दव्यवस्था च? अविभक्तभावितस्वलक्षणविषयत्वात्, अविभक्तभावितस्वलक्षणविषयस्थाणुपुरुषप्रतिपत्तिव्यवस्थावत्, तथा लक्ष्याप्रतिपत्त्यव्यवस्थाभ्यामभिधानाभिधेयविषयप्रत्ययद्वयविसंवादः।

स वृक्ष आस्त इति पुरुषविषयप्रकृतिप्रत्ययसंवादेन स्वयं प्रतिपद्य पुनरेहि मन्य इति तद्विपरीतप्रतिपत्त्या प्रकृत्यादिलक्षणालक्षणीकरणं प्रतिपत्तेश्च तद्वदेवाप्रतिपत्तित्वम्, यदृच्छाप्रतिपत्तित्वात्। अत्र प्रयोगः — 'एहि मन्ये रथेन यास्यसि न हि यास्यसि यातस्ते पिते'त्यादिवाक्यमयथार्थमगमकमसाधु प्रस्तुतक्रियासामानाधिकरण्यविसंवादात् 'त्वं यामि, अहं यासी'ति प्रयोगवत्; प्रस्तुत प्रत्ययविसंवादाद्वा, 'देवदत्तो भूयत' इति यथा, अङ्गीकृतपुरुषार्थवैयधिकरण्यवृत्तत्वात्, 'त्वं पचती'ति यथा।

अत्र प्रत्ययपरप्रकृतिनियमात् प्रयोगकाले केवलयोः प्रकृतिप्रत्ययोरसम्भवः, तथाऽनर्थकत्वम्, भूलतिप्शबादीनाम्, काकवासितवत्, शिक्षणार्थं तु चित्रभक्तिबिन्दुविन्यसनवत् प्रकृतिप्रत्ययार्थोपदर्शनं पृथक् क्रियते, अपृथक्सिद्धसमुदायाथप्रतिपत्त्युपायत्वात्, एवमेव कृत्वोक्तम् — *'प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः तयोः प्रत्ययार्थः प्रधानम्'*[1] इति, अत एव च *'प्रकृतिपर एव*

१ महाभाष्यम् ३-१-६७

प्रत्ययः प्रयोक्तव्यः, प्रत्ययपरैव प्रकृतिः"[1] इति । एवञ्च प्रत्ययार्थं नापैति प्रकृतिः, तत्परत्वात्, अत एव च मन्यतेः एहिशब्दप्रयोग प्रस्तुतसामानाधिकरण्यत्यागेनास्मत्समानाधिकरणोत्तमैकवचन-प्रत्ययोऽयथार्थाभिधानम् ।

प्रत्ययपुरुषायथार्थत्वेऽप्येषैव भावना इत्यर्थत्रयविषयम-यथार्थत्वम्, इदञ्च द्रव्यतः, तथा घटपटादिशेषोपपदविषयो भिन्न-व्यवहारो निराक्रियते ।

प्रहासादिदमसत्यमेवेति चेत्, बह्वेव तर्हि लक्षणालक्षणीकरणं लक्ष्यालक्ष्यीकरणं प्रतिपत्तेश्चाप्रतिपत्तित्वम्, सर्वस्यासत्यत्वात्, तद-सत्यत्वं प्रत्याय्यार्थविपर्ययवृत्तत्वात् प्रहासोक्तिवत्, पर्वताधिकरण-कर्मवचनासत्यमतिश्च, इह पर्वते वसतीत्येतस्मिन्नधिकरणार्थे पर्वतमधिवसति अध्यास्त इत्यादिकर्मत्वायुक्तेः, *'आधारोऽधि-करणम्'*[2] ..... अन्यस्यानाधारत्वाद्वा, एतच्च क्षेत्रतः, कालतश्च 'अग्निष्टोमयाजी पुत्रोऽस्य जनिते'ति 'भूतमनागतमि'ति च विरुद्धार्थम्, 'शतभिषजो नक्षत्रं गोदौ ग्रामः पुनर्वसू पञ्चतारकाः देवमनुष्या उभौ राशी', इत्यादिषु भावतोऽयथार्थता । एवञ्च न वाचकता शब्दस्य, न वाच्यताऽर्थस्य, द्रव्यक्षेत्रकालभावविषय-विसंवादवृत्तत्वात्, स्वोक्तार्थनिराकरणार्थत्वात्, उन्मत्तप्रलापवत् ।

ननु पुष्यस्य देवविशेषविषयनक्षत्रतारासामान्यार्थत्वात् घटविशेषविषयमृत्सामान्यार्थवत्सामानाधिकरण्यमुपपन्नम्, उक्तं हि

१. महाभाष्यम् ३-१-२ २. पाणिनि १-४-४५

'यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावद्व्यवहारकाले।
सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद्दुष्यति चापशब्दैः ॥'[1]

इति विवक्षापूर्वकत्वाच्छब्दप्रवृत्तेर्विषयविशेषपरिग्रहणे साधुताऽसाधुता च शब्दानाम्, गावी गोणी गोता गोपोतलिका इत्यादयो गमका अगमकाश्च, यद्येवं तर्हि कया विशेषविवक्षया आप इति दारा गृहा सिकताः? इति।

नित्यमपि बहुवचनं बह्ववयवृत्तत्वादिति चेत्, एकघटेऽप्यत एव नित्यं बहुवचनं प्राप्तम् बिन्द्वादाविवापः, अप्सु वैकवचनं स्यात् नित्यमपि, बह्ववयववृत्तत्वाद्घटवत् अतिशय्येकात्मनिरासेन त्वया विशेषविषयप्रयोगो गवादिवत्साधुरिष्टः सोऽपि तत एव न्यायाद्व्यभिचरति, सोऽप्शब्द एकवचनान्त एव स्यात्, बह्ववयवात्मकत्वेऽप्येकमिति गृहीतत्वात्, तन्तुपटवत्।

तथा तटस्तटी तटमित्यत्र कतमं वा विशेषमुपादाय लिङ्गभेदः? कतमद्वा सामान्यमतिदिश्यते विशेषप्रतिपादनार्थम्? ननु स्थितिप्रसवसंस्त्यानविशेषविषयो लिङ्गभेदः, न, तटतटीतटानां विषयविशेषो नास्त्यभिन्नस्वरूपत्वात्, घटघटस्वात्मवत्, गोचरविशेषोपपत्तौ वा सोऽपि विशेषो नास्ति, प्रसवस्य संस्त्यानात्मकत्वात्, स्त्रीवत् संस्त्यानस्य प्रसवात्मकत्वात् पुंवत् संस्त्यानप्रसवयोः स्थित्यात्मकत्वात् स्त्रीपुंसवत्, न तटी संस्त्यानम्, प्रसवात्मकत्वात्, तटवत्, न तटः प्रसवः, संस्त्यानात्मकत्वात् तटीवत् न तटं नपुंसकम्, स्थित्यनात्मकत्वात् तटीवत् अथ च.....

१. महाभाष्यम् १-१-पस्पशाह्निके

तटीवत्, एवं लिङ्गाभाव एव तटत्वादीनां, प्रसवादि धर्माभावे गोचरविशेषाभावात्।

ततश्चासत्त्वमप्येषां मूलोद्वर्त्तनेनाक्रियाव्ययत्वे सत्यलिङ्गत्वात् खपुष्पवत्, अथोच्येत नन्वेवं प्रपञ्चेन संस्त्यानात्मकत्वादिना त्रिलिङ्गत्वं व्यवस्थापितमेवेत्येतच्च न, लिङ्गव्यवस्थापनहेत्वभावात्, एकार्थे सन्निधिभावे वा स पुमानेव न स्यात् स्त्रीत्वाद्देवदत्तादिवत्, न स्त्री पुंस्त्वात्, ततोऽस्त्रीपुंसौ नपुंसकत्वात्, पर्वतनदीभवन-विषयत्वात्त्रिलिङ्गत्वं विशिष्टविषयमित्येतच्च न, पुमादिभिन्नबाह्याद्येक-लिङ्गत्वात्, अर्धर्चादिषु च विशेषादर्शनादपरिहारात्।

नन्वेकस्य दृष्टं त्रिलिङ्गत्वं भूतिर्भवनं भाव इतीति चेन्न, यदि वयं दृष्टत्वादेव त्वादृशा इव प्रतिपद्यामहे तदा किं विवादेन, तदेव दुर्दृष्टम्, अपि चेदं साध्यं, यथार्थाभिधानशब्दनयमतेन भिन्नत्वात्, अपि च भावो वेत्येतदपि साध्यम्, प्रकृत्यर्थस्य न्यग्भूतत्वात्, कर्त्रर्थ-स्यैव सद्भावात्, अपि चैकस्य त्रैलिङ्ग्यायुक्तिविचारे नानालिङ्ग-नानाशब्दोपन्यासोऽतिविस्पर्धते, एकभवनासत्त्वादर्थैकत्वमपि नैव, सामान्यभवनस्यैकस्य न्यग्भूतत्वात् विशेषभवनस्य भूत्यादि-विशिष्टैकरूपत्वात् तस्मादृष्टान्तः।

यदप्युक्तं नक्षत्रतारार्थातिदेशविषयो नक्षत्रं भवति पुष्योऽयं देवदत्त इति, वृक्षोऽर्थो भवतीति यथा वृक्षस्यार्थेनातिदेशस्तथा नक्षत्रादिना देवदत्तस्येति, अत्र देवदत्तस्यैवं नक्षत्रादिनाऽतिदेशो न भवति नक्षत्रादीनामतद्विषयत्वात्, अर्थेन च सता वृक्षोऽतिदिश्यते प्रत्यक्षः सन् परोक्षेण धर्मेण असता वा, वृक्षस्यार्थविषयत्वात्।

ननु पुरुषोऽपि ..... गवादि गोण्येति, सत्यमुच्यते शब्दो हि तेन प्रकारेण वाच्यविशेषं संवादिनं ब्रवीति न तु तद्गतानां विशेषाणां विरोधेन यथा स्त्रीपुंनपुंसकादीनां एकद्विबहुत्वादीनाञ्चैकार्थत्वेन..... संवादव्युदसनवृत्तिरिति।

नन्वेवमाख्यापुराख्यानकर्मणि प्रकृत्यर्थस्याख्येयार्थगतविशेषैरवश्यम्भाविभिर्विना तदाख्यानासम्भवान्नान्तरीयकसङ्ख्यालिङ्गादिविशेषणोपादानम्, इतरथाऽर्थोपदेशाभाव इत्येतच्च न, क्रिया-व्युत्पत्त्यादिभेदेन व्याख्यानोपपत्तेः उक्तं हि-- 'क्रियाकारकभेदेन .....' दिवुक्रीडाविजिगीषा..... स वृक्षः, इहापि..... क्रियाकारकभेदाभ्यां पुष्यति..... खपुष्पं,..... उपोद्घात ..... भेदलक्षणाया इति व्याख्यायाः अधिकरणयोगपदार्थ..... का कथं वाऽनुपपत्तिलिङ्गाद्यभेदेऽपि, इतश्च व्याख्यानात् लिङ्गाद्यभिन्नार्थगतिरुपपद्यते, यथाऽऽह- 'वाग्दिग्भूरश्मि..... .....'[1] ..... दृष्या वेति।

अत एव व्याकरणं लक्ष्याधिगतये लक्षणम्, तस्माद्व्याकरणाध्ययने यत्न आस्थेयः, उक्तं हि — '.....।

अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम्।
तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते॥[2] इति

यदप्युच्येत स्त्रीपुंनपुंसकव्यक्तीनां विरुद्धानां पुष्यनक्षत्रतारार्थानामयुक्तमैकाधिकरण्यं पुनर्वसू नक्षत्रमित्यादिसङ्ख्या-

१. मूलं मृग्यम् २. वाक्यपदीये काण्डः १ श्लोकः १३।

विरोधाद्युक्तेः, विज्ञानमपि तद्विषयमयुक्तम्, इत्यादिवचनखेदोऽयमकस्मात् क्रियते त्वया, अभिजल्पो हि शब्दार्थः, स च शब्द एव, न लिङ्गादिविचारखेदेनार्थोऽसद्विषयत्वात्, खपुष्पविषयविचारखेदवत्,

'सोऽयमित्यभिसम्बन्धात् रूपमेकीकृतं यदा।
शब्दस्यार्थेन तं शब्दमभिजल्पं प्रचक्षते॥

तयोरपृथगात्मत्वे रूढेरव्यभिचारिणि।
किञ्चिदेव क्वचिद्रूपं प्राधान्येनावतिष्ठते॥

लोकेऽर्थरूपतां शब्दः प्रतिपन्नः प्रवर्त्तते।
शास्त्रे तूभयरूपत्वं प्रविभक्तं विवक्षया॥'[1]

दर्शनोत्प्रेक्षाभ्यामर्थमभिधेयत्वेनोपगृह्य तत्र न्यग्भूतस्वशक्तिर्बुद्धौ परिप्लवमानोऽयमित्थमनेन शब्देनोच्यत इत्यान्तरो विज्ञानलक्षणः शब्दात्मा श्रुत्यन्तरस्य बाह्यस्य ध्वन्यात्मकस्य प्रवृत्तौ हेतुः, सोऽभिजल्पाभिधेयाकारपरिग्राही बाह्याच्छब्दादन्य इति भर्तृहर्यादिमतम्।

वसुरातस्य भर्तृहर्युपाध्यायस्य मतन्तु स च स्वरूपानुगतार्थ रूपमन्तरविभागेन सन्निवेशयति,

'अशक्तेः सर्वशक्तेर्वा शब्दैरेव प्रकल्पिता।
एकस्यार्थस्य नियता क्रियादिपरिकल्पना॥'[2]

१. वाक्यपदीयम् काण्डः २ श्लोकाः १३०-३२ २. तत्रैव, श्लोकः १३३

इहैकमेवार्थवस्तु एकस्यां पचनावस्थायामेकस्मिन् मुहूर्त्तादौ काले बहुभिर्वक्तृभिर्युगपदेकेन वा पर्यायेण वक्त्रोच्येत विरुद्धैर्धर्मैः, तद्यथा — ओदनं पचति, पाकओदनस्य, पाकं निर्वर्त्तयति, करोति निर्वृत्तिं पाकस्य । तत्र यदि अर्थवस्तु शब्देनोच्येत तर्हि विरोधात् कथमोदनस्यैकस्य युगपत् क्रमेण वा कर्मत्वं सम्बन्धित्वं पाकं निर्वर्त्तयति पाकस्य निर्वृत्तिं करोतीति कर्मत्वं शेषरूपत्वं च पाकस्य? तस्मादविद्यमाना वा शब्दस्यैव शक्तयः बुद्ध्या बाह्यार्थनिरपेक्षं समध्यारोप्यन्ते सर्वशक्तियोगे वाऽर्थार्थत्वाच्छब्दप्रयोगस्य शब्दः प्रतिनियतमेवार्थं प्रकाशयति, तत्राशक्तिपक्षे वस्तुगता शक्तिः अप्रयोजिका शब्दप्रयोगस्य, खपुष्पवदसत्त्वात्, न ह्यस्यावस्तुविषयाभ्यां सन्निधानासन्निधानाभ्यां किञ्चिदपि प्रयोजनमस्ति प्रयोजने सति प्रयोगः स्यात्, तस्यामसत्यामपि बाह्यार्थशक्तौ मत्पक्षे सम्भवत्येव शब्दप्रयोगः, योग्यशब्दनिबन्धना हि विवक्षा अनपेक्ष्यार्थगतशब्दं बुद्धौ शक्तिमध्यारोपयति ।

सर्वशक्तिपक्षे तु मम विशेषणव्यवस्थितां कुतश्चिदनादेयां अव्यतिकीर्णामनन्यशब्दवाच्यां तां तां शक्तिमुपादाय स्वविषयनियताः शब्दाः प्रयुज्यन्ते प्रयोगसाफल्यमस्तीति, तस्मादुभयोरपि पक्षयोः शब्दप्रयोगसाफल्यं सम्भवतीति ।

अत्र वयं ब्रूमः, इदमप्यस्मदभिप्रायसाधनफलम्, योग्यशब्दनिबन्धना हि विवक्षाऽनपेक्ष्यार्थगतशब्दं बुद्धौ शक्तिमध्यारोपयतीति, तत्र वस्तु तावदनेन त्वद्वचनेनैव शब्दादन्यत् सिद्धम्, तच्च तदिदंसम्बन्धात्मकशब्दार्थयोः शब्दशक्तिबुद्धिविवक्षाख्यस्यार्थस्य

आधारभूतम्, योग्यशब्दाच्च बाह्यार्थसिद्धिः, योग्यानुरूपः शब्दः केनचिदर्थेन युज्यते, तस्मादर्थात्सिद्धात् पश्चाद्भवति शब्दः, यथारूपं तथा हि स योग्यः, अर्थनिबन्धना हि विवक्षा, इतरथा वचनस्य प्रवृत्त्यसम्भवात्, न हि शब्दोऽनामृष्टप्रत्याय्यप्रत्यायकभावो वक्तुमिष्यते, नच विवक्षामात्रेण, शब्दार्थस्य च शक्तिः शकनात्, शक्नोति वक्तुं शब्दः, शक्यते वक्तुमर्थ इति।

एवञ्चानेन त्वद्वचनेन पलायमानस्यापि ते बाह्यवस्तुसद्भावोऽनतिक्रमणीयः प्रतिपाद्यते बलात्, अतः स्त्रीपुंनपुंसकैकद्विबहुत्वकर्त्तादिविशेषलक्षणाः शक्तयः परिगृहीता एव त्वया, अस्मन्मतवदेव च विशेषणस्वरूपप्रवृत्त्या विना न कश्चिच्छक्तिमानन्यः किन्तु विशेषा एव विशेषेणास्मदभीष्टाः शक्तिय इति यद्युच्यते त्वया, उच्यतां को वारयति? ताश्च स्वार्थसत्यः शक्तयो विशेषरूपेण विशेषा एव, तासाञ्च तेषु तेषु प्रवृत्तिवस्तुषु स्त्रीत्वादिषु विवक्षैव व्यञ्जिका।

सैव तां तां शक्तिमर्थगतशब्दमनपेक्ष्य सिद्धामध्यारोपयति प्रागात्मनि, पश्चात् प्रयोगात् श्रोतृबुद्धौ, वक्त्रभिप्रायार्थग्रहणप्रयतनात्, अत्र प्रयोगः शब्दनिरपेक्षैव विवक्षाध्यारोप्या शक्तिरर्थः, प्रत्याय्यत्वात्, यः प्रत्याय्यः शब्दनिरपेक्ष एव सिद्धः, अभिजल्पार्थार्थावयववत्, यथा त्वत्प्रयुक्तस्याभिजल्पशब्दस्याभिधेयोऽर्थः समुदायः स च प्रत्याय्योऽवयवार्थाभ्यां समुदायार्थप्रतिपत्तेरवयवार्थः प्रतिपत्तिपूर्वकत्वात्, मा भूद्विवक्षाप्रयोगयोरानर्थक्यमिति तावदभ्युपगन्तव्यौ खपुष्पवैलक्षण्येन शब्दनिरपेक्षौ शक्त्याख्यौ त्वया,

प्रत्याय्यत्वात् तथा शक्त्याख्योऽर्थः, इतरथाऽभिजल्प शब्दवैयर्थ्यं स्यात्।

प्रयोजकत्वाच्चास्या अशक्तिपक्षोक्तमितोमुखं युक्तिजातं विपरिवर्त्तते, सर्वशक्तिपक्षेऽपि वाऽस्मन्मतमेवोच्यते त्वया, अर्थार्थत्वाच्छब्दप्रयोगस्य, व्यवस्थितां शब्देनानादेयामव्यतिकीर्णामनन्यशब्दवाच्यां तां तां शक्तिं विशिष्टामेवोपादाय शब्दाः प्रयुज्यन्तेऽभिन्नलिङ्गसङ्ख्यादिविशिष्टैकशक्तिविषयनियताः, लिङ्गादिभिन्नसामानाधिकरण्यक्रियायां व्यतिकरापत्तेः।

परमार्थतस्तु *वादपरमेश्वरवाद* एवायम्, एकैकद्रव्यानन्तपर्यायत्वात्, अहं हि त्वयैव सह विरुध्ये, न वादपरमेश्वरेण, तेन च सह को विरोधः? यस्तु विषयोद्ग्राहः इहैकमेवार्थवस्त्वित्यादि यावच्छेषरूपत्वञ्च पाकस्येत्युदाहृत्य तस्मादविद्यमाना वा शक्तय इत्यादिना भावयित्वा तदुपसंहारेऽभिहितं तस्मादुभयोरपि पक्षयोरित्यादि सम्भवतीति, एतन्नातिसम्यक् प्रत्यपेक्षितस्वार्थम्, सर्वस्यास्योदाहृतस्यार्थस्याविरुद्धैकार्थत्वात्।

ननु सर्व एव प्रयोगा ओदनं पचति ओदनस्य पाकः पाकं करोति विक्लित्तिनिर्वृत्तिं करोति विक्लेदयति पचति पाकं निर्वर्त्तयतीत्यादय एकार्थाः, यदेवोदनं पचतीति पचिविषयं कर्मोदनाख्यं तदेव पाक ओदनस्येत्यनया षष्ठ्योच्यते, पाकशब्देन च भावः पच्यर्थः कृता पचतीति तिङा कर्त्रर्थ उच्यते, स एव पाकं निर्वर्तयतीति निदर्श्यते, कृदभिहितभावद्रव्यत्वात्, पाकं करोतीति द्रव्यवत्कर्मणि द्वितीया, निर्वर्त्तयतीति च करोतीत्यर्थः, कर्तुः

साध्यत्वात्, विक्लित्तिस्तण्डुलानां पाकः तद्विषयः कर्ता साध्यते यदा चौदनः प्रतीतो भवति तद्विषयभुजिपच्यादिक्रियासन्देहे किं करोतीति प्रश्ने ओदनस्य प्रसिद्धस्यानूद्यमानस्याव्याख्येयत्वादस्यैव पचेर्भुज्यादि व्यतिरेकेण विधानं पचतीति, तस्यैव पचतेः पूर्वस्य व्याख्याने किं करोतीति पृष्टे पाकं करोतिति पचिना प्रतिवचनात् कर्मत्वमुक्तवत्, देवदत्तस्य व्यापारं विशिष्टं स्थाल्यादिव्यापारेभ्यः सम्भवनधारणादीनां प्रकरणात् तत्प्रयोजकत्वात् स्थाल्याद्यपि पचने वर्त्तत इत्येवमादिभिरन्योन्यव्याख्यानप्रयोगैरेक एवार्थो व्याख्यायते यथा *'वृद्धिरादैच्'*[1] इत्यस्य प्रतीतापेक्षव्याख्यानवत्।

एवं सर्वत्र पाकः साध्यरूपतायामेव व्यवस्थितः साधनमाकाङ्क्षतीति तस्मिन्नेव काले कर्मत्वं शेषत्वञ्च भजते, शेषस्याकारकविवक्षणात्, तस्मादविरुद्धा क्रियादिपरिकल्पना अर्थशक्तिविषयैव, न शब्दोत्थापिता, अस्मादुद्ग्राहानुरूपोपसंहाराभावादसम्यक्प्रत्यपेक्षितस्वार्थं वचस्त्वदीयमेवम्, तस्माच्छब्दस्याप्रधानत्वात् कुतोऽस्य कल्पनाशक्तिः? अत इत्थं कारिकापठितव्या

'शक्तेर्वा सर्वशक्तेर्वा, स्वार्थेनैव प्रकल्पिता।
नाप्रधानेन नियता क्रियादिपरिकल्पना॥' इति।

विशेषाः शक्तय एवोपसर्जनीभूतसामान्याः, तदर्थो हि शब्द प्रयोगः, यथार्थाभिधानञ्च शब्द[2] इत्यस्मन्मतम्, सर्वशक्तेर्वा उक्तवदेकस्यैवार्थस्याविरुद्धशक्तिविशेषस्यानेकशक्त्यात्मकस्य वा

१ पाणिनि १-१-१ २. त.भा. १०-३५

स्वार्थेनैव प्रकल्पिता न शब्देनाप्रधानेन नियता — व्यवस्थिता क्रिया कर्मशेषकर्त्रादिपरिकल्पना, अभिजल्पशब्दार्थत्वमपि स्वदर्शनरागेणै-वोक्तं नोपपत्त्या, अभिजल्पगत्यर्थाभावात् स च शब्दोऽभिजल्पत्व-मागतो वाच्यतां यायात् सोऽयमित्यभिसम्बन्धात् शब्दस्वार्थेन सहैकीकरणात्, न च तत्, शब्दस्यैवार्थत्वात्, न हि कश्चित् शब्दादर्थस्य पृथगसिद्धौ करोत्यैक्यमनयोरभेदोपचारसम्बन्धेन।

द्रव्यभवनोपसर्जनत्वादमूर्त्तस्य मूर्त्तलक्षणविशेषात्तस्य प्राधान्यं इति स्थिते बाह्ये येन येन विशेषेण भूयते तदुपसर्जनं तन्नाम बाह्यम्, तद्वशप्रवृत्तित्वात्, भृत्यवत्, नाम वचनादिविशेषवशम्, यथार्था-भिधानशब्दत्वात्, तथाऽऽचार्यसिद्धसेन आह —*'यत्र ह्यर्थो वाचं व्यभिचरति नाभिधानं तत्'*[1] इति। व्याख्यातारोऽपि प्रस्थिता नामस्थापनाद्रव्यभिन्नलिङ्गवाच्येष्टाकरणाद्भावयुक्तवाची शब्द इति।

वृक्ष इत्यत्र पञ्चकः प्रातिपदिकार्थश्चतुर्थस्त्रिको वा, तथाऽऽख्यातस्यापि, एवमपि वक्तुर्विवक्षापूर्वकत्वात् शब्दप्रवृत्तेः सामस्त्यावगमं परित्यज्य विशेषमेकमेव ब्रूते शब्दः, एकद्विबहु-वचनेषु प्राप्तेषु विवक्षितसङ्ख्याभिधाय्येकवचनं विधीयते, एकस्य वचनमेकवचनम्, उच्यतेऽनेनार्थः, कर्मणि षष्ठी, तथा च लोके वृक्षशब्दप्रयोगे सामान्यमुपसर्जनं विशेषः प्रधानमिति गम्यते, एकार्थगतेर्व्यादिनिवृत्तेः, इतरथा सामान्यप्राधान्यात् सर्वगतिः सन्देहो वा स्यात्, वृक्षे प्रातिपदिक..... भवति।

---

१. तत्त्वार्थसूत्रे ३५तमसूत्रव्याख्यायां उद्धृतम्।

ननु विशेषाणामप्यस्ववशत्वानवस्थानात् सामान्यभवन-प्राधान्यमेव, दृश्यते हि द्विचनादिः यथैकवचनं द्विचनार्थं नक्षत्रं पुनर्वसू पुष्यः तारा..... हेतुः कर्म, सर्वत्राप्येवमेव च विशेषानवस्थानाद्विशेषो विशेष एव न भवितुमर्हति, ततोऽसौ नैव स्यात्, अविशिष्टत्वात्, अस्ववृत्तित्वात्, अस्ववशत्वात् खपुष्पवत्।

ततश्च सामान्यमपि नैव, प्रवर्त्तकाभावात्, किमर्थं न प्रवर्त्तयति विशेषः स्ववशत्वात्, स्ववशो हि विशेषः, विविक्त-वृत्तित्वात्, मुक्तवत्, असदेव वा प्रवर्त्तकाभावात् तत् खपुष्पवत्, अर्थान्तराभावात् भवद्भवनाभ्यां केनचिदबाध्यत्वात्, अथ सोऽप्यस्ति भेदेनार्थः शब्दाद्यस्य तद्रूपमनेकं सदेकं क्रियते न तर्हि शब्द एव शब्दार्थोऽभिजल्पत्वमागतो वाच्यः, किं तर्हि? विशिष्टा शक्तिः शब्दादन्या सर्वशक्तिर्वाऽर्थोऽन्यः।

तत एवेदमयुक्तं तं शब्दमभिजल्पं प्रचक्षते शब्दार्थ इति, स हि यथा शब्दस्तथाऽर्थोऽभिसम्बन्धेनैकीक्रियमाणत्वात् पृथक् सिद्धः क्षीरोदकवत्, द्वयोरप्येकीकृतत्वे तुल्यत्वात्, अपि चार्थार्थमेवोक्तं प्राक् प्रत्याय्यत्वादभिजल्पार्थावयववत् शब्दनिरपेक्षा विवक्षाऽध्या-रोपाशक्तिरिति, यदा चैवं तदाऽस्मन्मतं यथार्थाभिधानशब्दत्वमेव प्रतिपन्नमर्थस्य तत्त्वात्, योऽसौ शब्दः सोऽयं नार्थः, अर्थोऽर्थ एव, अस्मात् प्रत्यक्षनिर्देश्यादन्य एवासौ स इति परोक्षनिर्देश्यः, एवंविषय एव शब्दो न शब्दविषयः, किमुक्तं भवति तेनार्यते गम्यते शब्दस्य विषयः, विषयिणो विषयपरतन्त्रत्वात् याऽर्थस्य गतिः शब्दस्यापि सैव, नात्मनः पृथक्-स्वतन्त्रेति।

एवञ्च कृत्वा योग्यशब्दनिबन्धना हि विवक्षाऽर्थमनपेक्ष्य सिद्धां तां तां शक्तिमध्यारोपयतीति स त्वदुक्तो ग्रन्थो युक्तोऽस्मिन् दर्शने योग्य एव शब्दोऽर्थस्य, न योग्यः, यः कश्चित् क्रीडितमेवाऽस्त्विति प्रयुज्यते काकवाशितादिवदबुद्धिपूर्वो वाऽर्थविसंवादादेकी कर्त्तुमशक्यत्वात्, हिशब्दोऽपि च हेत्वर्थे, यस्माद्योग्यशक्ति... मर्यादया वा, यदपि च स्वलक्षणव्याप्तिप्रदर्शनार्थं लोकगतशब्दार्थ-संव्यवहारव्यवस्थापनार्थञ्चोक्तं श्लोकद्वयं

'तयोरपृथगात्मत्वे रूढेरव्यभिचारिणि।
किञ्चिदेव क्वचिद्रूपं प्राधान्येनावतिष्ठते॥

लोकेऽर्थरूपतां शब्दः प्रतिपन्नः प्रवर्त्तते।
शास्त्रे तूभयरूपत्वं प्रविभक्तं विवक्षया॥'[1]

इति तदपि च अर्थस्यार्थरूपत्वं शब्दादापन्नमित्येतत्फलमेव।

वयमत्र निश्चिनुमः तयोरपृथगात्मत्वं रूढेः लोकप्रतीतेः, अतस्य तदुपचारात्, पथिगमनवत् — यथा 'पन्थाः पाटलिपुत्रं गच्छती'ति पथो गमनं पुरुषगत्यभेदोपचारात्, तद्विनाऽभावाद् व्यर्थत्वात्तथोच्यते तथा शब्दार्थयोरव्यभिचारादिति, इतरेतर-प्रधानोपसर्जनभावाच्च व्यर्थत्वं सन्मित्रवत्, तत्तु त्वद्वचनादेव सिद्धं यथोक्तं त्वया *'किञ्चिदेव क्वचिद्रूपं प्राधान्येनावतिष्ठत'* इति, तथा *'लोकेऽर्थरूपता'*मित्येषोऽपि, गामभ्याज शुक्लामिति न शब्दे बुद्धिः, किं तर्हि? अभिधेये लोकसिद्धा, *व्याकरणशास्त्रे* शब्दरूपतां

१. वाक्यपदीयम् काण्डः २ श्लोकौ १३१-१३२

प्रतिपन्नः प्रवर्त्तते, तुर्विशेषणे, शब्दाधिगमार्थप्रवृत्तिविशेषात् भवतिवत्। तस्माद्भिन्नः, रूपभेदात् अर्थस्य च गोः सास्नादिरूपं भिन्नं तदर्थं गकारादिवर्णानुपूर्वीमात्रोच्चारणम्, तद्धि न कदाचिदर्थो भवितुमर्हति कल्पितं वा, त्वया योऽभिजल्पः कल्प्यः कल्पित एव सः, न भवत्यर्थः अव्यवस्थितत्वात्, व्यतिकीर्णत्वात्, अनियतत्वाच्च, तस्मान्न शब्दोऽर्थरूपतां प्रतिपन्नः प्रवर्त्तते।

प्रतिपत्तिव्यभिचारादनयोरेकीभावगतिः पार्थक्ये सति, नान्यथोक्तत्वत्, *'शास्त्रे तूभयरूपत्वं प्रविभक्तं विवक्षया'* इत्येतदप्यस्मन्मतमेवानुधावति, *'यस्तु प्रयुङ्क्ते कुशलो विशेषे'*[1] इत्यादिक्रमेण गोशब्दस्य सास्नादिमति साधुत्वं सिद्धेऽर्थे शब्दे सम्बन्धे च पृथक् गोण्यादावसाधुत्वं रूढितः, अर्थविशेषविवक्षायां गोण्याः साधुत्वमित्यादि, तस्य च प्रयोजनं धर्म इत्यादिरुक्तः सोऽपि पृथगर्थसिद्धिं सूचयति लोकेनाभिधेयेऽर्थे शब्दाः प्रयुक्ताः, तत्रार्थस्य पृथक् सिद्धत्वे शब्दस्य च तद्विषयस्य धर्मार्थः प्रयोगनियमः शास्त्रेण क्रियते भक्ष्याभक्ष्यनियमवदिति।

एवमेव च दर्शनोत्प्रेक्षाभ्यामित्यादिदर्शनानि शब्दाद्बहिरर्थ-सिद्धौ घटन्ते, इतरथा अभिजल्पार्थैक्ये तत्र किं दर्शनम्? का उत्प्रेक्षा? ..... कुतोऽभिजल्पः? श्रुत्यन्तरप्रवृत्तिहेतुरित्येतदपि च त्वत्कल्पिताभिजल्पे नैवोपपद्यते, अस्मदिष्टे तूपपद्यते श्रुतेरन्या श्रुतिः श्रुत्यन्तरम्, अन्तरेकीभूतोऽभिजल्पपृथग्भूतो ध्वनिर्व्यवहारानुपाती स्यात्, स त्वदिष्टाभ्यामकर्त्तृभ्यामचेतनाभ्यां करणकर्मभ्यां न

१. महाभाष्यम् १-१-१ सूत्रे

प्रवर्त्तते, चेतनात्मत्वात्तु कर्त्ता स प्रवृत्तिहेतुः श्रुत्यन्तरस्य भवितुमर्हति, शब्दार्थयोरेकीभूय वर्त्तमानयोः काऽन्या श्रुतिः श्रुत्यन्तरमित्युच्यते? केन च विशेषेण तत्प्रवृत्तिहेतुरुच्यते?।

अस्ति विशेषः घटार्थप्रत्यायनार्थं श्रुतेरनुरूपा श्रुतिरेव युक्ता, कारणानुरूपत्वात् कार्याणाम्, नार्थो वैरूप्यात्, तस्माच्छ्रुतिः श्रुत्यन्तरस्य प्रवर्त्तिका, नार्थो नाप्यात्मेत्यत्रोच्यते ननु तस्यापि श्रुत्यन्तरस्य प्रवर्त्तकोऽर्थ एव, अर्थाभावे प्रयोगानर्थक्यात्, निरुक्त्यर्थोऽप्यभिजल्पस्य तथा घटते नान्यथा, आभिमुख्येन जल्पत्यर्थं शब्दः, तं प्रयुङ्क्तेऽर्थः अभिजल्पयति तद्विषयएवाभिजल्प इत्युच्यते। एतदुक्तं भवति अर्थविषयः शब्दः शब्दार्थकल्पनायां युक्ततरः स्यात्, न तु त्वत्परिकल्पिते शब्दप्रेरिते, एवं तावद्भर्तृहर्यादिदर्शनमयुक्तम्।

यत्तु *वसुरातो भर्तृहरेरुपाध्यायः* स च स्वरूपानुगतमर्थमविभागेन सन्निवेशयति, तेन द्वावपि शब्दोऽर्थश्चाभ्युपगताविति प्राच्यादत्यन्तादर्शनात्तैमिरिकदर्शनमिदं तत्त्वदृष्टिं प्रत्यासीदति, अभिजल्पस्वरूपन्तु पुनस्तेनापि निरस्तम्, ननु स तेन पुष्यशब्दार्थयोरिष्टादन्यान्यलिङ्गादीनि सन्निवेशयिष्यति तथापि शब्दनयाभिहितान् दोषान् परिहर्तुमशक्त एव, ननु शब्दानुगतार्थं अन्तरविभागेनेति ब्रुवताऽर्थतन्त्रः शब्दोऽभिहितो न शब्दतन्त्रोऽर्थः, यद्यर्थमनुगतः शब्दोऽन्तरविभागेन सन्निवेश्येत ततः शब्दप्रेरितत्वाच्छब्दावधारणादर्थोव्युदस्तः स्यात्, किन्तु तद्विपरीतमर्थप्राधान्यावलम्बनं कृतं ततोऽर्थतन्त्रत्वात् शब्दप्रवृत्तेः तदवस्था दोषाः, अतो विशेष एव व्यवस्थितः।

यथा च रूपादय एकैकभवनात्मका न पर्यायान्तरमपेक्षन्ते विशेषत्वात्तथा पुष्यतारानक्षत्रादिपुंलिङ्गादयः, परस्परविरोधित्वाद्विशेषाणामित्येकमेकमेव भवनं भवतीति कुतः सामानाधिकरण्यम्, पुष्यः पुमान् स कथं स्त्री भवति तारेति नपुंसकं वा नक्षत्रमिति, एवञ्च यथार्थाभिधानमेव न्याय्यम्, लक्षणञ्च यथार्थाभिधानं शब्दः, नामस्थापनाद्रव्यभिन्नलिङ्गादिवाच्येष्टाकरणाऽभावयुक्तवाची शब्द इति च, तथाऽऽचार्यसिद्धसेनोऽप्याह-

'णामं ठवणा दविये त्ति एस दव्वट्ठियस्स णिक्खेवो।
भावो उ पज्जवट्ठियस्स परूवणा एस परमत्थो॥" इति।

व्यवहारान्तःपातिस्थापनावाच्येष्टाकरणप्रदर्शनार्थन्तु स्थीयते यस्मिंस्तत्स्थानम्, भावः क्रिया, केन स्थीयते? स्थानकर्त्रेति, क्व च स्थीयते? आकारे, आ मर्यादया करणमभिविधिना, प्रस्तुतस्य रूपस्याभिविधिः परिसमापनमभिव्याप्तिः, तेनाऽऽकरणमाभवनम्, तस्मिन् स्थानम्, का मर्यादा? अन्यरूपविलक्षणम्, तस्य स्वतन्त्रस्थातृसमवायिनः प्रयोजके हेतु कर्त्तरि विहितो णिः तस्य भावः स्थापना।

किमुक्तम्भवति ईषत्तिष्ठतः स्थातुरेकाग्र्याधानं स्वयं तिष्ठतोऽसद्भावेन सर्वत्र विशेष्य स्थाप्यमानपरिसमाप्तं स्थानं स्वविशिष्ट आकारेऽभिव्याप्य तिष्ठति, इन्द्रोऽयं न स्कन्द इत्यादिरूपान्तरव्यावृत्त्या मर्यादया नियतञ्च, अनिश्चितैकक्रिय

१. संमतितर्कप्रकरणम् कारिका १-६

प्रयोज्यत्ववत्, यथा पचिपठिगम्यादिक्रियाऽवधारणाभावेनानिश्चित-क्रियं स्वतन्त्रकर्त्तारं हेतुकर्त्ता पच पचेति नियुङ्क्ते पचावेव स्थापयति क्रियान्तरव्यावृत्त्या तत्रैव स्थाने पच्याकारे नियमयति सा स्थापना, असद्भावेन वाऽतद्रूपेऽपि स्थूणेन्द्रवत्, तदेव हि वस्तु व्यक्ताव्यक्ताकारपरिणामं स्वयं तथा तथाऽऽकृतिवद्विशेषेऽभीष्टे स्थाप्यते।

तथाऽक्षादिषु, तस्माद्यथा बालादिपिच्छकद्रव्यपाचकादिनाम क्रियाभावभेदा विविधा उपपन्नाः सत्याश्चैवं तदाकार एक एव देवदत्तः सर्वभेदोऽपि नान्योन्यश्च, आकारपरमार्थत्वाभेदात्, एवं चित्रलेप्यपुस्तादिभेदोपपत्तावपि तथा तिष्ठतस्तस्य तस्य स्थानस्य प्रयोजनात् सा स्थापना, तत्कर्मणस्तत्त्वापत्तेरिति व्यापिता स्थापनाया इत्येवं स्याद्वादी ब्रूते, स्थापनाद्रव्यैकान्तवादिनस्तु न किञ्चिदाकारव्यतिरिक्तमस्त्यतो भ्रान्तिमात्रं भेदा इति।

स्थापना सद्भावासद्भावाभ्यां वस्तु निक्षिपति, अतद्भूतात्मकं वस्तु तद्भावमापादयत्यात्मानमात्मनेत्युक्तं भवति, पुरुषान्नाम कर्मणो देवदत्तादितावत्, यथा पुरुषो नामकर्मप्रागमूर्त्तात्मा लक्षणतः सत्तात्मा कर्मत्वेन मूर्त्तात्मना परिवर्त्तते आभवति ततश्च नामकर्मणो देवदत्तादिता तथा चित्रकरादिः, तत्रात्मवदतथाभूतस्य तथात्वा-पादनात्तदेकता चित्रकर्मादिदेवदत्तस्य।

यथा च जीवत्वादि तत्पूर्वरूपं अव्यक्ताकारं सततं तिष्ठत् स्थाप्यते तथा पुद्गलानामपि वर्णादिपारिणामिका भावा अतस्तयोरेकता, आकारतत्त्वैकत्वात्।

यदि स्थापनया व्यतिरिक्तार्थस्वरूपं स्थाप्यं वस्त्वापद्यते ततः कस्मात् स्थाप्यवस्तुस्वरूपं उद्देश्योऽर्थो नापद्यते? इन्द्रतामक्षादिरापद्यते नाक्षतामिन्द्र इत्यत्र को विशेषहेतुः? अत्रोच्यते, नन्वसावपीन्द्रनामगोत्रकर्मस्थाप्यत्वात् स्थापनानिक्षेपात्मकतां नातिवर्त्तते, तस्मात् स्थापनानिक्षेपत्वे सत्येव जीवकर्मणोर्योगवक्रादिपरिणामवैचित्र्यं व्यक्ताव्यक्ताकारवैश्वरूप्यं न न युज्यते।

अथ च स्थापनाया निक्षेप इति कर्मणि षष्ठीं कृत्वा समासः, किं कर्म? स्थापनैव, का सा? आकारः, कोऽसौ? वस्त्वात्मा, स एव निक्षिप्यते, क्व? स्वात्मनि, कः? घटादिः, केन? कुम्भकारादिभिरिति, मुमुक्षुभिरात्मा कर्मामिश्रः स्वात्मनि, अविविक्तः सन् विविक्तरूपत्वेन, तथेन्द्रोऽपि प्रदर्श्यते, न हि तदाकारमन्तरेणेन्द्रः, घट इव विकुक्षित्वादिविनाभूत इति।

अथ वा स्थापनायां निक्षेपो न नाम्नि, यतो नामापि सहार्थेन तत्तत्तन्त्रमेव, स्थानकरणजन्मानो वर्णाः सङ्कल्पोच्चरन्तः सुप्तिङन्तादिविशेषाकाराः, पुद्गलाश्च नामाख्यातवाच्यद्रव्यक्रियार्थाकाराः, सर्वं भूताकारतत्त्वस्थापनाविपरिणामविजृम्भितमात्रम्, तदभावे शब्दार्थयोरभावात्, एवं तावन्नामनिक्षेप उक्तः।

द्रव्यमपि स्थापनानिक्षेप एव, आकारमयत्वात्, यथा श्रीपर्णीदारु द्रव्यं तस्य तस्यान्तर्लीनाकारम्, भावोऽपि क्रियोपयोगरूपादिनीलादिशिवकादिरूपभेदैः साकार एव, एवं निक्षेपत्रयं स्थापनानिक्षेप एव रूपान्तरव्यावर्त्तनेन रूपान्तरकरणात्मकस्थापनास्वरूपानतिक्रमात्।

अक्षाद्यसद्भावस्थापनायामपि रूपान्तरश्चेद्द्यावर्त्यरूपान्तरं न कुर्यादिन्द्रादेरक्षनिक्षेप प्रतिपाद्यस्यावरोधः स्यात् तस्मादविरुद्धाभि प्रेताकारे वृत्तो नाम्ना इन्द्र इति बुद्ध्या वाऽध्यारोपस्तत्कर्मणः, द्रव्यार्थस्थापनेन्द्रस्थूणावत्, एतत्तत्त्वाध्यवसायादेव लिङ्गसमाचार देवताप्रतिमानमस्करणादि लोके रूढत्वात् स्थापनैव सर्वमिति स्थापनाद्रव्यार्थनयमतमुक्तम्।

अत्रापि विशेषाकारस्य परमार्थस्यैकभवनस्य स्थापनानिक्षेपे कार्ये सामान्याकार उपसर्जनं प्रधानस्य परमार्थस्य, उपकारित्वात्, पाण्यङ्गुलित्वगस्थिसन्धिवर्णरेखावयवपरमाणुरूपादिभेदेष्विव प्रत्येकं विशेषतत्त्वभवनस्य, इतरदुपसर्जनम्, परमार्थतस्तु तदन्त्यविशेष-तत्त्वमविकल्प्यमस्तीति न तानि पाण्यादीनि स्वरूपतः, कुतस्तेषां स्थापना? क्षेत्रतो युगपद्भाविपर्यायेषु विशेषव्यतिरेकेणार्थाभावात्, कालतोऽपि बालाद्ययुगपद्भाविपर्यायेष्वेकं परमार्थ इति कथं स्थापना क्रियतां कस्य वा?

असद्भावस्थापनायाश्च प्राधान्ये पर्यायनिराकरणं स्यात्, सद्भावस्थापनायाः प्राधान्ये त्वितरनिराकरणम्, योऽपि नामबुद्ध्यारोप उक्तः सोऽपि नयान्तरयोर्नामद्रव्यपर्यायार्थयोर्विषयः स च विशेषभवनमेव, द्रव्यार्थस्त्वतिक्रान्तभङ्गेषु व्याख्यातो दूषितश्च, इतस्तु भाव एवैको भवतीति, द्रव्यं द्रव्यार्थवाच्यश्चेष्टं न करोतीति भावितमेव, अतः स्थितमेतत् विशेषभवनमेव परस्परानपेक्षं जगत्तत्त्वमिति, क्रियाफलाविसंवादोऽपि च, ऐहिकमामुष्मिकं वा ओदनादि स्वर्गादि फलं पचिक्रियादिदानादेः,

न तत्र काष्ठस्थाल्यादीनि नाममात्राणि न चित्रलिखितानि वा प्रवर्त्तन्ते, किन्तु तथाभूतानि तान्येव विशेषैकभवनानि, न चाग्निना शब्देन पच्यते न वा चित्रलिखितेन, न यथा मानप्रस्थकेन तथा तन्नाम्ना।

नामप्रत्ययनामकर्मतत्त्वात्तेनैवेति चेन्न चेतनाभेदभूतिभूयोग्य-विशेषात्मनियततत्त्वाभावे तिर्यग्गतिनिर्वर्त्तनीययोगवक्रतादिपरिणामा-तिप्रवृत्तेः फलाभावान्नामकर्माद्यनुपपत्तेः, न च चित्रलिखिताग्नि-प्रस्थकाभ्यां दहनमाने, तयोर्व्यवहाराक्षमत्वात् तथावृत्तिभावस्यैव व्यवहारक्षमत्वात्, द्रव्यमपि च भव्यं तथा तथा भवनात् भाव एव घटते, त्वन्मते द्रव्यभवने तु न तथा तथा भवनार्थेन भावशब्देन द्रव्यशब्दस्य सम्बन्धः, अग्निप्रस्थकादिसर्वमेकभाव एव भूतं द्रव्यार्थभेदात्।

तथा प्रस्फुटमेव अग्निर्द्रव्यमिति पुंनपुंसकयोर्भावभेदे सामानाधिकरण्यम्, नान्यथा दारुप्रस्थकवद्वा सामानाधिकरण्ये धरण्यादावपि समानमवतिष्ठेत द्रव्यत्वादिति, तथाभूत ..... दहनोऽग्निः, एवं प्रतिपदार्थं भावनिक्षेपः शब्दनयस्योक्तो न यथर्जु-सूत्रस्य नामादिचतुर्विधनिक्षेपाभिलाषिणः, अत्र च शब्दार्थोऽपि असत्योपाधिसत्यः, नानन्तरनयनिर्दिष्टोऽन्यापोहः, यथोक्तम् — *'असत्योपाधि यत्सत्यं तद्वा शब्दनिबन्धनम्'*[1] इति, विशेषा उपाधयोऽसत्याः, सद्भ्यो हितं सत्यं, कर्मणि चतुर्थी, प्रकृतिः सामान्यं प्रतिपाद्यम्, सामान्यवादिमते असत्यैर्विशेषैरेव विकारप्रकृतित्ववत्तदभिधीयते।

१. वाक्यपदीपम् काण्डः २ श्लोकः १२९

भवद्व्यापि पर्यायवृत्तितत्त्वमविकल्पं सत्यमसत्याः पुनरुपाधयोऽस्य लिङ्गादि, यथा द्रव्यमृद्घटकुण्डकुण्डिकादिप्रवृत्तयस्तदाभाः, तद्वस्तु व्यापिवदाभासते, एवमेव चैतद्दर्शनसंवादीदं.....आनीयताम्, सत्यस्य..... तदाख्यानमुपसर्जनम्, गृहोपलक्षणकाकवत् उदितस्यार्थवज्जातिशब्दो विशेषार्थ इति त्वद्वचनेनोक्तमपि विशेषवस्तु उक्तवत्, तद्गम्यते जातिगतलिङ्गसङ्ख्यादिसमानाधिकरणगतिनिरूपितं अनर्थिकाया एव तस्या अप्युक्तवत् परार्थत्वादर्थवत्त्वमनर्थकत्वं स्वार्थेन, वाग्विसर्गकालोपलक्षणनक्षत्रदर्शनश्रुतिवत्।

अन्यथा मुख्यन्यायेन तच्छब्दार्थतायां पुनरुक्तदोषात् विशेषशब्दाप्रयोग एव स्यात्, अत एव सत्यवृत्त्या नोक्तो विशेषः, उपाधिवृत्त्योक्तोऽप्यनुक्त एव, नियमार्था पुनः श्रुतिः, तदर्थत्वात् पूर्वश्रुतेः, नियमः स्वार्थव्यवस्थापनम्, सञ्चारि चैतत् विशेषपरम्परया, तत्र कारणं द्रव्यनय..... युगपदेतस्य विशेषस्य प्रधानस्य प्रत्यायकत्वेन प्रत्ययस्य उपसर्जनमात्रप्रवृत्तिरसत्योपाधिरर्थः, यावच्च..... सर्वमनेन शब्दनयशब्दार्थेन व्याप्तम्।

एवमेव चेदमपि

'न जातिशब्दो भेदानामानन्त्याद्व्यभिचारतः।
वाचको नियमार्थोक्तेर्जातिमद्व्यपोहवान्॥'[२] इति

२. प्रमाणसमुच्चये सामान्यपरीक्षायाम्

जाति शब्दो विशेषार्थनियमोक्तेर्भेदानामवाचकः व्यभिचारादानन्त्याच्च, जातिमतो वाचकत्वे च ये दोषास्तेऽन्यापोहवदभिधानेऽपि, प्रतिज्ञा कथं? भेदजातिजातिमदभिधानपक्षेषु दोषदृष्टेरर्थादापन्नमन्यापोहकृच्छ्रुतिरिति *'शब्दान्तरार्थापोहं हि स्वार्थे कुर्वती श्रुतिरभिधत्ते'* इत्युच्यते, अर्थौ च स्वसामान्यलक्षणावुक्तौ, नातोऽन्यत् प्रमेयमस्तीति स्वार्थ एव तावदवधार्यः, स्वार्थः, स्वलक्षणोऽन्यतोऽन्योऽनन्यः स प्रत्यक्षविषयः, स इह न सम्भवति, *'स्वलक्षणमनिर्देश्यं'*[1] इत्युक्तत्वात् प्रत्यक्षविषयस्य।

न च ततोऽन्यः स्वार्थः कश्चिदस्ति, लक्ष्यद्वित्वावधारणात् प्रमाणद्वित्वावधारणात्, तिष्ठतु तावत् स्वार्थः, तथाच शब्दवाच्यविचारे प्रस्तुते जातिसम्बन्धजातिमदभिधानानामसम्भवादन्यापोहकृच्छ्रुतिरिति।

अनुमानविषयोऽपि नैवास्य स्वार्थः, अग्निरनग्निर्नेत्याद्यपोहार्थस्वरूपत्वात्तस्यापि च व्याख्येयत्वात् भेदोपादानेवाऽस्वार्थत्वमपोहार्थादन्यत्वात्, परप्रत्यायनादित्वभिन्नार्थत्वाच्च । अथ क्वचिद्दृक्षानुमानविषयत्वविचारोऽसम्बन्ध इति चेन्न, तृतीयार्थासम्भवादित्यादेः प्रदर्शितत्वात्। यद्यपि प्रत्यक्षानुमान विषययोरदृष्टोऽप्यन्यापोह इत्यस्मादेव शब्दादवगन्तव्यः स्वार्थो न निराश्रयः, उक्तदोषात्, तस्माद्यस्मिन्नन्योऽपोह्यते स स्वार्थ इति घट इत्युक्तेऽघटो न भवतीति घटे पटाद्यपोहाद्घटः स्वार्थ इति शब्दविषय

१. प्रमाणसमुच्चयः ५

एव स्वार्थो निश्चित इति मतं तथापि स्वार्थ इत्याधाराधेयादर्शनात् स्वरूपविधिविनाभूतत्वाद्विधीयमानस्वार्थानवस्थानादन्यशब्दान्तरार्थयोरस्थितरूपत्वात् कस्मिन् स्वार्थे कोऽसावन्यो यस्मादपोह्यते?

अन्योऽनन्यो न भवतीति चेत् ननु स एव विधिः स्वार्थः, तस्याग्रहणे नेत्यादिबुद्धेरभावात्, इतरथाऽन्यो न भवतीति व्यावृत्तिमात्रस्थितित्वादप्रतिष्ठितस्वार्थयोस्ततोऽयमन्यः, अतश्चान्यः स इति तदेतयोर्ग्रहणाभावात् कुतः कोऽन्यः? कुतोऽस्यापोहः? इतरेतराश्रयभावदोषश्च — तस्मादन्यः, अन्यस्मात् स इति।

अथान्यापोहलक्षणवाक्यव्याख्यानुवृत्त्या व्यावृत्तिमत्स्वार्थो गृह्यते, हिशब्दो यस्मादर्थे, यस्माद्वृक्षशब्दोऽवृक्षशब्दनिवृत्तिं स्वार्थे कुर्वन् स्वार्थं वृक्षलक्षणं प्रत्याययति, एवं निवृत्तिविशिष्टं वस्तु द्रव्यादिसन् शब्दार्थो न निवृत्तिमात्रं खपुष्पतुल्यम्, किन्तु तत् सदसत्, यथा कृतकत्वस्यानित्यत्वविशिष्टशब्दानुमापकत्वमेवं शब्दोऽपि स्वमभिधेयमर्थान्तरव्यवच्छेदेन द्योतयति प्रमाणत्वात्।

अत्र ब्रूमोऽत्रापि त्वयैवं ब्रुवतान्यापोहातिरिक्तः स्वार्थ उक्त इति विधिरेवाङ्गीकृतः अन्यव्यावृत्तस्वार्थार्थत्वात्, 'देवदत्त! गां अभ्याज शुक्लामि'ति गवानयनवाक्यवत्, व्यावृत्तियुक्तस्येत्यादि यावत्प्रदर्शनादिति त्वद्वचनेन निवृत्तिविशिष्टं वस्तु शब्दार्थो द्रव्यादिसन्नित्यादिना ग्रन्थेन च स्वार्थविधानमेव प्रदर्शितम्, अन्यथा सर्वत्रैव व्यावृत्तिमात्रं न स्वार्थो नाम कश्चिदस्तीति स्वार्थे कुर्वती श्रुतिरित्यनर्थकं स्यात्।

यदपि च तत्सदित्यसन्न भवतीति सच्छब्दार्थोऽसच्छब्दार्थं निवर्त्तयतीति तदपि परिश्लथम्, युगपदयुगपद्भाविनोऽर्थस्यासत्त्वाविनाभाविन एव सत्त्वात् युगपद्भूतपटाद्यभवनेनैव घटभवनं दृष्टम्, तस्माद्भवनाभवने न न भवत्यसन्निति, अन्यथाऽनुपपत्तेः त्वन्मतवत् उक्तवच्चायुक्तं सदित्यसन्न भवतीति।

अयुगपद्भूतपूर्वोत्तरभावाभावे वर्त्तमानभावो दृष्टः, यदि तु सदसन्न भवेत् ततोऽन्यापोहो निर्विषय एव भवेत्, तद्यथा — घट इत्यघटो न भवतीति नैव स्यात्, अघटसत्त्वाभावाद्घटसत्त्वाभावाच्च, घटस्याघटत्वेनात्मासद्रूपेणापि पटादिना भवनात्।

ततश्चेदं दोषजातमापद्यते *'भेदो भेदान्तरार्थन्तु विरोधित्वाद पोहते'*[1] इत्यादि यथार्थं तथा न भवति, नापोहताऽप्येवम्, विरोध्यविरोधित्वात्, अथ युगपद्युगपद्भावि सर्वभावभेदभवनस्य भवननियमः सन्नेवासन्न भवतीत्युच्यते घटाद्यसद्व्युदासेनेत्यदोषः, तदपि न, विदितभवनानुवादत्वादेवंवादिनस्ते घटादिरूपाद्यसत्त्वात्तद प्रसिद्धौ घटो रूपादिर्वा भवति न भवति, अपोह्यते नापोह्यते वा, स्वार्थो न स्वार्थ इत्याद्यनुवादायुक्तेः, अनुवदता च त्वया घटादिरूपादेः सदित्यभ्युपगतम्, अतोऽसत्त्वादुक्तदोषाविमोक्षः।

नैव चैवं रूपादिव्यतिरिक्तघटाद्यसत्त्वाभ्युपगमेऽनिदेश्यपरमनिरुद्धक्षणिकसन्तानिव्यतिरिक्तसन्तानरूपाद्यसत्त्वाभ्युपगमे च घटादिविशेषः स्वार्थ इति वचनम्, प्रतिपक्षापेक्षणक्षीणशक्तिवात्, साध्यविशेषस्वार्थागतिवत्।

१. प्रमाणसमुच्चयः

घटादिसर्वसंवृत्यर्थासत्त्वादगतिरेव, अनन्तरातीतासद्वस्त्वाम्नानात्, अर्थविशेषश्च न वाच्य एव, यथोक्तं

'नार्थशब्दविशेषस्य वाच्यवाचकतेष्यते।
तस्य पूर्वमदृष्टत्वात् सामान्यन्तूपदेक्ष्यते॥"

इति सामान्यस्यासत्त्वाद्विशेषस्यावाच्यत्वात् कतमोऽन्यः स्वार्थः? अस्मन्मतेन त्वभिधेयो विधिरेवावश्यम्। अस्य च वाक्यस्य यदा तदाऽनेनैव विषयेण भवितव्यम्, अन्यस्यार्थस्याभावात्, उक्तवत् तथा चान्यापोहोपेक्षा।

ननु चात्राप्यपोहो देशकालभेदानां परस्परतः, अत्रोच्यते — अत एवोपेक्ष्यः, पारस्पर्यस्य विशिष्टार्थविषयत्वाद्विधेरेव व्यावृत्तरूपत्वाच्च, भवतु वा तत्रापोहः तथापि सर्वविशेषयुक्तस्यैव स्वार्थस्य गमनमुपलक्ष्यते, स्वरूपविधिविनाभूतस्यासम्भवात्, न च पूर्वदृष्टः सः, नापि पूर्वदृष्टेनार्थः अज्ञातज्ञानार्थत्वाच्छ्रोतुः, एवञ्च

'अर्थशब्दविशेषस्य वाच्यवाचकतेष्यते।
तस्य पूर्वमदृष्टत्वात् सामान्यादुपसर्जनात्॥'

इत्थं श्लोकः पठनीयः।

यथासङ्केतमर्थविशेषस्य वाच्यता शब्दविशेषस्यैव वाचकता ऽस्माभिरिष्यते, अनयोरेव सत्त्वात्, तस्य विशेषस्य पूर्वमदृष्टत्वात् स एवाज्ञातत्वात् ज्ञाप्यते, सामान्यादुपसर्जनात्, अतद्भेदत्वे सामानाधिकरण्याभावः, असदसच्छब्दाभिधेयंवस्त्वविशेषत्वे सतः साक्षादनुक्तेः, कथं साक्षान्न ब्रवीति सत्? अन्यापोहेऽपि हि साक्षात्

१. प्रमाणसमुच्चयः

प्रवर्त्तमानोऽन्यापोहसामान्यगतं नित्यत्वादिभेदं नाक्षिपति, अन्यापोहेऽपक्षीणशक्तित्वात्, किमङ्ग ! पुनस्तद्गतान् भेदान् घटादीनाक्षेप्स्यंति?-

एतदर्थव्यक्तीकरणार्थं सदित्यसन्न भवतीति वाक्यमवश्यं उपादेयम्, सच्छब्दमात्रादनभिव्यक्तेः, तत्र चावश्यं भवतिशब्दः प्रयोक्तव्यः, क्रियापदमन्तरेण सच्छब्देन सह प्रयुक्तनञोरर्थाभावात् सदर्थ एव मुख्यः श्रयणीयः, स चाव्याहत एष्टव्यः, एवं गमिष्यमाणघटादिद्रव्यप्रभेदस्य तिरस्कृतपटाद्यपेक्षासत्त्वस्य प्राप्तिर्मनोरथैरपि न लभ्येत, असद्विविक्तसत्त्वप्राप्तावेव यत्नस्ते, कुत एव तदन्यापोहः? भवत्यसम्भेदेऽविविक्तैकसत्त्वप्राप्तौ तवान्यापोहयत्नवैयर्थ्य मेव, घटस्य पटभावादित्यलमुद्धट्टनेन।

अयन्तु गुणधर्म एवैषः स्वतोऽन्यान् व्यावर्त्तयन् द्रव्यमात्रमभिधत्ते पारतन्त्र्यात्, ततश्च घटादिभेदानाक्षेपात्तैः सह सामानाधिकरण्याभावः, स्यादेवं अनाक्षिप्तैरव्याप्तैरपि सामानाधिकरण्यं भविष्यति विवक्षावशात्, अत्र पर एवाह — न ह्यसत्यां व्याप्तौ.....रूपं शुक्लं रूपं नीलमिति, तद्वति श्रुतगुणगतभेदाभेदत्वादनाक्षेपस्ततो जातेरपोहाद्वाऽन्यस्य तद्वतः यथा सत्त्वपक्षे शब्दस्वरूपं गुण एव, जातिगुणौ गुणो द्रव्यञ्च, द्रव्यन्तु द्रव्यमेव।

स्वरूपापोहगुणा विशेषणान्यनुग्राहकत्वापेक्षयोच्यन्ते, अपोह-गुणद्रव्याणि च प्रधानान्यनुग्राह्यत्वापेक्षया, शुक्लशब्दो ह्यशुक्लत्वनिवृत्त्या शुक्लमाह शुक्लतरादयश्च तद्भेदास्ततश्चातद्भेदत्वं शुक्लाभेदत्वं

तस्माच्छुक्लशब्दो मधुरादिकं नैवाक्षिपति, एवमिहापि सच्छब्दो पूर्वमसन्न भवतीत्यसद्व्यावृत्तिमुक्त्वा तद्वन्तमाह सत्त्वद्रव्यमभेदवदिति नयेन, तस्मात् सद्द्रव्यं सन् गुणः सत्कर्मेत्यादौ सच्छब्द उदकादिना द्रव्यभेदेन रूपादिगुणभेदेन गमनादिकर्मभेदेन वा तद्वत्तं विशेषं तान् विशेषान् वा, सत्त्वमात्रवत्, इति सच्छब्दवाच्यार्थाभेदत्वं द्रव्यादीनां घटादीनाञ्च।

सच्छब्दो हि सदित्यसन्न भवतीत्यसत्त्वादवच्छिन्नं धर्मिणोऽशमात्रमभिधत्ते, न तस्यान्यं कञ्चिदपोहते, नित्यत्वाद्यंशवत्, तत्स्वरूपजातिविशिष्टद्रव्याभिधायित्वात्, तद्वत्, शुक्लश्रुतिवत् यथाऽशुक्लनिवृत्तिमात्रं धर्मं शुक्लशब्दोऽभिधत्ते तथा सच्छब्दोऽसन्निवृत्तिमात्रमुक्त्वा तदुपसर्जनं द्रव्यमाह, द्रव्यशब्दश्चाद्रव्यं न भवतीत्येतावदभिधत्ते, न तद्विशेषम्, इत्थं तयोरवच्छिन्नभागमात्रविषयत्वादभेदवत्त्वान्निर्विषयत्वम्, निर्विषयत्वात् कुत एकार्थता? असदसद्रूपेऽपि न सतो भेदा द्रव्यादयः, न द्रव्यस्य घटादयः, न वा सच्छब्दस्य द्रव्यादिशब्दाः, तस्मादतद्भेदत्वम्।

ननु च तत्र दृष्टं शुक्लखण्डादिसामानाधिकरण्यम्, अथवा दृष्टविरुद्धं त्वयोच्यते शुक्लशब्दस्वरूपजातिगुणानां खण्डद्रव्यस्य वाऽत्यन्तभिन्नार्थत्वम्, पुनस्तच्च खण्डं मधुरमिति शुक्लतरः शुक्लतम इति शुक्ला शङ्खस्य जातिर्नित्येति च, इह वा किं न दृष्टं सद्द्रव्यं सद्गुणः सत्कर्मेति, एतदेव तु दृष्टं सामानाधिकरण्यं गुणशब्दत्वे विशेषणद्वारेण शब्दस्वरूपजात्युपसर्जने तद्वति वा न प्राप्नोतीत्युच्यते परं प्रति दोषः, यथा चैते जातिमत्पक्षे सच्छब्दे घटाद्यनाक्षेपादिदोषाः शुक्लशब्द-मधुरानाक्षेपादिदृष्टान्तास्तथाऽन्यापोहपक्षे सच्छब्देऽपि, असाक्षा-

द्वचनत्वात् भवत्साक्षाद्वचने च गुणपर्यायलक्षणं विशिष्टं भवदेव सत्यं वस्त्वभिधीयते प्राधान्येन, द्रव्यघटपटादिभेदजातं गुणकर्मसामान्य-विशेषादि वाऽसत्, संवृतिसत्त्वात्, गुणपर्याय लक्षणो हि विशेष एव सन्, अङ्गुलिव्यतिरिक्तमुष्टिवत् बलाकादिव्यतिरिक्तपङ्क्त्यादिवच्चेति नास्वतन्त्रविशिष्टं भवद्वस्तु असदुपसर्जनं जात्युपसर्जनं वा रूपनीलत्ववदिति।

यथा चाहुः सच्छब्देन सह भेदशब्दा न समानाधिकरणाः तदभिधानेनानाक्षिप्तत्वात् शुक्लाभिधानानाक्षिप्तमधुरादिवत्, सच्छब्दो भेदैः सह न सामान्याभिधायी, भेदानाक्षेपात्, यथा शुक्लशब्दो मधुरादिभिः सह न सामान्यवाची, द्रव्यादिशब्दो न साक्षात् विशेषशब्द एव तद्द्वारेण विशेषार्थ एव वा, तद्विशेषासम्बन्धित्वात्, मधुरशब्द इव शुक्लब्दो न।

सच्छब्दो वाऽसद्व्यावृत्तिमन्तं नाभिधत्ते घटादिशब्दैः सहा-समानाधिकरणत्वात्, अनित्यशब्दवत्, यथा चाह

'विद्यमानाः प्रधानेषु न सर्वे भेदहेतवः।
विशेषशब्दैरुच्यन्ते व्यावृत्तार्थाभिधायिनः॥'[1]

इति, एतेनैव यत्नेन त्वदीयेन च कृतप्रयोजनत्वान्न पृथग्दूष्यते।

ननु चासदसच्छुतेः सामान्यश्रुतित्वादयमप्रसङ्गः, अत्र ब्रूमः केन तस्याः सामान्यश्रुतित्वम्? यदा सा स्वरूपगुणमात्रविशिष्टं द्रव्यमाह तदा भेदानामनाक्षेपात् कस्य तत्सामान्यमभिवदतीति

१. वाक्यपदीयम् काण्डः ३ श्लोकः ४

सामान्यश्रुतिरित्युच्येत, अत्र प्रयोगः न सच्छ्रुतिः सामान्यश्रुतिः भेदानाक्षेपादिति।

अथ वा *'तद्वतो नास्वतन्त्रत्वात् भेदाज्जातेरजातितः'*[1] इति सच्छब्दो मुख्यया वृत्त्या प्रकाश्यमानः संवृतिसद्वस्तुस्वरूपव्यवहितमाह, न च स तत्र वृत्तः स्वरूपव्यवहितेऽर्थे सत्यसतो व्यावृत्तेरसंभवात्, न तु तथा किञ्चित्सत् तत्तुल्यमस्ति, सतोऽन्यस्यासत्त्वात्। इत्थं सच्छब्दोऽसद्व्यावृत्तिं न करोति भूतार्थेन किन्तूपचारादसदसद्भवीति, सोऽपोहेऽपि तावददृष्टत्वात्तद्वति दूरत एवेत्यप्रधानत्वादस्वतन्त्रः, नहि यत्रोपचर्यते स तमर्थं भूतार्थेनाहेति, तथा चोक्तं

'मञ्चशब्दो यथाऽऽधेयं मञ्चेष्वेव व्यवस्थितः।
तत्त्वेनाह तथाऽपोहशब्दो द्रव्येषु वर्तते॥'[2] इति।

एतदनभ्युपगमेऽप्ययमन्योऽर्थोऽन्यापोहवत्पक्षदूषणः, स्वरूपेऽन्यापोहे च मुख्यया वृत्त्या तद्वत्युपचारेण वर्त्तते शब्दः, नाभिधानेनाह उपचारात्, सच्छब्दो हि अपोहवत्युपचर्यते न स तमर्थमभि-धानेनाह, मञ्चशब्दवदिति, सोऽप्युपचारो न घटत इति ब्रूमः, द्वयी ह्युपचारस्य गतिः सारूप्यात्, यथा राजामात्ययोरन्यतरस्मिन् स एवायमिति, प्रत्ययसङ्क्रान्तेः गुणोपकाराद्वा उपधानानुरागादिव स्फटिके रक्तत्वादिबुद्धिः, तत्र न तावत् सारूप्यात् प्रत्ययसङ्क्रान्तेरुपचारो यमलादिवत् सारूप्यासम्भवे प्रत्ययसङ्क्रान्त्यसम्भवात्, स्वामिभृत्ययोर्भिन्नत्वात्, यदि सैव बुद्धिः सङ्क्रान्ता स्यात् स्वामिनि भृत्ये च स्वाम्यनुज्ञातमुक्तवति न तु भवति, किं तर्हि?

१. प्रमाणसमुच्चयः २.

राजवदमात्य इति भिन्न एवाभेदोपचारा भवति, क्रमवृत्त्यभावाच्च, न हि क्रमेण सकृदुच्चरितः शब्दः क्षणिकत्वादसदपोहवर्त्तित्वात्तद्वति वर्त्तते राजभृत्यबुद्धिवत्।

नापि गुणोपरागात् स्फटिकवत्, विशेषणप्रकर्षमगृहीत्वा विशेष्ये प्रत्ययप्रसङ्गात्, अयथार्थज्ञानापत्तेः, युगपदसम्भवाच्च, यथा च बहवो ग्रहीतारो भवन्ति गुणवतः शुक्लादेः तदा गुणोपकारे विरुध्यते, न हि शक्यं तदा द्रव्येणैकगुणरूपेण स्थातुम्, अनेकात्मकस्याविशिष्टत्वेऽप्येकदेशेन गुणरूपमनुभवितुं शक्यम्, कृत्स्नस्य घटादिरूपप्रतीतेः, अथ पुनः सर्वैर्घटत्वादिभिरुपकारो युगपत् कृत्स्नस्य क्रियते ततः सर्वेषां प्रत्येकं ग्रहीतॄणां घटादिरूप-ग्रहणाभावात् सर्वगुणसङ्करणमेवैकदर्शनं युगपत् सर्वरूपापत्तेः स्यात् स्फटिकवदेव, स्वशब्दार्थप्रवृत्ति ....।

इतश्च त्वन्मतिवत् तद्वतो न वाचको भेदात्, भिन्ना हि व्यावृत्तिमन्तः सत्त्ववन्त इवार्था घटादयः, असदसन्तोऽर्था घटादयो भेदानाञ्चानन्त्ये सम्बन्धाशक्यत्वात् व्यभिचाराच्चावाचक इत्युक्तं प्राक् त्वयैव।

"ननु नायं घटादिषु सत्त्ववन्मात्रपक्ष इवासदसन्मात्रपक्षे भेदानभिधानेन दोषः परिहृत इत्यत्र ब्रूमः यस्याभिधानं शब्द इष्यते सोऽर्थोऽसदसन्मात्राख्यो भेदवत्सत्त्वं वा स्यात्, भेदनिरपेक्षा सत्तैव वा, सत्तासम्बन्धो वा सत्त्ववन्मात्रं वा, तत्र सन्मात्रविधिवादिमत-वदपोहवादिमतेऽपि विकल्पचतुष्टये स्थिते समान एवात्रापि विचारो ग्रन्थश्च।

'नापोहशब्दो भेदानामानन्त्याद्व्यभिचारतः ।
वाचको नियमार्थोक्तेर्जातिमद्वदपोहवान् ॥

न जातिशब्दो भेदानामानन्त्याद्व्यभिचारतः ।
वाचको नियमार्थोक्तेः सत्ताद्यर्थोऽप्यतो न सः ॥''

इति, एवं सन्मात्रसत्ताद्यापादनवदिहापीति तुल्यदोषत्व विवक्षया भवन्तमन्यांश्च प्रति न जातिशब्द इत्यादिरारभ्यते, जाति-शब्दस्तावत् सदादिः, सच्छब्दो हि जातिसम्बन्धिनो जातिमुपादाय द्रव्यादीनभेदोपचारादाह, तस्माद्व्यपदिश्यते जातिशब्द इति, यथा सिंहो माणवक इति, कस्मान्न वाचकः? आनन्त्याद्भेदानाम्, आनन्त्ये भेदानामशक्यः शब्देन सम्बन्धः कर्त्तुम्, आनन्त्याद्वा द्रव्यादीनाम्, ते हि घटपटरथादिभेदेनानन्ताः, सम्बन्धान्तरविशिष्टा-भिधायी शब्दः सम्बन्धान्तरविशिष्टशब्दवाच्यमसमर्थो वक्तुम्, गवाश्वादिवत्, न च कृतसम्बन्धः शब्दः ततो हि सम्बन्धाशक्यता, सम्बन्धाव्युत्पत्तेरनभिधानं स्वरूपमात्रप्रतीतेः यत्र शब्दस्यार्थेन न सम्बन्धो व्युत्पत्तौ यथा म्लेच्छशब्दानाम् तत्र शब्दमात्रमेव प्रतीयते नार्थ इत्यादिः सह टीकया भाष्यग्रन्थो द्रष्टव्यो यावत् .... अगुणत्वाद्व्यभिचारादिति, एतावच्च..... स्वाधारो वा तवास्ति सम्भव इति।

अथवा भेदात्, यस्माद्व्यावृत्तिमानसदसत्तावान्, अतो न तस्य भेदा घटादय इति स एव दोषः, तेन सहाभूतसामान्यत्वात्, यो येन सहाभूतसामान्यस्तस्य तेन सामानाधिकरण्यं न भवति, यथा सत्त्ववदर्थसच्छब्दस्य घटादिभेदार्थत्वाभावात् तेन सहासामानाधि-

करण्यं साक्षाद्विधिवादमत इव तवापि सच्छब्दोऽसदसत्त्ववदर्थो न भवतीति।

शब्दमात्रं हि तत्र प्रतीयते नार्थः, निमित्ताभावात्, छत्रिदण्डिवत्, यथा छत्रनिमित्तश्छत्री, दण्डनिमित्तो दण्डी, भिन्ननिमित्तत्वात् परस्परासमानाधिकरणौ तथा व्यावृत्तिमत्सच्छब्दपक्षेऽपि सन् घट इति भिन्नव्यावृत्तिविशिष्टसद्घटत्वसामान्ययोर्भेदादित्यत ऊर्ध्वं तुल्यगमनीयमेव विधिपक्षदूषणेन सर्वम्।

तद्व्याख्या — एकस्मिन्नर्थे घटादौ घटत्वपृथिवीत्वद्रव्यत्वसत्त्वादिभिन्ने वक्तृषु कश्चिद्घट इति ब्रूते कश्चित् पृथिवीत्यादि यावत्सन्निति, तत्र सोऽर्थः घटरूपेण कृत्स्नो वाऽभिधीयेत? एकदेशेन वा? न तावत् कृत्स्नः तस्मिन्नेव काले वक्तुं शक्यः, तस्य पृथिवीत्वेनाभिधानासम्भवप्रसङ्गात्, न ह्यघटव्यावृत्तिरूपसामान्यं गृहीत्वाऽतद्रूपाभिधायिशब्दप्रयोगो युक्तः, स चेतरवक्तृवशादपि कृत्स्नो घटरूपेण स्थित इत्यसम्भवो रूपान्तरस्य, कृत्स्नस्यैकव्यावृत्तिसामान्यरूपप्रतीतेः, अथास्यैकदेशं घट इत्यघटनिवृत्त्या गृह्णात्येकः, अपरोऽपार्थिवनिवृत्त्या देशं पार्थिव इति मतं तदयुक्तम्, अप्रतीतेरतदसत्त्ववत्सामान्यविषयत्वाच्च, यथाऽऽचार्यो मातुल इति।

अथापि स्यादसद्व्यावृत्तिजातिमत्येकत्रासदसत् वर्तते साक्षात् ततो बह्वर्था सत्ता, तस्याश्च सत्यां घटादिभेदवादिभिः शब्दैः सामानाधिकरण्यं भविष्यति, तत्सामान्यगुणत्वात्, तद्वाचिशब्दस्यापि तद्व्यवच्छेद्यविषयत्वात्। तद्यथा — अनन्यद्रव्यवर्तिनीलगुणसामान्येऽनीलनिवृत्तिसामान्यस्य नीलेतरादिद्रव्यवृत्तित्वात्

तैस्तद्वाचिभिः सह सामानाधिकरण्यं भवति, यथा नीलतरः पटो नीलतम इति चेति।

तच्च न, सामान्यविशेषभावस्य नीलत्वनीलगुणद्रव्यादेरनीलत्वानीलगुणद्रव्यनिवृत्तिलक्षणस्य तच्छब्दार्थाभावात् सम्प्रधार्यत्वात्; नीलशब्दोऽपि हि न द्रव्यं नीलत्वेनाह यत्तत्तरतमादि प्रकर्षभेदस्य सामान्यं स्यात्, किं तर्हि? अनीलवदभावम्, तत्र च न नीलनीलतरनीलतमानां कस्यचिदपि सम्भवः, अनीलाभावभावत्वान्नेति चेत्, एवं विधिशब्दार्थता तर्हि सैव, एवं हि सतोऽपि न सामानाधिकरण्यम्, अभूतसामान्यविशेषविषयत्वात्।

उपेत्यापि तु व्यावृत्तिमदभिधानं सामान्यविशेषत्वाभावोऽसदघटादिव्यावृत्तिमताम्, जातेरजातितः, न ह्यभिधानप्रत्ययहेतौ सज्जातौ घटत्वजातिरस्ति, यथा नीलगुणे द्रव्ये नीलप्रकर्षभेदः, यतोऽसदसत्त्ववतो वस्तुनोऽघटाभावघटत्वादीनुपादाय प्रवर्तेत, द्रव्याणि तावद*पोहवादिनस्ते*ऽस्माकमिव न घटाद्यभिधानानां हेतवः, यानि तत्कारणान्यघटासत्त्वादीनि तानि नासदसत्तायाम्, न चाविद्यमानः स्वात्मन्यर्थः शक्यते विशेष्यवस्तुन्यध्यारोपयितुम्, स्वरूपवत्। तस्मादविद्यमानतद्रूपं नीलमिव मधुरं न सद्घटादीन् विशेषयिष्यतीति कथं सामानाधिकरण्यं स्यात्?

अर्थाक्षिप्तास्तर्हि, असद्व्यावृत्तिमतोऽन्यतमघटत्वादिसामान्यविशेषानुबद्धत्वात्, नैतदस्ति, अर्थाक्षेपेऽप्यनेकान्तात्,..... असद्व्यावृत्तिमता विशेषाक्षेपो युज्यते चेद्भेदानां व्यभिचाराद्द्रव्यत्व-

मात्राक्षेपस्तर्हि भविष्यति, तदीप न गुणादिव्यभिचारात्, एतावच्च.....।

मा मंस्था अन्यापोहवादिलक्षणवदतिप्रसक्तत्वादपवादोऽस्या -प्यारब्धव्यो लक्षणस्येति किमन्यत्वे न सामान्यभेदपर्यायवाची? किं त्वं मन्यसेऽन्यत्वे सामान्यभेदपर्यायशब्दानामर्थं वृक्षश्रुतिर्नापोहतेऽ विरोधात्, विरोधाच्च पटादीनपोहते, अस्य हि विरुद्धाविरुद्धयो-रन्यत्वादपोहानपोहप्रसङ्गे तुल्ये त्वयेव मयाऽपवादो नारब्धोऽनारभ्य विधित्वात्, विधिना हि सामान्योपसर्जनं विशेषं शब्दोऽभिदधानो विरोधाभावात्तानपि गमयति, त्वया पुनरुत्सर्गवाक्ये महता क्लेशेन प्रतिपाद्यान्यापोहोऽपवादेन त्यक्तः, अनिर्वाहकत्वात्, सामान्यादि-शब्दान्तरार्थापोहानिष्टेः, ततः सामान्यादिशब्दान्तरार्थात्यागात्तु नन्वयमेव परमविधिः । विधानं विधिः लक्षणतस्त्वनपवादं प्रतिपत्त्याधानम्, स च शब्दार्थः सामान्यादिशब्दार्थेष्वव्याहतत्वात् परमः।

तत्र तावत्सामान्यादुक्तिः सामान्ये विशेषविध्यर्था न व्याहन्यते, त्वयैव सामान्यं नापनुदतीत्युक्तत्वात्, अस्मदिष्ट उपसर्जनी -कृतसामान्यो विशेषो विधिनैवोक्तः, यथा न हि घटादिबाह्यवस्तु सामान्योपसर्जनमन्तरेण भवितुमर्हति वस्तुत्वात्, आत्मवत्, यथा नामरूपसन्तानाख्य आत्मा शरीरादिप्रतिक्षणदेशभिन्नरूपादिसुख-विज्ञानादिविशेषतत्त्वार्थो नरकमनुजादि विशेषतत्त्व आमुक्तेः सन्तानाख्यसामान्योपसर्जनमन्तरेण न भवितुमर्हति, एवं घटशब्दे-नाप्यागृहीता मृदादयस्तच्छब्दार्थान्तःपातित्वात्, आकारादिवत् ।

एवं तावद्घटे विशेषशब्दार्थे पार्थिवद्रव्यसत्त्वादिसामान्यात्यागो युक्तो विधिप्रधानशब्दार्थत्वात्।

भेदास्तूच्यन्त एव, घटसामान्यस्य तदङ्गत्वात्, तद्भवनात्मकत्वात्, रूपादिस्वरूपशब्दार्थत्ववत् सामान्योपसर्जनद्वारेण प्रतिपादनार्थं सामान्यशब्दाः प्रयुज्यन्ते न तु परमार्थसता कल्पितेन वा विना तेन शब्दार्था भवितुमर्हन्तीति सामान्यशब्दप्रयोगो विशेषप्रतिपादनार्थः, विशेषास्तु विवक्षिता एव विशेषपरमार्थत्वात् अस्य नयस्य।

पर्यायशब्दा अपि तद्विधानाः, घटनविशेषस्य कुटन-कुम्भाद्यर्थात्मकत्वात्, कुटनघटनाभ्यां विना नास्ति कुम्भता नाम काचित्, तया वा विना न घटनकुटने स्त इत्येतदवगम्यतां घट इत्युक्ते तत्प्रतिपक्षशब्दार्थवदप्रतिपक्षसामान्यविशेषपर्यायशब्दार्था अन्ये ततस्तेषामान्यत्वे तुल्ये विधिप्राधान्यादेव तान्नापोहते। अतोऽस्माकमपवादलक्षणान्तरारम्भक्लेशादृते व्यापि युक्तञ्चासत्योपाधि-सत्यविध्यर्थलक्षणशब्दार्थकथनम्, भवतस्तु विध्यतिक्रमेण प्रस्तुतासत्त्वशब्दार्थानापत्तिरन्यापोहायुक्तिश्च।

एषोऽप्यनिष्टोपचयः उदकाद्याहरणार्थिने घट इत्युक्तेऽप्रस्तुतव्यावृत्तिशब्दार्थतापत्तिः, विधिपक्षे च साक्षादेव स्वार्थं ब्रूत इत्येष च विशेषः, पर्यायशब्दस्य तावत् घटकुटादेर्विधेय एवार्थः, दर्शनात्, तदेव हि विधेयं घटनं कुटनमुभयं वा, द्विमातृवत्, यथा विशेषणद्वारेण विशेष्यप्रधाने निर्देशे राधकमाता पूर्णकमाता राधकपूर्णकमातेति द्वाभ्यामन्यतरेण वा विशिष्यते सैव, तथा

विशेषणस्वरूपापन्नविशेष्यप्रतीतित्वात् युगपदप्रयोगेऽपि स एव निमित्तोपलक्षितो भेदः प्रतीयते, न हि स्वार्थानुपातित्वाद्विधिः स्वरससमापतितः प्रतिक्षेप्तुं युक्तो निमित्तान्तरेणापि तस्यैव प्रतीतेः।

सुदूरमपि गत्वा तेन विना तदगतेरक्लेशेनागतो विधिरेव शब्दार्थः पर्याय इति, अत एव चाविनाभावात् सामान्यशब्देनापि स एव विशेषार्थः साक्षाद्विधिना प्रतीयते सर्वथाऽव्यवहितविधिवृत्तिना विधिना स्वभेदाः समाक्षिप्तास्तद्रूपपरमार्थत्वेनाङ्गाङ्गिभावगत्या, प्रतिषेधव्यापारनिराकाङ्क्षं विधिरूपेण विवक्षितविध्यर्थस्य प्रतिपत्तौ तस्योपसर्जनत्वेनापोहबुद्धेरनुत्पत्तेरेव स्वात्मा विधिः प्रधानोऽपोहोऽप्रधानः, शिंशपाद्युपहारिवृक्षशब्दार्थेऽघटावतारवत्, यथा वृक्ष इत्युक्ते शिंशपादिभेदानामन्यतमेन विनाऽर्थवान्न भवति वृक्षशब्द इति शिंशपाद्युपहरन्नर्थवान्, तस्मिन् मूलादिमति शिंशपाद्यवश्यम्भावि-विशेषस्वभावेऽर्थेऽघटानवतारः, अघटो न भवतीत्यस्य तु दूरत एव।

यदि तु सोऽप्यपोहपर एव स्यात् ततः सोऽवृक्षव्यावृत्ति वृत्तत्वाद्वृक्षभेदशिंशपादीन्नाक्षिपेत् नानुमन्येत न व्युदस्येत वा, अनर्थित्वादवृक्षाभवनवत्, अवृक्षो घटादि तदभवनस्य भेदा-नाक्षेपवद्वृक्षशब्दस्य व्यावृत्तिवृत्तत्वाद्भेदाक्षेपे व्यापार एव नास्ति, यदसौ वृक्षार्थं घटादिभ्योऽन्यत्वेन शिंशपादिभेदात्मकं स्वार्थमनन्य-त्वेनाक्षिपति तस्मात्तेन सह सामानाधिकरण्यं प्रतिपद्यते वृक्षः शिंशपेति तद्भवनविध्येकार्थीभावात्, तद्भवनभवनविधिविनाभावे तु न युज्यते, भवनविधिविनाभूतस्य भेदाक्षेपाभावात्, साधनमप्यत्र

भवनविधिविनाभूतं भेदानाक्षेपि न समानाधिकरणं वृक्षः शिंशपेति त्वदभिमतं वस्तु स्यात्, अभावत्वात् वन्ध्यापुत्रवत्।

कुतोऽस्य भेदस्य भेदत्वम्? वृक्षसामान्यस्यावृक्षाभावत्वे सत्यसिद्धत्वात्, कथं सोऽपि तर्ह्यभेदो न भवति शिंशपादिर्वृक्षः? अनिवृत्तेः, शिंशपा वृक्षाभावाव्यावृत्तो वृक्ष एव न भवति कुतोऽभेदः, अत्रोच्यते यद्यसावपि भेदो न भवति न तर्हि वृक्षो वृक्षो भवति, अभूतशिंशपादिभेदत्वात्, घटवत् सोऽप्येवमेव, अभूतग्रीवादिभेदत्वात्, वृक्षवत्, एवं ग्रीवादिरभूतकपालादित्वादित्यादि यावत् परमाणुर्न भवत्यभूतरूपादिभेदत्वात्, विज्ञानवत्, रूपादिरप्यरूपादि, अभूतरूपक्षणभेदत्वात्, विज्ञानवदेव, सर्वत्र वा सामान्येन न भवन्त्यतोऽर्थाः स्वभेदशून्यत्वात् खपुष्पवत्, एवञ्च सर्वमिदं दृश्यादिवस्तु शून्यमापद्यते त्वन्मतेनैव कः किं केन कस्माद्वाऽपोहते?

अथ कथञ्चित् भवत्यपि वृक्षोऽवृक्षो न भवति शिंशपा न भवति शिंशपाभवत्यपीतीष्यते ततो ब्रूमः स्वार्थे इत्युक्तेर्विधिर्विषयः संवृत्तोऽर्थः, तदुपसर्जनश्चापोहोऽसत्त्वादसत्यः, उक्तवदेवेत्येष शब्दस्य विशेषार्थविधिः, एतेन सामान्यशब्दार्थविशेषताप्युक्तैव।

यथाऽन्यत्वे विशेषप्राधान्यात् सामान्यभेदपर्यायशब्दार्थास्तदङ्गत्वात्तदात्मकत्वाद्वा नापोह्यन्ते तथा विवक्षितशब्दादन्यस्याविशेषशब्दस्य स्वार्थं विशेषशब्दोऽभिधत्तेऽतत्त्वेनात्मानं विदधत् अभेदत्वान्न सत्त्वापत्तिपरित्यागेनैकान्तं विविक्तम्, नाप्यवृक्षाद्यसत्त्वापत्तिमेव, किन्तु शिंशपादिशब्दः तत्सम्परिग्रहेण शिंशपादि, अत्यजन्नेवानुवृत्तिव्यावृत्ती तदुपसर्जनाशिंशपाऽभवनबीजतां यन्

स्वार्थमभिधत्ते, इतरथा किमित्यसावपोहेताप्रतिपादयन् किञ्चित्? यदिसोऽप्यपोहपर एव स्यात् शिंशपाशब्दो न विदध्याद्वृक्षार्थम्, शिंशपाविशेषात्मापन्नव्यावृत्तत्वात्, नानुमन्येत नाप्यपोहेत वाऽर्थापत्तिलभ्यत्वाद्वृक्षार्थो मा भूत्, तथा चोपात्तार्थविरोध इति, कुतोऽविध्याननुमत्यव्युदासा इति चेदनर्थित्वात्, अनर्थी हि शिंशपाशब्दो वृक्षादिना सामान्येन, अशिंशपाभवनवत्, अशिंशपा घटादि तदभवन एवापक्षीणशक्तितया वृक्षादिसामान्यात्मकशिंशपा-विधाने व्यापार एव नास्ति, यदसौ शिंशपाशब्दो शिंशपार्थघटादि-भ्योऽन्यत्वेन वृक्षादिसामान्यात्मकं स्वार्थमनन्यत्वेन विदधाति ततस्तेन सह वृक्षः शिंशपेति सामानाधिकरण्यं प्रतिपद्यते । वृक्षः शिंशपेति तद्भवनविध्येकार्थी भावात् तद्भवनविधिविनाभावे तु न युज्यते, भवनविधिविनाभूतं सामान्यानाक्षेपि न समानाधिकरणं, वृक्षः शिंशपेति त्वदभिमतं वस्तु स्याद् भावत्वादवृक्षत्वा-द्वन्ध्यापुत्रवत्, कुतोऽस्य सामान्यस्य सामान्यत्वम्? शिंशपादि भेदस्याभावत्वे सत्यसिद्धत्वात्, कथं तर्हि सोऽपि भेदो न भवति वृक्षः शिंशपादिः, अन्यस्मादव्यावृत्तेः, वृक्षः शिंशपाभावा-दाम्रादेरव्यावृत्तेः शिंशपैव न भवति कुतो भेदः? अत्रोच्यते यद्यसावप्यभेदो न भवति न तर्हि शिंशपा शिंशपा भवति, अभूत-वृक्षादिभेदत्वात् घटवत् सोऽप्येवमेव, अभूतमृदाद्यभेदत्वात्, एवं सर्वत्र सामान्येन न भवन्त्यर्थाः स्वसामान्यशून्यत्वात्, खपुष्पवत् । एवञ्च सर्वमिदं दृश्यादिवस्तु शून्यमापद्यते त्वन्मतेनैवेति कः केन कस्माद्वाऽपोहते, अथ कथञ्चित् भवन्नपि वृक्षो वृक्षो न भवतीति शिंशपा भवत्यपि शिंशपा न भवतीतीष्यते ततो विधिर्विषयः

संवृत्तस्तदुपसर्जनश्चापोहोऽसत्त्वादसत्यः उक्तवदेवेत्येष शब्दस्य विशेषार्थविधिरिति।

यत्त्वविरोधादित्युक्तं सोऽप्येवमेवाविरोधो घटते भवनविध्येकार्थीभूतत्वान्नान्यापोहे, अन्यत्वाविशेषात्, अभावतुल्यत्वाच्च, समूहश्च प्रकृतिप्रत्ययादीनां तदर्थान्तरवाचकः, एवञ्च विधिप्रधानशब्दार्थत्वात् सामान्यविशेषशब्दयोः प्रकृतिप्रत्ययययोर्भवनसामान्यापरित्यागिनोस्तद्विशेषकर्तृपदार्थवाचित्वं समूहेन भवतीति नीलोत्पलमिति वर्तिपदार्थभवनसामान्यवाचिनोर्विशेषणविशेष्यत्वसम्बन्धलक्षणसामान्यविशेषभाविवृत्त्यर्थवाचित्वम्, द्यादिसमूहस्य वाक्यार्थवाचकत्वम्, उपात्तार्थाविरोधिसामान्योपसर्जनप्रकृतविध्यर्थत्वात् सर्वशब्दानाम्।

अयञ्च..... ॥ अनेन पारतन्त्र्यात् सच्छब्दानाक्षेपवचनेन सन् घट इति सामानाधिकरण्यं न प्राप्नोतीति प्रत्युक्तं प्रतिषेधसामानाधिकरण्यं वेदितव्यम्। आह च -

'तन्मात्राकाङ्क्षणाद्भेदः स्वसामान्येन नोज्झितः।
नोपात्तः संशयोत्पत्तेः साम्ये चैकार्थता तयोः ॥'[1]

इति, आत्मार्पणामात्रमाकाङ्क्षति सामान्यं स्वभेदे, अतस्तन्मात्राकाङ्क्षणाद्भेदः शिंशपा वृक्षेण सामान्येन नास्ति ततोऽन्यश्चेति किं तर्ह्युपात्त एव तदनुबद्धतत्त्वात्, अन्यत्वे सत्यप्येककार्यत्वादेकार्थता सामान्यविशेषयोरन्योऽन्यापरित्यागे सत्यात्मलाभादन्यतरत्यागे

१. प्रमाणसमुच्चयः

स्वरूपाप्रतिलम्भात्, अत्र यदुक्तं *'नोपात्तः संशयोत्पत्तेः साम्ये चैकार्थता तयोः'* इति तत् कुतः संशयः? कुतो वा साम्यैकार्थस्ते, अनुपात्तत्वाद्विशेषाणाम्, उपात्तत्वान्न संशयः स्याद्वृक्षवदिति चेन्न, उक्तत्वात्।

अनेकश्च सामान्यमिह वृक्षः शिंशपेत्युक्ते भेदशब्देनोपात्तम्, शिंशपाविध्येकार्थीभूतार्थत्वात्, अतस्तयोश्चित्रा विशेषणविशेष्यता, विवक्षावशात्, शिंशपा वृक्षः वृक्षः शिंशपेत्यनियमदर्शनात्, नामाद्यनेकं सामान्यं, पूर्वोक्तविधिना सर्वस्य नामादित्वात्, शिंशपैव वा नामाद्यपेक्षया सामान्यम्, तच्चेदं भेदेन वृक्षेण व्यभिचारिणा विध्येकार्थीभूतत्वादुपात्तं ततः संशयः स्यात्, अवृक्षशिंशपा -व्यावृत्त्यर्थं वृक्षशिंशपामानयेति भवत्येव विशेष्यविशेषणत्वानियमः, न तु यथोच्यते त्वया न तयोस्तुल्ये विशेषणविशेष्यते इति, दृष्टत्वान्नियमेन तुल्यत्वस्य। यदप्युच्यते त्वया

'भेदो भेदान्तरार्थन्तु विरोधित्वादपोहते।
सामान्यान्तरभेदार्थाः स्वसामान्यविरोधिनः॥'[1]

इति, तत्रापि न तु विरोधित्वादपोहते, विरोधाभावात्, अङ्गाङ्गिभावेन सामान्यविशेषभावापत्तेः सर्वस्य, कस्मात्तर्हि अपोहते? उच्यते -

'स्वार्थावबद्धशक्तिश्च भेदो भेदमपोहते।
सामान्यार्थविशेषार्थविधिमन्नियमश्रुतेः॥'[2]

---

१. प्रमाणसमुच्चयः २. तत्रैव

इति स्वार्थावबद्धशक्तित्वात् शिंशपाशब्दः खदिरादिमपोहते, सामान्यार्थविशेषार्थविधिमन्नियमश्रुतेर्भेदान्तरस्याविवक्षितत्वात्, न तु विरोधित्वात्, सामान्यविशेषयोरविनाभावित्वे सामान्याविनाभाविना विशेषान्तरेण स्वरूपेणैव कथं विरुध्यते विशेषः?[1] एतेन सामान्यान्तरभेदार्थाः स्वसामान्यविरोधिन इत्यादि सर्वमभिहितन्यायेन प्रत्युक्तार्थमित्यलमतिप्रसङ्गेन।

यत्तूक्तं कथं पुनः शब्दस्यार्थान्तरापोहेन स्वार्थाभिधानम्? पूर्वदोषाप्रसङ्गश्च कथम्? इत्यत्र त्वया

'अदृष्टेरन्यशब्दार्थे स्वार्थस्यांशेऽपि दर्शनात्।
श्रुतेः सम्बन्धसौकर्यं न चास्ति व्यभिचारिता॥"

अनुमानानुमेयसम्बन्धो हि अभिधानाभिधेयसम्बन्धः, तत्र यथा धूमस्यैकदेशे दर्शनादग्नेर्वाऽदर्शनादनग्निव्युदासेनाग्निप्रतीतिः तथा शब्दस्यान्वयव्यतिरेकावर्थाभिधाने द्वारम्, तौ च तुल्यातुल्ययोर्वृत्त्यवृत्ती, तत्र तुल्ये नावश्यं सर्वत्र वृत्तिराख्येया, क्वचिदानन्त्येऽर्थस्याख्यानासम्भवात्, न हि संभवोऽस्ति वृक्षशब्दस्य सर्ववृक्षेषु दर्शनेन, नापि सर्वत्र लिङ्गिनि सर्वलिङ्गस्य सम्भवोऽग्निधूमादिवत्, यद्यपि च क्वचिदस्तिडित्यादिषु सम्भवस्तथापि न तद्द्वारेणानुमानम्, सर्वात्मनाऽप्रतीतेः, गुणसमुदायो हि डित्याख्योऽर्थः, न च सर्वे काणकुण्टादयो डित्यशब्दाद्गम्यन्ते, एवमन्वयद्वारेणानुमानाभावः।

---

१. प्रमाणसमुच्चयः

अतुल्ये तु सत्यप्यानन्त्येऽशक्यमदर्शनमात्रेणाख्यानम्, अदर्शनेऽप्रवृत्तेः, अत एव च स्वसम्बन्धिभ्योऽन्यत्रादर्शनात्तद्व्यवच्छेदानुमानम्, एवञ्च कृत्वा वृक्षशब्दाद् द्रव्यत्वानुमानमुपपन्नं भवति, अन्वयद्वारेण चानुमानेऽयं दोषः, यस्मादनुगतोऽस्ति वृक्षशब्दार्थादिसहितस्य शिंशपादिषु तस्मात् केवलेनाप्यनुमानं प्राप्नोति।

अथ बहुषु पलाशादिष्वपि दृष्ट इति संशयो भवतीति चेत्, एवं सति वृक्षार्थे पार्थिवत्वद्रव्यत्वसत्तार्थाः सन्ति तेषु वृक्षशब्दस्य समानत्वात् संशयः स्यात्, निश्चयस्तु दृष्टः शब्दादवृक्षनिवृत्त्यर्थाभिधानवदपार्थिवादिव्यावृत्त्या वृक्षाभिधानात्, तथापि वृक्षपार्थिवद्रव्यसच्छब्दा आनुलोम्येन त्रिद्व्येकार्थनिश्चयहेतवः, न च सम्बन्धद्वारं मुक्त्वा शब्दस्य लिङ्गस्य वा स्वार्थख्यापनशक्तिरस्ति, आह च

'बहुत्वेऽप्यभिधेयस्य न शब्दात् सर्वथा गतिः।
स्वसम्बन्धानुरूप्येण व्यवच्छेदार्थकार्यसौ॥'[1]

अनेकधर्माशब्दोऽपि एतदयुक्तम्। यतोऽन्वयव्यतिरेकावपीह न घटेते,

'अन्यापोहार्थनैर्मूल्यात् स्वार्थस्यांशेऽप्यदर्शनात्।
श्रुतेः सम्बन्धदौष्कर्यात् तथापि व्यभिचारिता॥'[2]

इति, यदिदमुक्तमर्थान्तरापोहेन स्वार्थाभिधानमिति, अत्रार्थान्तरं नामाऽन्योऽर्थ इति यस्माद्भवति तस्मात्तत्तावद्विचार्यते, म किमन्योऽर्थः स एव भवति विधिना? उतान्यो न भवतीत्यपोहेन?

---

१. प्रमाणसमुच्चयः २. ग्रन्थकृतः

तत्र यदि तावन्मतमन्य इति स एव भवतीति ततः तच्छब्दोत्पाद्यविज्ञानविषयत्वात् स इति शब्देन यद्विज्ञानं तस्य स्वार्थ एवान्याख्यार्थो विषयः संवृत्तः, ततश्च स्वार्थे तस्मिन्नव्यावृत्त्या विधिनैव प्रतिपन्ने किमपोहेन क्रियते? अर्थप्रतीतेर्वृत्तत्वात्, अथापि स्यादन्यापोहेन प्रयोजनमित्थं — तदा तस्मिन् विधिनाऽन्य-विज्ञानकाले यद्यन्यो भवति ततः स न भवति, अथ स भवत्यन्यो न भवतीत्यर्थादापन्नं तदन्ययोरुभयोरपि तत्त्वतश्च स्वत एव सिद्धम्, तस्मात् स्यादप्यनयोरन्यापोहप्रत्ययः उपसर्जनो विधिर्नभवितु-मर्हति, असत्योपाधिसत्यशब्दार्थत्वात्, इत्थमन्यप्रतिपत्तिर्विधिरेव न व्यावृत्तिः।

अथान्यो न भवतीति तस्याप्यन्यस्य यदि व्यावृत्तिरेव स्वरूपम्, ततोऽपि प्रश्नाव्यवस्था, सर्वत्रास्याक्षेपस्य तुल्यत्वा-दुक्तवत्, अन्यत्वस्य चोभयविषयत्वात् तदग्रहणे कोऽसावन्यः? यदपोहादन्यापोहः स्यात्, कुतो वान्यो न भवतीत्युच्यते? यतोऽस्यान्यस्यान्यत्वं सिद्धयेत् निर्धार्यमेतदन्यत्वम्।

एवन्तु न स कश्चिदर्थो भविता, उभयतोऽप्यभावप्रसङ्गात् स्वार्थस्यांशोऽपि न दृश्यत एव, अन्यो न भवतीत्युच्यमाने उभयतोऽपि न भवति न भवतीत्यन्यस्याव्यावृत्तिरेव न कश्चित् विधि-गन्धोऽपीत्यन्यथा वृत्तेरभवनपरमार्थत्वादात्मान्यत्वाभावः, ततश्चा-भूतस्वान्यत्वाद्वन्ध्यापुत्रवदविषय एव, स च निबन्धनमन्यापोहस्य स्यात् ततश्चाप्रतिपत्तिरेव वन्ध्यापुत्राप्रतिपत्तिवत्।

अथोच्येतान्योऽप्यनन्यो न भवति, अन्यापोहशब्दार्थव्यापित्वात् व्यावृत्त्यैव गमयतीति, अत्रोच्यते यद्यन्य इत्यनन्यो न भवति ततोऽन्यस्यैवानुवदनात् किमुक्तं भवति योऽयमन्यः सोऽन्य एव सन्ननन्य उच्यते, स एव स्वयमेव भवति ततो योऽसावनन्यो नाम सोऽन्य एव सन्ननन्य इत्युक्तं भवति, तस्मात्तस्यैवानन्यशब्देनाप्यनुवदनात् कोऽसावन्यः पृथक्? यद्यर्थान्तरं स्यादन्यान्यत्वतदनन्यत्वात्तुल्यः शब्दार्थः स्यात् यथा वैधर्म्येण घट इत्युक्ते ऽघटो नान्यतदन्यातुल्यो दृश्यते न तथेह कश्चिदनन्य शब्देनाभिन्नोऽनन्योऽस्ति, यतोऽस्यान्यान्यस्माद्भिन्नस्य पटवदवृत्तिः स्यात्, अन्योऽन्यापेक्षत्वादन्यत्वस्य, अन्यशब्दार्थस्य चानन्यशब्दार्थाद्भिन्नत्वेऽन्य इत्युक्तेऽनन्यो न भवतीत्यपोहार्थी। विधिर्भिन्नः स्यात्, अतुल्येऽन्यस्मिन्नवृत्तेः, घटपटवत्, न त्वस्ति, अन्यस्यैवान्यस्यानन्यत्वात्।

स्यादेतदेवं यद्यन्य एवान्यत्वे स्थितोऽनन्य उच्येत परापेक्षान्यत्वात् स एवान्य इति, किन्तर्हि स्वापेक्षान्यत्वादेव, योऽसौ तदतत्त्वातुल्यः स स्वतोऽन्यस्मादेवान्यस्मात् अन्यः सन् घटात् पटानन्यत्ववदनन्यः, न हि घटस्य इतरापेक्षान्यत्ववदन्यत्वम्, पटस्य वाऽनन्यत्वं घटान्यत्ववत्, यथोक्तद्वित्वतुल्यतायामपि तत एवात्मनोऽनन्यत्वं तत्त्वम् तस्मादन्यत्वमपि स्वत एव, अनन्यत्वमपि तथेति व्यवस्थिते भवत्यन्यापोह इति।

नन्वेवं सोऽपि अन्यस्मात् अन्य एव भवन् अनन्यो भवति, तस्यान्यस्य स्वात्मनि व्यवस्थितस्य तदनन्यत्वं तत्त्वमपोह-

मानोऽन्यापोहस्तदपोह एव भवति नान्यापोह इति स्ववचनाद्यशेष-पक्षविरोधापत्तिः, विधिवादापत्तिश्चैवम्, अथान्यापोह इति चानन्यो ऽपोहो न भवतीत्यपि न परिहार एव, अन्यापोह इत्यनन्याभावा-पोहो न भवति, यतोऽर्थान्तरापोहेन स्वार्थेऽपोहे वृत्त्यर्थेऽन्य-विशिष्टोऽपोह इति।

यथाऽपोह इत्यनपोहो न भवति तथा अन्यापोह इत्युक्तेऽन्या-भावार्थान्यशब्दतायां सत्यामनन्याभावस्य व्यावृत्तेरपोहो भवतीत्य-न्यापोहार्थः संवृत्तः, तस्य चेदनन्याभावस्यान्यस्यापोहो न भवति न तर्ह्यनन्यस्यानपोहो न भवति तत्प्रतिपक्षत्वादनन्यानपोहस्येति, तथेहानन्य इत्यन्यशब्दार्थे त्वदीयेऽन्यापोह इति नान्याभावस्यापोहो न भवति, किन्तु स्वाभावस्यापोहो न भवतीत्यन्यापोह एव न भवति, किन्तु अनन्यापोहः स्वापोह एवेत्यनिष्टः ते प्राप्तः, अन्यस्यैवापोहो नानन्यस्येत्यवधारणान्नैष दोष इति तन्न, तत्रापि कोऽन्यः? कोऽनन्यः? कोऽपोहः? कोऽनपोहः? इति विचारणाया-मनन्याभाव एव, उक्तवदनवधारणात् विधिवादापत्तेः सर्वथाऽ न्यापोहनैर्मूल्यमिति स्थितमेतत्, अनन्याभावस्यापोहो न भवतीति।

एवं प्रक्रमेऽपि च न स कश्चिदर्थो भविता, उभयतोऽप्य-भावप्रसङ्गात्, स्वार्थस्यांशोऽपि न दृश्यत एव, अनन्यो न भवती-त्युच्यमाने उभयतोऽपि न भवति न भवतीत्यनन्यस्याव्यावृत्तिरेव, न कश्चिद्विधिगन्धोऽपीत्यन्यथावृत्तेरभवनपरमार्थत्वात् अभूतस्वानन्यत्वा-द्वन्ध्यापुत्रवदविषय एव, स च निबन्धनमन्यापोहस्य स्यात्, येषामपि चार्थान्तराणां मध्ये यत्तदर्थान्तरं तत् किं भवदेव भवति?

अभवद्वा? यदि तावत् स एव भवन्नर्थोऽर्थान्तरत्वेन स्थितः तदा तच्छब्दोत्पाद्यविज्ञानविषयस्य सिद्धत्वात् तस्मिन्नव्यावृत्त्या विधिवृत्त्यैकगतिगुरुतरप्रतिपत्त्यात्मके बहुतरविषये विधिवादे प्रतिपन्ने किमपोहेन पुनः क्रियते?

तदा ह्यर्थापत्त्या अनुगतसामान्यज्ञानं व्यावृत्तिसामान्यज्ञानञ्च भवति यदि स्वार्थः अर्थान्तराणि चैतदुभयं स्वत एव सिद्धात्मस्वभावं विधिनैव भवतु, को वारयति? असत्योपाधिसत्यशब्दार्थत्वात् पूर्ववत्।

अथार्थान्तरं न भवतीति मन्यसे ततोऽनवस्था प्रश्नस्य, पूर्वव्याख्यातान्यशब्दार्थप्रश्नानवस्थानवत्, अर्थान्तरस्य वोभयविषयत्वात्तदग्रहणे किं तदर्थान्तरम्? कुतो वाऽर्थान्तरं न भवतीत्युच्यते? इति द्विष्ठत्वादर्थान्तरत्वं निर्धार्यम्, एवन्तु न स कश्चिदर्थो भविता, उभयतोऽप्यभावप्रसङ्गात् स्वार्थस्यांशोऽपि न दृश्यत एव, अर्थान्तरं न भवतीत्युच्यमाने उभयतोऽपि न भवति न भवतीत्यर्थान्तरस्याव्यावृत्तिरेव न कश्चिद्विधिगन्धोऽपीति अन्यथावृत्तेरभवनपरमार्थत्वादात्मार्थान्तरत्वाभावः, ततश्चाभूतस्वार्थान्तरत्वाद्वन्ध्यापुत्रवदविषय एव, स च निबन्धनमर्थान्तरापोहस्य स्यात्। अथोच्यतेऽर्थान्तरमनर्थान्तरं न भवतीति, अत्रोच्यते यद्यनर्थान्तरं न भवति ततोऽर्थान्तरस्यैवानुवदनात्, किमुक्तं भवति यदर्थान्तरं तदर्थान्तरमेव सदनर्थान्तरमुच्यते तदेव स्वयमेव भवति ततो यदिदमनर्थान्तरं नाम तदर्थान्तरमेव सदनर्थान्तरमित्युक्तं भवति, तस्मात्तस्यैवानर्थान्तरशब्देनाप्यनुवदनात् किं तदर्थान्तरं पृथक्?

यद्यर्थान्तरं स्यादर्थान्तरार्थान्तरत्वतदनर्थान्तरत्वातुल्यः शब्दार्थः स्यात्, यथा वैधर्म्येण घट इत्युक्तेऽघटो नार्थान्तरतदनर्थान्तरातुल्यो दृश्यते न तथेह कश्चिदनर्थान्तरशब्देनाभिन्नमनर्थान्तरमस्ति यतोऽस्यार्थान्तरस्य पटवदवृत्तिः स्यात्, अर्थान्तरशब्दार्थस्य चानर्थान्तरशब्दार्थाद्भिन्नत्वेऽर्थान्तरमित्युक्तेऽनर्थान्तरं न भवतीत्यपोहार्थो विधिर्भिन्नः स्यात्, अतुल्ये तस्मिन्नवृत्तेः, घटपटवत्, स्यादेतदेवं यद्यर्थान्तरमेवार्थान्तरत्वे स्थितमनर्थान्तरमुच्येत परापेक्षार्थान्तरत्वात्तदेवार्थान्तरमिति, किन्तर्हि? स्वापेक्षार्थान्तरत्वादेव, योऽसौ तदतत्त्वातुल्यः तस्य स्वतः तस्मादेव पटाद्घटानर्थान्तरत्ववदनर्थान्तरत्वम्, नन्वेवं तदप्यर्थान्तरं अर्थान्तरादर्थान्तरमेव भवदनर्थान्तरं भवति, तस्यार्थान्तरस्य स्वात्मनि व्यवस्थितस्य तदनर्थान्तरत्वं तत्त्वमपोहमानोऽर्थान्तरापोहस्तदपोह एव भवति नान्यापोह इति स्ववचनाद्यशेषपक्षविरोधापत्तिः, अथार्थान्तरापोह इत्यनर्थान्तरापोहो न भवतीत्यपि न परिहार एव, अर्थान्तरापोह इत्यनर्थान्तराभावापोहो न भवति यत इत्यादिः स एव ग्रन्थोऽत्र द्रष्टव्यः, एवमुपक्रमेऽपि च न स कश्चिदर्थो भविता, उभयतोऽप्यभावप्रसङ्गात्, स्वार्थस्यांशोऽपि न दृश्यत एव, अनर्थान्तरं न भवतीत्युच्यमाने उभयतोऽपि न भवति न भवतीत्यनर्थान्तरस्याव्यावृत्तिरेव, न कश्चित् विधिगन्धोऽपीत्यन्यथावृत्तेरभवनपरमार्थत्वादभूतस्वानर्थान्तरत्वाद्वन्ध्यापुत्रवदविषय एव स च निबन्धनमर्थान्तरापोहस्य स्यादिति।

चतुर्थपादेन यत्त्वयोक्तं *'न चास्ति व्यभिचारिते'*ति सा तावदास्तां स्वपक्षगतापोहवादिनः तवाव्यभिचारिता विप्रकृष्टत्वात्,

भेदपक्षे संशयदोषापादनार्थं यत्तूक्तं त्वया व्यभिचारत इति, तन्न विधिवादे तदतद्भावात्मकस्य संशयज्ञानस्य प्राप्तत्वात् किमिव न प्राप्तमभिधानम्? अत्र तूक्तन्यायेन त्वत्पक्षे संशयाद्यनास्पदम्, तदतद्भावभावात्मकशब्दार्थत्वात् तद्व्यक्तेरस्वार्थत्वात् न भवति न भवतीत्युभयतोऽप्यभावविषयत्वात्।

अथवा त्वन्मतवदेवादर्शनादन्यशब्दार्थः स्वार्थस्य वांशेऽप्यदर्शनादिति, यथोक्तं वृक्षशब्दस्य वृक्षेषु सर्वेषु नहि दर्शनेनास्ति सम्भवः, नापि सर्वत्र लिङ्गिनि सर्वलिङ्गस्य सम्भवोऽग्निधूमादिवत्, यद्यपि च क्वचिदस्ति डित्थादिषु सम्भवः तथापि न तद्वारेणानुमानम् सर्वात्मनाऽप्रतीतेः, गुणसमुदायो हि डित्थाख्योऽर्थः, न च सर्वे काणकुण्टादयो डित्थशब्दाद्गम्यन्ते एवमन्वयद्वारेणानुमानासम्भव इत्यनेनोत्तरवचनेन त्वदीयेन स्वार्थांशेऽप्यदर्शनमेवेत्युक्तं भवति, तत एव चानुमानासम्भव इत्युच्यतेऽस्माभिः क्वचिददर्शनात्।

अन्वयानुयुक्त्युदाहृतेः व्यावृत्त्या डित्थोदाहरणमेतदिति चेन्न, तत्प्रतिपत्तिनिर्मूलत्वात्, अनवगतपर्युदासकस्वार्थत्वात्, अविदिते देवदत्ते न भवत्यदेवदत्त इति वचनवत् एवञ्च शब्दस्यार्थाभावेन सम्बन्धाशक्यत्वदोषो य उक्तः स इहापीति श्रुतेः सम्बन्ध दौष्कर्यम्, यः स वृक्षशब्दो यस्य स वृक्षोऽर्थस्तदितरो वा तस्य शब्दस्य तेनार्थेन न शक्यते सम्बन्धः कर्तुम्, तेन सहात्यन्तमदृष्टत्वात् श्रावणत्वनित्यानित्यत्ववत्।

स च सम्बन्धो नास्ति, उक्तवत्, अत एव यदुक्तं त्वया भेदाभिधानपक्षे दोषजातं व्यक्तत्वात् तन्नास्त्येव, असाधारण-

धर्मत्वात्, बाह्यसाधारणः पक्षधर्मा..... एकान्तव्यावृत्तेश्च, इदमपि चात्र यदन्वयव्यतिरेकौ शब्दस्यार्थाभिधाने द्वारमित्युक्त्वा पुनरन्वयस्य निराकरणं तद्भवतः केनाभिप्रायेणेति न विद्मः, किं अज्ञानात्? अस्मद्बुद्धिपरिभवात्? इहपरलोकाभ्यामयशसश्चाभीरुत्वात्? इति।

नन्वेवं सर्ववृक्षार्थदर्शनासम्भवात् भेदानन्त्याच्च स्वार्थदेशव्याप्यन्वयाभावात् गुणसमुदायमात्रत्वादभिधानाभिधेययोः कोऽसौ सम्बन्धो येनाभिधानाभिधेयाभाव उपपद्येत, लिङ्गचैकदेशसम्भविलिङ्गस्य गमकत्ववत्तु न स्वार्थांशमात्रे सम्भवति।

प्रत्यक्षवृक्षसम्बन्धाशक्यत्वे प्रतिपत्त्यभावबदेकत्वेऽपि मूलकोटरादिभेदानां सम्बन्धाशक्यत्वादप्रतिपत्तिः किमङ्ग! पुनरत्यन्तपरोक्षस्वर्गादिशब्दस्वार्थांशमात्रे नो चेद्धवखदिराद्यनन्त भेदाभिधानं वृक्षशब्दस्य स्यात्, अदृष्टस्वार्थांशत्वात्, अव्यापिपक्ष धर्मत्वात्, अवृक्षव्यवच्छिन्नस्यापि स्वार्थस्य नानुमानाय नाभिधानाय स्याद्वृक्षशब्दः, तदेकदेशवर्तित्वात्, अवनस्पतिव्यवच्छिन्नचैतन्यसाधनार्थस्वापवत्।

अशेषपक्षाव्यापी वृक्षशब्दो ह्यशेषमवृक्षव्यवच्छिन्नं वृक्षार्थं नामवृक्षं स्थापनावृक्षं वा सपक्षं नतु न व्याप्नोति, नाप्यनुमानेऽत्र दोषः तत्र कः सम्बन्धः साध्याशेषानित्यत्वाव्यापिप्रयत्नानन्तरीयकत्वानुमानत्वप्राप्तेः? स्वापोदाहरणनिरपेक्षादृष्टदेशवर्तित्वाभ्युपगमेत्वतुल्येऽपि वृत्तिप्रसङ्गः? अवृक्षे घटादौ वृक्षश्रुत्रेः अदृष्टदेशवर्तित्वात्, मूलादिमति पलाशादौ स्वार्थांशे वा वृत्तिवत्, तस्मादेव चानन्त्याद-

कृतसम्बन्धजातिशब्दभेदवाचित्वेऽप्यदोषः, तथाऽर्थांशेऽदृष्टत्वात्, अपोहस्वार्थवत्, त्वन्मतस्वार्थेऽपि वा तद्वद्दोष एव स्यादिति कुतः तुल्यातुल्ययोर्वृत्त्यवृत्तिभ्यामन्वयव्यतिरेकौ? कुतो वा शब्दस्याभिधेयस्य पक्षधर्मत्वम्? लिङ्गवल्लिङ्गिनः कुतस्त्रैलक्षण्यम्? कुतो ऽनुमानत्वम्?

एवञ्च शब्दलिङ्गगतपक्षापक्षमिष्यते तदेव पक्षाद्यतथार्थत्वादतत्तत्प्रत्ययात्मकत्वादनुमानमप्रमाणम्, अलातचक्रे चक्रमिति प्रत्ययवत्, तस्मात् साधूक्तं

'नाप्रमाणान्तरं शाब्दमनुमानात्तथाहि तत्।
कृतकत्वाद्यपि स्वार्थमात्मापोहेन नाश्रयेत्॥'[1]

इति, इदमपि वाऽत एव पूर्ववदलक्षणं यत्त्वयोक्तं यथा लिङ्गं लिङ्गिनं नातिक्रामति येन रूपेण तेनैव रूपेण चान्यतो व्यावृत्त्यात्मकेन गमयति, सत्त्वाद्यनेकधर्मापि सन् तैस्तान् व्यभिचारान्न गमयति, गम्यन्ते च लिङ्गयनुबन्धिनः सामान्यधर्माः तैरविनाभावात्, लिङ्गस्य विशेषा न गम्यन्ते तस्यैव व्यभिचारित्वात्, एवं लिङ्गस्यान्यव्यावृत्तं सामान्यं गमकं नाव्यावृत्तम्, लिङ्गिनः सामान्यं गम्यं निवृत्तम्, लिङ्गे त्वयं विशेषः *'लिङ्गानुबन्धिनः स्वार्थाः'*[2]

किमङ्गं..... । ..... ॥ ..... ।
..... ॥ .....। ..... ॥ यत्तूक्तं न सर्वत्र लिङ्गिनि लिङ्गं संभवत्यग्निधूमादिवदिति तदिदमपि यदि

१. ग्रन्थकर्तुः २. ग्रन्थकर्तुः

लिङ्गचेव, कथं तस्य लिङ्गं नास्ति? अथ नास्ति लिङ्गं कथं तद्वानिति स्ववचनविरोधि ते वचनम्।

अग्निधूमोदाहरणे चेदमः प्रत्यक्षविषयस्य सप्तम्यन्त-निर्देशेऽत्रेति प्रत्यक्षोपलभ्यधूमाधारप्रदेशाभिसम्बन्धो धूमवत्त्वाद्धूमा-दिति, यथाऽग्निरत्रेति साध्याधारप्रदेशप्रत्यक्षनिर्देशादग्नेः परोक्षस्य जिज्ञासितत्वात् तद्वत्त्वेन देशस्य साध्यत्वम्, इतरथाऽत्रेत्यनर्थको निर्देशः स्यात्, तस्मात् सर्वलोकप्रसिद्धिमत्यग्निमति प्रदेशे साध्ये सर्वत्र धूमवत्त्वं लिङ्गमस्त्येव, न च सर्वाग्निमत्प्रदेशसाध्यत्वम्, तत्र दृष्टान्ताभावादसाधारणतादिदोषप्रसङ्गात्।

अयोगुडाङ्गाराद्यग्नौ धूमासम्भवादिति चेन्न, अग्निसत्त्वस्य सिद्धत्वात्, अयोगुडाङ्गारभस्मच्छन्नाग्निष्वपि धूममात्रायाः कस्याश्चि-दर्शनात्तदविनाभावात् तद्विषयलिङ्गालिङ्गत्वात्तदलिङ्गित्वात् प्रत्यक्ष विषयवत्।

तदसिद्धौ पक्षधर्मादिनिर्मूलत्वाद्वनस्पतिचैतन्ये स्वापवत् स्यात्, देशविशेषानपेक्षाग्निसामान्यसाध्यत्वेऽसाधारणत्वमत्रेत्यभि-धानवैयर्थ्यञ्च, तन्मा भूदित्यत्रशब्दवाच्यस्याग्निविशिष्टस्य धूमपक्ष-विसंवादे साधर्म्याभावाल्लिङ्गशब्दयोः कुतोऽनुमानत्वं शब्दस्य? यदि लिङ्गवच्छब्दः त्रिलक्षणोऽन्यापोहेन स्वार्थं गमयतीति मन्यसे ततो वृक्षशब्दस्य व्यवच्छिन्नात् वृक्षादभिधेयादन्यत्र तुल्ये सपक्षे वृत्तिः स्यात्, अनुमानत्वात्, अन्वयदर्शनार्थप्रयुक्तघटादिवत्।

ननु वृक्ष एव वृत्तिः स्यात् पक्षत्वाद्वृक्षाणाम्, अनुमानत्वादेव त्वदभिमतावृक्षान्निवृत्तिमात्रं वृक्षता, नान्यस्मिन्नपि साध्यधर्म-

सामान्येन समानार्थाभिमतितुल्यार्थान्तरे वृक्षशब्दस्य वृत्तिरस्ति, सपक्षधर्मार्थावच्छिन्नार्थत्वात्, कृतकत्वस्येवानित्येषु, तस्मात् सपक्षाभावात्तत्तुल्ये नास्ति वृत्तिः शब्दस्य, किं तर्हि? तत्रैव वृत्तिः, तस्मात्रैलक्षण्याभावान्नानुमानं शब्दः, त्वन्मतवत्तत्रैव वृत्तावसपक्ष-वृत्तिगतदोषापत्तिश्च।

हेत्वपवादनियमितत्वादसद्वृत्तिगतदोषो नेति चेन्न, पक्षसपक्षा-सपक्षाव्यवस्थायां तद्व्यवस्थाभावात्, आपत्त्यभ्युपगमे त्वन्यापोहा-न्यथात्वात् स्वार्थापोह एव स्यात्, सपक्षावच्छिन्नस्यापि सपक्षत्वात्।

सपक्षापक्षेपणक्षीणशक्तेश्च पक्षापक्षयोर्विशेषं गमयितुं नालम्, साध्यनिर्देशवत्, तद्विषयपक्षधर्मत्वादेव तुल्ये वृत्तिरिति चेत्, अननु-मानं तर्हि शब्दोऽद्विलक्षणत्वात्, असाधारणवत् विरुद्धोऽपितद्विषय-मात्रार्थत्वादन्यापोहशब्दार्थत्वस्य, व्यतिरेकस्य स्वार्थासंभवादपि व्यर्थतैव वा, पक्षमात्रस्याप्यलक्षणत्वात्, अव्यक्तश्रुतिवत्।

गुणसमुदायो हि वृक्षार्थः उक्तवत्, संवृतिसतः सामान्य-समुदायाख्यस्यासत्त्वात् विशेषाणामृजुवक्रविवरकोटरादीनाम-वाच्यत्वात् तदेकलक्षणतापि नास्ति कुतः स्वार्थाद्भिन्नस्याभूतस्य प्रतिपत्तिः? अन्यस्य यतोऽपोहः सिद्धचेत्, स तु नास्ति, तदभावात्, यश्च वृक्षशब्दस्तस्य वृक्षार्थाभावात् पक्षधर्मत्वाभावः, तत्कथं वृक्षार्थो नास्ति? गुणसमुदायसंवृत्त्यर्थत्वात् सेनाशब्दवत् वृक्षशब्दस्य समुदायार्थवृत्तितैवेति चेन्न, अभ्युपगतमूलादीनां तदात्मत्वेनैकत्वे तदतुल्यत्वात् वृक्षार्थस्य तुल्यातुल्यवृत्त्यवृत्त्यादिवचनवैयर्थ्यमेव।

संवृतिसत्यत्वाच्च समुदायस्यापि वृक्षवदनर्थत्वात् सेनावनादेरपि व्यर्थत्वमेव, मूलादिस्वरूपसत्तामात्रत्वेनाप्यतुल्य एव

वृत्तिः, रूपादिभेदसमुदायसंवृत्यर्थत्वात्, रूपादिसत्यत्वप्रतिपादनार्थेऽपि च डित्थाद्युदाहरणे त्वयैव समुदायाभावोक्त्याऽन्यापोहप्रयासे रूपादिपरस्परव्यावृत्त्याऽभवनपरमार्थत्वान्न किञ्चित्सत्यम्, सजातीयासजातीयव्यावृत्तस्वरूपत्वात्, तत्सत्यस्यापि क्षणान्निपाति-त्वादत्यन्तापूर्वत्वादनिर्देश्यस्वलक्षणत्वात् कतमद्रूपम्? एवं सर्वत्रातुल्य एव वृत्तिः शब्दस्य, अप्रामाण्यं वा।

शब्दवत्तु लिङ्गाद्वैलक्षण्यमेव स्यादनुमानत्वात्, अननुमानं वाऽद्विलक्षणत्वादसाधारणवत्, अन्वयव्यतिरेकाभावात् पक्षधर्मत्वमात्रं विरुद्धवत्, सपक्षवृत्त्यभावात्, किमुक्तं भवति अन्यत्र वृत्त्यसम्भवात्, अत एवान्वयाभावाद्व्यतिरेकव्यापारावकाशाभावस्तस्मादेकलक्षणं शब्दवदिति, सन्निधानमप्यनुमानत्वार्थप्रतिपत्तावकारणम्, तावन्तरेणापि तदुपपत्तेः, साध्यधर्मसाधनव्याप्तिवत्, ततस्तयोरकारणत्वात् पक्षधर्मत्वमात्रकारणत्वादेकलक्षणं शब्दवल्लिङ्गमपि, अनुमानत्वात्, एकलक्षणत्वाच्च विरुद्धमपि, उक्तवत्।

शब्दोऽपि वा नानुमानं विरुद्धवदिति लिङ्गस्यापि प्राप्तम्, व्यर्थतैव वा, स्वार्थस्यासम्भवात्, पक्षधर्ममात्रस्याप्यभावोऽनध्यवसायात् म्लेच्छशब्दज्ञानवत्, विपर्ययाद्वा विरुद्धज्ञानवदग्निरत्र धूमादि-त्यस्मिन्नपि स्वार्थानुमाने गुणसमुदायो हि धूमाख्योऽर्थः बहलकुटिलत्वाद्यानन्त्ये च धूमत्वाभावो ज्ञातसम्बन्धत्वाभावात्, संवृतिमात्रत्वाच्च समुदायस्य तदर्थागतेस्तद्द्वारेण नानुमानमित्यलक्षणं लिङ्गं स्वार्थमात्रस्यापीति तदेकलक्षणतापि नैव, इत्थं कुत एव तस्यागृहीतत्वादुभयप्रतिपत्तेरभावेऽन्यापोहः?

पक्षधर्मे च वाऽग्निः धूमस्याधारः प्राप्नोत्यनुमेयत्वादिति सपक्षस्य तुल्यादेरभावस्तदभ्युपगमे पक्षाभावः, प्रागुक्तशब्दानुमानविषयवदिति तस्मिन्नेव पक्षधर्ममात्रलक्षणा वृत्तिः स्यादन्यत्र न, तस्मादन्वयव्यतिरेकौ न स्तः, अथ भवति ज्ञानं धूमोऽयमग्निरयं वृक्षोऽयमिति ततः शाब्दलिङ्गिके अपि ज्ञाने प्राप्ते प्रत्यक्षे, अन्वयव्यतिरेकवियुततथ्यज्ञानत्वात्, सन्निकृष्टार्थवत्।

अत इदं स्वप्रतिपाद्यवस्तुधर्मत्वे सत्यन्वयव्यतिरेकाभ्यां तस्य गमकत्वादनुमानं शब्द इति पूर्वापरासमीक्ष्यैवोक्तम्, अन्वयव्यतिरेकरहितत्वस्योक्तत्वात् प्रत्यक्षत्वस्योपपादितत्वात्, एष तु पाठो घटमान उपलक्ष्यते

'नाप्रमाणान्तरं शाब्दमनुमानात्तथा हि तत्।
कृतकत्वाद्यपि स्वार्थमात्मापोहेन नाशयेत्॥'[1]

इति, यदि न प्रमाणान्तरं शाब्दमनुमानात्तथा हि तत्। कृतकत्वादिवदिति मन्यते ततोऽन्यापोहार्थकृता दोषाः, न शब्द एवैकस्मिन् दोषाः, तद्विधदोषजालोपनिपातसम्बन्ध्येव तेऽनुमानमपि, नन्वेवं कृतकत्वाद्यप्यनुमानं स्वार्थमात्मापोहेन नाशयेदेव, अन्यापोहेन स्वार्थप्रतिपत्त्यगमकत्वात्, अन्यापोहशब्दार्थवत्, धूम इत्यधूमो न भवतीति निरन्वया प्रतिपत्तिरेव, ग्राह्यस्य दर्शनरहितत्वात्, अगृहीत-ब्राह्मणाब्राह्मणार्थप्रतिपत्तिवत् गुणसमुदायो हि धूमाख्योऽर्थः, पाण्डुबहलोत्सङ्गाद्यानन्त्ये धूमाभावात्, संवृतिमात्रत्वाच्च समुदायस्य तदर्थागतेः कुत एवान्यापोहः? एवं तावद्धूमार्थ एव न निश्चीयते, किं

१. ग्रन्थकृतः

पुनर्यत्रासौ धूमः स, ताभ्याञ्चान्ययोरपोहौ? तदभावात् कुतः तावपि? इति।

यच्च धूम..... गुणसमुदायोऽसौ नाग्निदेशौ नाम कौचिदपि स्तः, तज्ज्ञानाभ्यां तु तदध्यारोपणेनेत्यादि आ नन्वित्येतस्माद्ग्रन्थात् स एव ग्रन्थो यावदन्योपादानमात्मनश्च त्याग इति। एवं तावत् पक्षधर्मस्य चानुपपत्तिः किं भवदेव भवति? उताभवत्? अन्यापोहश्च गुणसमुदायपरमार्थश्च स्वार्थ इत्यादि विकल्पैरात्मापोहात्, तैरेव विकल्पैर्विचार्यमाणयोः सपक्षासपक्षयोरभावात् एवमनुमानमप्रमाणमेव, अतत्तत्प्रत्ययात्मकत्वात्, अलातचक्रधीवदिति।

अत्रेत्यभिधेयस्य लिङ्गित्वाल्लिङ्गत्वाच्चाग्निमद्धूमवत्तयोश्च विभागविवक्षायां साध्यसाधनधर्मभावाल्लिङ्गिनि लिङ्गस्यासम्भवो न सम्भवति, तयोस्तत्रैव प्रधानोपसर्जनभावेन परस्परं नियतभावत्वात्, तौ देशस्यैकस्य भेदविवक्षायां साध्यसाधने भवतः।

अग्निमत्पक्षोपरि विचिकित्सायां..... तत्सम्बन्धिमत्प्रतिपत्तिश्च, यदि च तस्य देशस्य.....तयोरेकवस्तुधर्मत्वात्, न चेदिच्छसि ततो नासम्भवद्धूमो लिङ्गतां लभते, अपक्षधर्मत्वात्, यथा तस्मिन् प्रदेशे प्रभादेः धूमोऽयोग्यादि काले वा, वनस्पतिचैतन्ये स्वापवच्च धूमः सन्देहहेतुः स्यात् पक्षाव्यापिसाधनधर्मत्वात् तत्प्रतिपत्त्याधानाधारधर्मभावात्मकप्रत्ययाव्यवस्थानकारणत्वात् स्थाणुपुरुषभावाभावप्रतिपत्तिवत्।

यत्तु तदन्यत्रादर्शनं प्रत्यक्षतस्तर्क्यते तत्र सपक्षे सर्वत्र दर्शनाभावेऽदोष एव, लिङ्गिन्यदर्शने तु स्याद्दोषः, लिङ्गी चात्र प्रदेशः प्रत्यक्षधूमसम्बन्धी तत्र सर्वत्र दृश्यत एव, तस्माद्भ्रान्तवचनमेतत् सर्वत्र लिङ्गिन्यदर्शनात्त्वदिष्टवत् प्रतिपत्तिरिति, एवञ्च दर्शनबलादेव गमयतीत्युक्ते यस्तद्विपरीतः प्रकाश्यप्रकाशकत्वभेदपाठः

'सम्बन्धो यद्यपि द्विष्ठः सहभाव्यङ्गलिङ्गिनोः ।
आधाराधेयवद्वृत्तिः तस्य संयोगिवन्न तु ॥'[1]

इति "यथाहि सत्यपि द्विगतत्वे सम्बन्धस्य न कदाचिदाधार आधेयधर्मा भवति, नाप्याधेयः आधारधर्मा तथा न कदाचिल्लिङ्गं लिङ्ग भवति लिङ्ग च लिङ्गं, संयोगी तु यथैकस्तथा द्वितीय इति न तद्वदिहेति, तथा हि

'लिङ्गे लिङ्गि भवत्येव लिङ्गिन्येवेतरत् पुनः ।
नियमस्य विपर्यासेऽसम्बन्धो लिङ्गलिङ्गिनोः ॥'[2]

यस्माच्च लिङ्गे लिङ्गी भवत्येव तस्माद्युक्तं यदग्निमद्धूमो द्रव्यत्वादीनां अस्ति प्रकाशको न तैक्ष्ण्यादीनाम्, यस्माच्च लिङ्गिन्येव लिङ्गं भवति नान्यत्र तस्माद्युक्तं यद्धूमो धूमत्वेनेव पाण्डुत्वादिभिरपि प्रकाशयति न द्रव्यत्वादिभिरिति ।

ननु च लिङ्गमपि लिङ्गिनि भवत्येव, यथा कृतकत्वमनित्यत्वे,

'कामं लिङ्गमपि व्यापि लिङ्गिन्यङ्गि न तत्त्वतः ।
व्यापित्वान्ननु तत्तस्य गमकं गोविषाणवत् ॥'[3]

---

१. प्रमाणसमुच्चयः २. तत्रैव ३. तत्रैव

यद्यपि किञ्चिल्लिङ्गं लिङ्गिनि भवत्येव, न तु तत्त्वेन लिङ्गिनं गमयति, तद्यथा — विषाणित्वेन गोर्व्यापित्वेऽपि न गोः प्रकाशकत्वम् व्यापित्वात्तु तदेव गोत्वेन प्रकाश्यं भवति,

'प्रतिषेध्याप्रचारेण यस्माद्व्याप्तिरपोहते।
लिङ्गे लिङ्गिनि च व्याप्तिः तस्मात् सत्यप्यकारणम्'[1]

कृतकत्वस्य ह्यनित्यार्थव्यापित्वेऽपि नित्यत्वप्रतिषेधेन गमकत्वम्, तस्माद्यदनित्यार्थेऽपि कृतकत्वव्यापित्वं तेनाकृतकत्वानवकाशाद-नित्यत्वस्य कृतकार्थव्यापित्वेऽप्यकृतकत्वप्रतिषेधेन गम्यतैव स्यान्न गमकत्वे तुल्यत्वमिति चेन्न, विषाणित्वे व्यभिचारात्।

आह च *'नाशिनः कृतकत्वेन'*[2] इति *'विषाणित्वेन गोव्याप्तिः'*[3] इति च निर्दिष्टं स्वार्थमनुमानं गम्यगमकनियम-व्यवस्थाक्तेः।

अत्रास्माभिरुच्यते

'तद्भावदर्शनादेव साध्यसाधनधर्मयोः।
विधेः संयोगिवद्वृत्तिर्नाधाराधेययोरिव॥'[4]

इति, यत्तद्भावदर्शनं स एवाग्निर्धूमो भवति तेनैवाग्निना धूमेन भूयते तद्देशेन्धनादिसम्बन्धेन, नान्येन, न सोऽग्निर्धूमो न भवतीति तद्भावस्यास्वनिवृत्तिहेतुना वा भूतस्य दर्शनादेव धूमो धूमो भवन्नेवाग्निं गमयति न तु यत्र न दृष्टस्तदवच्छेदेन, तद्भावाग्रहणे दोष -दर्शनात्, अतद्भावान्वयशब्दार्थतायामग्निधूमविपक्षव्यावृत्तिमात्रेष्टौ अनिष्टं स्यात्, अधूमस्य पटस्याभावो घटो वन्ध्यापुत्रो वा स्यात् एवं

१. प्रमाणसमुच्चयः २. तत्रैव ३. तत्रैव ४. ग्रन्थकर्तुः

लिङ्गिन्यपि तथा तत्रेत्यभूतान्वयसाधनार्थातथार्थत्वात्, अतस्तद्भाव-दर्शनादेव तु साध्यसाधनधर्मयोस्तथाभूतान्वयदर्शनहेतोः लिङ्गिनि परस्परप्रत्ययाधाराधेयप्रधानोपसर्जनभावेनाविनाभावात् संयोगि-वद्वृत्तिर्न तु कुण्डबदरयोराधाराधेययोरिव, तुल्यकक्षत्वादुभयोः।

एवञ्च सपक्षे साध्यसाधनधर्मयोः सहभावदर्शनात् समान्वय-वृत्त्या तथाप्रत्यक्षसम्बन्धित्वविवक्षया साधर्म्यदृष्टान्त उच्यते तथा प्रसिद्धस्य धर्मस्य साधनत्वादप्रसिद्धस्य साध्यत्वात् कुतो लिङ्गलिङ्गि-व्यतिकरदोषाशङ्का? धर्मिण एवैकस्य लिङ्गत्वालिङ्गित्वाच्च नाग्निर्लिङ्गी न धूमो लिङ्गम् प्रत्यक्षेतरसम्बन्धित्वविवक्षितत्वान्न सङ्कीर्येयातां लिङ्गलिङ्गिनौ।

यत्पुनरिदं लिङ्गलिङ्गचेकरूपापादनं सम्बन्धिना द्वितीय-सम्बन्धिरूपेण भवितव्यमिति, एषोऽन्यायः, प्रत्यक्षाप्रत्यक्षत्व-विशेषदर्शनात्, न हि चैत्राश्वादि सम्बन्धिनां प्रत्यक्षाप्रत्यक्षाणां नियमोऽस्त्येकः प्रत्यक्ष इति द्वितीयेनापि प्रत्यक्षेण भवितव्यञ्चेति, तथा संयोगित्वसाध्यसाधकत्व..... यथैकः संयोगी तथा द्वितीय इति, अत एव चैवं वक्तुमयुक्तं यथा त्वया विश्रब्धमुच्यते — यथा हि सत्यपि द्विगतत्व इत्यादि यावत्तद्वदिह न भवतीति तन्न घटत इति ब्रूमः। ननु तद्वदेवेह संयोगिनोरपि लिङ्ग- लिङ्गिनोः, संयोगित्वात्, स्थाण्वादिसंयोगिवत्, यथा हि स्थाणु- श्येनयोः संयोगः सकर्माकर्मकत्वाभ्यामतुल्यः तथा मल्लद्वयङ्गुलाकाशा-दिसंयोगसंयोगिनाम्।

यत्तूक्तं स्वत्वादिप्रत्यक्षत्वात् द्वितीयस्य स्वस्य स्वामिनो वा तेन सहैवावगतत्वात् अन्यापेक्षत्वाच्च सम्बन्धस्य शेषसिद्ध्यर्थं

स्मृत्यानर्थक्यमितितदयुक्तमुक्तम्, अथान्यथा मन्येथास्तन्न तस्य प्रकारस्यानुक्तत्वात्, स्वस्वाम्यादिभावेन सम्बन्धादिति वचनात् इति।

अत्र ब्रूमः, न किञ्चिदत्र नोक्तम्, उक्तभेदात् सम्बन्धादनुमानम्, तच्च तत्सम्बन्धिप्रत्यक्षात् *'एकस्मात् प्रत्यक्षात्'* इति वचनात् तेनैव प्रकारान्तरेणानुमानावतरणात्, द्वयोस्तु सम्बन्धिनोर्विशिष्टयोरुपलब्धसम्बन्ध्यन्यतरप्रत्यक्षोत्तरकालं यत्रायं प्रत्यक्षोऽश्वश्चैत्रो वा तत्रेतरोऽपीति या उपलब्धसहचरसम्बन्धानुसारिणी स्मृतिः किमित्यनर्थिका स्यात्? अग्न्यपेक्षधूमवत्, एवञ्च कृत्वोक्तं *'कश्चिदर्थः कस्यचिदिन्द्रियस्य प्रत्यक्षः..... अविशिष्टस्याग्नेरस्तित्वं प्रतिपद्यते'* इति।

यत्तु तेन प्रत्युच्यते परमतमाशङ्क्य लिङ्गग्रहे तुल्यमिति चेदिति तत्तथैव लिङ्गेऽपि, लिङ्गलिङ्गिनोरन्योऽन्यापेक्षत्वात्, अथ तत्र नेष्यते स्वस्वाम्यादिष्वपि मा भूदिति, अत्राहमप्येवं ब्रुवे लिङ्गिसम्बन्धित्वात् लिङ्गस्य उत्तरकालं स्मृतेरानर्थक्यं लिङ्गग्रहे हि लिङ्गी गृहीत इति, अथान्यथा ग्रहणं चेत्तन्नोक्तमिति लिङ्गेऽपि तथा, यत्तूच्यते मा मंस्था लिङ्गग्रहणतुल्यमिति लिङ्गित्वेऽस्ति विशेषः, न हि लिङ्गं सम्बन्धित्वमात्रेण गृह्यते, किं तर्हि? अनुमेयदेशस्थं धूमादित्वेन पूर्वं गृह्यते, पश्चात्तस्याग्न्यादिभिरविनाभावित्वं स्मर्यते इति सर्वत्र व्यापीति, तदिहापि तुल्यम्, अनुमेयस्थं अश्वत्वेन पूर्वं गृह्यते पश्चात्तस्य चैत्राविनाभावित्वं स्मर्यते न तद्देशसम्बन्धीति देशादिस्थाऽनग्निधूमवत्।

यत्तूक्तमव्युत्पन्नस्य तद्गतेरविनाभावित्वेन गृहीतस्वरूपस्य लिङ्गादेः कारणत्वम्, ज्ञापकत्वात्, नोत्पादकबीजादिवदिति, एतदप्ययुक्तम्, अविनाभावित्वस्य सहचारिभावसम्बन्धत्वात्, तस्मात् अपि यो निश्चयः सोऽपि स्वस्वाम्याद्यर्थव्युत्पन्नानामेव, तदादित्वात् सहचरितभावस्य।

अविनाभावगम्यातिरिक्तार्थविषयत्वेन तु स्वस्वाम्यादिसम्बन्धव्युत्पन्नबुद्धेरेवानुमानं दृश्यते यथा काकभुवनव्यापि तत् स्वीकृततत्प्रसवकालतत्कृतनीड्प्रसवोर्णभेदविवृद्धिपोषणसहचरणपृष्ठतो गमनादीनि धर्मान्तराणि व्यापित्वाविनाभाविरूपोपेततायामपि न कारणानि कोकिलत्वज्ञानस्य आ स्वस्वामिभावाप्रत्यवगमनाऽऽदरात्, पश्चात् तत्प्रतिपत्तिः स्वस्वामिभावादिसम्बन्धेन परित्यज्याविनाभाव्यभिमतान् तत्तद्धर्मान्, लोके प्रतिपत्तारो वक्तारश्च भवन्ति कोकिलशावकोऽयं न काकशावकः, स्वभाषासमन्वितत्वात् विशिष्ट-माधुर्योपेतस्वरत्वादितरकोकिलवदित्येवं स्वस्वाम्यादिसम्बन्धा अनुमापकाः, अनुमेयव्यक्तिकाले तथोपलभ्यमानत्वात्, तत्प्रसिद्धलिङ्गवत्।

यदप्युक्तं न चावश्यं स्वस्वाम्यादिसम्बन्धादनुमानं भवति, तदव्यभिचारार्थं विशेषाकाङ्क्षितत्वात्, तथा च त एव हि विशेषा अनुमापकाः स्युः, न स्वस्वाम्यादिसम्बन्धः, सत्यपि तस्मिन्ननुमानाभावादित्येतदपि न, शेषसिद्धिवचनेनाव्यभिचारिविधिवृत्तेरुपात्तत्वात्।

इदं हि सर्वाभासव्युदासेन सम्बन्धिनोऽभिव्यञ्जकम्, प्रत्यक्षादितरः शेषः सम्बन्धी अनुमेयानुमानाभासभेदैः प्रत्यक्षादि-

विरोधैरविरुद्धार्थः, पक्षो धर्मधर्मिसमुदायाख्यः परार्थानुमाने साध्याभिधानमिति वक्ष्यमाणो निर्दोष एव शेषसिद्धिवचनेन गृहीतः, यथायोगं तेन तेन सम्बन्धेन सम्बद्धात् प्रत्यक्षात् प्रत्यक्षवद्वा प्रसिद्धात् पक्षधर्मस्य सम्बन्धात् प्रागुपलब्धादनुस्मर्यमाणाच्छेषेण शेषस्य सिद्धिरिति शेषसिद्धिवचनादेव विरुद्धासाधारणधर्मव्युदासः, शेषाय शेषे वा प्रत्यक्षादेकस्मात् सम्बन्धादित्येतावता सिद्धेः सिद्धिवचनं सिद्धिरेव नासिद्धिरित्यवधारणादसिद्धिर्व्यभिचारिधर्मता मा भूदिति, तद्यथा — स्वाम्यसम्प्रदान.....अतिप्रियसुतवत्।

इत्थं हि व्यभिचारिविशेषव्यावर्तनेनापि स एव सम्बन्धी गमकः सम्बन्ध्यन्तरस्य, न ते विशेषा व्यावर्त्या विधेया वा गमकाः, तत्समर्थनार्थत्वात्, न हि वात्या प्रसङ्गव्यावर्तनेन धूमस्याव्यञ्जकत्वम्, अधूमता वा धूमतैव हि सती वह्नितायाः सम्बन्धिनी सम्बन्धिन्या व्यञ्जिकेति शेषसिद्धिवचनान्निरस्त-व्यभिचाराशङ्कं सम्बन्धानुमानमेव, त्वयापीष्यत एवैतत् प्रसिद्ध-सम्बन्ध्येवाप्रसिद्धसम्बन्धिनो गमकम्, तदव्यभिचारस्वरूपाव-धारणार्थं व्यभिचारविशेषव्यावृत्तिरुच्यते यथा कृतकत्वस्यानित्यत्वा-व्यभिचारप्रदर्शनार्थं यदनित्यं न भवति तत्कृतकमपि न भवतीति व्यतिरेक उच्यते।

यद्युपलब्धसम्बन्धस्य पुनरव्यभिचारित्वापेक्षमनुमानं न स्यात् व्यतिरेकवचनं पक्षधर्मसाध्यानुगतिसमर्थनार्थं न स्यात्, नापि च तस्यैवाभिव्यञ्जकत्वमापद्यते; तथा चास्मन्न्यायेन कृतकत्वस्यानित्य-त्वोपलब्धसम्बन्धस्य व्यतिरेके पुनरव्यभिचारापेक्षानुमिति र्युक्ता,

तस्यैवाभिव्यञ्जकत्वव्यक्तेः, तथेहापि, चेत्राश्वोदाहरणमत्र स्वस्वामि -सम्बन्धस्योपलक्षणार्थम्, अग्निधूमानित्यकृतकत्वादिषु तुल्यन्याय-त्वात्, पक्षधर्मात् सोऽत्र तद्वत्सत्त्वात्, यत्र यत्र तद्वत्सत्त्वं तत्र तत्र सोऽस्ति पूर्ववत्।

नन्वेवमविनाभावोपवर्णनमेवेदम्, उच्यते — एवमेवैतत्, आधाराधेयसंयोगिवद्वृत्त्यभेदात् अस्मदभिहितेस्तु पूर्वत्वादस्मन्मतोप -जीवनमेव, यथात्वमविनाभावसम्बन्धं व्युत्पादयसि तत् सम्बन्धानु -मानैकदेशस्यैवैतल्लक्षणस्य भाष्यमात्रम्, एवञ्च द्रव्यार्थासत्योपाधि-सत्यार्थव्याख्यानुज्ञा कृता त्वया, तथा च लिङ्गिनो लिङ्गत्वं प्रसक्तमित्यस्याभावः।

तथापि स्याद्विवक्षाभेदात्तथा तथास्वस्वाम्यादिगम्यगमक-त्वात्, यथा देवदत्तयज्ञदत्तयोरन्यतरकर्मणा योगः तयोश्चान्योन्य-लिङ्गत्वं पर्यायेण विवक्षावशाद्भवति युगपद्वोभयकर्मजसंयोगित्वात् तथा स्वस्वाम्यादिषु, तथाहि..... अग्निना धूमानुमानम्, न, संयोग्येकरूपत्वात्तत्काल एवायं व्यतिकरप्रसङ्गः, न, असम्भवात्, प्रत्यक्षत्वाद्धूमोऽसाध्यः साधनन्तु, साध्यस्त्वग्निरप्रत्यक्षत्वाद-साधनम्, धूमोऽपि साध्यश्चेत् प्रत्यक्षमप्रमाणं स्यात्, तदप्रामाण्ये चानुमा निर्बीजा स्यादिति।

संयोग्येकरूपत्वानुमानाच्चानिष्टापादनमुपेक्षितार्थम्, संयोगित्व ..... यत्पुनरुक्तं यस्य त्वविनाभावित्वं..... ..... अदोष इति, वयन्तु ब्रूमोऽत्र गुणदोषाभिमानः साध्यसाधनधर्मवद्देशाद्यनुमेयत्वमुक्त्वा पुनस्तस्यैव दोषाभिधानात्

अप्रत्यभिज्ञातमग्न्यादिसम्बन्धिदेशस्य लिङ्गित्वं लिङ्गत्वञ्च, न धर्मयोरग्निधूमयोः धूमो लिङ्गं अग्निर्वालिङ्गीत्युक्त्वा यत्पुनरिदमुच्यतेऽग्नितोऽपि धूमानुमितिप्रसङ्ग इति, वयं ब्रूमस्त्वां शिक्षां ग्राहयन्त इह देशसाध्यतामुक्त्वा लिङ्गलिङ्गित्तत्त्वव्यवस्थानवृत्तेरेवं वक्तव्यमग्निमतोऽपि धूमवदनुमानप्रसङ्गः.....उभयतोऽपि, तथा तथेष्टवद्वृत्तेः यदि धूमविषय एतदेव स्यात्, अग्निरेव वाऽनुमेयः तदाऽग्नितो धूमानुमानं धूमादग्न्यनुमानवत् स्यात् प्रसङ्गः, संयोगिनोरविशेषात्।

अथ पुनर्देशस्य साध्यसाधनत्वान्नास्ति दोषगन्धोऽपि, धूमवत्त्वस्य हि लिङ्गत्वं युक्तम्, धूमवत्त्वेन सिद्धस्य देशस्य साधकत्वात्, अग्निमत्त्वविशिष्टदेशस्यैव लिङ्गित्वम्, न ह्यग्निमत्त्वस्य युक्तं लिङ्गत्वम्, साध्यत्वात्, साध्यत्वं लिङ्गित्वात्, लिङ्गित्वमसिद्धत्वात्, अस्मन्मतेन तु लिङ्गत्वमप्यग्निमत्त्वविशिष्टस्य देशस्यैव शक्यं भावयितुं कदाचित्, अत एव मया तत्प्रधानमेवोच्यतेऽग्निमतोऽपि धूमवदनुमितिप्रसङ्ग इति।

नन्वेवं देशमुपेक्ष्याग्नेरेव लिङ्गित्वं स्यात्, अनुमेयत्वात्, उच्यते, न चासौ लिङ्गी भवितुमर्हति, लोके सिद्धत्वात्, तथा चोक्तं त्वयाऽस्मन्मतमेव

'न धर्मो धर्मिणा साध्यः सिद्धत्वात्तेन धर्म्यपि।
धर्मेण धर्मः साध्यः स्यात् साध्यत्वाद्धर्मिणस्तथा॥

इति, न धर्मो धर्मिणः साध्यः यथाऽग्निर्धूमेन, सिद्धत्वात्, अग्नेः तद्धर्मत्वाभावाच्च, तेन धर्म्यपि, यथाऽस्ति प्रधानं भेदानामन्वय-

दर्शनादिति, धर्म्यसिद्धेरेव धर्मासिद्धेः पारिशेष्याद्धर्मेण धर्मः साध्यः ननु धर्मयोरपि परस्परं धर्मत्वासिद्धिर्धर्मित्वाभावे, साध्यत्वाद्धर्मिण-स्तथा — तेन प्रकारेण तथाऽनेकधर्मणो वस्तुनः सिषाधयिषितधर्म-विशिष्टस्य साध्यत्वात्, तत्प्रसिद्धधर्मविशिष्टस्य साधनत्वात्, तथा चाह — *'साध्यत्वापेक्षया चात्र धर्मधर्मिव्यवस्था, न गुणगुणित्वेने-त्यदोषः'* इति, उपचारादेवेदमुच्यत इति चेत्तच्चायुक्तम्, यस्मात् अत्र हि तत्त्वं मृग्यते सुहृत्सूपचारः..... साध्यत्वाद्धर्मिण-स्तथेति।

एवन्त्वग्निमद्देशस्य लिङ्गत्वम्, धूमवत्त्वसाधकलिङ्गानन्यत्वात् धूमवत्त्वस्वात्मवदेव, ननु नाग्निमत्त्वस्य लिङ्गत्वम्, व्यभिचारात् प्रमेयत्ववदिति, न, धूमवस्तुत्वानुमानभूतपाण्डुत्वबहलत्वाविच्छिन्न -मूलत्वादिरूपेण धूमत्वनिश्चयकरेण लिङ्गत्वस्य नियतत्वात्तत्र लिङ्ग -त्वदोषप्रसङ्गस्यावतार एव नास्ति, प्रत्यक्षत्वात्, तथाऽग्नेरपि प्रत्यक्षत्वे धूमस्य लिङ्गिनो लिङ्गित्वमव्यभिचारित्वोपपादनेन, यदि त्वग्निमत्त्वं प्रमेयत्ववद्धूमं व्यभिचरेत् ततो धूमस्य धूमत्वमेव सन्दिह्येत कुतोऽलिङ्गत्वम्?, अग्न्यविनाभावित्वेनैव तु धूमत्वसिद्धेः स्यात् पक्षधर्मत्वाल्लिङ्गत्वं तथाऽग्नेरपि धूमसिद्धौ लिङ्गत्वम्।

अथात्र किं प्रतिपत्तव्यं धूमलिङ्गादग्निप्रतिपत्तिवदग्नेरपि धूमप्रतिपत्तिः स्यादिति? अथ किं विषयः सम्प्रधारः? दर्शित-न्यायदेशसाध्यताया हेतोः, तस्माद्युक्तमेव लिङ्गस्य लिङ्गिनो वा लिङ्गित्वम्, धूमस्य लिङ्गित्वापत्तौ तु प्रमेयत्ववदग्निमत्त्वव्यभिचारा -ल्लिङ्गत्वाभाव एव, धूमसंयोगित्वमेवाग्नेर्गमकं दृष्टम्, यत्र यत्र धूमः

तत्र तत्राग्निरिति, तस्मादग्नेरन्यथा संयोगित्वम्, अन्यथा धूमस्य, न हि सर्वत्राग्नौ धूमो दृष्टः, मा भूदेष दोष इति देशसाध्यतेष्यते तस्याश्च सिद्धसाधनन्यायविरोधदोष इति।

अग्निसाधनवदेव हि धूमसाधने व्यभिचारः धूमो ह्यग्निं विना वासमृहेऽपनीताग्निकेदृष्टः, अरणिनिर्मन्थने वा भूताग्निके, सम्भाव्यते तु धूमदर्शनादग्निरत्रेति, अग्निदर्शनाद्वा धूमोऽत्रेति, अग्ने रन्धन-गृहधूमवत्, वैधर्म्येण निर्जलवत्, धूमोऽग्नेरन्यत्र न सम्भवति, सम्भवार्थत्वेनेतरवत्, शक्यत एव प्रतीतिरपि तथा, अथ बालिशरुतवत्तु अलं क्रीडितेन।

वस्तुतः प्रतिपत्तितश्च प्रतिपादितमपि किमर्थं न प्रतिपद्यसे? अवयवनिरूपणेनापि प्रतिपादयिष्यामः — अग्निरत्रेत्यस्यां प्रतिज्ञायां अग्निरेवात्रेति नावधार्यते, तत्र पृथिवीत्वादि सद्भावात्, देशस्यैव वा भावात्, तथा च तयोरग्निधूमयोरप्यभावापत्तेः, नाप्यग्निरत्रैवेति, तत्प्रदेशव्यतिरिक्तेषु प्रदेशेष्वग्न्यभावात्, यत्र यत्र धूमस्तत्र तत्राग्निरिति न शक्यते वक्तुम्, नाप्यग्निरत्र भवत्येवेति, भवतिप्रयोगाव्यवहारेण हि भवत्यपि कदाचित्, तत्र कादाचित्काग्निव्युदासो निरर्थकः सततमग्निधूमयोरभावात्, तस्माद्विवक्षिते देशे काले च भवत्यग्निरिति प्रतिज्ञार्थः, अव्युत्पत्तिविध्यनवधृतेः, रक्तमिदं करवीर-पुष्पमित्यादिप्रतिज्ञावत्।

धूमश्च पक्षधर्मोऽनुबद्धरूप एवाग्निना भवति, किमर्थम्, अग्नि-सहचरितत्वाग्निनिमित्तत्वख्यापनार्थम्, इह क्वचित् सहचरिभावो

यथा रूपस्पर्शयोः, क्वचित् निमित्तनैमित्तिकभावो यथा दण्डघटयोः, इह तु द्रव्यवयवमेव लिङ्गम्, तत्राविनाभावी सहचरिभावः सहचरो यस्मिन् विद्यत इति सहचरी धूमस्याग्निः, इनिः सप्तम्यर्थे, अस्य त्रिविधोऽर्थः अस्मिन् विद्यत एव, न न विद्यत एव, न च न विद्यतेऽपि क्वचिदिति, तस्मिन् हि किल सति विद्यत एवाग्निः, न न विद्यते वात्यादिवत्, न च न विद्यतेऽपि धूमसहचारयोऽग्निधूमवत्, न वा सपक्षसहचरे न विद्यत एव, कृतकमिव नित्य इत्येवमसिद्ध-विरुद्धानैकान्तिकव्युदासः।

नन्वेवं सहचरिभावादनुमानसिद्धौ किमर्थं निमित्तनैमित्तिक-भावोपादानम्? एकावयवमेवास्त्विति, एतच्च न, अग्निवद्व्यभिचारि-त्वाद्धूमस्यापि, यदिह स सदा.... सत्यपि सहचरिभावे निमित्तभूत-मग्निमन्तरेण विशिष्टधूमस्यैवाभावः, पाण्डूर्ध्वगतिबहलोत्सङ्गचेक-देशबद्धमूलपुनःपुनरुत्थायिधूमस्य अग्निमन्तरेणाभावान्निमित्तनैमित्तिक भाव एषितव्यः।

बलाकापताकावच्च निमित्तसद्भावेऽपि नैमित्तिकस्य स्थपति-कृतप्रासादादिवत् नैमित्तिकसद्भावेऽपि निमित्तस्य चाभावदर्शनात् सहचरिभावोऽप्येषितव्यः, धूमाग्न्योर्व्यभिचारदर्शनात् सहचरि-निमित्तत्त्वोपपत्तावपि देशान्तरासञ्चारितत्कालसन्निहिताग्नि-निमित्तस्य विशेषण विशिष्टस्यैव धूमस्य सहचरिण्यग्नौ गमकत्वेन विशेषणार्थ वत्त्वात्, इतरथाऽग्निमत्त्वमेव न गमयति उभयतोऽपि यस्मात् तस्मात् स यथाऽग्निमत्त्वं गंमयति तथा सन्निहिताग्नि-निमित्तत्वमपि, उभयत्राव्यभिचारात्।

एवञ्च बद्धमूलत्वादिविशिष्टधूमपरिग्रहेऽग्नेरपि गृहीतत्वान्न प्रत्यक्षादिप्रमाणान्तरमपेक्ष्यम्, कृतकत्वेनेवानित्यत्वस्य, कृतकमित्युक्ते तदेव ह्यनित्यमध्रुवमित्युक्तं भवति, उत्पादविनाशयोरध्रौव्याभेदात्, तथा धमग्रहणेऽग्निग्रहणं प्रदेशात्माभेदात् स एव निमित्तमग्निर्धूमस्य सहचरश्च, न हि तस्य धूमस्याग्नितोऽन्यन्निमित्तं भवितुमर्हति परिणाम्यभेदपरिणामान्तर साध्यत्वे परिणामान्तरसाधनत्वात्, पूर्वप्रत्यक्षवदन्यकाले सम्बन्धस्मरणादन्यतर विवक्षितहेतुनोपात्तस्येतरस्य साध्यस्याभिव्यक्तिः क्रियते, अर्हत्तत्त्वस्याभ्युपगम्यमानत्वात्।

स्ववचनानपेक्षायामप्यनित्यं सर्वं प्रयत्नानन्तरीयकं न भवतीति ते वचनं न्यायापेतमेव, तान्यपि सिद्धप्रयत्नानन्तरीयकान्येव, लोकप्रत्यक्ष..... चेतनविहितवृत्तित्वात् कुड्यादिवत्, लोकप्रत्यक्ष..... वातादीनामनण्वादित्वे स्पर्शादिमत्त्वाज्जीवशरीरत्वेऽपि तु नात्यन्तशरीरवत्ता ..... स्वयं प्रवृत्तत्वात्, स्थपतिवत् वातादिचैतन्ये सिद्धे चेतनविहितवृत्ति च विद्युदभ्रमेघशब्दादि....., सवितृगति..... तस्मात् विद्युदादीनि प्रयत्नानन्तरीयकान्यनित्यानि चेत्यन्योऽन्यगम्यगमकतेति।

याऽप्याधाराधेयवद्वृत्तिः

'लिङ्गे लिङ्गी भवत्येव लिङ्गिन्येवेतरत् पुनः।
नियमस्य विपर्यासेऽसम्बन्धो लिङ्गलिङ्गिनोः॥'[1]

१. प्रमाणसमुच्चयः

यस्माल्लिङ्गे धूमे लिङ्गयग्निर्भवत्येव न नभवत्यपि तस्माद्युक्तं यदग्निवद्धूमो द्रव्यत्वादीनामस्ति प्रकाशको न तैक्ष्ण्यादीनाम्, यस्माच्च लिङ्गिन्येव लिङ्गं भवति नान्यत्र तस्माद्युक्तं यद्धूमो धूमत्वेनेव पाण्डुत्वादिभिरपि प्रकाशयति न द्रव्यत्वादिभिरिति सामान्यस्य गमकत्वं लिङ्गिनि, न विशेषाणाम्, लिङ्गस्य च विशेषाणां केषाञ्चिद्गमकत्वं न सामान्यस्य, तदेतत्सर्वमविनाभावादाधाराधेयवद्वृत्तेरिति, एषामपि तद्भावदर्शनविधेरेव गमकत्वं, यत्र दृष्टः तद्गमयति न यत्र चादृष्टस्तद्व्यवच्छेदेन।

न हि योषिद्गण्डपाण्डुत्वं गमयत्यग्निम्, अभूताग्निधूमत्वात्, धूमभूतं तु पाण्डुत्वं गमयत्यग्निम्, धूमभूताग्नित्वाद्विधेरेव तद्भावस्य तद्भावत्वेनैव गमकत्वात्, यथा चेदं तथा द्रव्यत्वादिसामान्यमपि गमकमग्नेः धूमभूताग्नित्वात्, पाण्डुत्ववत्, यत्तु धूमो दीप्त्यादीनां न प्रकाशक इत्युक्तं तदपि तद्भावदर्शनविधेरेव, तथा चान्यथा च दृष्टत्वात् व्यभिचारात् दर्शनविधेरेवानुमानलक्षणोपपत्तेश्च, *'तद्भावदर्शनानुबन्धेन हि बुद्धयुत्पत्तिरनुमानम्'*, धूमवत्त्वं प्रदेशस्याग्निमत्त्वानुबद्धमेवेत्यैकान्तिकग्रहणेऽनुमानं भवति धूमादग्निरत्रेति, तस्यैकान्तेनैव ग्रहणमव्यभिचारात्, व्यभिचारात्त्वनुमानाभासं वृक्षक्षुपादिवत्, यथा वृक्षः क्षुपो वाऽत्र धूमादित्यनुमानाभासं व्यभिचाराद्दर्शनबलेनैव तथाविधदर्शनबुद्ध्यनुबद्धमेवानुमानमपि।

एवमनध्यवसायविपर्ययानुमानाभासावपि, तदतत्पक्षद्वयगत-मेकान्तमनाश्रित्य ज्ञानमनवधृतार्थमनध्यवसायः, विपर्ययश्चाभूते भूतप्रत्ययो भूते चाभूतप्रत्ययः, एतावप्यनुमानाभासौ, तत्परिणामा-

व्यवच्छेदेन दृष्टवत्, त्वन्मत्या व्यावृत्तेस्त्वनुमानाप्रामाण्यापत्तिः, न भवति न भवतीत्यभवनपरमार्थत्वादर्थान्तरमभावो वा, अत्यन्ताज्ञानात्, अनध्यवसायवत्, ग्राह्यवृत्त्यननुरोधिप्रतिपत्तेर्वा विपर्ययवत्, तस्माद् दृष्टवदेवानुमानतदाभासौ, यथादृष्टज्ञानानुबद्धत्वात् इति।

एवञ्च तदपि दूषणं यत्सम्बन्धानुमानलक्षणस्य प्रसक्तं न दूषणमेव, दृष्टविधिवृत्तेरनुमानोक्तेः।

यथाह — न हि सर्वत्र लिङ्गिनि लिङ्गं सम्भवत्येवायोऽग्निवदिति, अत्रोत्तरं लिङ्गिनि देशेऽग्निमति धूमो भवन्नेव पक्षधर्मो भवति, नाभवन्, असिद्धत्वात्, लिङ्गिनि लिङ्गं भवत्येव, वात्यादिव्युदासेन, तस्य चाग्निगततैक्ष्ण्यादिलिङ्गत्वं न भवति, न दृष्टत्वाद्धूमे तैक्ष्ण्यादिना च विधिवृत्त्या, यथा वाऽऽह — यदा भवति लिङ्गं तदा नालिङ्गिनि भवत्युदकादौ धूम इति, तदपि न घटते नियमेन तस्य सद्भावे तत्रैवाग्नौ नान्यत्र लिङ्गत्वम्, अत्रशब्दवाच्यैतत्प्रदेशसम्बन्धिन्येवाग्नौ लिङ्गत्वात्, तस्मात् स एव तस्यैव लिङ्गम्, धूमगत-द्रव्यत्वाद्यग्न्यप्रकाशनन्त्वस्मदिष्टदर्शनविधेरेव, तथाऽव्यभिचारात्।

यथा च त्वयोच्यते लिङ्गे लिङ्गी भवत्येवेति तत्र लिङ्गे चेल्लिङ्गिनियमः तथा च धूमादग्निगतिवत् धूमावधारणकारणविशेषसहचाराग्निविशेषः तेभ्य एव किमिति नेष्यते? यथा प्रचुरहरिततृणेन्धनोऽग्निः मशकनिवारणार्थं यत्र गोकुले क्रियते तत्रैवोक्तविशेषो धूमस्तार्ण्याल्पतादिविशेषानग्नेर्गमयति तथा बहलतुषावकीर्णे

गृहाङ्गणगते मृत्पात्रकाराः शिल्पिनोऽग्निं कुर्वन्ति तत्रैव तौषस्तौषाग्निं गमयतीति विशेषाणामपि लिङ्गित्वदृष्टेर्लिङ्ग एव लिङ्गिनो भावः।

अथोच्येत तस्यैव व्यभिचारिणो विशेषा न तु गम्यन्त इति विशेष्योक्त एवेत्येतदपि न, तैक्ष्ण्यादिवचनात्, मया तत्रापि चोक्तमेव तद्भावदर्शनविधेरेव तदिति, तस्माल्लिङ्गे लिङ्गी भवत्येवेत्य युक्तमुक्तम्।

न च लिङ्गिन्येव लिङ्गमिति नियमो वासगृहवत्, शक्यते च लिङ्गे धूमे नियमादग्निरिति वक्तुम्, असन्धुक्षितानग्नित्वात्, स ह्यसन्दीप्तेन्धनावस्थोऽरण्यवस्थो वाऽग्निरधूमकोऽधूमकत्वादनग्निरेव, भस्मच्छन्नस्यापि बाष्पोष्मपुद्गलनिश्चरणात् सेन्धनत्वं सधूमत्वञ्च परमार्थतः तत्परिणामात्, सर्वत्र धूमेऽग्निर्नियतः, तथाऽग्नौ धूमः, एवञ्च लिङ्गं लिङ्गिनि व्यापित्वादेव गमकत्वं भजते, कृतकानित्यत्ववत्।

त्वन्मतिवद्भेदं कृत्वा साध्यधर्मस्य लिङ्गित्वे साधनधर्मस्य लिङ्गत्वेऽपि ब्रूमः

'यथा लिङ्गमपि व्यापि लिङ्गिन्यङ्गचपि तत्तथा।
व्यापित्वादुभयोर्लिङ्गलिङ्गिता गोविषाणवत्॥'[1]

संयोगिवद्वृत्तौ साध्यसाधनयोः प्रदेशधर्मत्वात् प्रसिद्धाप्रसिद्धसम्बन्धित्वविवक्षया धर्मिण एवैकस्य लिङ्गत्वाल्लिङ्गित्वाच्च।

---

१. ग्रन्थकृतः

अत एव च यत्तद्गोविषाणवदेकतो व्यभिचाराभावादुभयं लिङ्गं लिङ्गि वा, विषाणं हि प्रमेयत्ववत्, व्यभिचारि, इतरवद्गौरव्यभिचारी कृतकानित्यत्वयोस्तूभयमव्यभिचारात्, अस्मदुक्तव्याप्तेर्विधिरूपाया एव गम्यगमकत्वात्

'विधेयार्थप्रचारेण यस्माद्व्याप्तिरपेक्ष्यते।
लिङ्गे लिङ्गिनि च व्याप्तिः तस्मात् सत्येव कारणम्॥'[1]

इति, न यथा त्वयोच्यते

'प्रतिषेध्याप्रचारेण यस्माद्व्याप्तिरपोहते।
लिङ्गे लिङ्गिनि च व्याप्तिस्तस्मात् सत्यप्यकारणम्'॥[2]

इति, विधेयो भावः नाभावः प्रतिषेध्यः तस्य प्रचारः नाप्रचारः, तदर्थगमनप्रकर्षेण चारः प्रचारः, अन्य ..... न धूमसामान्याग्नि मद्गतिवत्, यस्माद्व्याप्तिरेवंविधा परस्पर संसृष्टाऽपेक्ष्यते गतादर्थस्य, अस्मदिष्टा वैविध्येन व्याप्तिरुभयाव्यभिचारात्मिका तस्मात् स्फुट-मेवान्वयदृष्टान्तो नोच्यते यत्र यत्र धूमस्तत्र तत्राग्निः, यत्र यत्राग्नि-स्तत्र तत्र धूम इति, तस्मात् सत्येव साधनम्, तस्माद् दृष्टान्त-लक्षणमपि *'साध्येनानुगमो हेतोः साध्याभावे च नास्तिता'*[3] इत्यनर्थकमथवा भ्रान्तम्।

यथाऽग्निसान्निध्यार्थविशेषणैर्धूमात्मलाभाद्धूमवत्त्वमग्नि - सान्निध्यसाधकं तथा शब्दकृतकत्वं, पूर्वपूर्ववर्णविनाशस्योत्तरोत्तर वर्णोत्पत्तेः कारणत्वात्, शिवकादिविनाशक्रमेण घटकृतकत्ववत्,

१. ग्रन्थकृतः २. प्रमाणसमुच्चयः ३. तत्रैव

अस्मादेव च न्यायाद्यदप्युक्तं त्वया *'नाशिनः कृतकत्वेने'*त्यादि तदप्येवमव्ययं

'नाशिनः कृतकत्वेन व्याप्तेस्तत्कृतकं कृतम्।
अनित्यत्वमभिव्याप्त्या कृतकेऽर्थे प्रदर्श्यते॥'[1]

तद्व्याख्या चेयं ..... कृतकत्वस्यानित्यत्वमिति, एतस्मादेव न्यायात् यो ह्युक्तः *'विषाणित्वेन गौर्व्याप्तः'* इत्यादिश्लोकः सोऽपीत्थं पठितव्यः,

'विषाणित्वेन गौर्व्याप्तो विषाणित्वं प्रसाधयेत्।
गव्येवानियमात्तत्तु न गवार्थप्रसाधनम्॥'[2]

गोत्वाद्विषाणीति संयोगिवद्विधिवृत्तेः साधयेत् विषाणितां गोत्वम्, तेनैव नियतत्वात्, विषाणित्वं पुनरस्मादेव न्यायात् गवार्थं न साधयेत् एवं तावदाधाराधेयवद्वृत्तिपक्षे दोषाः संयोगिवद्विधिवृत्तिपक्षे गुणाश्चेति द्वयमप्युक्तम्।

यत्पुनर्निरुक्तीकृत्यान्वयासम्भवं व्यतिरेकासम्भवमाशङ्क्य उक्तम्। स्यादेतद्व्यतिरेकस्याप्यसम्भव इति, तद्युक्तमुक्तम्, उक्त-संयोगिवद्विधिवृत्तिमन्तरेणान्वयव्यतिरेकयोरभावात्, अन्वयव्यति-रेकौ हि प्रत्ययात्मकौ, न वस्तुगते तुल्यातुल्ययोर्वृत्त्यवृत्ती त्वदुक्ते, विशेषस्यैव वस्तुत्वात्।

न च सम्भवोऽस्ति लिङ्गस्य सर्वान् व्यावर्त्यान् व्यतिरेचयितुम्, आनन्त्यात्, सर्ववृक्षार्थान्वयवत् यत्तूच्यतेऽतुल्ये सत्यप्यानन्त्ये

१. प्रमाणसमुच्चयः २. तत्रैव

ततोऽन्यस्याभावमात्रं सामान्यतो व्यतिरेचनीयं लिङ्गेनेति, अत्र ब्रूमः, न दृष्टवल्लिङ्गं लिङ्गिनं यदि प्रकाशयेत् सर्वत्र लिङ्गिन्यदर्शनात्तल्लिङ्गं लिङ्गमेव न स्यात्, अगतिर्वा सर्वथा भवेत्, लिङ्गमपदेशः कारणं निमित्तमित्यादि, तत्र विशेषस्यैव वाच्यत्वादनुमेयत्वाच्च सामान्यस्यासत्त्वादेव पूर्वमदृष्टत्वे विशेषस्यैव दृष्टस्य कल्पितसामान्योपसर्जनद्वारेण वाच्यत्वम्, शब्दस्यापि तथैव वाचकत्वम्, तथाऽनुमानेऽपि, भेदाविवक्षापादितैकत्वसामान्यलिङ्गभावापन्नधर्मस्तथाभावितैकत्ववाच्यलिङ्गत्वभेदात्तद्भावदर्शनात् एव गम्यो गमकश्च।

यदि तु न तथा प्रकाशयतीतीष्टं किन्त्वन्यापोहेन, ततो नैव प्रकाशकं स्यात् सर्वस्यादर्शनात्, प्रतिद्रव्यमपोह्यस्यादर्शनात् किं तदर्थादन्यददृष्टमेव भवेद्यतश्च बुद्धेर्व्यावृत्तिरिष्टा? न हि स वृक्षोऽग्निर्वा भवति ततोऽन्यो वा, अदृष्टत्वाद्वन्ध्यापुत्रवत्, दृष्ट एवायमत्र भवति न भवत्यन्यो वा ततः, न च तेन दृष्टेनातुल्यमतच्छब्दमतद्रूपमवृक्षोऽनग्न्यादि वा, तथा तथाऽदृष्टं हि प्रतिपत्तुमशक्यम्, अप्रतिपत्तेश्चान्यस्याभावात् कस्य कथं वाऽपोहः स्यात्?

अपितृत्ववत् स्यादिति चेत् — यथा पितुरन्ये सर्वे पुरुषा अनाश्रितभेदरूपा अन्यत्वव्यावृत्तिबुद्धिमात्रेण निरवयवा एव प्रतीयन्ते तथाऽवृक्षाज्वलना वृक्षज्वलनपर्युदासेनानन्तभेदा अपि व्यावृत्तिबुद्धिमात्रेण निरवयवाः प्रतीयेरन् को दोष इति चेद्ब्रूमः, सर्वस्यादर्शनात्, सा हि पितरि अस्मद्दर्शनेन दृष्टे तत्पर्युदासेनान्यस्मिन् पितृविपरीतबुद्धेर्गृहीतेरेष पिता देवदत्तो नेमे *वसुरातादय*

इति प्रत्ययोत्पत्तिरिति युक्तम्, त्वद्दर्शने पुनर्गुणसमुदायस्य न तु पितुरेवादर्शने, असति वा।

यथा त्विदं तुल्ये वृत्तिरतुल्येऽवृत्तिरिति व्याचक्षाणस्य तव मते पितृकल्पस्य दर्शनात् स्वार्थस्य परार्थस्य तदन्यस्य तदपोहस्य वाऽप्रतिपत्तिरिति, अथ वा यदि हि स्वार्थः सामान्योपसर्जनो विशेषः समस्तः शिंशपादिरभिहितः स्यात् तेनापोढश्च संपिण्डयायमन्योऽस्मादिति गृहीतः स्यात् तत एवं प्रतिपद्येतायं अयमेव भवति, ततोऽन्योऽयं न भवतीति, प्रत्यक्षत्वादुभयस्य, नात्यन्ताविदितवृक्षावृक्षशब्दतायां न चात्यन्तादृष्टवृक्षावृक्षस्वरूपतायां वा सा प्रतिपत्तुर्भवितुमर्हति, खपुष्पवन्ध्यापुत्रादिवत्।

वृक्षशब्दादंहिपशब्दोऽनन्यत्वाद्वृक्षः तथा तदर्थोऽग्नेर्वह्न्यादिः, उभयत्र वा सत्त्वद्रव्यत्वादि सामान्यविशेषधर्मेभ्योऽनग्निरवृक्षश्चेति विदितसकलवृक्षावृक्षाग्न्यनग्निशब्दार्थस्यैव तज्ज्ञानं दृष्टम्, न हि क्वचिद्दर्शनमात्राद्वा तद्वृत्तिनियमौ भवतः, व्यभिचारात्, घटमानपादपतरुशाखिभेदवृक्षव्यभिचारात् वृक्षोऽवृक्षो घटोऽघटश्च, अन्योऽपि हि भवन्ननन्यो भवति, पीलुहस्तिवृक्षवत् सामान्यविशेषशब्दपर्यायशब्दार्थेभ्यः।

सामान्यशब्दार्थेषु तावत् सदित्यसन्न भवतीति, अत्र द्वयी वृत्तिः — अनङ्गीकृतार्थान्तरवृत्तिः सच्छब्दोऽङ्गीकृतार्थान्तरवृत्तिर्वा स्यात्, तत्र व्युदस्तभेदसामान्यमात्रवृत्तिरनङ्गीकृतार्थान्तरवृत्तिः शब्दोऽपोहः केवलो व्यावृत्त्यर्थो निर्निबन्धनः, सदित्युक्तेऽसन्न भवतीति,

द्विर्नञ्प्रयोगाद्विध्यर्थ एव ज्ञायते, ततः *सिद्धे सत्यारम्भो नियमार्थ* इति नियम्यते सत्त्वमेव, यो न भवति यथा वा न भवतीति, तस्य द्विविधस्याप्यत्र सम्बन्धो नास्तीत्युक्तं भवति, स च प्रतिषेधो न विधिप्रधानपर्युदासः, प्रसज्यप्रतिषेधमात्रं तत्, ततश्च अयमस्मादन्य इत्यन्यस्याभावात् पर्युदासात्मकान्यशब्दार्थान्तरापोहस्वार्थाभिधान-लक्षणाभ्युपगमत्यागदोषाः स्युः।

अथैतेभ्य एव भयादङ्गीकृतार्थान्तरवृत्तिरपोह इष्यते तत इदं विघटते सदित्यसन्न भवतीति, प्रतिस्वं सत् सर्वमपि घटादीति, सर्वमपि हि प्रतिस्वं प्रत्यात्म सदेवासदपि भवतीतरेतराभावादिभ्यः, अत्र प्रयोगः — असताऽपि हि तेन सता केनचिद्भवितव्यम्, प्रत्येक-वृत्तित्वात्, यथा घटादन्यः पटो घटत्वेनासन्नेव पटत्वेन सन् दृष्ट इति, एवमङ्गीकृतार्थभेदत्वे सद्भवत्येवासत्, अभ्युपगतमपि चैतत्त्व-यापि घट इत्यघटो न भवतीति वृक्ष इत्यवृक्षो न भवतीत्येव-मायन्यापोहशब्दार्थवादित्वादिति।

द्रव्यादिसामान्यशब्दार्थेष्वपि द्विविधा सैव, तत्र तावदनङ्गी-कृतार्थान्तरतायां द्रव्यमित्युक्तेऽद्रव्यं न भवतीति द्विर्नञ्प्रयोगात् द्रव्यमेव *'सिद्धे सत्यारम्भो नियमार्थ'* इति नियम्यते यो न भवति यथा वा न भवतीति तस्य द्विविधस्याप्यत्र सम्भवो न भवतीत्युक्तं भवति, स च प्रतिषेधो न विधिप्रधानः पर्युदासः, प्रसज्यप्रतिषेधमात्रं तत्, ततश्च भावितदभ्युपगमत्यागः, अर्थान्तरापोहतायां प्रति स्वसन्न्यायात् यथायोगं तथैव योज्यम्।

ननूच्यमानसच्छब्दवदेतत्सिद्धिः, यः सच्छब्दः स सतः शपनादाह्वानात्, अतो यथा सच्छब्द एव सद्वाची एवञ्च नासच्छब्दः

तथा सद्वस्त्वपि स्यादिति, अत्र ब्रूमः — यदि सच्छब्दोऽसच्छब्दोऽपि भवति तत एव लोकेऽन्यापोहवादे च घटशब्दाद्युदाहरणमवकाशं लभते, सच्छब्द एव सन्नसच्छब्दो भवति, एवं सदेव शब्दयन् घटादिः पटाद्यशब्दतां गमनादसच्छब्दो भवत्येव, इतरथा सत्त्वाभावात् सङ्करादिदोषाच्च, एवमर्थतोऽसच्छब्दो न भवतीत्ययुक्तम् शब्दतोऽपि रूपसिद्धिकृतनानात्वात् सच्छब्दो भवन्नेव न भवतीति।

एवं द्रव्यादिशब्देष्वपि सत्त्वासत्त्वे द्रष्टव्ये, एवं तावन्महासामान्यापरसामान्यशब्दार्थेषु सर्वस्यादर्शनादयुक्तोऽन्यापोहः।

विशेषशब्दार्थेषु तु घट इत्यघटो न भवतीत्यत्रापि न भवत्यघटो भवत्यघटः, तद्यथा — आमच्छिद्रादिघटोऽघटः घटनसामर्थ्याभावादचेष्टत्वात्, अघटोऽपि च घटो भवति चेष्टार्थत्वात्, घटते घटयति वा तन्तुतन्तुवायगवाश्वादिरिति, तथा प्रत्यक्षसिद्धं हि वागादिषु वर्तमानस्य गोशब्दस्यैकत्वम्, अतोऽनन्यत्वमनाशङ्कनीयं किमन्योऽनन्यो गोशब्द इति, तच्छब्दविशेषानिरूप्यत्वात्, यदि हि विशेषरूपस्यानिरूप्यत्वान्नास्त्यनन्यत्वं ततः तत्सम्बन्धाशक्यत्वात्, शब्दानामर्थप्रत्यायनमन्याय्यम्, तस्मादेकात्मकत्वं गोशब्दस्य, तस्मिंश्च सति शब्दस्य शक्तिभेदात् सम्बन्धिभिरभि व्यक्तात्तत्तदर्थप्रत्यायनशक्तयः प्रकल्प्याः, एकपुरुषपितृपुत्रादिवत्, प्रतिसम्बन्धमन्यथावृत्तेः। तस्मात् — वागादिभिन्नार्थवाचित्वाद्गौरेवागौर्भवति, अगौरपि गौर्भवति।

गदनादिविशेषनिरूप्यान्यत्वे वा गवान्तरवद्गौरेवेत्यस्मिन्नपि पक्षे गौरित्यगौर्भवतीत्यपि, वागादिगवाव्यतिरेकातिरेकवत्, अनेक-

शब्दैकार्थत्वेऽपि एकोत्तरशतनामत्वाच्चाम्भसो विषमविषं भवत्य-विषमपि विषं जीवनात्मकमप्युदकादि मारणात्मकं दुःप्रयोगात्, तथा पीलुर्वृक्षोऽवृक्षत्वादपीलुर्भवति धनादिवत्, हस्तिवत् पीलुर्वा तथा विपर्ययेण, अतः पीलुरपीलुश्च, अपीलुरपि पीलुश्च, एवं हरि-रामार्जुनादयोऽपि, शक्रसिंहवासुदेवमण्डूकवानरहयादिषु रम्यवर्ण-दाशरथिबलदेवजामदग्न्येषु तृणसुवर्णवृक्षपाण्डवकार्त्तवीर्येषु च दर्शनात्।

एवं श्रुतिमात्रतत्त्वो गवादिरेकः शब्दोऽप्रतिलब्धविभागोऽ नेकार्थगमकशक्तियुक्तः, एकादित्यानेकार्थकारित्ववत्, प्रत्यर्थवृत्ति -व्यवस्थापका हेतवो यथोक्तं —

'संसर्गो विप्रयोगश्च साहचर्यं विरोधिता।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः॥
सामर्थ्यं मौचिती देशः कालो व्यक्तिः स्वरादयः।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः॥'[1]

सकरभा धेनुरकरभा धेनुः, रामलक्ष्मणौ, रामार्जुनौ, अञ्जलिना जुहोति, सैन्धवमानय, अक्ताः शर्करा उपदधाति, अर्जुनः कार्तवीर्यः, अनुदरा कन्या, सीरासिमुसलैः, मथुरायाः प्राचीना-न्नगरादागच्छामि, द्वारम्, ग्रामस्यार्धं लभेत, स्थूलपृषतीमालभेते-त्यादिषु निमित्तान्तरैरेकार्थस्यावच्छेदः।

अथोच्येत ननूक्तमेव गुणसमुदायमात्रार्थस्य सर्वथा दर्शनासम्भवः सत्यपि च दर्शनेऽनुमानासम्भव इति पुनरिदानीं को

१. वाक्यपदीयम् काण्डः २ श्लोकौ ३१७-३१८.

विचारो दर्शनं स्यादिति? स्थिते तु स्वार्थाभावे सामान्यरूपस्याभाव-मात्रस्य निवृत्तिः, अभावभेदासंस्पर्शात्, वृक्ष इत्यवृक्षो न भवति अग्निरित्यनग्निर्न भवतीत्यवृक्षानग्नी अभावभेदासंस्पर्शेनोच्येते, तस्मात् सर्वाभावभेददर्शनेन विनैवापोहो गमक इत्यत्रोच्यते अथ स्वार्थाभावाभावमात्रत्वे वृक्ष इति धूम इति तच्छब्दलिङ्गाभ्यामपोह्यौ घटादिभेदरूपाण्यसंस्पृश्य प्रसज्यप्रतिषेधेन तन्मात्रमेव च गम्येत, न वृक्षादिपर्युदासेन घटादिरर्थात्मा कश्चित् अन्यस्यासत्त्वादविवक्षित-त्वाच्च, स्वयमनवगतः कथमभावं विशेषयितुं शक्नुयात् अवृक्षो वृक्षाभावो न घटाभाव इति, तस्य भावलभ्यात्मलाभत्वात्, उभयत्र सपक्षासपक्षयोः न किञ्चित् केनचिद्विशेषयितुं शक्यम्।

ततश्च वृक्ष इत्यवृक्षो न भवतीत्युक्ते इदमुक्तं भवेत् योऽभावाभावः स वृक्ष इति नान्यदभावनिवृत्तेः, ततो घटपटादीनां वृक्षतावत् वृक्षशब्दार्थत्वप्राप्तेः कुतोऽपोहस्तेषां स्यात्, सर्वथा वा गतिर्भवेत्, अतः सर्वदर्शननिराकाङ्क्षतायां सत्यां शब्दादनु-मानाद्वाऽभावाभावमात्र वृक्षाग्नित्वाद् विशेषवचनप्रत्ययानर्थक्यम्, अभावाभावमात्रस्यैकत्वात्, भेदविषयवचनानुमानव्यवहार-निर्विषयत्वात्, अभूतभेदविषयत्वाद्वा खपुष्पादिवत्, अगतिरज्ञानं वा वृक्षशब्दोच्चारणाद्भवेत् सर्वथा, गन्तव्याभावात्, अभावाभावमात्र -वृत्तित्वाच्छब्दानुमानयोरिति।

अत्रोच्येत न स्वभेदा अपोह्यन्ते नाप्यशेषभेदा संस्पर्शेना-भावमात्रम्, किन्तर्हि? स्वसम्बन्धिसामान्यधर्मानुबन्धिभेदेष्व-विनाभाविषु दर्शनसंस्पर्शने तद्व्यतिरिक्तेष्वन्यापोहस्य प्रवृत्तिरिति

नोक्तदोषाः, अत एव चेदं स्वसम्बन्धिभ्योऽन्यत्रादर्शनात्तद्व्यवच्छेदानुमानमिति, अस्य व्याख्या — यत्र दृष्टः सोऽत्र सम्बन्ध्यभिप्रेतो न त्वविनाभावित्वसम्बन्धेन,..... अवृक्षोऽनग्निर्वा न भवतीति, एवञ्च कृत्वा वृक्षशब्दाद्धूमाच्चानेकाविनाभाविनां पृथिवी द्रव्यत्वादीनामनुमानमुपपन्नं भवति, तद्दर्शनस्पर्शनवृत्तत्वात्, इतरथा त्वनुबन्धिनामन्यत्वादतुल्ये एव वृत्तेरपक्षधर्मत्वादनैकान्तिकत्वविरुद्धत्वानुमानाभासदोषाः स्युः, अनुबन्धिनां त्यागे च तदविनाभाविनः स्वार्थस्यासम्भव एव, ततः प्रत्याय्यप्रत्यायनयोरनुपपत्तिः, तस्मात् स्वसम्बन्धिभावाभावाभ्यां दर्शनादर्शनयोरभिप्रेतानुमानसिद्धिरिति।

एवं तर्हि यदि सत्त्वादीनि विशेषणानि वृक्षस्य वृक्षादभिन्नानि वृक्षो भवन्ति स वा वृक्षस्तानि भवति तेन तानि विशेष्यन्ते देवदत्तपाण्यादिवदेकभवनात्मना, तस्मिन्नेकभवने प्रयोगः शाखादिमति दर्शनमित्युच्यते, तत्स्वात्मवत्, ततोऽन्यत्वात् द्रव्यादिवृक्षभावदर्शनात्, द्रव्याद्यभावदर्शनानभ्यनुज्ञानादतिस्फुट एवायं विधिवादस्त्वयाऽभ्युपगतः, भवनपरमार्थार्थाभ्युपगमात्, यः कोऽपि भवति वृक्षादिस्तदपि भवनमेव भवत एव भवनात् योऽप्यसौव्यावृत्त्यभितः तदपि भवनमेव, भवत एव व्यावृत्तेः पर्वतादेः देवदत्तादेः व्यावृत्तिवत्, वैधर्म्येण खपुष्पवत्, एवं भवद्भवननिरूपणेऽयमस्य स्थित एवार्थः स चान्यश्चेत्यान्यापोहपरिग्रहोऽनुगमो विधिरेव, तस्मिंश्च सति सर्वथा वा गतिर्भवेदिति।

अथवाऽनिर्वाहकव्याख्याविकल्पा एकान्तरूपा उपेक्ष्याः, सर्वथाशब्दो विमर्दरमणीयः परिनिष्ठितोऽयं पिण्डार्थ इत्येतदा-

ख्यानार्थः, वाशब्दो विकल्पार्थः, विकल्पानां गतिः निश्चयः परिनिष्ठा, अनेकान्तः स एवैवं भवेत्, इत्थं सर्वन्यायपरिशुद्धफलत्वादस्य सर्वविकल्पाः विधिप्रतिषेधौ त्वद्वचनादेवापतितौ विधिविकल्पोऽपि सदाद्यात्मकार्थग्रहणात्, अपोहविकल्पोऽपि स्वसम्बन्ध्यन्यप्रतिषेधार्थत्वात्, तेन सर्वथा विकल्पानां गतिः *स्याद्वादः*, स च द्रव्यार्थपर्यायार्थौ, एकान्तत्यागरूपैकवाक्यमत्यात्मकौ, द्रव्यार्थतः.....स्यादनपोह इत्यादि न च तेन..... सर्वेषामपि, ततश्चेदमपि दुरधीतमेवा*न्यापोहवादिना*.....।

यत्तूक्तं वृक्षो मञ्चकः क्रियत इत्यत्र वृक्षशब्दोऽर्थप्रकरणशब्दान्तरसन्निध्यादिभिः शिंशपादिष्वपि दृष्टत्वात् सर्वत्र सर्वथा केवलोऽपि शिंशपावाची स्यात् अथ बहुषु पलाशादिषु दृष्टोऽयं वृक्ष इति सामान्यात् संशयो भवतीति चेदेवं सति वृक्षार्थे सत्त्वद्रव्यत्वपार्थिवत्वानि दृष्टानि तेषु निश्चयस्तु दृष्टः, अवृक्षनिवृत्त्यर्थाभिधानवदपृथिव्यद्रव्यासत्त्वव्यावृत्त्या वृक्षाभिधानात्, यथा हि वृक्षादिशब्दाः स्वावयवान् तदनुबन्धिनश्चार्थान् व्याप्नुवन्ति स्वार्थाभावे न वर्त्तन्त इति व्यवावृत्तिबलेन निश्चयहेतवः, शिंशपादिस्वार्थाभावेऽपि पलाशादौ वृत्तेरन्वये संशयहेतव इति वयन्तु ब्रूमो गुणे दोषाभिमानस्ते स्वपक्षरागात्, अन्वयद्वारेणादृष्टत्वात् केवलात् संशयः यथादर्शनमनुमानप्रवृत्तेर्विशेष एवार्थादिरपि निश्चयस्तु विशेष-सहितस्य दृष्टत्वात्, सत्त्वद्रव्यत्वपार्थिवत्वादावपि निश्चयो दृष्टबलादेव।

एवमेव च वृक्षार्थभवनप्रतीतिवद्वृक्षशब्दात् पार्थिवद्रव्यसत्त्वानि प्रतीयन्ते तैर्विना वृक्षभवनस्यैवादर्शनात् विधिरूपेण

दर्शनसामर्थ्येनैव वृक्षपार्थिवद्रव्यसच्छब्दा आनुलोम्येन त्रिद्व्येकार्थ-निश्चयहेतवः प्रातिलोम्येन संशयहेतवः, एवङ्गम्यतामर्थप्रकरणादि-सहिताद्वृक्षशब्दात् शिंशपाया वृक्षत्वतत्त्वाद्धवादिभ्योऽर्थेभ्योऽन्यस्याः शिंशपादिशब्दादिव गतिर्विशेषदर्शनादेवेति।

यदप्यनियतसंशयं ब्रवीषि सोऽपि विशेषाविशेषदर्शनेनैव, यथाऽविभातैकदेशधूमदर्शनादग्निसंशयो बद्धमूलत्वादिविशिष्टधूम-दर्शनात्तु तन्निर्णयस्तथा वृक्षशब्दाद्विशेषदर्शनान्निर्णयोऽविशेष-दर्शनाच्च संशयः, तद्भावदर्शनन्यायवत्, एवं वृक्षत्वस्य शिंशपादि-विशेषेषु पृथिव्यादिसामान्येषु चानेकत्र वृत्तेस्तुल्यत्वेऽपि स्वार्थेन सहैव वृत्तेः पृथिवीत्वादिभिर्वृक्षादेरानुलोम्येन तथादर्शनात् प्रातिलोम्येन दर्शनाच्च निर्णयसंशयौ।

अथ मन्येत तावेतौ न युक्तौ दर्शनादुभयतोऽपि, वृक्षदर्शनस्य धवशिंशपयोरविशेषो निश्चय एव वा स्यात्, मन्मते पुनः तौ युज्येते, अतुल्यत्वात् स्वार्थाभावे वृत्त्यवृत्त्योः, ते हि संशयनिश्चयहेतू, संशयहेतवस्तावत् वृक्षादिशब्दाः शिंशपादिस्वार्थाभावेऽपि पलाशादौ वृत्तेः, निश्चयहेतवस्तु वृक्षावयवान् तदनुबन्धिनश्च पार्थिवादीन् व्याप्नुवन्ति स्वार्थस्याभावे न वर्त्तन्त इति ते व्यावृत्तिबलेनैवेति।

न, दर्शनोत्सर्गापवादाभ्यां वस्तुनोऽतुल्यत्वात् संशयनिश्चयौ, स्थाणुपुरुषविषयशकुनिनिलयनवस्त्रसंयमननियतोत्सर्गापवादभूतोर्द्धत्व-सामान्यदर्शनवत्।

ननूक्तं वृक्षादेरभावो ह्यवृक्षादिस्तत्रैवादर्शनम्, ततो व्यवच्छेद्य-मानं यदवृक्षादि न भवतिति तदेव स्वार्थाभिधानमिति, एवञ्च सति

क्व दर्शनं यत्त्वयेष्टम्? वयं ह्यानन्त्यव्यभिचारादिदोषाद्दर्शनपक्षेऽसपक्षादर्शनसाधनार्थमवृक्षाद्यभावो वृक्षादिशब्दार्थ इति कल्पयामः, दर्शनस्यैवाभावात्तद्दोषासंस्पर्शात्, अदर्शनमात्रस्याभिन्नत्वादित्यत्रोच्यते नन्वदर्शनादिति दर्शनस्यैव सिद्धिरेवम्, अदर्शनस्यादर्शनात्, यदि दर्शनमन्वयो नाभ्युपगम्यते न वृक्षो नाम कश्चित् स्यात् तत इदमदर्शनमेवाभावमात्रं खपुष्पादिवन्न किञ्चिदुक्तं स्यात्, अवृक्षस्यैव चाभावो वृक्षीभूतत्वात् सर्वस्य कुतस्तद्दर्शनम्, वृक्षदर्शनबलादेव वाऽवृक्षदर्शनसिद्धिः, वृक्षावृक्षदर्शनाच्चायं वृक्षोऽयं घटादिरवृक्ष इति सिद्धिर्नादृष्ट इति दर्शनमेवैवं सिद्ध्यति।

अपितृवदवृक्षादर्शनं व्यतिरेकत इति चेन्न, उक्तवत् पितृकल्पस्य दर्शनमत्रापि स्यात्, न चेत् प्रागुक्तवदेवानुपपत्तिः, व्यवस्थाकारिदर्शनेनायं वृक्षोऽयमन्योऽस्माद्घटादिरवृक्ष इति व्यवस्थिते हि विधेये वृक्षेऽदर्शने त्ववृक्ष इति स्यात्।

स तु तव तदा स्याद्यदाऽनवस्थावारणाय व्यावर्त्त्यव्यावर्त्तकयो-र्विधिना व्यवस्थापकं दर्शनं भवेत्, तच्च नेष्यत एव, विधिप्राधान्ये तु पृथिवीत्वाद्युत्तरभावा वृक्षादिपूर्वभवनविज्ञानविध्यापाद्याः दृष्टाः वृक्षाद्यात्मकत्वाद्वृक्षादिस्वात्मवत्, वृक्षादिपूर्वभावः पृथिव्याद्युत्तरभवनविज्ञानविध्यापाद्याः तदनतिरिक्तात्मकत्वात् वृक्षमूलादिवत् एवं विधिरूपेण दृष्टवदेवानुमानमभिधानञ्च युज्यते।

व्यावृत्तिप्राधान्ये तु दृष्टवत् पार्थिवत्वाद्यसिद्धौ वृक्षो नैव वृक्षादि स्यात् तोयवत्, पार्थिवं द्रव्यत्वेनासिद्धत्वात् पार्थिवं नैव स्याद्गुणवत्, एवं द्रव्यं द्रव्यं न स्यात् सत्त्वेनासिद्धत्वात्

खपुष्पवदिति, पार्थिवद्रव्यसत्त्वासिद्धयोऽसिद्धा इति चेन्न, व्यावृत्ति-प्राधान्येऽन्यत्वात्, तथा सदपि न सत्, द्रव्यादित्वेनासिद्धत्वादेवं पूर्वं पूर्वं नात्मरूपभाक् स्यादुत्तररूपेणाभूतत्वादग्निवदिति।

यदप्युक्तं

'गुणत्वगन्धसौरभ्यतद्विशेषैरनुक्रमात्।
अद्रव्यादि व्यवच्छेद एकवृद्ध्योत्पलादिवत्॥'

इति व्यावृत्तिप्राधान्ये गुणवत्त्वादिभिरद्रव्यादिव्यवच्छेद एकवृद्ध्या युज्यते, विधिप्राधान्ये तु

'दृष्टवद्यदि सिद्धिः स्यात् शौक्ल्यरूपगुणाश्रितात्।
क्रमवत्प्रातिलोम्येऽपि त्रिद्व्येकार्थगतिर्भवेत्॥'

इति, तदपि *'दृष्टानुवृत्तेः.....'* तद्व्याख्या — दृष्टानुवृत्तेरेव, नादृष्टावच्छेदात् आनुलोम्यान्निश्चयः प्रातिलोम्याद्वा संशयः, यतस्तत्र तुल्येऽन्यत्वे शुक्लत्वाद्बुणे निश्चयो द्रव्यकर्मणोर्न, दर्शनादेव चैकानेकात्मभ्यामाश्रितगुणरूपादिभिर्गुणरूपशौक्ल्येषु संशय इति।

तत्रानुबन्धितत्त्वदर्शनान्नैवान्यत्वमिति चेत् शुक्लं तर्हि नीलरक्तपीताद्यपि स्यात् रूपादनन्यत्वात्, शुक्लगुणस्वरूपवत्, एवमेव रसाद्यपि रूपं स्यात् गुणादनन्यत्वात्, गुणः कर्माद्यपि स्यात्, आश्रितानन्यत्वात्, आश्रितं द्व्यणुकाद्यपि उत्क्षेपणादि रूपादि च स्यात्, आश्रितत्वात् तथा चाऽऽश्रितादिना गुणादिसंशयो न स्यात्, शौक्ल्यैकात्म्यात्।

अनन्यत्वमेव तर्ह्यतुल्यं शौक्ल्यादेः, रूपादयो नान्ये शौक्ल्यादेः तद्रूपानुबन्धित्वात्, वृक्षादिपार्थित्ववत्, अरूपादित्वे

तच्छौक्ल्यमेव न स्यात्, अरूपादित्वात्, उत्क्षेपणादिवत्, तस्मात्तेन सहानन्यत्वात् न तदपोहः, ये पुनरन्ये आश्रितादेस्तु गुणादयः ततः तेषामपोहानपोहाभ्यां संशयः, तद्यथा — गुणोऽयमाश्रितत्वादित्याश्रित एव नियमात्, आश्रितस्तु गुणः कर्म सामान्यं विशेषः समवायो वेत्यनियमः तस्मात्तेन सह तेषामन्यत्वादपोहोऽनपोहश्चेति संशयः स्यादिति।

अथैतदेव कुतस्त्वया प्रत्यवगतं तद्वक्तव्यम्, अस्मदिष्टवस्त्वन्वयदर्शनादेवैतत्सिद्धम्, तदभावे तदप्रसिद्धेः, एवं तावद्भेदपक्षे परं प्रत्युक्तयोरानन्त्यानुक्तिव्यभिचारदोषयोः सविशेषयोरन्यापोहपक्षेऽप्यस्तित्वं दर्शितम्।

अनन्तरस्यापि चाभावः — तद्यथा *'व्याप्तेरन्यनिषेधस्य तद्भेदार्थैरभिन्नता'* असन्निवृत्तेः सर्वभेदव्यापित्वात्तैरभिन्नार्थत्वात् सामानाधिकरण्यमुपपन्नमित्येतन्न, यस्मात् — 'असन्निषेधाभावत्वाद्विशेषार्थविभिन्नता' सामान्यशब्दस्य हि सदादेः स्वभेदाप्रतिक्षेपेणार्थान्तरव्युदासे कुतो व्यापारोऽवधारितः प्रागुक्तं विस्मृत्य, अत्र तु वयं ब्रूमः स स्वभेदप्रतिक्षेपेणैवेति, तस्य सन्नियमार्थत्वात्, असत्प्रतिषेधस्याभावत्वात्, ततो भेदानां परस्परतः सदसत्त्वात् स्वभेदाः प्रतिक्षिप्ता एव, सन्तोऽप्यसंत एव न भवन्तीति प्राप्तम्, ततश्च भेदश्रुत्या सामानाधिकरण्यमनुपपन्नम्, असन्निवृत्तेरभावसाधनत्वात्, अभावेन वैकविभक्तित्वमनुपपन्नं भेदानाम्।

पदस्याप्यनुपपन्नं सामानाधिकरण्यं विभक्तिभेदेनापि, सद्द्रव्यस्य गुणस्य वेत्यादि सम्बन्धस्यापि भेदैरभावस्यानुपपत्तेः

सच्छब्देनाभिन्नासत्त्वनिवृत्तिमात्रोपादानात्, यथैव सुकरा हि..... द्रव्यस्य गुणस्य वा तथैव हि ..... सामानाधिकरण्यं न स्यात्, यथा न हि सत्ता द्रव्यं गुणो वा भवति, तथा नहि सदसन्निषेधाभावः, किं तर्हि? द्रव्यस्य गुणस्य वा भावाभाव इति, इयं व्याख्या त्वन्मतानुसारिण्येव, आह च

'विभक्तिभेदो नियमाद्गुणगुण्यभिधायिनोः ।
सामानाधिकरण्यस्य प्रसिद्धिर्द्रव्यशब्दयोः ॥'' इति ।

यत्तु सत्तासम्बन्धाभिधानपक्षयोरपृथक्श्रुतिदोषोऽस्ति, नापोह -पक्षे विशेषहेतुसद्भावात्, तत्र हि गुणौ सत्तासम्बन्धौ विशेषणत्वात्, तद्वस्तु गुणीत्यतः सामानाधिकरण्याभावो युक्तः, इह त्वर्थान्तरापोहो नासद्भावमात्रमेवोच्यते किं तर्हि? अर्थान्तरापोहेन विशिष्टं वस्त्वेव सदित्युच्यते यस्मिन् वस्तुन्यपोहः क्रियते, तच्च द्रव्यं शब्दार्थो नापोहमात्रम्, स चार्थः सच्छब्देन व्याप्तो न तु साक्षादुक्तः, तद्यथा सच्छब्दः साक्षान्न द्रव्याद्यभिधायी, संशयोत्पत्तेः तस्मात् सामानाधिकरण्यं विशेषार्थैः द्रव्यादिशब्दैः सच्छब्दस्य सद्द्रव्यं सन्गुण इत्यादि वाक्यार्थे युक्तं न पदार्थे ।

यस्मादवयवशब्दार्थाभ्यामन्यः समुदायार्थः तस्य च वाचकौ तौ समुदितौ न विपरीतार्थौ-न तु सच्छब्दो द्रव्यार्थमाह न द्रव्यशब्दः सदर्थं कथमिदं तर्हि यत् सत्तद्रव्यं यद्द्रव्यं तत्सदिति? उभयशब्दार्थव्युदासानुगृहीतस्य समुदायार्थस्यैकत्वात्, संहतशब्दद्वयाभिधेयात्, न तु सदर्थस्य द्रव्यशब्देनाभिधानादिति ।

१. वाक्यपदीयम् काण्डः३श्लोकः ८

तवापि शक्यं वक्तुमपृथक्श्रुतिदूषणम्, द्रव्याद्यभावाभावस्य गुणित्वात् सदभावाभावस्य चाश्रितस्य गुणत्वात्, या त्वयोक्तोपपत्तिः सा जातियोगपक्षयोरपि क्रमते, इह तु जातियोगौ यस्मिन् वस्तुनि त्वयोक्तापोहनिवृत्तिवत् वर्त्तेयाताम्, सत्तैव सत्त्ववदिति, शेषस्त्वदुक्तोपपत्तिग्रन्थवत्तुल्यगमो यावच्छब्दद्वयाभिधेयत्वात्।

पश्चिमस्यापि च दोषस्य भाव एव, नाभावः, यदुक्तं जातिमत्पक्षे *'तद्वतो नास्वतन्त्रत्वाद्भेदाज्जातेरजातितः'* इत्यादिदोषजातं तस्याभावोऽन्यापोहपक्षे, साक्षाद्वृत्तेरिति, तन्न भवति साक्षादवृत्त्यादिदोषजातस्य सतिशयस्योक्तत्वात् सच्छब्दोऽपोहमात्रस्वरूपोपसर्जनं द्रव्यमाह न साक्षादित्यादि सर्वं प्रागुक्तं जातिमद्रदपोहवानित्युपक्रम्य, तत्र दोषा यथा सङ्गतास्तथा प्रतिपादिता इति न पुनर्लिख्यते।

यत्तूक्तमन्यापोहवादिना परं प्रत्याशङ्क्य ततः *'अद्रव्यत्वाच्च भेदाच्च'* इति कारिका या च तद्भाष्ये लिखिता तद्व्याख्या नाप्यर्थान्तरापोहो नामेत्यादि यावन्नास्ति सामान्यदोष इत्यपोहपक्षे जातिमत्पक्षगतदोषाभावप्रतिपादनं विशेषदर्शनादिति, वयमत्रोत्तरं ब्रूमः — *'तद्वत्त्वञ्च त्वदुक्तवत्'* ननु भावान्तरतैव सामान्यवत्तद्व्या वृत्तेरपि, तद्वतोऽन्यप्रत्ययात्मकत्वात्। अथ स्वमते तद्रूपे न सामान्यं न व्यावृत्तिमदिति कुतस्तद्विशिष्टवस्त्वभिधानम्? खपुष्पशेखरविशिष्टवन्ध्यापुत्राभिधानवत्।

अपि च भावान्तराभावान्तरत्वाभ्यां न किञ्चित् प्रयोजनमस्ति किन्तु बुद्धिस्थस्यान्वयव्यतिरेकद्वारेणावधारितस्यार्थस्यानुगुण्येन

विधिप्रतिषेधयोर्भेदेन प्रत्ययः शब्दार्थसम्बन्धज्ञस्य शब्दप्रयोगादुत्पद्यते सामान्योपसर्जनविशेषशब्दार्थपक्षे वा द्वयोरपि च पक्षयोरुपसर्जनीकृतविशेषणत्वाद्भेदानाक्षेपादस्वातन्त्र्यादनभिधानं तुल्यमित्येष विचारः प्रयासार्थः, यथा जातिस्वरूपापोहगुणविशेषणानि पारतन्त्र्यादेव श्रुतगुणभेदाभेदत्वाद्भेदानामनाक्षेपः, तथा यथा कथञ्चित्..... स्वातन्त्र्यहेतुत्वादिति।

यदि चार्थान्तरापोहो न भावान्तरमित्यपोहवानर्थः शब्दवाच्यो न भवत्यतो नापोहो विशेषणमिष्टं कथमिदं तर्हि यत् सत् तद्द्रव्यं, यद्द्रव्यं तत्सदिति? उभयशब्दार्थव्युदासानुगृहीतस्य समुदायस्यैकत्वात् संहतशब्दद्वयाभिधेयत्वात्, न तु सदर्थस्य द्रव्यशब्देनाभिधानात् तथार्थान्तरापोहेन विशिष्टं वस्त्वेव सदित्युच्यते यस्मिन् वस्तुन्यपोहः क्रियते तच्च द्रव्यं शब्दार्थो नापोहमात्रमिति, किमुक्तं भवतीति चेदुच्यते यदि द्रव्यं यद्यद्रव्यमर्थान्तरापोहः तद्वांस्त्वर्थः शब्दार्थत्वेन विवक्षितत्वादुच्यत एव, बुद्धिस्थान्वयव्यतिरेकार्थभेदप्रत्ययोत्पत्तिदर्शनादिति, तस्मादनपहृतः पश्चिमदोषोऽपीत्यलं प्रसङ्गेन।

अत्र च सङ्घातो वर्णपदवाक्यादीनां शब्दार्थ उत्पत्तावभिव्यक्तौ वा, यद्यप्यप्राप्तयौगपद्यानि पदानि तथापि कार्याल्लोकप्रसिद्धेरेव वा व्यवस्था, दृष्टो हि लोके तेषां शब्दानामर्थप्रत्यायनासम्भवादर्थप्रत्यायकस्तत्समुदायः समुदायिभ्योऽन्य इति केचित्, तस्मादेव कार्यात् तेषु तस्य प्रतिदेशं समस्तेषु वा वृत्त्यसम्भवान्न व्यतिरिक्त इत्यपरे, अन्त्यवर्णे संहृताशेषदेशावयवः समुदायो

ऽभिधाता पूर्ववर्णजनितबुद्धिपरिपाकादित्येके, सर्वावयवेषु तिरोहिता -भिमतेषु वितत्य व्यवस्थितो बुद्धिसंस्कारपरिपाकसमुदाय इत्यपरे, समुदायात्मा शब्द एक एव, अनेक एव वा प्रत्यायक इत्यपरे किं न एतैः, यदि व्यतिरिक्तो यद्यव्यतिरिक्तोऽन्त्येऽशेषे वाऽभिन्नो भिन्नो वा प्रत्यायकः समुदायोऽवयवा एव वा योऽस्तु सोऽस्तु सर्वथाऽर्थ-प्रत्यायनात् समुदायः शब्दोऽनवस्थिततर्कत्वात् पुरुषाणाम्, यथोक्तं *'यत्नेनानुमितोऽप्यर्थः'* इत्यादि तथा *'हस्तस्पर्शादिवान्धेन'*[1] इत्यादि आगममात्रमेतत्।

पदसमूहो वाक्यम्, स चानियतानुपूर्व्यः पदसमूहः, तद्यथा — देवदत्त ! गामभ्याजे'ति, कदाचिच्च 'देवदत्त! गामभ्याज शुक्लाम्', इति देवदत्त ! महिषीं गृष्टिं कल्याणीमि', ति 'पात्रमाहर', 'आहर पात्रं सौवर्णञ्चे'त्यादि, सर्वागमसमूहात्मकाऽऽर्हतागमो वा वाक्यम्, वाक्यार्थोऽपि तदभिधेयोऽर्थः।

अयञ्च शब्दैकदेशत्वात् पर्यवास्तिकः, परिरुपसर्गः समन्तादर्थे; अव गत्यर्थे धातुः समन्ताद्भवति, कोऽसौ? भेदो भावोपसर्जनः, सोऽस्तीति यस्य नयस्य मतिः स पर्यवास्तिकः।

निर्गमनवाक्यमप्यस्य *'दुवालसंगं गणिपिडगमेगं पुरिसं पहुच्च'*[2] इत्यादि।

इति उभयनियमनयः समाप्तः।

१. वाक्यपदीयम् काण्डः१ श्लोकः ३४; ४२ २. नन्दिसूत्रम् - ४२

नवमः नियमभङ्गारः

यदि भेदप्रधानो भावः कथमसौ भावो भवितुर्भेदस्य क्रिया-भेदातिरेकेण स्वरूपमपि प्राप्तुं समर्थः? अस्वतन्त्रत्वादभवितृत्वा-दसन् खपुष्पवत्, ततश्च भेत्तव्यस्याभावाद्भेदा अपि न भवितुमर्हन्ति खपुष्पवदिति धर्मधर्मिस्वरूपविरोधः, घटादिभेदाभावः, भेत्तव्या-भावाद्गगनोदुम्बरकुसुमवत्, यथा गगनकुसुमादुदुम्बरकुसुममुदुम्बर कुसुमाद्वा गगनकुसुमं भेत्तृभेत्तव्यं वा न तथोपसर्जनप्रधानयोः, ततश्चात्यन्तनिरुपाख्यत्वाच्छून्यत्वापत्तौ स्ववचनादिविरोधा अपि।

पृथिवी घटो भवतीत्यत्र निर्धार्यं किं पृथिवी भवति? उत घटो भवति? उभयं वा भवति? न भवति वेति, तत्र यदि विशेष एव, नास्त्येवेतीदानीमेवोक्तत्वात् कुतः सामान्यस्य प्रधानोपकारिता, अथ पृथिव्यादेरन्वयित्वं प्रवृत्तेर्भवति सत्त्वात्- ततश्चोपसर्जनत्वं सामान्यस्य नास्ति, स्वतत्त्वव्यापित्वात्, भावत्वात्, प्रवर्त्तमान त्वाच्च भेदवत्, उभयमिंस्त्वसति भावे भवितरि च यद्यभाव एव भेदोऽप्यनुभूयते, तेनैव भेदेन न भूयेत, अभावत्वात् खपुष्पवत्, न ह्यभावो भावो भवति।

अथ भाव एवासौ भेद इष्यते ततो भावाव्यतिरेकाद्भूतत्वात् उभयथापि न पुनर्भूयेत, भूतघटादिवत् आकाशादिवत्, वैयर्थ्यात्, न हि भूत एव भवति, तथासत्यसत्त्वापत्तेः, यदि भूतमेव भवेत्ततस्तदसत् स्यात्, उत्पद्यमानत्वादजातघटवदित्यनिष्टा च सा भेदेषु पृथक् सत्सु भवनाऽन्वय औपचारिक इत्यत्रोच्यते ननु त्वयैव स्वद्रव्ये पृथिव्यादौ घटादिभेदं ब्रुवता तस्यावस्थामात्रं घटादिभेदा इत्युक्तं भवति, यथाऽङ्गुलिर्वक्रीभवतीत्युक्ते औपचारिकत्वं वक्रतायाः नाङ्गुलेः, न हि वक्रत्वमङ्गुलिर्भवति, अनुत्पन्नत्वात् खपुष्पवदिति।

भेदत्वाच्च रूपवत्, यथा घट एव चक्षुरादिग्रहणापदेश-विशिष्टत्वाद्रूपं रसो गन्ध इत्यादि भेदेनोच्यते, विज्ञानमात्रस्य तत्र भेदत्वाद्वस्तुनोऽभिन्नत्वादेवं पृथिव्यादिसामान्यभेदाः।

अत उक्तन्यायात् द्रव्यस्य पर्यायानाश्रितत्वाच्च पर्यायप्रवृत्तेः सर्वथाऽनुपत्तिः, एवं विशेषस्वरूपप्रत्यपेक्षायां पूर्वं भवनमस्वतन्त्रं पृथग्वा वृत्ति स्यात्ततो निर्मूलत्वादसन् घटः खपुष्पवत्।

नापि स घटः स्वयमेव भावः, विशेषप्रधानपक्षहानेः, नाप्यस्य भावः असत्त्वाविशेषात् खपुष्पवदेवेति पूर्वोक्ताविर्भावादि-भेदानुपपत्तिविरोधात्।

ननु विशेषः प्रत्यक्षत एवोपलभ्यत इत्यत्रोच्यते दृश्यमानत्वेऽपि यथा दृश्यते तथा तस्याभवनादसत्त्वं दृष्टं यथा मृगतृष्णिकासलिलगन्धर्वनगरादि, मृगतृष्णिकागन्धर्वनगरयोर्हि

भवनस्य पृथग्भावेनाभवनात् सलिलनगरयोरसत्त्वं दृष्टं तथा सामान्योपसर्जनतायां विशेषस्य, अथोच्येत त्वया शीतादिजीवादिविशेषाभावात्तयोः स्यादसत्त्वम्, नावश्यं विशेषे घटादौ पृथिवीविशेषैर्भाव्यम्, यदि स्युर्विशेषे विशेषा अविशेष एव स्याद्विशेषः सामान्यमेव विशेषवत्त्वात्, सद्द्रव्यत्वपृथिव्यादिसामान्यवदिति।

अपि च वयमप्येतदेव ब्रूमोऽविशेष एव स्यादिति यदि तथा भवनेन विशेषेण विना भवेदन्वयो विशेष एव निःसामान्यः स च नास्ति खपुष्पवत्, नापि सामान्यमेव निर्विशेषम् तथा तथा वस्तुनोऽभवनात्, मृगतृष्णिकाऽन्वाकृतजलविशेषापि किं शीतादिभेदा न भवति? न भावाभावादेव, यथा वाऽसौ विशेषभावाभावात् नास्ति, तथा घटादिः विशेषोऽन्वयभावाभावान्नास्ति, यदि विशेष एव प्रधानं स्यात् सलिलभावानन्वितमिव घटाद्यपि मृगतृष्णिका कल्पमसत् स्यात् निरुपाख्यत्वात्, उपाख्या हि भवनप्राणिका, इदं तदिति सोपाख्येयेति, ततो न किञ्चित् स्यात्, पृथिव्यादि सामान्येनानुपष्टब्धत्वात्, खपुष्पवत्।

तथा कस्माद्घटपटादिविशिष्टवृत्त्येव उदकज्वलनानिलाकाशादिना पृथिव्यादि न व्यज्यते? अत्यन्तमन्यस्य पृथिवीद्रव्यस्य वैलक्षण्याद्वा सर्वद्रव्यगणव्यतिरेकेण निरन्वयो निरुपाख्यः कश्चिदेवार्थः कस्मान्न स्यात्? अत एव च मिथ्यादर्शनादि प्रत्ययजीवकर्मसम्बन्धसन्तत्याख्यान्वयाभावात् पुण्यपापकर्मानुपपत्तेः संसारानुपपत्तिः, मोक्षानुपपत्तिः, तत्प्रतिपक्षपरिणामविशेषानुपपत्तेः, पुरुषकारानुपपत्तिश्च, अनियततथाप्रवृत्तेः।

सत्याञ्च तथानियतप्रवृत्तौ जीवो नारकः संसारी मुक्त इत्यादिवत् पृथिवी घट इत्यन्वयप्राधान्यमेवैषितव्यम्, विशेषस्तु घटः पृथिवीमनुवर्त्तते, लोके प्रधानं ह्यनुवर्त्त्यते, गुणस्त्वनुवर्तते नीलोत्पलवत्, सदापि विशेषानुवृत्तेरुक्तवन्नेतिचेन्न, विशेषाभावात् इति पूर्वनयेषु बहुधा भावितत्वान्न विशेषैकान्तपक्षः सामान्यं शक्नोत्य -त्यन्तं निवर्त्तयितुम्, नापि सामान्यैकान्तपक्षो विशेषपक्षमतस्तौ न क्षमौ?

वक्ष्यमाणमवचनीयं वस्तु प्रतिपत्तव्यम्, नाप्यभावनिरन्वयं न भाव एव, नाविशेषम्, न विशेषोपसर्जनम्, न विशेष एव, नोभयोपसर्जनं नोभयप्रधानम्, सर्वविकल्पेष्वणुभावापत्तिदोषर्शनात्, अवचनीय भावविशेषकारणकार्यैकानेकप्रधानोप सर्जनादिविकल्पं अवक्तव्यतत्त्वं वस्तु भवति, एवं हि भवनमग्नीन्धनवत् तद्विकल्पानुपपत्तेः।

यथा नैकत्वमग्नेरिन्धनेन सह घटते, यदि स्यादेकत्वम्, दग्धेन्धनवदग्निर्न प्रवर्त्तेत, अनिन्धनप्रवृत्तेश्चाभावतैवाग्नेः, 'अस्तिभवतिविद्यतिपद्यतिवर्त्ततयः सन्निपातषष्ठाः सत्तार्थाः' इति वचनादप्रवृत्त्यसत्त्वार्थत्वात्, न प्रवर्त्तते, एकत्वाद्दग्धेन्धनवत्।

यथेन्धनमग्निना सहैकत्वेऽप्यनुपजाताग्निकं प्रवर्त्तमानं दृष्टम् तथेन्धनेन सहैकत्वे प्रवर्त्तितुमर्हत्यग्निः सूक्ष्मावस्थ इति चेत् को वा ब्रवीत्यग्निरहितावस्थायामिन्धनत्वम्, तदपेक्षत्वादिन्धनत्वस्य, दह्यते दीप्यत इतीन्धनमग्नित्वपरिणतावेव 'त्रि इन्धी दीप्ता'विति स्मृतेः दह्यमानमिन्धनं भवति नानिध्यमानं, कारकाणामेव कारकत्वात्।

सूक्ष्मावस्थत्वेन चाग्नेः दीप्तिविशेषावस्थाप्राप्तिः सामान्य-विशेषाद्यवस्थयोरन्यत्वे सिद्धे स्यात्, तदपि तु चिन्त्यमेव, सिद्धश्चेद्भेदः कथमग्नीन्धनयोरेकत्वमुच्यते, अथोच्येत नाहं ब्रवीम्यग्नेरिन्धनेन सहैकत्वम्, किन्त्विन्धनस्याग्निना सह, यद्यप्यग्नेरिन्धनेन सहैकत्वेऽप्रवृत्तेरसत्त्वं सम्भाव्यते तथापि अदोषत्वेऽस्ति न्यायः तद्यथा — आदिधक्षदिन्धनाग्न्येकत्वात् दृष्टत्वात्, दृष्टा हीन्धनेऽनुपजाताग्निके प्रागव्यक्तस्याग्नेः पश्चाद्व्यक्तिः, उत्तराधरयोररण्योर्निर्मथनेन, सह-भावश्च द्विष्ठ इति प्रागग्न्युत्पत्तेः सत एवाग्नेर्व्यक्तिवदग्नावपीन्धनस्य सत्त्वमेवेति।

एतदेव त्वं पृच्छसे — अथ भेदप्रवृत्तिः कथम्? कस्मान्नेन्धनं अव्यक्तत्वेन्धनाग्नित्वाभ्यामरण्यवस्थायामिव ज्वालावस्थायामग्निः? तत्रेन्धनमग्निरेव स्यात्, दहनैकत्वात्, अन्तवत्, अन्ते वाऽग्निरिन्धनं एव स्यात्, इन्धनैकत्वात्, प्राग्वदिति, विकल्पाच्चैकत्वव्याघातः, एकत्वे कुतोऽयं विशेषः, इदं न सहेदं सहेति, *अद्वैतवादिनामिव*, एकत्वे मथनक्रियाधारकरणाद्यनुपपत्तेश्च, दृष्टश्चोपकारकव्यापारभेद-व्यवहारः।

अथापि कथञ्चिदभ्युपगम्याप्यग्नीन्धनेकत्वं यदेकत्वेनाभिमतं तदेकमिति न वक्तव्यमेकत्वात्, एकदेवदत्तहस्ताद्यनेकत्ववत्, हस्तोऽप्येक एवेति न वक्तव्योऽङ्गुल्याद्यनेकत्वात्, अङ्गुलिरपि पर्वादिबहुत्वात् पर्वापि त्वगादिपर्वावयवस्कन्धबहुत्वात् स्कन्धोऽपि परमाणुबहुत्वात्, अणो रूपाद्यनेकत्वात्, रूपादेः प्रतिक्षण-मन्यत्वात् प्रतिक्षणैकस्याप्यनन्तानेकत्वात्, सोऽप्यनेकः

परस्परासङ्कीर्णरूपः केनचित् कदाचिदसम्बध्यमानत्वात्, असमानत्वादवक्तव्य एव, सम्बद्धो ह्यर्थः सामान्येनोच्यत इति, एवमग्नीन्धनयोरपि।

अथ मा भूवन्नेते दोषा इत्यग्नीन्धनयोरन्यत्वमभ्युपगम्यते चेत् तेन तर्ह्यग्नेरिन्धनात् पृथग्भूतं रूपमाख्येयम्, निर्दिष्टे हि पृथग्भूते रूपेऽन्यत्वं सिद्धचेत्, शक्यञ्च प्रतिपत्तुमयमस्मादन्य इति, यथाऽन्येषामन्येभ्यः, त्वया न शक्यतेऽग्नेरिन्धनात् पृथग्भूतं तत्त्वं दर्शयितुम्, न ह्यन्यदन्यसाधारणं रूपं भवति, तस्माच्छक्यते च ततः पृथग्भूतेन तत्त्वेन निर्देष्टुम्, न तथेन्धनात् पृथग्भूतमसाधारणमग्नेरूपं शक्यं वक्तुम्।

सामान्यविशेषैकत्वनानात्वाभ्यां त्वत्प्रदर्शितपृथिवीघटपटादि-निर्देशवदत्रापि स्यादिति चेदुच्यते न मम किञ्चित् सामान्यविशेषैकत्वनानात्वाभ्यां व्यवस्थितमस्ति, त्वन्मतानुवृत्त्या प्रतिपादनार्थं संवृत्त्या पृथिवीघटपटवदित्युदाह्रियते, मन्मतेन तु सामान्यविशेषैकत्वान्यत्वानवस्थिततत्त्वघटपटसंवृत्तितुल्यसंवृत्तिवन्नाग्नीन्धने निर्दिश्येते, तस्मादनिरूप्योऽसन्नापद्येताऽग्निः, अनिन्धनत्वे सत्यरूपत्वात् खपुष्पवत्, घटपटादिष्वप्येतत्साधनं योज्यमिति।

अथोच्यते यदेतत् ज्वाला देशेऽग्नेः रूपमिति, तद्वा कुतोऽनिन्धनम्? अग्नित्वपरिणतत्वेन पुद्गलानामाकाशदेशेऽवस्थानाज्ज्वालाधृतेः, वैद्युतस्याप्युदकेन्धनत्वान्नानैकान्तिकत्वम्, यदि स्यादनिन्धनोऽग्निर्निरवशेषदग्धेन्धनोऽपि भवेदग्नित्वाज्ज्वालावत्, अथोच्येत तावन्नाहं ब्रवीम्यग्नेरिन्धनेन सहान्यत्वम्, किन्त्वि-

न्धनस्याग्निना सहान्यत्वम्, यद्यप्यग्नेरिन्धनेन सहान्यत्वेऽनिन्धनत्वे सत्यरूपत्वादप्रवृत्तेरसत्त्वं सम्भाव्यते तथाप्यदोषत्वेऽस्ति न्यायः..... इन्धनाग्न्यन्यत्वात् हुतवहवत् दृष्टत्वात् दृष्टा हि लोके इन्धनमाहरति काष्ठमाहरतीति, अत्रोच्यते तद्विषय एवैष उपचारोऽग्नित्वपरिणति-कालसिद्धयथार्थेन्धनत्वं मुख्यमपेक्ष्य, तदन्यत्वे च स नैव स्यात्, मुख्येन्धनाभावात्, अत एव तु तदपरिणतावपीन्धनत्वस्योपचारः सिद्धयति, गौणस्य मुख्यमूलत्वात् सिंहमाणवकवत्, चित्रकरादिवद्वा

'ञि इन्धी दीप्ता'विति ननु स्मरन्त्यभियुक्ता वैयाकरणा । दीपन इत्यग्निमिन्धः, पूर्वोक्ताच्च तद्वृत्तित्वात्स्वात्मवन्नान्यत्वम्, अदह्यमानं हीन्धनमेव न भवति, कारकाणामेव कारकत्वादित्या-दिव्याख्यातत्वात् ।

काष्ठशब्दव्यवहारेऽप्यग्निकाष्ठयोरन्यत्वं व्याहन्यते, यदाऽयमग्निः ततोऽन्यो नास्ति सेन्धनात्, ननु यदैव काष्ठमनग्नि दृष्टं तदा तेन विना दृष्टत्वादन्यत्वसिद्धिरिति, अत्र ब्रूमः—अथाभेदवृत्तिरन्यत्वे न प्राप्नोति, अदीप्यमानाकाशेन्धनत्वाप्राप्तिवत्, कस्मान्न काष्ठमग्निः दीप्यमानावस्थायामिवाव्यक्ताग्नित्वावस्थायाम्? अग्निः काष्ठमेव, काष्ठमग्निरेव वा स्यात्, प्राग्वत् पश्चाद्वाऽनन्यत्वात् ।

यदि काष्ठं कथमनग्निः काशनाद्दीपनादङ्गनात्, काष्ठमनग्नि तदिति स्ववचनविरोधः, इन्धनमनग्निरित्यपि, *काशृ दीप्ताविति* कर्तृवाचिनि थनूप्रत्यये काष्ठमिति रूपसिद्धेरशेषविरोधः, किं दारुण्यपि शक्यमित्थं भावयितुम्? को हि नाम शक्यं न

शक्नुयाद्वक्तुम्, 'दह भस्मीकरण' इत्येकार्थत्वात् तथापि दानरक्षणार्थदारुशब्दस्याविवक्षितत्वाददोषो गगनाविवक्षावत्।

सहासहभवनद्वयमपि द्विष्ठमतो यद्येकमथ नाना सर्वथाऽप्येकमन्यदिति वा न शक्यते वक्तुम्, अथापि कथञ्चिदभ्युपगम्यापि काष्ठाग्न्योरन्यत्वं त्वन्मत्या यदन्यत् तदन्यदेवेति न वक्तव्यमन्यत्वात्, हस्ताद्यन्यानन्यदेवदत्तवत्, चक्षुरादिव्यपदेशविशिष्टरूपाद्यात्मकघटवत्, सम्बन्ध्यन्तरापेक्षविशिष्टपितृत्वादिव्यपदेशात्मकदेवदत्तवच्चैकः, अन्यथा तद्भेदाभावात् भेदास्त एवान्य इति वक्तुमशक्याः, देवदत्तात्मकत्वात् घटाद्यात्मकत्वाच्च .....

.....

रूपादिक्षणान्तरान्यानन्यपरमाणुवदिति।

अभावस्तर्हि, अग्न्यनग्नित्वव्यावृत्तेः, खपुष्पवत्, यथा खपुष्पं नाग्निर्नानग्निः तदेकत्वानेकत्वव्यावृत्तेरसच्च, तथाऽग्नीन्धने स्यातामिति, ननु भिन्नव्यवस्थानलक्षणत्वान्नास्तीत्यप्यवचनीयमेव, यदि दाह्यदाहकत्वलक्षणनियमो न व्यवस्थितः ततोऽग्निरपि दह्येत काष्ठवत्, पच्येत, ओदनवत्, भुज्येत चौदनवदेव, तथेन्धनमपि पृथगेव दहेत् पचेच्चाग्निवदित्यनुभयताऽप्यवक्तव्यैव।

अनुभयञ्चेन्नास्ति उभयमस्ति तर्हि तच्चोभयं भिन्नव्यवस्थानवृत्तमपि, एवं नाभ्युपगम्यते ततो सर्वात्मकैकनित्यकालाद्यन्यतमद्भावतत्त्वमसन्निरुपाख्यं चेत्येतदुभयं स्यात्, तच्च न भवति निष्ठितत्वादेषां पक्षाणाम्, अनुभयत्वप्रतिषेधादुभयत्वमिति चेन्न,

अन्यत्वावक्तव्यत्वात्, अन्यत्वप्रतिषेध एकत्वमिति चेत् न, तस्याप्यवक्तव्यत्वात्, एकत्वान्यत्वोभयत्वानुभयत्व प्रतिषेधेन च प्रधानोपसर्जनभावोऽपि प्रतिषिद्ध एवेति सर्वथाप्यवक्तव्यतैव।

एवं सामान्यविशेषयोस्तावद्यद्येकत्वं विशेषस्य भावेन नान्यत्वं, ततोऽनात्मनो भावस्याप्रवृत्तेरभावतैव स्यात्, न प्रवृत्तिर्भावस्य, एकत्वात्, दग्धेन्धनवत्, ननु यथा विशेष एकैकोऽपि प्रवर्त्तमानो दृष्टस्तथा सूक्ष्मावस्थ एकको भावः प्रवर्त्स्यतीति चेत् को वा ब्रवीति निःसामान्यस्य विशेषस्य प्रवृत्तिम्? अत एव विशेषत्वात् सन्नेव विशेषीभवति, तदपेक्षत्वाच्च विशेषस्य, रूपं हि रसाद्विशिष्यमाणं सम्बद्धरसमपेक्ष्य विशेषो भवति तथा रसोऽपि नासत् खपुष्पाद्यपेक्ष्य, विशिष्यते स तस्मात्तेन वा स इत्यादिकारकाणामेव कारकत्वात्, अविशिष्यमाणो हि विशेषः विशेष इति निर्देशमेव नार्हेत्, विशिंषन्नन्यमन्येन च विशिष्यमाणः विशेषो भवति, तस्मात् स्थितमिदं सामान्यमेव विशेषः इति, तथा च कुतः पृथक् प्रवृत्तिर्विशेषस्य? को वाऽऽश्वासो विशेष एकैक एव प्रवर्त्तत इति।

सूक्ष्मावस्थाप्राप्तिदिगप्यवयवावयविविशेषसामान्यकारणकार्याणां भेदे सिद्धे स्यान्नान्यथा, प्रधानावस्था हि सूक्ष्मा महदादि-विषयस्थूलापेक्षैव ते चाऽवस्थे परस्परापेक्षे परस्परमन्तरेण न भवतः, एतच्च सूक्ष्मावस्थोक्त्यैव त्वयाऽभ्युपगतं भवति, तद्व्यतिरेकेणाव्यव-स्थानात्, तथा च तदनुपपत्तिरभावत्वापत्त्यभ्युपगमात्, प्रागभाव-प्रध्वंसाभावात्मकत्वादवस्थयोः ततश्च तेऽभ्युपगमहानिः।

अथाभावत्वमेव भावस्याभ्युपगच्छसि ततश्च चक्षुरादिलक्षण-लक्ष्यारूपाकाशादिविशेषाणां निर्बीजानामुत्पत्तिरसतीति सर्वशास्त्र-लोकगतव्यवहाराभावप्रसङ्गः।

अथोच्येत प्रागग्नीन्धनैकत्वे दोषादिन्धनाग्न्यैकत्वाभ्युपगम-वद्यदि भावो विशेषान् व्याप्नोति, न तु विशेषो भावम्, एकदेशवृत्तित्वात् तस्माद्विशेषेण सह सामान्यस्यैकत्वं नास्ति, अस्ति तु विशेषस्य सामान्येन सह, भावोपग्रहान्तर्भावितवृत्ते र्विशेषत्वादिति, एतदेव त्वं पृच्छ्यसे — अथ भेदवृत्तिः कथम्? दृष्टा हि भेदेन वृत्तिर्लोकेऽनयोः, एकत्वेऽनयोश्च विशेषाविशेषवृत्त्योः कोपपत्तिः?

परस्पररूपतापत्तौ नानात्वकृतायां कस्मान्न समानभूतः सन्नविशेषरूप एव संवृत्तः? भावो वा विशिष्टत्वाद्विशेषरूपः?, तदेकत्वात्, दृष्टा चेयं सामान्यविशेषयोरनुवृत्तिव्यावृत्तिभ्यां भेदवृत्तिः, विकल्पाच्चैकत्वव्याघातः, एकत्वे कुतोऽयं विशेषः — इदं न सह, इदं सह इति, विशेषणक्रियाधारकरणाद्यनुपपत्तेश्च।

अथापि कथञ्चिदित्यादि पूर्ववद्यावत् परमाणुवदिति, अथ मा भूवन्नेते दोषा इति भावविशेषयोरन्यत्वपक्षोऽभ्युपगम्यते चेत् तत्र तावद्यदि भावस्य विशेषेण सहान्यत्वं तेन तर्हि भावस्य विशेषात् पृथग्भूतं रूपमाख्येयम्, निर्दिष्टे हि पृथग्भूते रूपेऽन्यत्वं सिद्ध्येत्, शक्यञ्च प्रतिपत्तुमयमस्मादन्य इति, यथाऽन्येषामन्येभ्यः पटादिभ्य-स्तन्तुत्वम्, न शक्यते च भावस्य विशेषात् पृथग्भूतं तत्त्वं दर्शयितुम्, न ह्यन्यदन्यसाधारणरूपं भवति, तस्माच्छक्यते च ततः

पृथग्भूतेन तत्त्वेन निर्देष्टुम्, न तथा विशेषात् पृथग्भूतमसाधारणं भावस्य रूपं शक्यं वक्तुम् । सामान्यविशेषैकत्वनानात्वाभ्यां त्वप्रदर्शितपृथिवीघटपटादिनिर्देशवदत्रापि स्यादिति चेदुच्यते न मम किञ्चित् सामान्यविशेषैकत्वनानात्वाभ्यां व्यवस्थितमस्ति, त्वन्मता -नुवृत्त्या संवृतिघटपटवदित्यैक्यं कर्त्तुमुदाहियते, अनिरूप्यमाणस्त्व -सन्नापद्यते, अविशेषत्वे सत्यरूपत्वात्, खपुष्पवत् ।

अथोच्येत रूपं पृथग्भावस्यविशेषादनुप्रवृत्तौ, तथा कुतो विशेषं विना? घटपटाद्यनुप्रवृत्तिरूपत्वेऽपि पृथग्रूपाख्याना-शक्यत्वात्, यदि स्याद्भावो विशेषरहितस्ततो निरवशेषविशेषाभावे ऽपि खपुष्पादावनुप्रवृत्तिरूपं स्याद्भावत्वाद्घटादाविव ।

अथोच्येतैतद्विशेषप्रधानमन्यत्वं मा भून्नाम, तथापि विशेषस्य सामान्येन सहान्यत्वमस्ति दृष्टत्वात्, दृष्टो हि विशेषो भावविना-भूतोऽपि, यथा भिन्नो घट इति, अत्रोच्यते भावविषय एवैष भेदो-पचारः, भिदिक्रियाविशेषणविशिष्टावस्था तु भावस्यैव मृत्पिण्ड-शिवकादिभवनानुविद्धस्य, नाभावस्य खपुष्पादेः ।

यदि मन्येथाः भावे भेदोपचार इति स भावादन्यत्वे खपुष्पवन्नैव स्यात्, न भिन्न इति उत्पन्न इति वोपचर्येत, अभावत्वात् खपुष्पवत्, अत एव च तत्सिद्धिः, भिन्नसमानाधिकरणस्य मुख्यमूलत्वात्, भिन्नो घट इति घटेन समानाधिकरणो भेदोपचारो गौणो मुख्यं भेदमनुप्रवृत्तिसहचरितमवस्थाविशेषं भावस्यापेक्ष्य-विनष्टेऽपि क्रियते, अभिन्न एव वा भावे कपालाद्यवस्थायां भेद-

उपचर्येत स्तिमितसरःसलिलवदनुत्पादव्ययत्वाद्भावस्य, विशिष्यते विशेष इति सतो विशेषत्वात् तदपेक्षत्वाच्च, पूर्वोक्ताच्च तद्वृत्तित्वाच्च।

भावादन्त्यविशेषस्तु नैव पृथग्भूतः, विशेषत्वात् घटवत्, यदा चायं भावाव्यतिरिक्तो न कदाचिदप्यभावो भवति खपुष्पवत्, ननु यदैव सामान्यमविशेषं तदैवान्यत्वम्, न, अविशेषात् भावस्यात्मलाभाभावादभावत्वापत्तेरुक्तत्वात्, यदपि च भावो विशेषेण सह भवति न विशेषः, विशेषो भावेन सह, न भाव इति सहासहवृत्तिभेद उच्यते, स चासिद्धः, सिद्धे ह्यन्यत्वे सहासहभवनं द्विष्ठत्वात्, तथापि कथञ्चिदन्यत्वमभ्युपगम्यापि त्वन्मत्या यदन्यत् तदन्यदिति न वक्तव्यम्, अन्यत्वात् हस्तादन्यानन्यदेवदत्तवत्, यावद्रूपादिक्षणान्तरान्यानन्यपरमाणुवदिति।

अत्यन्ताभावस्तर्हि तौ, विशेषाविशेषत्वाभावात् खपुष्पवदिति, ननु भिन्नव्यवस्थानलक्षणत्वादनुभयत्वमप्यवचनीयम्, यदि ह्यनुवृत्ति-व्यावृत्ती तयोर्भिन्नव्यवस्थाने न स्यातां ततो रूपादिरपि पृथगेव भावात् प्रवर्त्तेत व्यावृत्तिरूपरहितत्वात्, भाववत्, भावोऽपि च रूपादेः पृथगेव व्यावर्त्तेत, अनुप्रवृत्तिरूपरहितत्वात्, खपुष्पवदित्यनु-भयमप्यवक्तव्यैव, अनुभयश्चेन्नास्त्युभयमस्तु तर्हि भिन्नव्यवस्थान-वृत्तमपि तदेवं नाभ्युपगम्यते ततः सर्वात्मकैकनित्यकालाद्यन्य-तमद्भावतत्त्वमसन्निरुपाख्यश्चेत्येतदुभयं स्यात्, तच्च न भवति निष्ठितत्वादेषां पक्षाणाम्, अनुभयत्वप्रतिषेधादुभयत्वमिति चेन्न, अन्यत्वावक्तव्यत्वात्, अन्यत्वप्रतिषेध एकत्वमिति चेन्न तस्याप्यवक्त-व्यत्वात्, एकत्वान्यत्वोभयत्वानुभयत्वप्रतिषेधेन च प्रधानोपसर्जन-

भावोऽपि प्रतिषिद्ध एवेति सर्वथैवावक्तव्यता, द्रव्यगुणकारणकार्यादि -ष्वप्येवमेवेति स्थितमवचनीयं वस्त्विति।

अतोऽन्यथोक्तौ वस्तुविसंवादः, अन्यस्यानन्यत्वेनानन्यस्य चान्यत्वेनावधारणात्, घटपटविपर्ययवृत्तिवदिति।

अयञ्च नयो नियम एव वस्त्वितीच्छति, सामान्य विशेषैकत्वान्यत्वैकान्तायतस्ववृत्तेरेव निश्चितनियताधिक्ययमनात्, उक्तविधिना सामान्यविशेषयोरेकत्वेऽन्यत्वे द्वित्वेऽनुभयत्वेऽन्यतर प्रधानोपसर्जनत्वे च निश्चितनियताधिकभावेनायतस्ववृत्तित्वात्, अवक्तव्यत्वे निश्चितनियताधिकभावेन यतस्ववृत्तित्वात्।

अत्र चाभिजल्पः शब्दार्थः प्रागेवोक्तः, आह हि-

'शब्दोवाऽप्यभिजल्पत्वमागतो याति वाच्यताम्।
सोऽयमित्यभिसम्बन्धाद्रूपमेकीकृतं यदा।
शब्दस्यार्थेन तं शब्दमभिजल्पं प्रचक्षते॥
तयोरपृथगात्मत्वे रूढेरव्यभिचारिणि।
किञ्चिदेव क्वचिद्द्रव्यं प्राधान्येनावतिष्ठते॥'[1]

इति सोऽयमित्येकीकृतत्वाच्छब्दरूपस्यार्थेनान्यत्वमवक्तव्यमित्युक्तं भवति, द्विष्ठत्वादेकीकरणस्यैकत्वमवक्तव्यमित्युक्तम् भवतीति, शेषमभ्यूह्यम्। स शब्दार्थः, पदसङ्घातो वाक्यम्, 'देवदत्त! गामभ्याज शुक्लामि'ति प्रत्येकवृत्तिसामान्यविशेषैकत्वान्यत्वानेकार्थस्थत्वात् अवक्तव्यः तदर्थ इति दिक्। एवं च कृत्वा यदप्युक्तं

१. वाक्यपदीयम् काण्डः २ श्लोकौ १३०-१३१

'सामान्यार्थस्तिरोभूतो विशेषो नोपजायते।
उपात्तस्य कुतस्त्यागो निवृत्तिः कावतिष्ठताम्॥'[1]

इति तदपि प्रत्युक्तमेव, यथाविचारितनिश्चितमवक्तव्यं वस्त्विति, एवमेव 'नामस्थापनाद्रव्यवाच्येष्टाकरणाद्भावयुक्तवाची शब्द' इति शब्दनयमतं युज्यते, यदवक्तव्यमिति पर्यवणमात्रमाह, सामान्य-विशेषैकत्वान्यत्वानेकात्मकस्य वस्तुनो वाचा वक्तुमशक्यत्वात्।

शब्दनयदेशत्वात् पर्यवास्तिक एषः, किं कारणं भावयुक्त-वाचित्वे पर्यायग्रहणम्, न सामान्यग्रहणमिति चेदुच्यते भुवो भिन्नधात्वर्थवाचित्वात्, न सत्तैव भूः, पर्यवति भवतीति भावः, पर्यवणञ्च प्रवेशनम्, परिशब्दः समन्तादर्थः, अवशब्दः प्रवेशार्थः, समन्तात् प्रविशत्येकतामन्यतामुभयतामनुभयताञ्च योऽर्थः स पर्यवः, तत्रास्तीत्येवं मतिरस्येति मूलसंज्ञाऽस्य नयस्य, उप-निबन्धनमस्य *'तदुभयस्स आदिट्ठे'* इत्यादि।

इति नियमभङ्गो नवमोऽरः।

---

१. वाक्यपदीयम् काण्डः२ श्लोकः१५
२. भगवती सूत्रम् श.१२ उ. १०

दशमो नियमविधिनयारः

नैवंविधो नियमो युज्यते, स्ववचनविरोधादिदोषात्, अनेकावस्थापत्तावनियतत्वाच्च, इदं हि त्वदीयं वचनं लोकाभाणक एव संवृत्तम्, तद्यथा—इदं तत् तदेवोद्यते तदेवापोद्यते त्वया ततश्चासत्तत्, स्वयं विहितनिवर्त्तित्वात्, सर्वोक्तानृतपक्षवत्।

एतस्य प्रतिपादनार्थमेकत्वादि प्रतिषिध्य व्यवस्थाप्य चापोद्यते, तद्यथा प्रागेव तावत् सामान्यविशेषयोरेकत्वे प्रतिषिद्धेऽन्यत्वमुपस्थितं विधाय दृष्टान्तेऽग्नेरिन्धनपृथग्भूतं रूपमाख्येयमित्यादिना पुनः प्रतिषिद्धः, सोऽपि चाप्रत्ययः यथोक्तमग्नेरिन्धनमित्यादि यावदसदापद्येतेत्यादि, तदेतत् पुनस्तयोः स्वयमेवापोदितम्, ननु ज्वाला देश इति निरूपणादन्यत्वं स्फुटीभूतमपि तद्वा कुतोऽनिन्धनमित्यनिन्धनप्रत्याख्यानेन ज्वालारूपमिन्धनसहितमेवेति ब्रुवता।

एतच्चान्यत्वमेव समर्थयत्यतोऽप्रत्ययम्।

उपसंहारेऽपि यदुक्तं विशेषस्य भावपृथग्भूतं रूपमाख्येयमित्यादि, एतदपि त्वयैवापोदितम्, ननु भवद्विशेषा एव समुदिता

एकमित्युच्यन्ते भ्रान्तैः, एकैक एव विशेषः प्रणिधानवद्भिरवगम्यते, रूपरसादिघटैकत्वविशेषवत् । पृथगेकत्वविलक्षणं प्रतिपादयितुं विशेषस्य भावपृथग्भूतं रूपमाख्येयमित्यादिना पृथगेकत्वमन्यत्वं विशेषाणां स्वरूपेणावधारयितव्यमिति वचनादेवान्यत्वं समर्थितम् अतोऽन्यत्वप्रतिषेधोऽतिस्फुट एव स्ववचनविरोधो दार्ष्टान्तिकोपसंहारेऽपीति।

ननूभयतोऽपि प्रतिषेधाददोष, इति, अत्रेदमस्ति त्वं प्रष्टव्यः — किंविषया तर्ह्यवक्तव्यता? तत्र न तावद्भावस्य विशेषस्योभयस्य वा, भावस्यैकत्वान्यत्वोभयत्वानुभयत्वानि प्रविभागेनाप्रविभागेन वा स्युः, अप्रविभागतस्तावदेकत्वं नास्ति, द्वितीयरहितस्योपाख्यानाशक्यत्वेन त्वयैव प्रतिषिद्धत्वात्, प्रविभागतोऽपि नास्ति, सहासहभवनस्य द्विष्ठत्वादित्यादिना निषिद्धत्वादेव, तथा विशेषस्योभयस्य च सिद्धे चैकत्वेतद्बलेनान्यत्वं व्यावर्त्येत, तत्तु नास्ति।

न चान्यत्वं सिद्धम्, त्वयैव तस्यापि निषिद्धत्वात्, यद्बलेनोभयत्वं व्यावर्त्यैतैकत्वं वा तथानुभयत्वमपि नास्ति, एकत्वान्यत्वयोर्लक्षणभेदनियमादित्युक्तम्, यद्बलेनैकत्वान्यत्वोभयत्वानि व्यावर्त्येरन्, यस्य वाच्यतामवाच्यतां वा गृहीत्वाऽवाच्यं वाच्यं वा व्यावर्त्तेत, व्यवस्थापूर्वत्वादितरव्यावर्त्तनस्य।

अन्वयव्यतिरेकाभ्यामर्थाधिगमाच्च, कथम्? एकशब्दो ह्यन्यनिरपेक्षसङ्ख्यार्थः, तस्मादेक इत्युक्ते नान्योऽस्तीत्युक्तं भवति, स चार्थो न घटते, न स निरपेक्षः एकत्वान्यत्वोभयत्वानुभयत्वविकल्पानामन्योऽन्यापेक्षत्वात्, अथासहायवचन एकशब्दः,

तथा सति सहगतेद्वर्थाद्यर्थेनाव्यतिरेकादेकत्वं नास्ति किन्त्वन्यत्वमेव सिद्धचेदिति पुनरन्यत्वमेवार्थः।

ततोऽन्यार्थे तु साक्षादन्यत्वमेवविशेषविषयं ततोऽन्यत्व-निषेधेऽतिस्फुट एव स्ववचनविरोध इत्युक्तम्, तथा चानन्यत्वमपि सिद्धयति प्रतिपक्षाक्षेपात्, यथा व्याख्यातमेकत्वान्यत्वयोः परस्पर-प्रत्यपेक्षत्वं तथोभयानुभयत्वयोश्च, एवं तावदेकत्वसिद्धप्रतिपक्ष-बलात् सिद्धं सद् व्यावर्त्यते नान्यथेत्यवक्तव्यनिर्विषयता, एवमन्य-त्वोभयत्वादावपीत्येकत्वादिप्रतिषेधाः किं कथमवक्तव्यम्? ते तु निषेध्यानामतथात्वे निर्मूला अवक्तव्यत्वमेव व्यावर्त्तयन्तीति।

न पराभिप्रायगतैकत्वाद्येकान्तव्यावर्त्तनार्थत्वान्निर्मूलाः प्रतिषेधाः, न च निर्विषयमवक्तव्यत्वम्, एकत्वादि प्रतिषेधतथार्थ-त्वात्, अथ त एकत्वादयो विद्यमाना अविद्यमाना वा कथं परेण प्रतिपन्नाः? यदि तावद्विद्यमानाः सन्तः प्रतिषिध्यन्ते ततस्तत्रावक्त-व्यत्वनिर्विषयतोक्ता, अथाविद्यमानाः, अत्यन्तमभूतत्वात् कथं प्रति-पत्तुं शक्यन्ते? अप्रतिपन्नत्वादेव प्रतिषेधानुपपत्तिः।

ननु वादपरमेश्वरवादवत् प्रतिषेध उपपद्यत इत्येतच्चायुक्तम्, तद्वैधर्म्यात्, न ह्येषां भवता एकान्तभवनं व्यावर्त्त्याऽनेकान्तभवनं प्रतिपाद्यते, तत्र ह्यनेकान्तरूपेण वक्तव्या एव सन्त एकान्तरूपेणा-वक्तव्या इत्युच्यन्ते, सप्रतिपक्षत्वाद्भावानाम्, तथा ह्याह

'सप्रतिपक्षाण्येतानि यतस्तस्मान्न तानि वाच्यानि।
एकान्तेन हि वदतो मिथ्यावादः प्रसज्येत॥' इति।

अवक्तव्यशब्दस्य तु प्रतिपक्षः सम्भाव्यते नञ्युक्तत्वात्, अब्राह्मणवत्, अपि च त्वयाप्यभिजल्पशब्दार्थवादिना दिक्प्रत्यासत्त्याऽवक्तव्योऽर्थ इत्यभ्युपगतम्। त्वन्मत्या स चावक्तव्य एवावक्तव्य इति नञा प्रतिषिध्यते, स च प्रतिषेधप्रतिषेधत्वात् प्रकृतिं गमयेत्, अनब्राह्मणवदिति।

संवृत्यैव वाग्व्यवहार इति चेत्, अपरमार्थस्तर्ह्यवक्तव्यः, संवृतिसत्यपदसमुदायार्थत्वात्, मण्डूकजटाभारकृतकेशालङ्कारवन्ध्यापुत्रखपुष्पदामकृतमुण्डमालाख्यानवत्, धर्मधर्मिविभागव्यवस्थाभावात् प्रतिपादनप्रमाणाभावेनाविदितं भवत्यवक्तव्यं वस्तु।

इदमसि त्वं प्रष्टव्यः, अथ यस्य य एते देशास्तेषां यो विशेषोऽवयवस्तस्मात्तत् किमव्यतिरिक्तम्? व्यतिरिक्तं वा? अवक्तव्यस्य विशेषावयवत्वनियमात् प्रश्नोत्थानम्, सामान्यविशेषैकत्वाद्याशङ्कासम्भववत्, यदि सामान्यमेव विशेष एवोभयमेवाऽन्यद्वा वस्तु, तत्र यदि सामान्यकृतमेकत्वं विशेषीभूतमक्रम्य विशेषस्वरूपं वस्तु व्यावर्त्तयत् तत् सामान्यकृतैकत्वविशेषं व्यावर्त्तयेत् न सामान्यमेवेति, यदि वोभयकृतमन्यत्वं न सामान्यं न विशेषश्च वेति तदेकत्वान्यत्वयोरपि विशेषेणाव्यतिरिक्तायां सत्यामवक्तव्यार्थः संवदेन्नान्यथा, तेषां स्वातन्त्र्येऽवक्तव्यत्वनिवृत्तेः।

अवक्तव्यत्वस्य नियमत्वादस्य च नियमस्य तथा तथा ऽऽत्मान्तरनिवृत्तावात्मान्तरत्वापत्तेर्विशेष्यमाणस्य विशेषत्वमेव, यदि पुनर्विशेषव्यतिरिक्तं स्यात् ततो व्यतिरेकादन्यत्वाक्षान्तेः।

यद्येवं विशेषाव्यतिरिक्तं ततस्तत्तु विशेषमात्रमेव, यथा भिन्नोऽप्येको विशेषो रूपादिस्वरूपादव्यतिरिक्तत्वाद्विशेष एवेत्यभ्युपगम्यते त्वयापि, यस्य भावेन सहैकत्वान्यत्वादिविचार्यते, यस्माच्च तैर्भावोऽवक्तव्य इत्युच्यते, एष विशेषोऽप्येक एव, अव्यतिरेको ह्येकलक्षणम्, यथा *'पुरुष एवेदं सर्वमि'*त्यादि, स च विशेषो भावो वस्तु, अवक्तव्यस्य विशेषाव्यतिरिक्तत्वात्, तत्स्वात्मवत् यथा विशेषाव्यतिरिक्तं विशेषस्वात्मवस्तु विशेष एव, भवतीति भाव इति सत्तार्थत्वात्तस्य, ततश्च विशेषमात्रमेव, स्थितमिदमेक एव विशेषस्तद-वक्तव्यसामान्यमिति।

तस्मिंश्च स्थिते तदेकत्वात् कुतोऽवचनीयता तस्य न हि विशेषोऽवचनीयो विशेषाव्यतिरिक्तत्वात् स्वात्मवत्, एवं निर्धारितो विशेषो वाच्य एव तथा च निर्धारितार्थावक्तव्यवचनात् उष्णत्वेन निर्धारितस्याग्नेः शीतोऽग्निरिति वचनव्यवहारवदबुद्धिपूर्वकयादृच्छिकवचनव्यवहारप्रसङ्गः, अतथा चेदिच्छस्येवं तर्हि विशेषो वचनीयः, विशेषाव्यतिरिक्तत्वात्, अवक्तव्यसामान्यवत्।

त्वया विशेषस्यैकत्वादि वाच्यत्वेनाभ्युपगम्य प्रतिषेधेनावक्तव्यप्रतिपादनस्य कृतत्वात्, तस्याप्यवाच्यत्वे वस्तुनश्चावाच्यत्वे तयोः परस्परमवचनीयत्वादुभयतोऽप्यवचनीययोर्द्वयोरपि वचनीयत्वं स्यात्।

अथ विशेषव्यतिरिक्तं वस्त्विष्यतेऽवक्तव्यत्वादेव, नन्वेवं तस्य भावत्वे वक्तव्यतैव, अभावत्वेऽप्यसदिति वक्तव्यतैव, तथा

त्वदुक्तवदप्यवस्तुता, अभूतावक्तव्यत्वात्, खपुष्पवत्, भावपक्षेऽप्य-भूतावक्तव्यत्वात् प्रधानादिवत्तदवस्तु, यथा च तद्विशेषव्यतिरिक्त-मिष्यते तथा विशेषोऽपि वस्तुनो व्यतिरिक्तः, एवञ्च तदेवासत्त्वम-नयोः, त्वदिष्टं वस्त्वसत्, अविशेषत्वात्, खपुष्पवत्, विशेषो ऽप्यसत्, वस्तुव्यतिरिक्तत्वात्, खपुष्पवत्, तथा च सामान्य-विशेषयोरेकत्वान्यत्वादिविकल्पप्रपञ्चनमाकाशरोमन्थनवत्, परि-क्लेशमात्रफलम्, अयथार्थत्वात्।

अथावक्तव्यविशेषव्यतिरेकाव्यतिरेकं वस्त्वित्येष मे पक्षः, तथापि द्विर्विशेषांशवृत्तेः विशेषप्रधानावक्तव्योपसर्जनपक्षता, विशेष एवावक्तव्यत्वेन विशेष्यत्वाद्गौरदन्तुरत्वद्वयविशेषणविशेष्यदेवदत्त-वत् प्रधानः, अवक्तव्यस्य चोपसर्जनता स्यादिति प्रधानोपसर्जन-पक्षताऽप्रतर्कितोपस्थिताऽनिष्टा च सेति।

तस्या अपि च रूपं निरूप्यम्, किमेकत्वमन्यत्वमुभयत्व-मनुभयत्वं वेति प्रतिषेध्यविपक्षरूपस्याश्रयितव्यत्वात्, तत्र तस्य किं द्विर्विशेषांशवृत्तिराश्रीयते? अथ नाश्रीयते? अथाश्रीयते निषिध्यमान -प्रतिपक्षरूपता ततः पर्यायेण साङ्ख्यादिवादगतानन्यत्वादिदोष-प्रसङ्गः, तत्र त्वयैवोक्तदोषास्तवाऽऽपतन्ति।

प्रतिपक्षरूपानाश्रयणे सर्वविकल्पानां निवर्त्तनाद्वस्त्वत्यन्तम-सदिति कुत आयाताऽवक्तव्यता? अनवधारण परिग्रहेत्वेकं द्रव्य-मनन्तपर्यायमिति वादपरमेश्वरशरणं प्रपन्नोऽसि तथापि तेऽभ्युपगम-विरोधाद्विजिगीषुतां निरुणद्धि।

अथैकान्तवादगतदोषविदूरीकरणार्थमसदेव तद्वस्त्विति वदेत् तदपि न शोभनं विशेषद्वारा निषेधानुपपत्तेः, ततोऽप्ययुक्तमवक्तव्यत्वम्, विशेषधर्मासत्त्वे विशेष्यत्वाभावात्, खपुष्पवत्।

अथोच्येत प्रतिपादनार्थं विशेषैकत्वान्यत्वाद्यसदेव कल्प्यते, ग्रामादिपथोपदेशे दिगादिप्रदर्शनवत्, अत्र त्रिलक्षणोपपत्तेस्तत्र तयोश्च स्वरूपेणावक्तव्यतैवेति, एवं तर्हि ननु प्रतिपादनमित्यप्यवचनीयमेव, अत्यन्तासत्त्वात् खपुष्पवत् प्रतिपादनमिति चोच्यते त्वया लोकदृष्टप्रतिपादनवैधर्म्येण, विशेषवचनस्य च विशेषाविशेषाद्येकत्वाद्यवक्तव्यत्वात्, प्रतिपाद्यप्रतिपादकयोरपि चैकत्वान्यत्वाद्यवक्तव्य-त्वात् तदवचनीयत्वे च तत्सत्त्वमवश्यम्भावि, वक्तव्यवत्।

अथोच्येत न प्रतिपाद्यात् प्रतिपादकभेदोऽस्ति, किन्तु सर्वस्य विशेषणसविशेष्यस्यास्य वाक्यसङ्घातस्यैकस्यैवोक्तप्रकारेणावक्तव्या-र्थप्रतिपादनवचनाददोष इत्यत्र ब्रूमः, ननु यद्यवचनीयमित्येतदप्यवचनीयमेव, वस्तुत्वात्तदर्थवदिति, अत्रेदानीं परमनिश्चये त्वदीये तत्तावत् प्रत्यक्षमुच्यमानं किं कथञ्चिदवचनीयम्? सर्वथा वा? उभयथा च प्रत्यक्षादिविरोधाः, एकत्वेनान्यत्वेनोभयत्वेनानुभयत्वेना-न्यतरप्रधानोपसर्जनतया तथातथावचनीयत्वात्।

इत्येवंविधमवस्तु, सर्वथाऽप्यरूपत्वात् खपुष्पवत्, सर्वेण वा विरोधात्, खपुष्पवदेव, प्रत्यक्षरूपादिवत्, ज्ञानसुखादिरूपादिवत्, तस्मान्नावक्तव्यं वस्तु।

नापि निर्विचारवक्तव्यमेकान्तवादप्रसङ्गात् तत्र चोक्त-दोषत्वात्, विशेषोऽपि रथादिवन्न भवति वस्तु, समुदायत्वात्, न भावोऽपि, त्वयैव प्रतिषिद्धत्वात् कुतस्तदेकत्वाद्यवक्तव्यता?

किं तर्हि वस्त्विति चेदुच्यते — रूपादय एव समुदायिनः, न समुदायो नाम कश्चित्, त एव हि भवन्ति, यत्तत्तैर्भूयते स भावो भवनं भूतिः, ते हि तस्या भवनक्रियायाः कर्त्तारः, योऽन्यैः परिकल्प्यते समुदायः कारणं द्रव्यमित्यादिः स न भावः कश्चिदस्ति, अरूपादित्वात्, खपुष्पवत्, को हि सः पृथिव्यादिविनाभूतः, एवं कः पृथिव्याकाशादिरण्वादिविनाभूतः, केऽणवो रूपादिभ्यो विना, अभिवचनमात्रमेवैते, आत्मा च न नामान्यः कश्चिदस्ति, अरूपादित्वात् खपुष्पवत्।

यथा चक्रेषाण्यक्षादिहस्त्याद्यङ्गसमूहे रथसेनासंज्ञा, समुदायो विभज्यमानोऽङ्गेषु तान्यपि स्वांशेषु, प्रत्येकमेवं परमाणुपर्यन्तं विभज्य सुष्ठु निभाल्यमानोऽपि न रथादिरङ्गव्यतिरिक्तो दृश्यते, किन्तु तत्समुदाय एवाऽऽभासते तथा, यदि सोऽङ्गेषु रूपाद्यात्म व्यतिरिक्तेनात्मना स्यात्तत उपलब्धिधर्मा तत्प्रतिबन्धिनामभावे रूपादिवदुपलभ्येत, वस्तुत्वान्न तूपलभ्यते, तस्मादसन्, रूपादि व्यतिरिक्तोऽस्ति चेत्समुदायोऽनात्मको नासौ ततः खपुष्पवद्भवेत्, अरूपत्वात् अरूपाद्यात्मकत्वाद्रूपादिभ्य इव वा खपुष्पादेरपि भवेत्।

अथानर्थान्तरतायां रूपादिष्वदृष्टं भारवहनादिकार्यं रथादौ कथम्? अत्र प्रयोगः स्वतो व्यतिरिक्तसहकारिसम्बन्धिनो रूपादयः, स्वासम्भविकार्यदर्शनाच्चक्षुरादिवदिति, क्व तर्हि तद्दृष्टं? तेष्वेव, नन्वविवादसिद्धं शिबिकावाहकेभ्यश्चतुर्भ्यो व्यतिरिक्तात् सहायादृतेऽपि शिबिकावहनं दृष्टं कार्यम्, अतोऽनैकान्तिकं तत्, तथा प्रत्येकवस्तुवृत्तिमनतिक्रामन्त एव स्वां वृत्तिमवतिष्ठन्ते

रूपादयः तेषामेव वस्तुत्वात्, अन्यथाऽर्थस्य परिकल्पनामात्रत्वम्, अनवस्थितैकस्वतन्त्रत्वात्, अलातचक्रवत्।

ननु घटादावनवस्थितैकस्वतत्त्वत्वस्य सत्त्वमिति चेन्न समुदायत्वाद् घटस्य शकटादिवदेव साध्यत्वात्, रूपरूपादिस्थितैकरूपत्वेऽपि सत्त्वमिति चेन्न, रूपसामान्यसमुदायसाध्यत्वात्।

प्रत्येकं वृत्ता रूपादिव्यक्तिर्भेदरूपैव, सा चानवस्थितैकरूपेत्येतन्मात्रसत्यमेव वस्तु, तस्य त्वभिवचनमात्रं घट इति परिकल्पनामात्रार्थत्वाच्छब्दस्य, संसारानुबन्धवत्, परमार्थतस्तु पश्चात् पूर्वञ्च भावाद्यथा रथस्यात्मा नास्ति तथा संयुक्तावस्थायामपि, यथोच्येत किञ्चित् कार्यं बुद्धिपूर्वकं पुरुषेण क्रियते, स्वत एव च कारणात् कार्यमुत्पद्यत इत्येतन्मृषा तैर्यर्थाच्यते — सत् कार्यं यथा रूपादिभिराकाशादीनां भूतानामुत्पत्तिरिति वाचोयुक्तिमात्रेण प्रक्रियावशाद्भिन्नत्वादिति।

यदेतत् सन्नाम ततोऽन्यदेव तु कार्यम्, तदतुल्यविकल्पत्वात्, रूपादिखपुष्पवत्, कथमतुल्यविकल्पः? इह शब्दादीनां कारणानां आकाशादीनां कार्याणामुभयेषां सत्त्वं कार्याणामाकाशादीनामेव सत्त्वमिति द्वौ भङ्गावुपयोज्यौ, इतरयोरभ्युपगतप्रतिपक्षत्वाद्भादाभावात्, तद्यदि तावदुभयसत्त्वं सत्त्वाविशेषात् कार्यकारणयोरविशेषः, सति चाविशेषे यथा स्वरूपतत्त्वा एव शब्दादय उत्पद्यन्ते ऽभिव्यज्यन्ते वा तथाऽऽकाशादयोऽप्युत्पद्येरन् सत्त्वाविशेषात्, रूपादिवत्, शब्दस्पर्शाद्येकोत्तरपरतत्त्वोत्पत्तिर्मा भूत्, इष्यते चासौ, तस्मात्तदतुल्यविकल्पता सिद्धा ततस्ततोऽन्यस्वभावं कार्यम्।

अथ वैषम्यरहितविविक्तस्वरूपरूपादिप्रादुर्भाववन्न भूम्यादि-प्रादुर्भावः, तच्च कार्यं सदेवेति निश्चितं ततः कार्यमेव सदस्तु, रूपाद्यसत् स्यात् सद्विलक्षणत्वात् खपुष्पवत्, स्वरूपतत्त्वेन भूतत्वाद्रूपादेः पररूपतत्त्वाविर्भाविनः सतः कार्याद्विलक्षणत्वात्, अथेदमपि सत् स्वतत्त्वप्रादुर्भावात्मकञ्चेष्यते ततस्तद्वैलक्षण्यात् कार्यमसत् प्राप्नोति, अस्वतत्त्वाविर्भावात्मकत्वात्, अलातचक्रवत्, अथ मा भूद्दोष इति सदेव कार्यमिष्यते ततः स्वत एव प्रादुर्भवेत्, सत्त्वाद् रूपादिवदिति तुल्याविर्भावस्ते प्राप्तः।

तदनिच्छतः प्रादुर्भावाविशेषप्रसङ्गपर्यवसानं चक्रकं तत्रैव प्रसङ्गे स्थितं सत्त्वाद्रूपादिवदित्युत्थाप्य सत्त्वाद्रूपादिवदित्येवं विपर्ययेण गमनीयम्, तस्मात् सतोऽन्यस्वभावमेव कार्यम्, एवन्तु रूपादिप्रतिनियतचक्षुराद्यविषयत्वात् पृथिव्यादयो न प्रत्यक्षाः, अनाविर्भाव्यत्वात् खपुष्पवत्, रूपाद्येव तु यत्किञ्चित् प्रत्यक्षं स्वत एवाविर्भावितृत्वात्, इतरवदिति प्रत्यक्षत्वाद्यविरोधात्तदेव भवतीति।

अथैवंदोषवदित्युभयसत्त्वपक्षं त्यक्त्वा कार्यासत्त्वा-भ्युपगमपरिहारेण कार्यसत्त्वपक्षमेवाश्रयेः, ततः कार्यमेव सदित्यव-धार्यमाणः पक्षः स्यात्, तत्र कार्यमेव सदिति कार्यसमीपे एवकारः क्रियते 'यत एवकारस्ततोऽन्यत्रावधारणात्' कार्यस्य सत्त्वेन नियमात् कार्य एव सत्त्वं नियतं नान्यत् सदिति नियम्यते ततश्च रूपादि न सदिति ते प्रसक्तम्, तस्यासत्त्वे कार्यस्यासतः सत्त्वे विपरीता संज्ञा क्रियते सतोऽसदित्यसतश्च सदित्यग्निमङ्गलनामवत्, कार्यसत्त्वमिति च नाममात्रमेव।

कार्यासत्त्वनिवृत्त्येकान्तत्यागाच्च स्ववचनादिविरोधाः, कारणे कार्यसत्त्वन्यायेे तु स एवोभयसत्त्ववादः, तत्र चोक्ता दोषाः।

अथ सदेव कार्यमित्येवकारात् सदनवधृतेः पूर्वदोष एवेति।

यथा च पृथिव्याद्येवमात्मापि संवृत्या तत्समुदाये प्रज्ञाप्यते तत्सन्ताने वा, 'राशिवत् सार्थवत्,' ननु शुद्धपदप्रयोगादेव नासन्नात्मेति रूपादिवदेवाऽन्य इति चेन्न, शब्दान्तरवाच्यत्वादेवानन्यत्वात्, यथाऽनन्या नररथाश्वद्वीपवती शब्दान्तरवाच्या सेनेति, नरादिपृथक्प्रवृत्तेस्तत्र स्यादसत्त्वम्, आत्मनस्तु नाभूद्रूपापृथग्भावात्तदात्मत्वाच्च, तत्रोच्यते, अनन्यत्र प्रवृत्तेरपि समुदायस्यानर्थान्तरत्वात्, यथा च शिखरादिभ्यः शिखरिणो नार्थान्तरत्वम्।

तत्रापि शिखरादिविभागादेव न स्यादिति चेन्न बुद्धिविभागेऽप्यनन्यत्वात् पानकवत् तद्यथा मरिचक्षोद..... पानकम्। एवं ससम्प्रयुक्तविज्ञानादिधर्मव्यतिरिक्त आत्मा नास्ति, तद्यथा सुखितो दुःखितो रक्तो द्विष्टोऽवाऽस्मीति संव्यवहारसिद्धिर्विज्ञानादेव तथैव पुरुषकर्मफलसम्बन्धादिसंव्यवहारसिद्धिः पञ्चसु स्कन्धेष्वेव कुतः पुनरात्मग्राहः प्रवर्त्तते? अत्रोच्यते *'औदासीन्याच्च तत्त्वेषु'*। पंचस्कन्धतत्त्वविपरीतात्मकल्पनाया विपर्ययज्ञानीभूतत्वात् चित्तस्य सप्तमानान्तर्गताहंमानाकुशलसंस्कारानुशयात्, आत्माऽस्तीत्यहङ्कारः प्रवर्त्तते ततः पञ्चस्कन्धव्यतिरिक्तः पुरुष इति।

एवञ्च रूपादितत्त्वस्य वस्त्वन्तरसङ्क्रान्तेरयथार्थत्वात्र वस्तुव्यवस्थागतिविनिर्मुक्तेरुभयावस्तुत्वमापादयेत् सेति प्रतिपत्तेः

समभिरूढः, एकीभावेनाभिमुख्येनैक एव रूपादिरर्थस्तां तां संज्ञां समभिरूढः, यस्य शतसङ्ख्यस्यापीदमेव लक्षणम्, *'वत्थूओ संकमणं होति अवत्थूणये समभिरूढे'*[1]। इति, तत्रायं नियमविधिर्द्वादशधा भिन्नस्य शतभेदसमभिरूढैकदेशस्य गुणसमभिरूढस्य नामभेदः।

अस्य नयस्य चोत्पत्तिविगतिस्थितिभिरपि नैव सम्बध्यते रूपादि, उत्पत्तिविगत्योस्तावत् प्रागभावप्रध्वंसाभावात्मकत्वादुभयमभूतं रूपादि च भूतम्, तयोर्बस्त्वन्तरसङ्क्रान्तेर्नैनूभयं व्याहन्यते भूतश्चेत् कथमभूतम्? अभूतश्चेत् कथं भूतं रूपादिवस्तु? इति।

भूता स्थितिरपि च भवनात्मिका सर्वत्र सङ्क्रामति वस्त्वन्तरमिति न वस्तुतैव, अथ तथा तथा भाव एव भवतीति तस्यैवैकस्याभिव्याप्तिर्न वस्त्वन्तरसङ्क्रान्तिरिति तन्न, प्रतिवस्तु तथा भवनस्य भूतत्वात्, परस्परव्यावृत्तात्मना सर्वस्य वस्तुनः प्रतिनियतत्वात्, न च भवनेनापि व्याप्तिरस्त्येवमिति स्थित्युत्पत्तिविगतिनिरपेक्षरूपादिमात्ररूपतायां सर्वसिद्धिरिति।

एवं हि नियमो भवति यदि वस्तु, एष नयोऽनन्तरातीतनय प्रतिक्षेपेण पूर्वतरातीतविचारप्रसिद्धोत्सर्गविधिवृत्तात्मीयानाश्चापवादेन नियमः क्रियते विधीयत इत्थंतयेति, पर्यव इति परिगमनं तच्चानेकता गुणः परितो गमनात् स एवास्तीति मतिरस्येति पर्यवास्तिकः।

१. आवश्यकनिर्युक्ति ७५७

पृथक् स्वेन स्वेनार्थेन युक्तानि पदानि वाक्यम्, तेषामेवार्थो वाक्यार्थः, उपनिबन्धनमस्य, *'गोयम! चउव्विहे पण्णत्ते तं जहा-वण्णवंते रसवंते गंधवंते फासवंते"*[1] वर्णवन्त इत्यादिनिर्देशे मत्प्रत्ययः संसर्गे, परस्परसंसृष्टा एव वर्णादय इति।

इति दशमो भङ्गो नियमविधिनयः समाप्तः।

१. भ. श.२० उ.५

एकादशो नियमोभयनयः

इदमशक्यं यद्यत्तद्रूपादिभवनमेव भाव इति स्वमतं व्यवस्थाप्य वस्तुसङ्क्रान्तिप्रतिषेधेनोत्पत्त्यभाव इति वचनं श्रोतुमपि, अवश्यं हि तैः केनापि प्रकारेण भवितव्यं, अत एव, तत्र च तयोरत्यन्तभवनस्य व्यावर्त्तितत्वाद्भावरूपेण भवनाभावात् परिशेषादुत्पादविनाशेनैवैषां भवनमव्यावृत्तम्, तद्व्यावर्त्तने ह्यभावता तेषां स्यात् खपुष्पवत्, उत्पादविनाशरूपं भवनं त्वयापि ननु तैर्यथानुभूयते स एव भाव इत्युक्तम्।

ननु तैर्भूयतेऽनुत्पादादित्वेनैवेति, न तर्हि तैर्भूयते, अकालत्वेऽकालत्वात्, त्वदुक्तिवदुत्पादाद्यनभ्युपगमादकालत्वम्, उत्पादविनाशावेव हि वस्तूनां भवनबीजम्, रूपादय इव तन्त्वादिभवनबीजम्, तदभावे तदभावात् तद्भावे तद्भावात्, इतरथा ह्यनुत्पादविनाशत्वादपर्यायत्वान्निर्मूलत्वान्न स्यात्, वन्ध्यापुत्रवत्।

अपि च नानित्यसामान्यमात्रेण वस्तुप्रतिपक्षनित्यसंस्पर्श-सम्बन्धिना सन्तुष्यामः, किं तर्हि? प्रतिपक्षविनिर्मुक्तमेवानित्यत्वं वस्तुनः, तानि रूपादीनि क्षणिकानीत्यवधार्यताम्, यो हि भाव

उत्पन्नः स *'नंष्टा चेन्नाशविघ्नः कः?'* यदि हि उत्पत्तिविनाशस्वभावो भावः तर्हि तस्य विनाशधर्मणः सतः को विनाशप्रतिबन्धी विघ्नः येनावतिष्ठेत तद्विशिष्टमपि कालम्, स उत्पन्नमात्र एव विनाशमनुभवेत्, अनन्तरासत्त्वे सति तत्स्वभावत्वात्, विनाशक्षणवत्, *'न चेन्नैव विनंक्ष्यति'*। एवमनिच्छतः स नैव नश्येत्.....पूर्ववत्।

अस्ति विघ्नः, कोऽसौ? विनाशहेत्वसान्निध्यम्, कः कस्य विनाशहेतुः? यत्सन्निधानासन्निधानाभ्यां विनाशाविनाशौ, यथा घटस्य मुशलाद्यभिघातोऽग्निसंयोगः पार्थिवानां रूपादीनामपाञ्च विनाशहेतुरित्यत्रोच्यते *'साध्यं विनाशहेतुत्वं'*। अन्यतरासिद्धेः कथं निर्धार्यते हेतुरेवेति, विशेषहेतुर्वाच्य इति, अस्ति विशेषहेतुः, तस्मिन् सति 'पश्चादग्रहणं यत' इति अत्रोच्यते — इदमज्ञापकम् *'स्वयं विनाशे तुल्यत्वात् तथानुत्पत्तितोऽग्रहः'* कथं कृत्वा? यथासङ्घनिर्देशा हि पार्थिवघटरूपादयः रूपादय एव घटाकारेणोत्पद्यमाना घट इत्याख्यां लभन्ते, समुदायविशेषात्, ते पुनः स्वयमेव विनष्टाः, उत्पत्तेरेव विनाशकारणत्वात्, तत्राभिघातप्रत्ययवशादन्ये रूपादयो न पुनस्तथोत्पन्नाः, तस्मात् तदानीं घटत्वेन रूपाद्यग्रहणम्, तेन न घटो विनाशितः, तथा पार्थिवा अपि रूपादयः आपश्च।

कथमिदमवगन्तव्यं दृश्यमानेऽभिघातादौ विनाशहेतौ स्वयमेव विनाश इति, एतदधुनाऽनुमानेन प्रत्याय्यते — स्वयं विनाशि घटादि, जातत्वात्, प्रदीपशिखावत्, आगमोऽपि

'जातिरेव हि भावानां विनाशे हेतुरिष्यते।
पश्चात् विनाशकाभावान्न विनश्येत् कदाचन॥' तथा -
'जुहुरिक्कत्तं मिलेडंमि उप्पादे अत्थि कारणं।
पट्ठणे कारणंणत्थि अणत्थु ..... ॥ इति।

तस्मात् प्रतिक्षणमुत्पत्तेरेव विनाशित्वं सिद्धं रूपादीनाम्, तत्रैवं रूपादीनामभूततथार्थत्वाद्देशाभेदभवनाभावसमुदायवत् कालाभेद-भवनाभावादसत्त्वम्, यथा हि समुदायस्य देशाभेदस्य संवृतिसतः परमार्थतोऽसत्त्वं तथा रूपादेरपि रूपादिपरमार्थतया भवतोऽप्येक-स्मिन् क्षणे न क्षणान्तरप्रतीक्षणं कालतो भेदात् रसादि-रूपकालाभेदादित्यर्थः, तस्योत्तरकालाप्रतीक्षितत्वात्तदेवेदमित्यशक्यं वक्तुम्, ततोऽत्यन्तमन्यत्वाद्रसादिवत्।

कृत्वा कल्पनया इत्थं स्याद्यदि स्यात् तद्यथारूपं तथारूपं तद्रूपं स्यात् द्वितीयक्षणादिषु न कदाचित्, इदन्तु तदभावपरम्-परापतितमसदेव समुदायवत्, यथा समुदायः स्वरूपेणासन्नेव रूपादीनामेवं रूपमपि, पृथक्त्वानवस्थितार्थत्वात्, अतो रूपं, रूपस्वरूपासत् एवं नियमो नियमितोऽसत्त्वेन विशेषो रूपादिः।

अभावार्थस्तु नियमः यत्तत् प्रतिक्षणभवनं तस्य तत्तु क्षणे क्षणे वृत्तमत्यन्ताभावविपरीतवृत्ति सत् कथमनर्थतायां स्यात्? किन्तु नास्ति तत्, अत्यन्ताभावत्वात्, खपुष्पवदिति स्यादतः प्रतिक्षणं न भवति न भवतीति विशेषाभ्युपगमात् सोऽभावः सन्नर्थश्च।

ननु स भवनव्यपदेशः सत्त्वे घटते, अन्यथा हि कुतोऽस्या त्यन्तभेदस्य भवतीति भवनेनोपाख्या? अभावो वाऽर्थोऽस्येत्यस्य

शब्दनिर्देश्योऽन्योऽर्थः सन्नसता सम्बध्यते, अभावस्याश्रयभूतत्वात्, भाव एव ह्याश्रयो भवितुमर्हति, एकक्षणविज्ञानवद्रूपादिसदसद्विचारस्य, इतरथा निराश्रयौ प्रागभावप्रध्वंसाभावौ न स्याताम्, इष्टौ च तौ न हि भावमनाश्रित्य भवितुमुत्सहेते, असद्विशेषत्वात्, स चाश्रयोऽर्थः पूर्वमसद्रूपः पश्चाच्च सदित्युच्यमानत्वात् तदुपपदनञ्त्वात्, अर्थ इति नाभावमन्तरेणोत्सहते, अभाव इति चार्थम्।

ननु रूपादिभावोऽर्थः क्षणिकतायां सत्यामपि नाभावमन्तरेण नोत्सहते भवितुम्? न चाभावः नञुपपदत्वात्, अब्राह्मणवत् भावाद्रूपादेरन्यस्याभाव इति निर्देशो युक्तः। नन्वेवं क्षणिकत्वादसत्त्वे कथमुत्पन्ने पुत्रादौ घटादौ वाऽर्थे भूतमित्याश्वासः, दग्धमृतप्रध्वस्तेषु चानाश्वासः? अविषयत्वात्, नन्वविषय एवायं व्यवहारः, क्षणिकेऽस्यासम्भवात्, उक्तवत्; एवमेव च वैराग्यभावना घटते, तदर्थश्चायमारम्भ इति गुणोपचयः।

स हि युज्यते संवृत्या, सन्तानविषयत्वात्, उत्पादो विनाशश्च किं सूक्ष्मः महान् वा? महोत्पादः सूक्ष्मोत्पाद इत्येवम्, महत्ता सन्ताने उत्पादविनाशयोः सूक्ष्मता तत्प्रवृत्तेः बुभुक्षातृष्णयोरिव न तर्हि सूक्ष्मौ स्त एव, अकारणत्वात् खपुष्पवत्, सन्तानगतावैव स्तः, सकारणत्वात्, चक्रस्थघटस्येव न घटस्येव विनाश इति, अत्रोच्यते परस्परकारणत्वात्, जातिर्विनाशस्य कारणं जातेर्विनाशः, तयोर्युगपद्भावात्, *'नाशोत्पादौ समं यद्वन्नामोन्नामौ तुलान्तयोः'*।

एवमेव च सन्तानसिद्धिः, युगपदुत्पादविनाशैः रूपनैरन्तर्यात्, अन्यथाऽनवस्थानेन क्रियाकर्तुरभावात् का क्रिया? उक्तञ्च-

'क्षणिकाः सर्वसंस्काराः अस्थितानां कुतः क्रिया।
भूतिर्येषां क्रिया सैव कारकं सैव चोच्यते, ॥' इति।

अथ वा नायमर्थो युक्तिसाध्यः प्रत्यक्षत्वात्, अन्यदेव हि रूपादि उत्पद्यमानं दृश्यते, वहतीवोदके, मन्दबुद्धेश्च सन्ताने स्रोतसि तदेवेति मिथ्याप्रत्यय उपजायते।

अथ सन्तानवत् सूक्ष्मोत्पादविनाशयोरप्यन्तरे वस्तु दृश्येत, सन्तानमपि वा न दृश्येत सूक्ष्मोत्पादविनाशवत्, अत्रोच्यते न हि दृष्टेऽनुपपन्नं नाम, उक्तं हि बुद्धिमान्यादुदकस्रोतोवदवस्थान-दर्शनमसतः सन्तानस्य, प्रत्यक्षं दृश्यमानत्वादेव वा न चोद्यम्, प्रत्यक्षस्य प्रमाणान्तरेणाबाध्यत्वात्, तथा हि-*'यद्येकस्मिन् क्षणे जातं .....'* इति । तस्मात् स्थितमेतत्क्षणिकं रूपादि बाह्यं वस्त्विति।

एताभ्यामेव महोत्पादभङ्गाभ्यां सन्तानजाभ्यां क्षणिकौ सूक्ष्मोत्पादभङ्गावनुमेयौ, तद्यथा — अन्ते क्षयदर्शनादादौ क्षयो ऽनुमीयते, प्रदीपशिखावत्, तथा घटादिरपि, तथा बुद्धिरपि क्षणिकेति; अयश्च नयः प्रतिक्षणमन्यो भवन्नेव न भवतीत्यभ्युप-गच्छति, अतो नियमोभयं वाञ्छति, भावनिक्षेपविकल्पमनागमतो भावमुपयोगसद्भूतं बाह्यं रूपादि प्रतिपद्यते, उपयोगैवं भूतस्य नयस्यैकदेशत्वात्, पर्यायमूलनयभेदश्चैषः, परि समन्तादयते इति पर्यायाक्षरार्थत्वात्, स एवार्थोऽस्यास्तीति पर्यायार्थिकः, इन्द्रोऽनिन्द्रश्चेन्द्रः, पुरन्दरादित्वस्य त्वनवकाश एव क्षणिकत्वात्, तद्भावस्यैव तद्भूतत्वादिति।

अत्र च प्रतिक्षणातिक्रमित्वाद्वस्तुनो बुद्धिस्थो योऽर्थः स शब्दार्थः, *'यो वाऽर्थो बुद्धिविषयः..... ।..... कैश्चिदिष्यते ॥'* इति, सन्तानवृत्तिश्च क्रमो वाक्यार्थः, वाक्यं वर्णपदादिशब्दानामानुपूर्व्योच्चारणम् । उपनिबन्धनमस्य तद्यथा-'इमाणं भंते!'[1] इत्यादि।

इति एकादशोऽरः नियमोभयभङ्गनयः संपूर्णः ।

१. जीवाभि. ३-१-७८

द्वादशो नियमनियमनयः

अन्ते क्षयाद्यद्येवं ततो वस्तुवत् प्रसिद्ध्युपगमः कृतो भवति, इतरथा विनाशोत्पादयोरप्यभावः, प्रतिसन्धानाभावात्, स्थितस्यैव हि भवनमित्यभ्युपगमस्ते, वस्तुव्यवस्थासिद्ध्युपहितनियमानतिक्रमात् निष्ठितं तर्हि तत्, अन्तवत्त्वात्, घटादिवस्तुवत्, निष्ठितत्वात् कृतकं ततश्चारब्धमपि, एवं ते पूर्वनिर्वृत्तवस्तुनिबन्धनाः, क्रियावत्त्वादन्तवत्, यथाऽन्ते क्रिया — भवनं सा पूर्वनिर्वृत्तवस्तुनिबन्धना तथा प्रारम्भादिक्रियाः।

कुतः क्रिया क्षणिकत्वात्? उक्तं हि-

'क्षणिकाः सर्वसंस्कारा अस्थितानां कुतः क्रिया।
भूतिर्येषां क्रिया सैव कारकं सैव चोच्यते॥'

इति, अत्रोच्यते तिष्ठतु तावत् यदन्यत्, क्षणिकशब्दार्थतत्त्वान्वीक्षणादेव क्षणभङ्गवादभङ्गः शक्यते कर्तुम् क्षणिकशब्दस्य अस्त्यस्तिमत्सम्बन्धवाचिठन्प्रत्ययान्तस्य स्थितार्थाभावेऽभिधेयाभावप्रसङ्गात्, न हि क्षणिकशब्दः क्षणेन स्वेन तद्वता चार्थेन स्वामिना विनाऽर्थवान्, यथा चैत्रेण स्वामिना दण्डेन स्वेन च विना दण्डिक इति शब्दो

नार्थवान् इति तत्समवस्थातृद्रव्यार्थलक्षणार्थो भवितुमर्हति, इतरथा क्षणोऽस्यास्तीति क्षणिक इति न शब्दार्थो घटते।

न, पर्यायविषय एव, तत्स्वामित्वोपपत्तेः द्विविधो हि क्षणः उत्पत्तिक्षणो विनाशक्षणश्च तदनन्तरम्। एवं निरन्तरयोः क्षणयोरुत्पत्तिक्षणानन्तरो विनाशक्षण एव तस्यास्तिपर्यायस्य पर्यायः तस्मात् क्षणिकशब्दः क्षणस्य क्षणान्तरापेक्षत्वादर्थवानिति न दोषः। एवमपि न युक्तोऽपदेशः इतराभावे इतरस्यापि तथाभावात्, यथा दण्डाभावे चैत्रो दण्डिक इति नोच्यते, एवं यदा दण्डो विद्यते चैत्रोऽपि तदाऽस्य तेन तद्वत्ताऽपदेश्यता स्यात्, इह तु यदोत्पत्तिक्षणः न तदा विनाशक्षणः यदा विनाशक्षणो न तदोत्पत्तिक्षण इतीतरकाले इतरस्यात्यन्तमसत्त्वात् प्राच्यापदेशो न युक्तः।

यदपि च 'नाशोत्पादा'वित्यादिनिदर्शनमुक्तं तदप्यर्थान्तरयोर्युगपत् सतोस्तुलान्तयोर्युज्यते न तु विद्यमानाविद्यमानयोः क्षणयोः यौगपद्यम्, घटखपुष्पयोरिव, अथ स्याता कश्चिद्द्वयोरपि क्षणयोः उत्तरः पूर्वो वा, तिष्ठतु नाम, तथापि यद्येकस्मिन् क्षणे जात इत्यादित्वयोक्तो दोष एव, एवं तावद्द्वयोः क्षणयोः सम्बन्धाभावात् क्षणिकशब्दार्थोऽसन् यद्यन्तरालावस्थानव्युदासार्थत्वेऽनन्तरशब्दस्य।

अथाऽऽत्मलाभोऽनन्तरविनाशधर्मसम्बन्धी, अनन्तरश्चासौ विनाशश्चेति समासत्वात् तस्यैव विनाशधर्मसम्बन्धिनः सम्बन्ध्यस्तीति क्षणिकशब्दोऽर्थवान्, न हि रूपादिविनाशक्षणव्यतिरिक्तः उत्पादक्षणः, तेनैव स क्षणिकः, अव्यतिरेकेऽपि सम्बन्धवाचिप्रत्यय-

दर्शनात् यथोत्पादवानङ्कुरः, स चोत्पादादनर्थान्तरमङ्कुरः, उत्पादातिरिक्ताङ्कुरासम्भवात्।

एवन्ते य उत्पादः स एवार्थः, तेनैव स एव क्षणिकः उत्पादातिरिक्तार्थासम्भवादिति अनिष्टं क्षणिकशब्दार्थसमीकरणव्याख्याप्रवृत्तेन त्वया तस्यैव विनाशितत्वात् न च स यस्य क्षणः न च योऽसौ क्षणः येन सम्बन्धात् क्षणोऽस्यास्तीति क्षणिक उच्यते ततोऽन्यः अतः साधनधर्मविकल इत्येतच्च न तुल्यपरिप्रश्नार्थत्वात्, कारणेन कार्यमात्मसात्कृतं कार्येण कारणमिति कतरस्य वचसा विशेषनिर्णयोऽस्त्वावयोः?

ननूक्तवस्तुवादवत् भवच्च कारणं द्रव्यमेव कार्यमात्मसात्करोति, तस्माद्भवता द्रव्येण कारणेनासाद्येते उत्पादविनाशाविति, यद्येवं नेष्यते खपुष्परूपमप्यासाद्येत, तस्योत्पादादर्थान्तरत्वेनाभूतत्वात् यद्यदुत्पादार्थान्तरत्वेनाभूतः तत्तेनासाद्यमानं दृष्टम्, यथाङ्कुर उत्पादेन, अङ्कुरं वोत्पादो नासादयेत्, अर्थान्तरत्वेनाभूतत्वात् खपुष्पवन्ध्यासुतादिवत्।

यत्तूत्तरेण विनाशेन प्राच्यस्यासतः तत्काले तेन वा सम्प्रति असतो न युक्तो व्यपदेश इत्यस्योत्तरं यदुच्यते त्वया न भाविधर्मव्यपदेशादिति भाविनं क्षणं सन्धायोच्यते क्षणोऽस्यास्तीति क्षणिक इति मरणधर्मिवत्, तस्यैव चासौ भावस्य व्ययः प्राच्यस्येति न्याय्य एवापदेशः यदि भावकालान्तरभाविना मरणधर्मेणापि व्ययात्मकेन तस्यैव धर्म इति व्यपदिश्यते भावः किमिति पुनरात्मलाभानन्तरभाविना विनाशेनात्मीयेन प्रथमक्षण एव क्षणिक

इति नोच्यते भाविक्षणसन्धानञ्चानन्तरशब्दलोपं कृत्वा उत्पाद्यते क्षणिक इति।

तस्योत्पन्नस्य व्यापारस्थितिरिक्तताज्ञापनार्थमेवमुच्यते यद्वत् क्षणिक आस्ते, क्षणिकं निकेतनमिति, एतदपि परिकल्पितमेव यन्मरणधर्मिणो द्रव्यार्थस्याक्षणिकस्यात्माख्यस्याभावविलक्षणस्य भावान्तरविलक्षणस्य विपर्ययसाधनाद्विरुद्धो हेतुः, स्थितमेव जायते जातश्च म्रियत इत्येवं लोके दृष्टत्वात्, यथा कृतकत्वानित्यत्वधर्मा स्थित एव घटादिः शब्दानित्यत्वप्रतिज्ञायां दृष्टान्त उच्यते नास्थितो नात्यन्ताभावो नापि ततोऽर्थान्तरभूतो वा कृतकत्वानित्यत्वधर्मा सम्बन्ध्याकाशादिः तथाऽवस्थितपुरुषमरणव्यपदेशो जन्मना तदविनाभावात् घटाद्यनित्यधर्मिव्यपदेशवन्मरणधर्मिव्यपदेशः।

आयुष्कजननमरणयोर्द्वयोरपि आयुःकर्मणि स्थिते आत्मा जायते स एव म्रियते भुक्तायुःकर्मत्वात्, असति च क्रियानुपपत्तेः।

तथा चाभियुक्ताः पठन्ति, *'मृङ् प्राणत्यागे'*[1] इति। व्यवस्थितो जीवो प्राणानुपात्तान् त्यजति, उपादत्ते च तानेव तत्र तद्भूतत्वात् किं सन्धानेन।

यदप्युक्तं तस्यैव भावस्य व्ययत्वात् विनाशेनोत्पादस्य क्षणोऽस्यास्तीति क्षणिक इति व्यपदेशो न्यायादनपेत इति तदपि न किञ्चित्, उत्पद्यमानविनश्यतोरपि तावत् भावयोस्त्वन्मतेऽभूतत्वात् सम्बन्धाभावः, किमङ्ग! पुनस्तत्प्रभावलभ्ययोरुत्पादविनाशयोः

१. धातुपाठः १४२८

सम्बन्धकथा? तयोरसत्त्वभूतत्वादवस्तुत्वाच्च, असम्भाव्यप्रवृत्त्योः, अपि चात्रापि तस्यैव भावस्य व्यय इति षष्ठ्यर्थानुपपत्तिरपि, असम्बन्धात्, सम्बन्धाभावश्चासहभावात्।

नन्वसहभवनेऽपि षष्ठी विकारविषया, प्रकृत्युपमर्दश्च विकारः, तद्यथा — धानानां सक्तवः, तण्डुलानामोदन इति, न ह्यत्र प्रकृति-र्विकृत्यवस्थायामस्ति। अथ च प्रकृतौ षष्ठी श्रूयते धानानां तण्डुलानां इति एतदपि न, द्रव्यपर्यायसहवृत्तेः, धानातण्डुलादिप्रकृतेरेव सक्त्वो-दनत्वादिविकारपरिणामात्तथातथाऽवस्थानात्, विनाशो घटस्य इव। तस्मात् स्वजात्यपरित्यागवृत्तेराविर्भावतिरोभावौ सर्वभावानामतः सहभाविनोरेव सम्बन्धादुपपद्यतेऽत्रापि षष्ठी भावस्य व्यय इति भावो विधीयते भवन्नेव वर्त्तते वोदेति वेत्युक्तं भवति। अतोऽन्यथा ह्यद्रव्ययोरुत्पादविनाशयोर्वस्त्ववक्तव्यमिति भाव एव स नेति कुतोऽस्योत्पादो विनाशो वा?

भवन्ती हि मृत् भवति उत्पद्यते तद्यथा शिवकस्य स्तूपकीभावः सैव च मृत् भवन्ती व्येति, स्तूपकत्वेनोत्पद्यमाना शिवकत्वाद्व्येति, भवनाद्धि भावः, भावस्य व्यय इत्यत्र भाव-शब्दोऽप्येवं घटते नान्यथा, एवन्तु त्वयोक्तो भावः स भाव एव न, पूर्वमभावात् पश्चादभावात् पूर्वं पश्चाच्चाभावात् वन्ध्यापुत्रवत्।

स्यात् प्रत्याशा वर्त्तमानक्षणे भावो भवितुमर्हतीति सापि न कार्या, त्वदुद्ग्राह एव, प्राक् पश्चात् मध्ये चाभावात्, त्वद्वचनादेव भावस्येति षष्ठी यदि कर्त्तृलक्षणा, स एव भावः- उत्पादः व्येति-विनश्यति न भवति इत्युक्तं भवति। यदि कर्मलक्षणा,

विनाशोऽकर्तृकः केनोत्पादो निवर्त्येतेत्ययुक्त एव भावः। तस्मात्स एव न भवतीति मध्येऽप्यभावः।

अपि च तण्डुलानामोदन इत्यत्रोदनस्य स्वकालसमवस्थायि-द्रव्यवृत्तविकारान्तरगतेः सम्भवेदियं गतिः, त्वन्मते तु तद्वैधर्म्यात् तदासावसन्निहित एव भावः कथं व्येतीत्युच्यते? यदि यदा सन्निहितस्तदैव व्येति नैव तर्ह्युत्पद्यते, अथोत्पद्यते न तर्हि व्येति, उत्पादव्ययययोर्विप्रतिषेधात् कुत एव तत्?

एवञ्चोत्तरोऽप्यस्य विनाशक्षणो नैव भवति, यतः तदपेक्षः क्षणोऽस्यास्तीति क्षणिक उच्यते, अनुत्पन्नत्वात् खपुष्पवत्, आकाशवद्वा, द्वयाभावे तु यदि सदेव चेद्वस्त्विष्यते तत आर्हत-मताभिमतस्थितद्रव्यार्थसद्भावे क्षणे क्षणे पर्यायनयसद्भावे चोत्पाद-विनाशाभ्युपगमात् क्षणिकशब्दार्थवत्तोपपद्यते नान्यथेति। एवमेव च *'जातिरेव हीति'* श्लोक इत्थं पठितव्यः, तद्यथा — *'जातिरेव हि भावानामनाशे हेतुरिष्यते'* इति। यस्मात् स्थित एवार्थ उत्पद्यते नास्थितः तस्मादुत्पत्तिरेवावस्थाने कारणं जातमवस्थितञ्चेत्यतो न ध्वस्तमिति।

स्थितश्च जायते च न च ध्वंसते घटः द्रव्यार्थात्मा, न तावद-स्थितः, अनुत्पादविनाशात्मकत्वात्, यदुत्पादात्मकं विनाशात्मकञ्च न भवति तन्नास्थितमेव, असंस्कृतत्रयवत्, तद्धि बोध्यत्वाद्रूपादिवत् सत्, सच्च नास्थितञ्च, उत्पादविनाशमात्रात्मकतायान्तु निर्बीजायां तयोरभावः, तस्यैव चासौ भाव इत्येतदपि न किञ्चित्, स्थितमेवोत्पद्यते विनश्यति चेत्यादि भावितवदिति। योऽपि श्लोकः

'क्षणिकाः सर्वसंस्काराः' इत्यादिः सोऽप्येवं पठितव्यः तद्यथा — *'सर्वेऽप्यक्षणिका भावाः क्षणिकानां कुतः क्रिया?'*। तद्व्याख्या — भावाः वस्तूनि इति पर्यायाः। ते सर्वेऽप्य क्षणिकाः स्थित्या क्रियया चोत्पत्तिविनाशात्मिकया सततभवनक्रियात्मका एव, अतस्ताभ्याम-क्षणिका इति।

त्वन्मतवद्यदि क्षणिकाः स्युस्तत एषामुत्पादविनाशौ नैव स्याताम्, व्यापारस्थितिरिक्तत्वात् खपुष्पवत्, यद्यक्षणिकाः तत उत्पादविनाशासम्भवात्तदतिरिक्तत्वं, उत्पादविनाशातिरिक्तत्वात्ते न स्थिता एव, खपुष्पवदस्थितानां कुतः क्रियेत्युक्तम्, सा हि युज्यते संवृत्त्यैवेति चेन्न भूतिर्येषां क्रिया सैव भवतीत्यभ्युपगतैव प्राक् व्यापारारिक्तता द्रव्यार्थवस्तुनः, भूतेरेव।

अभ्युपगतमपि चैतत् भूतिर्येषां भावानां स एव व्यापार इति, उत्पादविनाशावाविर्भावतिरोभावावस्थितस्यैवेति, अत एव कारकं सैव भूतिः, भव्यभवनद्रव्यार्थत्वात्, एवञ्च तदप्यकस्मात् दुःखं यत् पठ्यते *'नंष्टा चेन्नाशविघ्नः कः.....।.....॥'* इति।

स्थितस्यैवोन्मर्दनमुत्पादो विशेषेणादर्शनं विनाशः, को नंष्टा अत्यन्तादृश्यात्मना? को नाशः प्रध्वंसाभावात्मको यस्य विघ्नश्चिन्त्यते? को विनङ्क्ष्यति? विनाश एव नास्ति कुतोऽस्य हेतुर्यत उच्यते *'साध्यं विनाशहेतुत्वमि'*ति? अपि च वयमित्थं पठामः, तद्यथा *'भवितुर्भावविघ्नः को न चेन्नैव तथा भवेत्'* इति प्रतिपक्षसंस्पर्शविनिर्मुक्तो भाव एव भाव इति निर्धार्यः, यथा हि भाव उत्पन्नः स भविता, भूतोऽस्ति चेत् पुनरस्य तथाभवने को

विघ्नः? यदि हि भावो भूतः कोऽस्योत्तरकालमपि भवने विघ्नः? सदा हि तेन भवता भावेन भवितव्यम्, न न भवितव्यं कदाचित्, *'न चेन्नैव तथा भवेत्'* अथ पुनरेवं नेष्यते अतोऽसावभवनधर्मा ततश्चाधुनापि नैव भवेत्।

अस्ति भवने विघ्नः स्वयं विनाशो वा कः कस्य विनाशहेतुर्वेति निदर्श्यौ, *वैशेषिको* ब्रूयात् घटादीनामश्माद्यभिघातो विनाशहेतुः, अग्निसंयोगः पार्थिवानां रूपादीनामपाञ्च तत्सान्निध्ये विनाशोऽसान्निध्येऽवस्थानमिति, *बौद्धोऽपि 'जुहुक्खित्तं मिलेऽम्मि'* इति तन्न *'साध्ये विनाशतत्त्वे स्तः'* अन्यतरासिद्धे कथं निर्धार्यमयं हेतुरेवेति, अस्ति विशेषहेतुस्तस्मिन् सति पश्चादग्रहणादिति।

इदमसंज्ञापकं स्वयं विनाशेऽपि हि भावेऽकृतके क्रमनियमप्राप्तवृत्तौ प्राग्दृष्टो घटभावः कपालत्वेनाविर्भवंस्तिरोभवंश्च घटत्वेन न गृह्यते कपालत्वेन गृह्यते, अतः सिद्ध्यत्येवास्मन्मतेन घटपार्थिवरूपाद्युदकानां तिरोभूतौ तेन रूपेणानुपलब्धिः, कथं कृत्वा? यथासङ्केतनिर्देशा हि मृद्रूपादयः, उभयेऽपि शिवकाख्यां लभन्ते, स्वेन रूपेणाविनष्टाः तत्तत्स्वभावभूतेरेव पिण्डत्वेन लीनाः, कर्तृप्रत्ययवशाच्चोत्पन्नाः स्तूपकत्वेन स्तूपक इत्युच्यन्ते, अभिघातादिप्रत्ययवशाद्वा कपालानीति, सर्वज्ञो हि तथा तथा पश्यति, अतस्तस्य शिवकादेरग्रहणं न स्वयमभावाद्विनाशाद्वा।

पार्थिवा अपि रूपादयः स्वपरापेक्षस्वभावेन भवन्तोऽग्निसम्बन्धसामर्थ्येन पूर्वरूपतिरोभावे पुनरन्यथोत्पन्नाः, तथाऽपामप्यर्थान्तरापेक्षानपेक्षस्थितार्थभवनव्याप्तेरल्पतराविर्भूतिरग्निसम्बन्ध-

सामर्थ्यात्, अन्त्यानामपामतिसूक्ष्मत्वान्न स्फुटं ग्रहीतुं शक्यते ऽनुमीयते तु तिरोभूता *इत्यार्हतद्रव्यार्थवादं* पर्यायार्थाकाङ्क्षं *क्षणिकवादः* समर्थयति।

मा चाधृतिं कार्षीः ममैवार्हतत्वमापतितमनिच्छतोऽपीति, किं तर्हि? विध्यादिभङ्गान्तःपातिनः सर्वेऽन्येऽपि वस्तुवाद्युद्ग्राहाः त्वदुद्ग्राहतुल्याः, तच्च तद्व्यसनदर्शनादात्माश्वासकरमिति धृतिं भावय। येप्याहुः *'राशिवदिति'*, एष श्लोकः स्याद्वाद एव नैकान्तार्थत्वात् *'शक्त्यन्तरत्वतादात्म्यान्यानन्यत्वप्रकल्पना। ..... ॥'* इति शक्त्यन्तरं नरादिषु प्रत्येकमसत् सेनायां समुदितनरादिचतुरङ्गायां दृष्टं तदात्मना सेना तु प्रत्येकमिति तयोः समुदायिसमुदाययोरेकत्वनानात्वे वादिनाऽङ्गीकृते द्रव्यार्थपर्यायार्थानुपातः कृतो भवति, नरादिसामान्यतादात्म्येऽपि च सेनाऽन्यापि, तत्समुदायमात्रत्वात् तदात्मत्वात् भवनसामान्यस्य रूपरसार्थान्तरत्ववत्, तस्मादेव प्रागेष न्यायस्तद्यथा *'नृरथाश्व.....।.....॥'* इति।

तथा शिखरादिभ्यः प्रत्येकमसत्त्वात्तेष्वेव सत्त्वादन्योऽनन्यश्च शिखरी, तथा मरिचादिभ्यः पानकस्यान्यानन्यते वातादिरोगकोपोपशमादिसत्त्वासत्त्वाभ्यां पृथक् समुदाये च, तथाऽऽत्मापि सुखादिसहक्रमभाविपर्यायात्मकत्वादनन्यः, अन्यस्तु प्रत्येकं तेषां विरोध्यविरोधिभेदात्, पानकद्रव्यमात्रं स्वतत्त्वमपि, तद्वृत्तिसिद्धत्वात्, मधुररसवत्, न हि तद्वृत्तिसिद्धो रसः रूपादिसहभाविधर्मान्तरसङ्गतिमन्तरेणोपलभ्यतेऽतः स्वतत्त्वः परतत्त्वश्च।

तथैव पुरुषद्रव्यं स्कन्धमात्रे न समानीयते यतः स्कन्धा अपि रूपम् वेदना विज्ञानं संज्ञा संस्कार इति, रूपमपि विषयेन्द्रियविज्ञप्त्याख्यमरूपमपि विज्ञानात्मत्वात्, एवं पञ्चापि, आत्मापि विज्ञानात्मकः ते एव रूपादयः स्कन्धा इत्यनात्मा च, तस्मात् सिद्धार्थीयस्थित्यनतिक्रमात् उद्ग्राहितवस्तूनामयुक्तं पठितमेकान्तेन राशिवदित्यादि। तत्त एवाप्राज्ञाः स्कन्धव्यतिरिक्ता। व्यतिरिक्तात्मानमात्मानं स्कन्धा एवेत्याहुः। अप्राज्ञानां तेषामेव च भेदवादो यथा रूपादिसमुदायमात्रं तत्त्वमिति समुदायो रूपादि-विशेषाणां सामान्यमभ्युपगतं, तथेहापि पञ्चस्कन्धसमुदायः सामान्यमेवेति निराकार्यः *सैद्धार्थीयैः* तदुभयमिच्छद्भिरात्म-ग्राहोऽस्त्विति।

औदासीन्याच्च तत्त्वेषु मिथ्याभिनिवेशात्त्वदुद्ग्राह्यप्रापिते ज्ञान-सुखाद्यन्यात्मकमात्मानं पश्यसि तस्मात् तादात्म्यशक्त्यन्तरोद्ग्राह्यपुर -स्कृतसामान्यविशेषात्मकत्वानतिक्रमात् *सैद्धार्थीयत्वा*पत्तिः वस्तुवादित्वात्, एवं शेषवादेष्वपि *स्याद्वाद* एवापद्यते बलात् तत्र तत्र तथैव योजितमित्यलं प्रसङ्गिन्याः सङ्कथायाः।

एवन्तु गृह्यतां निःस्वभावमिदं सर्वम्, सुप्तोन्मत्तादिवत्, सुप्तमत्तस्थानीया एव हि रक्तद्विष्टमूढाः पाषण्डिनः तदतदाकार-प्रकल्पनानुपातिविज्ञानत्वात् तदतत्स्वाभाव्येन विज्ञानकल्पिताकार-सुप्तमत्तादिविज्ञानविषयवत्, किमपि किमपीत्या भासात् परमार्थतो नास्ति कश्चिदाकारः शून्यं तैः स्वैराकारैरिदं गृह्यमाणमपि बुद्ध्या

ग्राहकाकारपरिप्लवाद्ग्राह्याकारभ्रान्तेः शून्यगृहवत् प्रवेष्टृस्थातृनिर्गन्तृ-कल्पोत्पादादिरहितं कल्पयितुं न्याय्यम्।

स च स्वभावश्चिन्त्यमानो न स्वतः नापि परतो न द्वाभ्याम्, नाप्यहेतुतः, अथ कथं स्वपरोभयाभावः? ब्रूमः, असिद्धयायुक्त्य-नुत्पादसामग्रीदर्शनादर्शनेभ्यः, असिद्धेस्तावत् दीर्घह्रस्वयोर्मध्यमा-नामिकाङ्गुल्योः दीर्घाया दीर्घस्वभावो न तावद्दीर्घे स्वात्मन्यस्ति परायत्तत्वात्तस्यास्तस्य तद्धि अनामिकाह्रस्वत्वायत्तं यत् स्वात्मन्यसिद्धं तत् कथं परतः सिद्धयेत्?

यदि हि स्वविषयमेवैतत् स्यात्, अनामिकाह्रस्वत्वं न स्यात्, अपरापेक्षत्वात् साऽपि दीर्घैव स्यात्, मध्यमावत्, न तु भवति तस्या ह्रस्वत्वेष्टेः, अथाह्रस्वैवेष्यते ततश्च मध्यमादीर्घत्वाभावः, तामेवापेक्ष्य दीर्घेति व्यपदेशात्, तस्माच्च दीर्घत्वप्रतिपक्षस्यानामिका-ह्रस्वत्वस्याभावः, तयोः परस्परायत्तत्वात्, कदा मध्यमा दीर्घा सेत्स्यति? यदाऽनामिकाह्रस्वा भवेत् अनामिका ह्रस्वा च मध्यमादीर्घत्वसिद्धौ सेत्स्यति इति इतरेतराश्रयत्वादसिद्धिः।

न ह्रस्वेऽपि दीर्घत्वं तत्प्रतिद्वन्द्वित्वात्तयोस्तमः प्रकाशवत् जीवितमरणवच्चैकत्र कुतो भावः? तस्य वाऽदीर्घत्वेऽभावात्मकत्वात् कुतो दीर्घत्वमागतमन्यत्? ह्रस्वत्वाभावाच्च नास्ति दीर्घत्वम्, दीर्घत्वस्य ह्रस्वे वृत्ते तदवष्टब्धे ह्रस्वत्वस्यानवकाशात्, तथापि पुनः ह्रस्वप्रतियोगिनो दीर्घत्वस्याभावान्न सिद्धयति दीर्घत्वम्, स्वात्मनि परत्र वा वृत्त्यसम्भवात्।

न द्वये, उक्तन्यायात्, प्रतिद्वन्द्वित्वाद्वा, उभयत्र दीर्घत्ववृत्तिरेषा च किं ह्रस्वे वर्त्तमाने दीर्घत्वे दीर्घं भवति? उत दीर्घे एव वर्त्तमाने, यदि ह्रस्वे वर्त्तमानं दीर्घत्वमुभयत्र भावं लभते ततो ह्रस्वे वर्त्तमानं दीर्घत्वं दीर्घस्य दीर्घतां दीर्घ इति बुद्धिश्च कथं कुर्यात्? ततोऽन्यत्र वृत्तत्वात्, ह्रस्वादीर्घत्वप्रत्ययवत्।

अथ दीर्घ एव दीर्घत्ववृत्तिरिष्यते ततो दीर्घे एव वर्त्तमानं दीर्घत्वं करोति तत्प्रत्ययश्चाधत्ते इति ह्रस्वेन दीर्घेतरेणेतरेतरयोगार्थं कल्पितेन नार्थः न च तत्प्रत्ययेन, स्वाधारबलादेव तत्सिद्धेः, अथ तथापि तत्र दीर्घे दीर्घतां न करोति न तत्प्रत्ययश्चादधातीति मन्यसे ततो ह्रस्वे कथं दीर्घत्वं तद्बुद्धिश्च कुर्यात्, ततोऽन्यत्र वृत्तत्वात्, ह्रस्वादीर्घत्व-प्रत्ययवत्, अथोच्येत ह्रस्वे दीर्घतां नैव करोति दीर्घप्रत्ययमपि नादधातीति, एतदपि नोपपद्यते ह्रस्वदीर्घयोः परस्परापेक्षसिद्धेर्लोके दृष्टत्वात्, तद्यथा — सिद्धार्थकेत्यादि मेरुपर्यन्तानामितरेतरापेक्ष-ह्रस्वदीर्घाणां दृष्टानां ह्रस्वे वृत्तस्य दीर्घत्वस्य दीर्घाकरणदीर्घप्रत्ययाना-धानाभ्युपगमेऽत्यन्तदीर्घाभाव एव प्रसक्तः, नैव दीर्घं भवेत् दीर्घाकरणात्, ह्रस्वत्ववत्, तत्प्रत्ययोऽपि न भवेत्, दीर्घप्रत्ययाना-धानात्, ह्रस्वप्रत्ययवदिति, एवं ह्रस्वत्वेऽपि।

उभयोभयपक्षोऽपि प्रत्येकमभिहितैर्दोषैर्न विमुच्यते, प्रत्येकम-सिद्धयोरपेक्षायामप्यसिद्धेः, विप्रतिषेधाच्च, एवं तावन्न स्वतो न परतो नोभयतश्च ह्रस्वदीर्घे सिद्ध्यतः, यद्यहेतुतः, खपुष्पमपि स्यादिति।

एवं घटादीनामपि स्वरूपसिद्धिरेव नास्ति, न घटे घटत्वम्, परायत्तत्वाद् घटत्वस्येत्यादिदीर्घत्वप्रतिषेधन्याय एवात्रापि, यदि हि स्वविषयमेवैतत् स्यात् घटो न घटोऽपि स्यात्, भवत्वितरेतरः तस्य चाघटत्वे एवमन्येऽपि घटा इति तस्याभावः, तस्याभावेऽघटाभावः घटापेक्षत्वाद घटत्वस्य, सोऽप्येवमघटो न भवति, एतद्घटायत्तत्वाद-घटत्वस्य, तयोः परस्परायत्तवृत्तित्वात् कदा घटः सेत्स्यति प्रत्येक-व्यक्त्यात्मा? यदाऽसावघटो भवेत्, अघटश्च घटसिद्धौ सेत्स्यतीति इतरेतराश्रयत्वादसिद्धिः।

अथाघटेऽपि न घटत्वम्, प्रत्यक्षत एवाघटे घटत्वस्याभावात् प्रतिद्वन्द्वित्वाच्चाघटे कथं घटत्वं स्यात्, ह्रस्वदीर्घत्ववत्, अघटस्य च घटत्वे घट एव सः प्राप्तः तस्मात् को घटो नामाघटादन्य इति घटाभावः, घटत्वाभावात्मकत्वादघटत्वस्य, अघटाभावाच्च नास्ति घटत्वम्, घटत्वास्याघटे वृत्ते घटत्वावष्टब्धेऽघटत्वानवकाशात्, अघटाभावे क घटत्वं वर्त्तेत? तथापि पुनर्न सिद्ध्यति घटत्वं स्वात्मनि परत्र वा वृत्त्यसम्भवात्।

न द्वये, उक्तन्यायात् द्वयोरन्यतरत्राप्यसिद्धस्य कुत उभयत्र सिद्धिः स्वपरयोः प्रतिद्वन्द्वित्वाद्वा तयोः सहवृत्तिरयुक्ता, अयमपि च न्यायश्चिन्त्यः किमघटे घटत्वं वर्त्तमानमुभयत्र भावं लभते? उत घट एव वर्त्तमानमिति, यद्यघटे विद्यमानमुभयत्र भावं लभते ततोऽघटे वर्त्तमानं घटत्वं घटस्य घटत्वं कथं कुर्यात्, तद्बुद्धिञ्चादध्यात्? ततोऽन्यत्र वृत्तत्त्वात् ह्रस्वादीर्घप्रत्ययवत्, अथ घट एव घटत्ववृत्तिरिष्यते ततो घट एव वर्त्तमानं घटत्वं घटतां करोति

तत्प्रत्ययश्चाधत्ते तत्रेतीष्यते किन्तु अघटेन घटेतरेणेतरेतरयोगार्थं कल्पितेन नार्थः न च तत्प्रत्ययेन, स्वाधारबलादेव तत्सिद्धेः । अथ तथापि तत्र घटतां न करोति न एतत्प्रत्ययश्चादधातीति मन्यसे ततः कथं त्वयोच्यते मन्यते च घट इति ततोऽन्यत्र वृत्तत्वात् ह्रस्वादीर्घत्वप्रत्ययवत् । अथोच्येताघटे घटतां नैव करोति तत्प्रत्ययमपि नादधातीति, तदपि न, घटाघटयोः परस्परापेक्षसिद्धेर्लोके दृष्टत्वात् तद्यथा — सिद्धार्थकेत्यादिमेरुपर्यन्ताना मितरेतरापेक्षघटाघटानां दृष्टानामघटे वृत्तस्य घटत्वस्य घटाकरणघटप्रत्ययानाधानाभ्युपगमेऽत्यन्तघटाभाव एव प्रसक्तः, नैव घटो भवेत् घटाकरणात्, ह्रस्वत्ववत्, तत्प्रत्ययोऽपि न भवेत्, घटप्रत्ययानाधानात्, ह्रस्वप्रत्ययवदिति। एवं न घटत्वेऽपि, नाघटेऽघटत्वमित्यादि यावद्घटत्ववदनुसर्त्तव्यम् ।

उभयोभयपक्षस्तु प्रत्येकमभिहितैर्दोषैर्न विमुच्यते, प्रत्येकमसिद्धयोरपेक्षायामप्यसिद्धेः, विप्रतिषेधाच्च, एवं तावन्न स्वतो न परतो नोभयतश्च घटाघटौ सिद्धयतः, सिद्धयत्यहेतुतश्चेत् खपुष्पाद्यपि स्यात्, एवं सर्वार्थेष्वपीत्यसिद्धिरेवेति।

अथान्तरेणापीतरेतरयोगं स्वत एव सिद्धयति घट इति चेदत्र ब्रूमः, यद्यस्ति घटस्ततस्तस्य सत्त्वैकत्वघटत्वानामेकत्वान्यत्वयोः का युक्तिरिति विचारे तेषामेकत्वञ्चेदिष्यते ततो यत्रैकत्वं तत्रास्तित्वमपि निष्कलं स्वेनैव तत्त्वेन भवितुमर्हति, अनर्थान्तरत्वात्, यत्र यस्यानर्थान्तरत्वं तत्र तस्य निष्कलमेव स्वतत्त्वं भवति, घट इव घटस्वतत्त्वस्य, ततश्चास्तित्वस्वतत्त्वं च सर्वभावा इति सर्वभावानां घटत्वप्रसङ्गः ।

यत्रास्तित्वमिति पूर्ववत्साधनं कृत्वा एकत्वस्वतत्त्वञ्च सर्वत्रैवैकैकस्मिन्, सर्वस्य प्रत्येकमस्त्येकत्वादिति साधनद्वयेऽप्यस्तित्वैकत्वाभ्यामनन्ये सर्वभावाः पटादय इत्यनन्यत्वापादनं तुल्यम्, पूर्वत्र घटः सर्वं तदेकत्वं सतः घटाद्व्यतिरिक्तम्, परस्मिंस्तु घट एव सर्वं तदेकत्वं सर्वभावा इति विशेषोऽस्मात्तस्य।

तथा यत्र घटत्वं तत्रास्तित्वैकत्वयोरपि निष्कलेनैव स्वतत्त्वेन भवितव्यम्, अनर्थान्तरत्वात् यत्र यस्यानर्थान्तरत्वं तत्र तस्य निष्कलमेव स्वतत्त्वं भवति, यथा घट इव घटस्वतत्त्वस्येत्यत एकैको घटादिरवादिः सर्वो भेदेन सर्वात्मकः, तथा च प्रत्यक्षादिविरोधाः व्यक्ताव्यक्तात्मकभावानां द्रव्यगुणकर्मणामुत्पादस्थितिभङ्गानां साधनदूषणतद्भेदानाञ्चापाद्याः।

एते चेन्नेष्यन्ते घटो नास्तीति प्रतिपत्तव्यम्, तथा च सर्वे भावाः, यत्र घटस्यावृत्तिस्तत्र सर्वभावानामवृत्तिरेव, अस्तित्वैकत्वयोः घटानर्थान्तरत्वात्, अथाप्यर्थान्तरं ततो घटस्य सामान्यविशेषौ न स्त इति निःसामान्यत्वान्निर्विशेषत्वाच्चासत्त्वमेव स्यात्।

अथ भावाः परस्परविपरीतस्वभावा एव सत्यप्यस्तित्वैकत्वाभेदे, भेदार्थं प्रधानादिप्रवृत्तेः, तस्मान्न सर्वात्मदोषः, अत्र ब्रूमः घटः पटादस्त्यात्मकादेकात्मकादनन्यात्मकाच्च विपरीतः संवृत्तः ततश्च घटो घटात्मस्वरूपादपि विपरीतः प्राप्नोति, अस्तित्वैकत्वाभ्यां विपरीतत्वात्, घटविपरीतपटात्मवदिति पुनरपि नास्ति घटः, एवं सर्वभावा अपि, सर्वगतत्वाद्व्याप्तेः।

नन्वस्तित्वैकयोर्विपरीतता कस्मात् सर्वगतत्वाद्व्याप्तेः, ततो व्यावृत्तिः कल्प्यते घटादयः परस्परविपरीता इति, अत्र ब्रूमः, एवं तावदेकत्वे कुत इदं? यत्ते सर्वगते न घटत्वम्, घटत्वमेवासर्वगतं न ते इति, नन्वेवं सर्वेषामप्येकरूपेण भवितव्यम्, अनन्यत्वात्, प्रतिवस्तुतत्त्ववदिति नास्ति सर्वगतत्वासर्वगतत्वविशेषः, अथ एतन्नेष्यते घटबहुत्वं तर्हि प्राप्तम्, यस्मादस्त्यपि घटो भेदेन, एकोऽपि, घटोऽपीति त्रयो घटाः स्युः, अथ घट एवैको घट इष्यते, न त्वस्तित्वैकत्वे सिद्धस्तर्हि नास्ति घट इति, अस्तित्वार्थान्तरत्वात् खपुष्पवत्, नैक इति च, एकत्वास्तित्वत्यागाच्च रूपादिषु घटैकदेशेष्वपि न घट इति प्राप्तम्, एकत्वत्यागात्, एकैकत्वाच्च रूपादीनां रूपादिष्वभावे घटस्य रूपादयो घटः संवृतिसन्निति निवर्त्तते, क्षणिक इति च न क्षणिकमात्रम्, अस्तित्वत्यागात् ततश्चानस्तित्वो घट इति प्राप्तम्, तच्च विज्ञानमात्रमिदं सर्वं इति वक्ष्यमाणपक्षोऽभ्युपगतो भवति।

अथोच्येत बह्वेवास्ति प्रत्येकवृत्तेरस्तित्वस्य, बह्वेव नास्ति परस्परव्यावृत्तस्वरूपत्वात्, तच्च क्वचिदर्थे न सर्वत्र, पटात् विशेषणार्थमस्ति घट इत्युच्यते, एकमपि व्यादिविशेषणार्थमुच्यते तत्रात्येको घट इति, सर्वैकत्वप्रसङ्गो घटबहुत्वप्रसङ्गश्च कुत आयातौ? इति, एतन्न, सर्वसमयाप्रसिद्धेः, अस्तितत्त्वं न कस्यचित् समयसिद्धं बह्विति, अस्तित्वस्य रूपान्ताराभावात्।

यदि स्याद्रूपान्तरं ततो नानारूपमेव स्यात् किञ्चिदस्ति किञ्चिन्नास्ति किञ्चिदस्ति नास्ति चेति, अनिष्टश्चैतत्, तस्मादभेद

एवास्तित्वस्य, तस्मिंश्च तदभेदे तु सर्वेषामैक्यम्, भेदे वा घटबहुत्वमिति तदवस्थौ प्रसङ्गौ, तथापि च नास्तित्वमेव, अस्तित्वैकत्वशून्यत्वात् खपुष्पवत् । इतरेतरासत्त्वाभ्युपगमाच्च कुतोऽस्तित्वं तेषामिति।

अथोच्येत भिन्नास्तित्व एव घटः, आत्मलाभे भिन्नप्रकारत्वात्, पटकटधीवत्, कटो हि नास्ति पटः पटश्च नास्ति कट इति कटपटधियौ भिन्नास्तित्वे दृष्टे तथा घटोऽपि भिन्नप्रकारात्मलाभत्वात् पटादिभ्यो भिन्नास्तित्वः एतदपि न, उक्तसत्त्वतुल्यत्वात्, अस्य वा हेतोरभिन्नप्रकारत्वादिति प्रयोगेऽपि, येन प्रकारेणैकस्यात्मलाभस्तेन प्रकारेण सर्वभावानामप्यात्मलाभः, अस्तित्वेन भवनाविशेषात्, नानारूप्येऽस्तित्वं नास्तित्वमस्ति-नास्तित्वं वा स्यादित्युक्तम्। तस्मादभिन्नास्तित्वोऽसौ नञ्सहित एव हेतुः, घटवदिति दृष्टान्तः, तथैकत्वमपि।

यदि तु ताभ्यामप्यन्यस्ततो घटस्य शून्यत्वम्, अस्तित्वैकत्व-शून्यत्वात् खपुष्पवदिति प्रागुक्तो दोषः, अनन्यत्वे तु सर्वमेव घटः, अस्तित्वैकत्वानर्थान्तरत्वात् घटस्वतत्त्वानर्थान्तरघटवदिति, अथैवं नेष्यतेऽनर्थान्तरत्वञ्च न त्यज्यते ततो घटोऽपि घटो मा भूद्भवन-विशेषहेत्वभावात्, एवमनभ्युपगमे वा तुल्ययोरस्तित्वैकत्वयोः सतो र्घटो घट एव नियतरूपो न तु पटो घट इष्टः, अस्तित्वैकत्वा-विशेषात्, एवमघट एव घटः स्यात्, तस्मादेव हेतोः, नन्वयमेव विपर्ययः — रूपं लोके रूपमेव न रस इति सिद्धमपि रूपं न स्याद्रसो ऽपि रसो मा भूद्रूपं स्यात्, बहुत्वप्रसङ्गो वोक्तवत्, तस्मान्न सन्ति घटादयः।

नन्वेवमसत्त्वे प्रत्यक्षसिद्धं तृप्तिसुखादि विरुध्यते, ननु तत्सर्वसिद्धान्तसिद्धमित्ययुक्तेर्घटादीनां शून्यता।

तथाऽनुत्पादादपि, आद्यन्तयोर्जाताजातयोरनुत्पादादसत्, तत्र हि तौ विद्येयातां न वा? यदि नाम न ततोऽसत्त्वे तयोः सर्वभावानामनाद्यन्तत्वान्नित्यस्थितिरेव स्यात् सा च प्रत्यक्षादिविरुद्धा उत्पत्तिविनाशदर्शनात्, स्थितवस्तुविपरीतत्वादवस्तु प्राप्नोति, अनुत्पन्नमेव सर्वं वस्त्वित्यभ्युपगमे सर्वसिद्धान्तव्याघातश्च।

अथोच्येत *साङ्ख्यानामेव* तावत् सत्कार्यवादित्वादव्याघात इति, नाव्याघातः, कथमसत्कार्यानभ्युपगमात्? प्रधानादीनां नित्यनिष्ठितत्वाभ्युपगमात्, अतस्तान्यारब्धान्येव, निष्ठितत्वात्, घटवत्, आरब्धत्वात् कृतकानि कृतकत्वात् पर्यवसानवन्त्यपि, यत्त्वेवं न भवति तत् खपुष्पवदसत् स्यात्, अथ त्वेवमपि नैवाभ्युपगम्यत आरम्भादि तर्ह्यनिर्वृत्तमनिष्ठितमसत् स्यात्, आकाशवत्।

नन्वाकाशं शुद्धपदवाच्यत्वान्निर्वृत्तं निष्ठितं सदेव प्रमाणज्ञानवदित्यत्रोच्यते कुतोऽस्य शुद्धपदता? आङीषदर्थ उपसर्गः काशृ दीप्ताविति धातुः आकाशत इत्याकाशम्, *'कुगतिप्रादयः'*[1] इति समासत्वात् मृगतृष्णिकावदाभासत इत्याकशमिति विज्ञानस्यैव तथातथोत्पादः। यदि च खादिशुद्धपदार्थप्रतिपत्तिं कुर्मस्ततो विज्ञानमात्रमेवेदं सर्वमिति नाभ्युपगच्छेम, अस्माकं हि वियद्गगनखाम्बरव्योममायाशून्यघटपटादिशब्दानामपि विज्ञानमात्रार्थतेति, अनेन सर्वे शब्दा विज्ञानाधाननिमित्तमात्रत्वादसदर्था एव।

१. पाणिनि २-२-१८

अथ मा भूद्विज्ञानमात्रताप्रसङ्ग इत्यन्यथाऽऽदिः प्रधानादिरिष्यते पूर्वप्रत्युपसंहारसमाहितत्वादिति स सोपसंहारः किं नित्यः? उतानित्यः? अथादिनित्यतायां दोषान्नित्यनिष्ठितमिष्यते ततः पूर्वोक्त एव दोषो यावद्विज्ञानमात्रार्थता, अन्तनित्यतायान्त्व-सत्त्वमेव।

अथानित्यत्वे स किं जातः? किमजातो वा? यदि जातोऽनुत्पादस्तर्हि, जातत्वात् निर्वृत्तघटवदनुत्पन्नत्वादसन्, यद्य-जातस्ततोऽप्यनुत्पादः, अजातत्वात्, अनिर्वृत्तघटवत् जाता-जातश्चेद्विरोधादुभयपक्षदोषसम्बन्धाच्च, निष्ठायामपि किं निष्ठितोऽ निष्ठतो वा? यदि निष्ठितः, अनुत्पादस्तर्हि निष्ठितत्वात्, निष्ठित-घटवत्, यद्यनिष्ठितस्तथाप्यनुत्पाद एवानिष्ठितत्वात्, अनिर्वृत्त-घटवत्, अनिष्ठितश्चासन्, असत्त्वादकर्त्ता, अकर्तृत्वाच्च खपुष्पवन्न निष्ठति, नोभयमुक्तवत्, अन्तेऽपि किं विनष्टो विनश्यति, किं वाऽविनष्टः? यदि विनष्टो विनश्यतीष्यते ततोऽनुत्पाद एव विनष्टत्वात् विनष्टघटवत्, नाविनष्टोऽक्षतघटवदभूतविनश्यद्भावत्वा-दाकाशवदिति वा, अस्यानुगमं कृत्वा प्रसङ्गः नोभयमुक्तवदिति नोत्पत्तिस्थितिभङ्गाः सिद्ध्यन्ति ततश्च खपुष्पवदभाव एव स्याद्वस्तु।

अथोच्येत किं न एताभ्यामस्वरूपाभ्यामाद्यन्ताभ्यां प्रयोजनम्, एतौ हि वस्तुन आत्मलाभात् पूर्वोत्तरकालौ, तयोरभावे ऽपि तन्मध्ये वस्तु भवितुमर्हत्येव, अत्र ब्रूमः, तन्मध्ये मध्यं वा किं जातमजातं वा वस्तु स्यात्? यदि जातम्, अनुत्पादस्तर्ह्यस्य जातत्वान्निर्वृत्तघटवदित्यादि स एव ग्रन्थः, यावपि च तौ कालौ

तावपि न स्तः, विनष्टानुत्पन्नत्वात् तदभावे तदपेक्षत्वात्तन्मध्यवस्त्वभावः, दग्धेन्धनज्वालावत्, यद्धि पूर्वोत्तरयोः कालयोर्नास्ति तन्मध्ये कथं सम्भाव्येत? असत्तद्भवति, पूर्वोत्तरकालयोरसत्त्वात्, खपुष्पवदिति।

अथोच्येत आदौ मध्ये, न चोत्पन्नमात्रे, कार्यं तत्त्वोपनिलयनात् प्रागसदेव, तदर्थं प्रवृत्तेः, न हि तदर्थित्वं सति तस्मिन्नुपपद्यते, तत्त्वोपनिलयनादुत्तरकालमस्ति, तदर्थमप्रवृत्तेः, न ह्यसति तस्मिंस्तदर्थी न प्रवर्त्तते, एतदसत्यम्, तदसत्त्वानिवृत्तेरसदेव स्यात् पुनरपि, तदादिमध्यान्तेष्वभूतत्वात् खपुष्पवदिति।

इतश्च नास्ति वस्तु सामग्रीदर्शनादपि, सामग्र्यां भावा दृश्यन्ते न प्रत्येकं स्वरूपेण, यच्च स्वरूपेण नास्ति तस्य सामग्र्यामपि कुतोऽस्तित्वम्? इह लोके यावती घट इति संज्ञा कपालसामग्र्यां पट इति संज्ञा तन्तुसामग्र्यां रूपमिति च संज्ञा तत्सन्ताने तत्सामग्रीमात्रमेव, सामग्री च भावानां भावान्तरं प्रति व्यापारः, यथा तन्तूनां पटं प्रति व्यापारः, तत्र च सामग्र्यामेकैकोऽवयवो नावयवी सम्भवति, तच्छक्त्यभावात्, न तावद्धेतुप्रत्ययसामग्री, पृथग्भावेष्वदर्शनात्, नापि तत्स्वरूपपृथक्त्वम्, अप्रत्यक्षतः, अनुमीयतेऽपि च नास्तीति, तत्सान्निध्य एव तदर्थप्रवृत्तेः, यच्च येषु नास्ति तेषु तदर्थी तदर्थं न प्रवर्त्तते घटपटवत्, न हि कुम्भः पटे नास्तीति मत्वा तदर्थिनां तदर्थं प्रवर्त्तनं पटे दृष्टम्, पटोऽपि वा कुम्भे नास्तीति मत्वा तदर्थिनां तदर्थं प्रवर्त्तनं कुम्भेऽपि दृष्टम्।

ननु कुम्भस्य सिकताकणेषु प्रत्येकमदृष्टस्य दर्शनादिति, न सामग्रीतुल्यत्वात्, सामग्री हि साध्या तयैव तुल्यः कुम्भोऽपि, अस्माभिर्यदि दृष्टः स्यान्नत्वेवतत्साध्यते — अस्ति नास्ति वा सामग्रीति । तस्यैवोपन्यासात्तद्विपक्षाभिमत्याऽनैकान्तिकत्वचोदनं पाठमात्रमेतत् प्रत्येकमदृष्टस्यं सिकतासु कुम्भस्य दर्शनमिति ।

अवयवास्तर्हि सन्तीति चेन्न, आ रूपादिभ्योऽवयविनश्चासत्त्वस्योक्तत्वात्, रूपादयोऽपि न स्वतो रूपादित्वं लभन्ते यस्मात् रूपादयस्तु रूपणादिनिरूपितविज्ञानसाराः तत्र रूपादीनां परस्परतः पृथक्त्वं हेतुत्वञ्च बुद्धौ वृत्तेरेव नावृत्तेः, तस्मान्न बहिरस्तित्वं जनयितुमर्हतस्ते हेत्वाद्यभावे सामग्र्यभावात्, सामग्र्यभावे च का द्रव्यता? इतरेतरदोषाच्चेति ।

इतश्च न सन्ति तथाऽदर्शनात्, सर्वथाऽप्ययुक्तयो दर्शनावगृहीतसद्भावाः सन्तोऽर्थाः कल्पयितव्याः, तथापि न सन्ति तस्य दर्शनस्यासम्भवात्-तदपि च दर्शनं नास्त्येव यतो यावद् दृश्यं तावदारान्मध्यपरभागम् तत्र यद्याराद्भागो दृश्यते इति प्रत्यक्षमिष्यत परमध्यभागयोरदर्शनादप्रत्यक्षता तस्य किं नेष्यते? तस्माददर्शनमेव वस्तुनः ।

अथ मतमाराद्भागो नियमात् प्रत्यक्षतो ग्रहीष्यते परमध्यभागौ अप्यनुमानात् कालान्तरे च प्रत्यक्षतो ग्रहीष्येते इति, न तत्रापि त्रिभागत्वतुल्यत्वाददर्शनमेव सावयवत्वात् समस्तवस्त्वदर्शनवत् अथ मतं भागो द्रक्ष्यत इति परमाणवस्तर्हि गृह्यताम्, तेष्वदृश्यमानेषु निर्भागेषु भागवद् दृश्यत इति का कथा? भागान्तरादृश्यत्वात्,

सिकतातैलवद्वा प्रत्येकं दर्शनाभावे तत्समुदायेऽपि दर्शनाभावात्, यदा च परमाणुर्न कस्यचिद् दृश्यस्तदा कुतः परमाणुसङ्घातो भागवान् द्रक्ष्यते? भागवति वा परमध्याग्रहणादगृह्यमाणे तदंशा निर्विभागाः परमाणवो ग्रहीष्यन्ते? इति।

—दृश्यदर्शनव्यवहारस्तर्हि कथमसति दृश्ये सम्भवतीति चेदुच्यते, अयन्तु व्यवहारो विज्ञानोत्थापित एव, विज्ञानञ्चासत्यपि बाह्येऽर्थे तथा तथा विपरिवर्त्तमानं बाह्यार्थवदवभासते, वस्तुत्वात् स्वप्नवत्, तत्रापि जाग्रद्गृहीतोऽर्थः कारणमिति चेत्तत्र च तत्र च विज्ञानमेव कारणम् स्वप्नजागरणकारणेन विज्ञानेनैवोत्थापितोऽर्थोऽर्थ इति प्रतिपत्तुं शक्यो नान्यथा, यदि वाऽविज्ञानोऽर्थः कश्चिदस्ति स दर्श्यतां त्वया, मया पुनः शक्यतेऽर्थेन बाह्येन विज्ञानमेवार्थ इति दर्शयितुम्, तद्यथा-स्वप्ने त्वनर्थकं विज्ञानमेवार्थ इति।

अत्र च विज्ञानं शब्दार्थः, विज्ञानमेव हि शब्दो विज्ञानोत्थापितो रूपरसादिघटपटादि — बाह्यो वाच्यो विज्ञानमेव, एवं तर्हि प्रमाणप्रमाणाभासाविशेष इति चेदिष्यत एतत्, तच्च विज्ञानं कल्पना, अनियतदेशकालाकारनिमित्तनैमित्तिकत्वात् सुप्ततैमिरिकादि विज्ञानवत्, बुद्ध्यनुसंहृतिर्वाक्यार्थः।

अयञ्च विकल्प एवम्भूतैकदेशः, तस्य च पर्यवास्तिकभेदत्वात्, परिसमन्तादवगमः, नैःस्वाभाव्यात् परितोऽवगमः, सोऽस्यास्तीति मतिरस्य पर्यवास्तिकोऽयं नयः, स च भावः

भावोऽपि भाव एव साकारोऽनाकारो वा प्रमाण-प्रमाणाभासादिविकल्पशून्यः, द्रव्याशब्दश्चैष षट्स्वपि द्रुर्गतिः, तस्या विकारे यत्प्रत्यये द्रव्यमिति, द्रव्यमेवार्थः द्रव्यार्थः, स पुनस्तथातथा प्राग्व्याख्यातो यथादर्शनं पर्यायार्थ एव स षड्विकल्पोऽपि, तथा गतेः।

निबन्धनमस्य *'से किं तं भावक्खंधे ! २ दुविहे पण्णत्ते तं जहा - आगमतो अ, नो आगमतो अ, से किं तं आगमतो भावक्खंधे! २ जाणये उवउत्ते सेत्तं आगमतो भावक्खंधे''*[1] इति, आगमभाव स्कन्धादेरुपयोगलक्षणस्य विज्ञानस्वरूपमात्रत्वात् सर्वमुपयोग एव, अयं नियमस्यापि क्षणिकवादस्य नियमः, तदपि क्षणिकं वस्तु विज्ञानमेव ।

इति नियमनियमभङ्गो द्वादशः।

१. अनु. सू. ५४-५५

द्वादशभङ्गस्यान्तरम्

एतदपि पूर्ववदेवैकान्तत्वादयुक्तम्, सम्भविविकल्पानुपपत्तेः, एवं सर्वं निःस्वभावमित्येवं ब्रुवतस्तव विज्ञानवचसोरपि सर्वान्तःपातित्वान्निःस्वभावत्वेऽप्रत्यायनप्रसङ्गात् परप्रत्यायनमयुक्तम्, विज्ञानवचसोः निश्चितपक्षादित्वेन अभूतत्वादुन्मत्तप्रलापविज्ञानवत्, अथ मा भूदेष दोष इति सस्वभावे विज्ञानवचसी अभ्युपगच्छसि ज्ञानवचनस्वभावत्वाभ्युपगमेनाभ्युपगमविरोधः, इदानीं सस्वभावत्वाभ्युपगमादिति स्ववचनविरोधश्च।

एवञ्च घटाद्यपि सत्, व्यवहारवृत्तत्वात्, तद्वाक्यवत्, उभयविरोधादिविकल्पतस्तच्छून्यत्वे तु प्रत्यक्षादिविरोधाः, लोकविरोधस्तु सर्वलोकमवमत्य प्रवृत्तत्वात्।

सर्वशून्यवादगतपक्षधर्माद्यभावाच्च न साध्यः, विज्ञानाभ्युपगमाच्च पुरुष एवेदं सर्वं चतुरवस्थामात्रभेदमभिन्नमस्तीत्यभ्युपगतं भवति सतो विज्ञानलक्षणत्वात् तस्य च सर्वत्वात् सर्वमेव चेत् विज्ञानमात्रं स च पुरुष एव ज्ञः, तन्मयश्चेदमिति। ननु विज्ञानशब्देनोत्प्रेक्षामात्रमुच्यते, नार्थवत्त्वं विज्ञानस्य, स्वप्नमुदाहरद्भिः

कल्पनामात्रत्वस्य प्रतिपादितत्वादिति, एतदप्य युक्तम्, जागरित-व्यतिरिक्तस्वप्नोदाहरणादेव विज्ञानमात्रत्वव्यावर्त्तनात्।

यदि तन्मात्रं किं स्वप्नस्य जागरणाद्विशेषणं घटते? उभयोरप्यभावतुल्यत्वात् खपुष्पस्य वन्ध्यासुतादिव, प्रतिपाद्यमत्य-पेक्षया इति चेन्न, उभयोरप्यभावतुल्यत्वात्।

खपुष्पव्युदसनेन च स्वप्नसिंहदर्शनवदिति वचनं घटते, स्वप्न-दृष्टान्तव्याख्याने न च वृथाभयहर्षादिविशेषणमवृथाभयहर्षादिना विना ननु भवितुमर्हति, विज्ञानविषया चास्तिता ननु स्थितैव, ततश्च सर्वं निःस्वभावमित्येतन्मिथ्या, निर्भेदश्च नास्तित्वं नास्त्येव, कुतश्चित्सतो वस्तुनो विशेष्य सदेव शक्यं वक्तुं नास्तीति न शून्यत्वं सर्वस्य, सत्त्वमेव तत्तथा, स्वप्नविज्ञानसिंहादेरपि नास्तित्व मन्यास्तित्वं साधयति।

अथोच्येत विज्ञानास्तित्वमपि कः प्रतिपद्यते? कल्पनामात्रत्वात्, विज्ञानाद्धि विज्ञानम्, तद्विज्ञेयाभावे कुतः? स्वप्ने तत्कारणविज्ञेयस्याभावाद्विबुद्धेऽप्येवमेव।

एवमपि विज्ञानविज्ञेयाविज्ञानाविज्ञेयज्ञानवचनविशेषणभेदा-भ्युपगमात् सद्वाद एवाभ्युपगतोऽत्र त्वया, नो चेदभावा-विशेषात्तूष्णीम्भावस्ते समाश्रयणीयः स्यात्, तथाऽविज्ञानाभावादिषु च नञः का गतिः? किं प्रागादिविशेषेण नास्तीति? उता-विशेषेणैवेति? तत्र यदि विशेषेण नास्तीत्युच्यते प्राक्पश्चादितरेतरा

-सामर्थ्यासंयोगेभ्यः ततो ननु निर्वृत्ताध्वस्ततत्समर्थबहिः सम्बन्धास्तित्वमेव घटादेः प्रसज्यते।

अथोच्येत नैवास्तीत्यविशेष्य वन्ध्यापुत्रादिवदुच्यते, अथ कथं पुनर्वन्ध्यापुत्रनास्तित्वमपि? यदि न विषयो, निर्वृत्त्यादिसत्प्रागभावादिस्वभावेषु न संभवेत्। सम्भवति तु स्वयं भवितृत्वेन तत्र चेतनस्यानाद्यनन्तकर्मपरिवर्त्तानुभाव्यनाद्यनन्तभवेषु स्वजात्यपरित्यागेनेतरद्रव्यवदन्यथाभवतो मनुष्यस्त्रीवन्ध्यात्वाभ्यां प्रत्यावृत्त्य जन्मान्तरे मनुष्यस्त्रीत्वोत्पत्तौ पुत्रवत्त्वे द्रव्यार्थाभेदाद्वन्ध्या पुत्रवती जायते।

अनन्तरभववन्ध्याभावानतिरिक्तत्वात् सकर्मा चेतनोऽवन्ध्यात्वेऽपि तद्वत् बालकुमारवद्वा एक एव, अनाद्यनन्त कर्मप्रबन्धात्मकत्वात्।

वन्ध्याशरीरगतानां पुद्गलानामुत्सृष्टानां मृत्त्वव्रीह्यादित्वसम्भूतौ वन्ध्यया स्त्रिया पुंसावाऽऽहारितानां पुत्रत्वेनोत्पत्तावपि वन्ध्यापुत्रास्तित्वमविरुद्धम्, तदन्योऽन्यानुगतिमन्तरेण तदभावात्तत्तस्यैव तदेव वा, शरीरारम्भवत्, तस्मात् सर्वमिदं सर्वस्वभावमशून्यमुत्पत्तिस्थितिविनाशसहितमेकमनेकात्मकं स्वपरोभयतोऽस्त्येवेति प्रतिपत्तव्यम्, उक्तन्यायात्।

अथ कथं स्वपरोभयभाव इति अत्र ब्रूमः संसिद्धिसंयुक्त्यनुत्पादसामग्रीदर्शनसदादर्शनेभ्यो हेतुभ्यः, संसिद्धिस्तदात्मभेदैकीभावेन सद्भावः, दीर्घत्वं दीर्घ एव, अपरायत्तत्वात्, तद्धि

स्वायत्तमेव, यदि स्वविषयमेव तन्न स्यात् नानामिका मध्यमादीर्घतायामपि कनिष्ठिकातो दीर्घा स्यात्, स्वात्मन्यविद्यमानदीर्घत्वात्, खपुष्पवत्, भवति तु दीर्घापि स्वायत्तकनिष्ठिकापेक्षस्वगतदीर्घत्वपरिणामात्, तथा न च मध्यमा शक्रयष्टिदीर्घतायां अनामिकापेक्षात् भवति तु, एवं ह्रस्वत्वमपि।

स्वगतनानारूप्यानतिक्रमात्तु एकपुरुषपितृपुत्रत्वादिवत् तथा तथानियमवृत्तेर्ह्रस्वत्वदीर्घत्वाव्याघातः, आत्मगता एव हि तास्ताः सापेक्षनिरपेक्षाः परिणामशक्तयः पुद्गलानामन्येषाञ्च।

अनेनैव न्यायेन ह्रस्वसद्भावे दीर्घस्याभावो न भवति, तथेतरेतराश्रयत्वादसिद्धिरपि न, उक्तवत् अत एवाप्रतिद्वन्द्वित्वम्, विरुद्धाभिमतसर्वधर्माविरोधवृत्तत्वात्, एवमेव चेतरेतरयोगविचारान -वकाश इति।

संयुक्तेरपि च स्वपरोभयभावः, इह भाव एव भावो नाभाव इति, स च भावः तदतदतीतानागतवर्त्तमानेष्वविशिष्ट एव, तद्भावे भावात् तदभावे चाभावात्, घटपांशुकार्पासतन्तुपटवत् सर्वसर्वैक्यमिति स्थितेऽस्मिन् न्याये तत्रास्त्येको घट इति त्रयाणामेकत्वे यत्रैकत्वं तत्रास्त्विस्यापि निष्कलेन स्वतत्त्वेन भवितव्यम्, अनर्थान्तर -त्वात्, यत्र यस्यानर्थान्तरत्वं तत्र तस्य निष्कलमेव स्वतत्त्वं, एकस्मिन्नेकत्वस्वतत्त्ववत्, अस्तित्वस्वतत्त्वञ्च सर्वभावा इति यदुक्तं तत् सर्वशक्त्यैकं वस्त्विच्छतो ममेष्टमेव।

यत्रास्तित्वमित्यादि पूर्ववत्, न मे कश्चिद्दोषः, मत्पक्षसाधना एव ते हेतवः।

ऊर्द्ध्वमध्यबुध्नदेशभेदेऽप्यभिन्नः स एवैकोऽस्ति च घटः, बालकुमारादिभेदे स एवैको नरः, तथा सर्वभावाः, तथा च सर्वात्मकमेव वस्त्विति प्रत्यक्षादिप्रमाणैरुपलभामहे, अतोऽन्यथा प्रत्यक्षादिविरोधाः, एते चेन्नेष्यन्ते मदुक्तं सर्वं घटोऽस्त्येक इति प्रतिपत्तव्यम्, घटानर्थान्तरत्वात् घटस्वात्मवदिति।

विपरीतस्वभावबहुत्वाद्याशङ्कानवतार एवान्यत्वानभ्युपगमात्, नन्वन्यथा तावत् प्रत्यक्षादिभिरुपलभ्यते नास्तीति, तद्यथा घटः पटत्वेन नास्ति पटोऽपि घटत्वेनेत्यादि, घटो हि घट एवोपलभ्यते न त्वसौ पटोऽपि, अथ पुनस्त्वन्मतेन सर्वरूप उपलभ्येत, न तूपलभ्यते तस्मान्नास्ति पटादित्वेनेति पररूपेणाभावः, तथा स्वरूपेणाप्यभावः पररूपासत्त्वात् खपुष्पवदिति।

को वा ब्रवीति नोपलभ्यत इति, ननु भोः त्वं नाम सर्वात्मकमुपलभ्यमानमप्युपलप्य शून्यं कर्तुमिच्छसि, न पुनरहमुपलभ्यमानमेव सर्वरूपं सन्तं कर्तुं शक्नोमीत्यहो साहसम्, घटो हि मृत् मृन्मयत्वात् मृदः पृथिवीत्वं तदंशत्वात् पृथिव्या द्रव्यत्वं द्रुविकारत्वात्, द्रव्यस्य भव्यत्वात् भव्यस्य भवितृत्वात् भवितुः सर्वत्वात् सदस्ति भाव इति घटपटादिसर्वं परस्परस्वरूपं हस्तवदिति न किञ्चिदेतत्, अन्यथा तावन्नास्त्येव घट इति।

अथोच्यते भिन्न एवासावर्थो भिन्नप्रकारत्वात्, वादिप्रतिवादिमतिवचनवदित्येतच्च न तुल्यत्वात्, येन प्रकारेणैकस्यात्मलाभस्तेन प्रकारेण सर्वभावानामिति सर्वोऽप्य भिन्नोऽसावर्थः,

आत्मलाभेऽभिन्नप्रकारत्वात्, एकवत्, न हि ताभ्यामस्तित्वैकत्वाभ्यां घटस्यान्यत्वमस्ति, घटात् सर्वभेदभाजस्तयोरन्यत्वम्, तदनन्यत्वे तेषामपि घटात्मकत्वं तदनर्थान्तरत्वात्, घटस्वात्मवत् इति।

नन्वेकत्वे प्रत्यक्षसिद्धं तृप्तिसुखादि विरुध्यत इति, ननु तत् सर्वसिद्धान्तेष्वपि, प्रत्यक्षसिद्धमन्यथा मत्वा मोक्षायाऽऽयत्यत इति न वा पुनरन्या विमतिः कार्या।

अनुत्पादादपि सर्वभावाः सन्ति, यदि हि तद्वस्तूत्पद्येत विनश्येद्वा ततः प्राक् पश्चादभाववन्मध्येऽप्यभावः स्वभावस्वाभाव्यात्, न स्यादेकरूपं भेदवद्वा स्यात्, या त्वया तर्क्यते सा सम्भाव्येतोत्पत्तिविनाशसद्भावे, न तु कस्यचिद्वस्तुन आदिरन्तो वा, वस्तुत्वात्यागात्, न हि वस्तु स्वरूपं त्यजति, शिवकादिकपालादि घटमृद्वत्।

अनाद्यनन्तमूर्त्तिमूर्त्तवच्चामूर्त्तमप्यनुत्पादविनाशाभ्यामनाद्यनन्तम्, अतोऽसौ तथाऽवस्थित एकस्वभावो निर्भेदः भेदासम्भवात्, उत्पादविनाशाभ्यां हि भेदः सम्भाव्येत, स तु न भवति।

नन्वनिष्ठितं प्राक् पश्चादारम्भात्, आरम्भवचनात्, तत्र यदि निष्ठितं स्यात् निष्ठितत्वान्नारभ्येत निष्पन्नघटवदिति, इदं विप्रतिषिद्धं यद्यनिष्ठितं अनिष्ठितत्वादसत् खपुष्पवत्, इतरो घटवत्, यथा घटो मृद्रूपादित्वेन निष्ठित एव सन्नाकारान्तरव्यक्तिरूपतो व्यज्यते, यदि न तथाऽऽरभ्येत किं न खपुष्पादद्रव्यादेर्वाऽऽरभ्यते?

एतदुक्तं भवति संक्षेपतस्तद्रूपशक्तिविवर्त्तमात्रन्त्वेतत्सर्वम्, भावैकत्वात्, अतो नानिष्ठितं निष्ठितमेव वस्तु, अनारब्धारब्धत्वात्,

यच्चानारब्धारब्धं तन्निष्ठितमेव, शिक्यकादिवत्, यथाऽऽनारब्धमपि शिक्यकत्वेन सूत्रं शक्तत्वान्निष्ठितमेवमन्यदपि वस्तु, अथैवमपि नेष्यते अनारब्धानि तानि, अनिष्ठितत्वात् खपुष्पवत्।

अथोच्येत आदिः प्रत्यक्षत एव घटादेर्दृश्यते भेदहेतुः, अत्र पृच्छ्यसे स किं नित्यः? उतानित्यः? यदि नित्यः सर्ववस्तुनित्यता, आदिस्वरूपत्वात् तन्नित्यत्वाच्च, क्रियमाणनिष्ठितयोश्चाभावात् तथाजन्यभेदाभावः, ततश्चास्मदिष्टोऽवस्थानपक्ष एव जयति, आदिप्रत्यक्षप्रमाणीकरणाच्च क्रियानिष्ठाप्रत्यक्षद्वयपरित्यागः तयोश्च दृष्टव्यभिचारमितरत्रैकस्मिन् प्रत्यक्षं कथं प्रमाणीकरिष्यत इति पुनरपि तद्धानिरिति सर्वथा त्वयैव प्रत्यक्षमप्रमाणीकृतम्।

अथादिनित्यतायां दोषात् निर्वृत्तनित्यत्वमभ्युपगच्छसि यस्मान्न परैकतेति, नन्वेवमपि कुतो भेदः? नित्यनिष्ठितत्वे नारम्भोऽस्ति न क्रियेत्यभ्युपगतत्वात् कुतो भेदः? अथानित्यत्वमभ्युपगम्यते चेत् स किमादिर्जातोऽजात इत्यादित्वत्पर्यनुयोगवदेव दोषः, यदि जातः तस्यैवानुत्पादो जातत्वान्निर्वृत्तघटवदित्यादित्वदुक्तवदेवेदं न युज्यते, अन्तेऽपि च त्वदुक्तदोषाविमोक्षात् यावदथोच्येतान्तः प्रत्यक्षत एव भेदहेतुर्दृश्यत इति पूर्वपक्षे स किं नित्योऽनित्य इत्यादि स एव पर्यनुयोगो वाच्यः।

सामग्रीदर्शनादपि सर्वास्तित्वसिद्धिः, तथा च तदेवैकं सर्वात्मकं स्वं परमुभयञ्च तमर्थं सम्पादयति, सा च सामग्री दृश्यते प्रत्यक्षतः, सामग्री अशेषभावानां भावान्तरं प्रति वृत्तिः यथा पृथिव्यादिसामग्री तं तमर्थं प्रति, वस्तुनोऽनेकशक्त्यात्मकस्यैकस्य व्यक्ताव्यक्तशक्त्यपेक्षत्वात् सर्वसर्वात्मकत्वात्, सामग्रयामेवं

दर्शनमेव संवादेन रूपादिपृथिव्यादिपरस्परसामग्रीघटपटादीति दृश्यते संज्ञायते प्रवर्त्तते चेतनं जगदिति।

यदि सामग्र्यशेषता सर्वस्य सर्वत्र वृत्तेः तिलेषु तैलवत् सिकतास्वपि तैलं स्यात्, तत्राभाववत्तिलेष्वप्यभाव एव स्यात्, ननु यथा तिलेष्वव्यक्तं स्वाभिव्यक्त्युपायादुपलभ्यते तथा सिकतास्वप्यनभिव्यक्तं तैलं नोपलभ्यते, सिकताभूप्रदेशोऽतिलबीजस्याङ्कुरमूलपर्णादिप्रभवः सिकतानामेव, तथातथा विपरिवृत्तेः, तद्वदुदकादि-द्रव्येषु।

सदा दर्शनात् संसिद्ध्यादिहेतुभिः सम्पादितसर्वात्मकैकवस्तुत्वाददर्शनाददृश्यमानभागान्तरासत्त्वेन कल्पिता अपि न परमार्थतोऽसन्तो न वा न दृश्यन्ते, भावितवदेकभवनात्मकत्वात् तदपृथग्भागान्तराणामपि दर्शनमेव, निर्विभागमेव हि सद्वस्तु, विभागेनेक्षणं भ्रान्तिरित्युक्तम्, तस्मात् स एवास्ति स्वतः परत उभयतश्चेति, यथोक्तं

'तदेजति तन्नैजति तद्दूरे तदुपान्तिके।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः॥'[1]
'यथा सुदीप्तात् पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः।
तथाक्षराद्विविधाः सौम्य! भावाः प्रजायन्ते तत्र चैवापियन्ति॥'[2]

इति। भावितानेकार्थद्रव्यार्थभेदवत्, यः पुनर्भेदः सोऽसत्येव भेदे भेदाभिमानः, तस्य क्रमाभिव्यक्तेः, एकद्रव्यस्वतत्त्वरूपादिवदिति।

द्वादशारान्तरं समाप्तम्।

---

१. ईशावास्योपनिषद् ५ २. मुण्डकोपनिषद् २.१.१

तुम्बनिरूपणम्

एतदपि नैवेकान्ते युक्तम्, ततश्च विधेरारभ्य विधिविध्यन्तरानुक्रमक्रमेणोत्तरोत्तरैकान्तायुक्तत्वप्रक्रान्त्या तेषु तेष्वरान्तरेषु विचारितमेव यावच्छून्यवादम्।

तदेकान्तायुक्तत्वस्थापना त्वेकान्तवादानां परस्परसंयुक्तत्वमापाद्य प्रत्येकशो द्विशोयावद् द्वादशारशः सप्रभेदस्तेषामुपरिविधिनयो यथालोकग्राहं वस्त्विति, तद्व्यावर्तितसविकल्पसामान्यविशेषाद्धारार्थं विधिनियमविधिस्तन्निवर्त्तनार्थमुभयोभयनय इत्ययं अपि क्रमो यावत् पुनरयं विधिविधिः, यथा चानेन *शून्यवादपूर्वपक्षस्य* सम्बन्धस्तथैवैकैकेन द्रव्यार्थभेदेन, यथा च तैः प्रत्येकं विधिविधिना शून्यवादे प्रतिषिद्धे यथारुचितमभिसम्बन्धः, *शून्यवादस्य* अपि येन केनचिदेकादशानामन्यतमेनान्तरितस्य सम्बन्धोपपत्तेः।

तस्माच्च द्वादशान्यतमारानन्तरोत्थानक्रमसम्बन्धेन सर्वकुमतपक्षाणां व्यवस्थायाश्चेशनार्थं सर्वमिदं नयचक्रशास्त्रं क्रमते, एवमेवास्य शास्त्रस्य नयानां चक्रं नयचक्रं नयसमूह इत्यन्वर्थसंज्ञा स्यात्, यथा चास्मादेवं सर्वेभ्योऽपि सर्वनयानामुत्थानमविरुद्धम्।

एषामशेषशासननयाराणामुपग्राहकं जिनवचनं तद्यथा — *'इमाणं भंते! रयणप्पभा पुढवी किं सासता असासता'*, इति पृष्टे व्याकरणं, *'सिया सासता सिया असासता'*, इति समग्रादेशात्, पुनः, *'से केणट्ठेणं भंते एतं एवं वुच्चति सिया सासता सिया असासता'*, तस्य विकलादेशाद्व्याकरणं, रत्नप्रभायाः स्वतत्त्वमुभयात्मकं विभागेन विदधाति तद्यथा — *'दव्वट्टताए सासता वण्णपज्जवेहिं गंधपज्जवेहिं रसपज्जवेहिंफासपज्जवेहिं संठाणपज्जवेहिं असासता'* इति तदनुपातवृत्तेः ससाधननाभिक्रिया तस्याः शाश्वताशाश्वतधर्मस्वतत्त्वायाः कारणाभ्यां द्रव्यार्थपर्यायार्थभ्यां कारितं, स्वतत्त्वं विदधतो *जिनवचनस्यानुगमात्*।

द्वादशानामराणामित्थं तुम्बक्रिया, तत्प्रतिबद्धसर्वारावस्थानात्, अतोऽन्यथा विशरणात्, तद्यथा विधि-विधिविधि-विध्युभय--विधिनियम-उभय-उभयविधि-उभयोभय-उभयनियम-नियम-नियमविधि-नियमोभय-नियमनियमा ऐकमत्येनान्योन्यापेक्ष-वृत्तयः सत्यार्थाः, तत्तन्नयदर्शनविकल्पैकवाक्यात्मकत्वात्, घटवत्, एतद्भङ्गनियतस्याद्वादलक्षणः शब्दः स्यान्नित्यः, स्यान्नित्या-नित्यः, स्यादनित्यः, विध्यादिद्वादशविकल्पनियताकृतककृतकाकृतककृतकत्वानेकान्तविकल्पात्मकत्वात्, घटवदिति।

व्याख्यानदिक्प्रदर्शनसाधनन्तु व्यवहारैकत्व-सर्वैकत्व-सर्वसर्वत्वो-भयप्राधान्या-न्यतर-प्रधानोपसर्जनत्वे-तरेतराभाव-भेदप्रधानत्वा-वक्तव्यत्वभेदसमुदायिमात्रत्व-क्षणिकत्व-शून्यता--नित्यः शब्दः, व्यवहारैकत्वसर्वैकत्वसर्वसर्वत्वोभय प्राधान्यान्यतर-

प्रधानोपसर्जनत्वेतराभावभेदप्रधानत्वावक्तव्यत्वभेद समुदायिमात्रत्व -क्षणिकशून्यताऽकृतकत्वात्, व्याख्यार्थघटवत्।

एवं सर्वप्रभेदेष्वपि, स्यादेकः स्यादेकानेकः, स्यादनेकः विधिविधिनियमनियमस्वभावत्वात्, विध्यादिद्वादशात्मकत्वात्, घटवत्, भावितमेव नयचक्रशास्त्रेणानेन, एवञ्च जिनशासनमेकान्तसत्यमेव, सम्यक्सम्प्रसिद्ध्युपनिबन्धनसम्प्रतिष्ठितार्थत्वात् सद सदर्थपदाव्यभिचारिप्रमाणप्रबन्धसंसिद्धबहुभेदार्थसिद्धादेशनैमित्तिकवाक्यार्थवत्।

एतदन्यतरैकान्तशास्त्रप्रबन्धस्तु विघटितार्थः, प्रस्तुतवस्तुविच्छेदपरमार्थत्वात्, दश दाडिमानीत्यादिवाक्यवत्।

एवमनेन समस्तेन ग्रन्थेनैतदभिहितं — विधिनियमभङ्ग वृत्ति -व्यतिरिक्तत्वादनर्थकवचोवत् जैनादन्यच्छासनमनृतम्, *जैनमेव शासनं सत्यम्*, विधिनियमभङ्गवृत्त्यात्मकत्वात्, भवतिवत्, घटवद्वा, एकमेव वा साधनम्, *तत्साधर्म्यवैधर्म्याभ्यां सर्वैकान्तवादि दूषणायानेकान्तवादिपक्षसाधनाय च प्रभवति*। एवञ्च कृत्वा विधिनियमभङ्गव्यतिरिक्तत्वादिति सिद्धे वृत्तिवचनमशेषभङ्गैकवाक्यतायामेव प्रतिभङ्गमपि वृत्तिरिति ख्यापनार्थम्। किमुक्तं भवति? स्याद्वादतुम्बप्रतिबद्धसर्वनयभङ्गात्मिकैकैव वृत्तिः सत्या, रत्नावलीवत्, अन्यथा वृत्त्यभाव एव, तथैव च सर्वैकान्तप्रक्रमः।

जैनशासनसत्यत्वेतरशासनासत्यत्वसाधनयोः एकतरस्य साधनेन साधर्म्यवैधर्म्याभ्यामर्थद्वयप्रतिपादनं कृतं भवति,

अन्योऽन्याविनाभावात्, विध्यादीनामेकस्मिन्नप्युक्ते शेषनया उक्ता एव वर्षाभिधानमेघाभ्युन्नतिवचनवत्, प्रतिज्ञादावितरभङ्गार्थाव्यभिचारात्, तत्साधनधर्माणां तदन्वयव्यतिरेकप्रदर्शनसाधर्म्यवैधर्म्यदृष्टान्तानाञ्चार्थाव्यभिचारात् द्वादशानामभिधानं कृतमेव।

तथा ह्ययमेव प्रयोगार्थो विधि-विधिविधि-विध्युभय-विधिनियमो-भयो-भयविध्यु-भयोभयो-भयनियम-नियम-नियम विधि-नियमोभय-नियमनियमाः ऐकमत्येनान्योन्यापेक्षवृत्तयः सत्यार्थाः, तत्तन्नयदर्शनविकल्पैकवाक्यात्मकत्वात्, घटवदित्येक एवायं हेतुः प्रत्येकनयविवक्षया प्रयोगेऽपि, तत्र यस्मिन् कस्मिंश्चित् नित्यानित्यादीनां साधने प्रयोगविधयो भवन्ति, तेषां भङ्गानामेकैकयोगे द्वादश भङ्गाः, द्विकयोगे षट्षष्टिः, त्रिकसंयोगे द्वे शते विंशे, चतुष्कयोगे चत्वारि शतानि पञ्चनवतियुतानि, पञ्चकयोगे द्विनवति-युतसप्तशतानि, षट्कयोगे चतुर्विंशत्युतशत्युत्तरनवशतानि, सप्तक-योगे द्विनवतियुतसप्तशतानि, अष्टकयोगे चत्वारि शतानि पञ्चनवतियुतानि, नवकयोगे द्वे शते विंशे, दशकयोगे षट्षष्टि एकादशयोगे द्वादश, द्वादशयोगे एक एव। एवं सर्वसङ्ग्रहेणैताः प्रतिज्ञाः। तासाञ्चैकैकस्यां हेतूनां चत्वारि सहस्राणि पञ्चनवतियुतानि (४०९५) विकल्पशो भवन्ति। एवञ्च प्रतिज्ञा-भङ्गहेतुभङ्गाश्चान्योन्यगुणिता भङ्गानामेका-कोटी-सप्तषष्टिः शतसह स्राणामेकोनसप्ततिश्च सहस्राणां पञ्चविंशेति (१६७६९०२५)। एवं तावन्नित्यादिप्रतिज्ञासु भङ्गानां भेदाः।

एवमियमनेकान्तवाददिगुपदर्शिता। एवञ्चानेकान्ते सम्यगवलोकिते न स कश्चिद्यो न हेतुः, तृणादिरपि यस्यां कस्याञ्चित् प्रतिज्ञायां हेतुर्भवति, सर्वस्य सर्वात्मकत्वेन सर्वद्रव्यपर्यायार्थविपरिवृत्तेः। तस्मात् *सर्वमेकात्मकमेकञ्च सर्वात्मैकं सर्वञ्च सर्वात्मकं इत्यादि तत एवैकं यो वेद स सर्वं वेद यः सर्वं वेद स एकं वेद।*

येन त्वेवंविधं वस्तु न ज्ञायते नासौ कस्यचिद्वस्तुनोऽवयवमात्रस्यापि ज्ञाता, तदेकदेशमात्रस्यैव परिगृहीतत्वात्, अनवधार्यस्यावधारयितृत्वात्, त्वगङ्गारकितमात्रनियतपलाशस्वतत्त्वग्राहिवत्।

भगवांस्त्वर्हन् यदेतत् सर्वं नाम तत्र निरावरणज्ञानः, तस्य यथाभूतसप्रभेदस्य सम्यगभिधातृत्वात्, यस्य यथाभूतप्रभेदवस्तुविषयसम्यगभिधातृत्वं स तत्र निरावरणज्ञानो दृष्टः, तद्यथा मैत्रक इव त्वगङ्गारकितादिभेदपलाशस्वतत्त्वं देशकालाकारप्रमाणादिविशिष्टं शिशिरवसन्तनिदाघवर्षाशरद्धेमन्तेषु तां तामवस्थां बिभ्रतं पलाशं त्वङ्मात्रोऽङ्गारकितः किसलयितः पत्रित इत्यादि ब्रुवन्, तथाऽर्हन् यथाभूतं वस्तु निरवशेषं ब्रुवन्निरावरणज्ञान इत्यनुमीयताम्।

सत्स्वपि पूर्वाचार्यविरचितेषु नयशास्त्रेषु तस्मिंश्चार्षे सप्तनयशतारचक्राध्ययने च द्वादशारनयचक्रोद्धरणं दुःषमाकालदोषबलप्रतिदिनप्रक्षीयमाणमेधायुर्बलोत्साहश्रद्धासंवेगश्रवणधारणादिशक्तीनां सङ्क्षेपाभिवाञ्छिनां शैक्षकजनानामनुग्रहाय विहितं

श्रीमच्छ्वेतपटमल्लवादिक्षमाश्रमणेन स्वनीतिपराक्रमविजिताशेष-प्रवादिविजिगीषुचक्रविजयिना तदिदं नयचक्ररत्नं चक्रवर्तिनामिव चक्ररत्नं जैनानां वादिचक्रवर्तित्वविधये सिद्धप्रतिष्ठितम्, प्रतिष्ठितसिद्धविजयावहजगन्मूर्धस्थसिद्धवदिति ॥

इति श्रीमल्लवादिक्षमाश्रमणपादकृतनयचक्रस्य तुम्बं समाप्तम्

श्रीकल्याणमस्तु ।

ग्रन्थाग्रम् ॥ १८०००